श्री हर्षपुष्पामृत जैन ग्रन्थमाला-ग्रन्थाङ्कः २३८

श्री महावीरजिनेन्द्राय नमः

श्री मणिबुद्ध्याणंद-हर्षकर्पूरामृतसूरिभ्यो नमः।

श्रीमत्क्षेमराजमुनि विरचिता स्वोपज्ञटीकासहिता

# 卐 उपदेशसप्ततिका (नव्या) 卐

: संपादकः संशोधकश्च :

तपोमूर्ति पूज्याचार्यदेव श्री विजयकर्पूरसूरीश्वर-पट्टधर-हालारदेशोद्धारक पूज्याचार्यदेव श्रीविजयामृतसूरीश्वर-पट्टधरः

पूज्याचार्यदेव श्री विजयजिनेन्द्रसूरीश्वरः

: सहायक :

परम पूज्याचार्यदेव श्री विजय शांतिचन्द्रसूरीश्वर कृपया पू. मुनिराज श्री देवचंद्रविजयसदुपदेशेन साचोर ( राजस्थान )
श्री श्वेतांबर मूर्तिपूजक जैन संघः परमपूज्य परमशासन प्रभावकाचार्यदेवेश श्रीमद् विजय रामचन्द्रसूरीश्वर कृपया तेषांमन्तेवासि
तपस्वी पंन्यासप्रवर श्री भद्रशीलविजयगणिवर-सदुपदेशेन मुंबई-घाटकोपर नवरोजलेनस्थः श्री श्वेताम्बर मूर्तिपूजक जैन संघश्च.

प्रकाशिका :-श्री हर्षपुष्पामृत जैन ग्रन्थमाला, लाखाबावल-शांतिपुरी (सौराष्ट्र)

॥१॥

प्रकाशिका : **हर्षपुष्पामृत जैन ग्रन्थमाला** (लाखाबावल)
**C/o.** श्रुत ज्ञान भवन ४५ दिग्विजय प्लोट, **जामनगर**

वीर सं. २५१७ : विक्रम सं. २०४७ : सन् १९९१ : प्रथमावृत्तिः प्रतयः ७५०

# आभार दर्शन

अमारी ग्रन्थमाला तरफथी **प्राचीन साहित्य प्रकाशन योजना** द्वारा आ **उपदेशसप्ततिका** ग्रन्थ प्रकाशित करतां आनंद अनुभवीए छीए. आ ग्रन्थनुं संपादन पू. आ. श्री **विजय जिनेन्द्रसूरीश्वरजी** महाराजे कर्युं छे.

आ ग्रन्थ माटे **प. पू. आचार्यदेवेश श्रीमद् विजय शांतिचन्द्रसूरीश्वरजी** म. नी कृपाथी पू. आ. श्री **विजयसोमचन्द्रसूरीश्वर** निश्रावर्ती **पू. मुनिराज श्री देवचंद्रविजयजी महाराजना** उपदेशथी **श्री श्वेतांबर मूर्तिपूजक जैन संघ** साचोर (राजस्थान) तथा परम शासन प्रभावक व्या. वा. **पूज्यपादाचार्यदेवेश श्रीमद् विजय रामचन्द्रसूरीश्वरजी महाराजाना** परम विनेयी शिष्य तपस्वीरत्न **पूज्य पंन्यास श्री भद्रशीलविजयजी गणिवरना** सदुपदेशथी **घाटकोपर** [**मुंबइ**] **नवरोजलेन श्री श्वेतांबर मूर्तिपूजक जैन संघे** सहकार आप्यो छे. तेमनो आ माटे खूब खूब आभार मानीए छीए.

ता. **१-९-९१** लि० **महेता मगनलाल चत्रभूज**

शाक मारकेट सामे, **जामनगर** व्यवस्थापक : **श्री हर्षपुष्पामृत जैन ग्रन्थमाला**

# अल्प वक्तव्य

पूर्वाचार्योए शास्त्रोमां आत्महित माटे घणा ग्रन्थो लख्या छे, विवेक बुद्धिवाला माटे तो गमे ते ग्रन्थ क्षीरनीर न्याये हितकारी बने छे परंतु बधाने माटे तेवुं थवुं कठीन छे जेथी धर्म शास्त्रोनुं वांचन मनन जरूरी छे.

आ उपदेश सप्ततिका ग्रन्थ ७० उपदेश काव्योनो उपदेश ग्रन्थ छे. तेनी टीका पण ग्रन्थकर्ताए ज रची छे अने प्रासंगिक कथाओ प्राकृत वि. मां प्रासबद्ध वि. रीते आपी छे. सरल नही छता प्रयास साध्य छे जे बोधक अने अभ्यासनी सूक्ष्मतामां सहयोगी बने तेम छे.

विशेष प. पू. चारित्रचूडामणि आ. भ. श्री विजय कमलसूरीश्वरजी महाराजाना उपदेशथी आ ग्रन्थ विक्रम सं. १९७३ मां प्रगट थयेलो तेनी ज प्रस्तावना आ ग्रन्थमां आपी छे जे विशेष जाणकारी माटे छे प्राचीन ग्रन्थोनुं वांचन मनन वधे ते आवश्यक छे अने प्रकाशनो पाछलनो आ हेतु सफल थाय एज अभिलाषा.

—जिनेन्द्रसूरि.

२०४७ भाद्रपद शुक्ल अष्टमी
४५ दिग्विजय प्लोट, जामनगर

卐

॥३॥

# ॥ प्रथमावृत्तेः प्रस्तावना ॥

विदांकुर्वन्तु शेमुषीजुषो विद्वांस–

इह किल जैनदर्शने द्रव्यानुयोगो गणितानुयोगश्चरणकरणानुयोगो धर्मकथानुयोगश्चेति चत्वारोऽनुयोगा मुख्यत्वेन प्रतिपादिताः। तत्रैकैकस्मिन्ननुयोगेऽनेकेषां विषयाणामन्तर्भावत्वेन प्रसक्तानुप्रसक्तत्वेन च रत्नाकररत्ननिकराणामिवाऽमेयत्वं दरीदृश्यते। तत्र द्रव्यानुयोगे कार्मणादिग्रन्थाः प्रविष्टाः, गणितानुयोगे भूगोलखगोलविषयाः प्रतिपादिताः, चरणकरणानुयोगे साधुश्राद्धानामाचारादिग्रन्था ग्रथिताः, धर्मकथानुयोगे च धार्मिकनैतिकैतिहासिकादिविविधविषयाश्रितमहापुरुषादिदृष्टान्तद्वारेण धर्मोपदेशा उपदिष्टाः। तत्र चोपदेशमाला–उपदेशप्रासाद–सम्यक्त्वसप्ततिका–कर्पूरप्रकराद्यो ग्रन्था आचारप्रतिपादकत्वाच्चरणकरणानुयोगे समवतरन्ति मुख्यतया, तथापि तत्तद्धर्मविषयोपदेशानां दृष्टान्तद्वारादृढीकरणाद्धर्मकथानुयोगेऽपि। मुख्यतया धर्मकथाप्रतिपादकानि च त्रिषष्टिशलाकापुरुषादिचरित्राण्यपि आचारादितात्पर्यपरतया प्रायश्चरणकरणानुयोगीन्यपीति उत्तरानुयोगद्वयं प्रायो नित्यसंबद्धमेव। तथा चायमपि उपदेशसप्ततिका नाम ग्रन्थोऽनुयोगद्वयप्रतिपादकः। यद्यपि मूलेऽस्य केवलाचार एवाभिहितः तथापि मूलकारेणैवास्य स्वकृतटीकायां कथानुयोगः स्फुटमेव प्रकटितः। एवंविधा एव कथाद्वारेण धर्मोपदेष्टारो ग्रन्थाः प्राय ऐदंयुगीनाल्पायुर्मेधाज्ञानानामासन्नोपकारिण इति मन्यामहे।

ग्रन्थस्यास्य सटीकस्य के कर्तारः ? कस्मिन् काले कस्मिन् देशे केन प्रार्थिताश्चामुं कृतवन्तः ? इत्येतज्जिज्ञासवः "पढिन्तु एयं उवएससत्तरिं, मुणंति चित्ते परमत्थवित्थरं । तरित्तु ते दुक्खभरं सुदुत्तरं, खेमेण पावंति सुहं अणुत्तरं ॥७३॥"

इति मूलचरमश्लोके क्षेमशब्देन, तथा –

"इह भव्यसत्त्वचेतःप्रतिबोधकृते प्रतन्यते मयका । स्वकृतोपदेशसप्ततिकायाः स्पष्टाक्षरा टीका ॥८॥"

इति पीठिकाचरमच्छन्दसा, तथा च प्रशस्तौ–

"तच्छिष्याः प्रविभान्ति शान्तिसहिताः सौभाग्यभाग्यश्रिताः, सद्विद्याभ्युदयाधरीकृतसुराचार्याः क्षितौ विश्रुताः ॥९॥
कीर्त्तिस्फूर्त्तिमधिष्ठिता मुनिवराः श्रीक्षेमराजाह्वयाः, पुण्योऽत्यतिशायिपाठकशिरोरत्नोपमानोदयाः ॥१०॥
स्वकृतोपदेशसप्ततिकाह्वयसूत्रस्य निर्मिता टीका । तैरेवैषा वर्षे मुनिवेदशरेन्दुभिः (१५४७) प्रमिते ॥११॥
हिसारकोट्टवास्तव्यः श्रीमालोत्तमवंशजः । पटुपर्पटगोत्रीयः श्रीमान् दोदाह्वयोऽभवत् ॥१३॥
स श्राद्धगुणरत्नानां रोहणोऽद्रोहणो हृदि । कृता तस्याग्रहेणैषा नव्या सप्ततिका मुदा ॥१४॥

इति श्लोकसमुदयेन सुखं भोत्स्यन्त इति तदुल्लेखाद्विरम्यते । खरतरगच्छीयाश्चेमे इत्यपि प्रशस्त्यां "श्रीखरतरगण-नाथाः" इत्यस्मिन्नेव श्लोके प्रकटं, नवरं न क्वापि कोऽपि गच्छीयसामाचारीभेदोऽत्र दृष्टिपथमवतरति, सर्वसामान्योपदेशमयत्वादस्य । किं चेमे पूज्याः कतमां भूमिं जन्मना कतमां च विहारादिना भूषयामासुः ? कौ च पितरौ प्रमोदयाञ्चक्रुः ? अन्याश्च काः काः कृतीश्चक्रवांसः ? इत्यादिकमुल्लेखाभावान्न किमपि ज्ञायते ।

अस्मिँश्च ग्रन्थे मूले सर्वेऽपि श्लोकाः प्राकृतभाषयामिन्द्रवज्रयैव ग्रथिताः, अत एषां मुखपाठमात्रेऽपि महानाह्लादो वक्तृश्रोतॄणां जायते, किमुतार्थविचारणे ? । अत्र प्रथमश्लोके मङ्गलमन्तिमयोश्च फलमभिहितमतोऽवशिष्टाः सप्ततिरुपदेशश्लोका इत्यन्वर्थेयं उपदेशसप्ततिकेति संज्ञाऽस्य ग्रन्थस्य । प्रतिश्लोकं चात्र प्राय उपदेशचतुष्टयमात्मनोऽत्यन्तहितकारि वर्णीकृतोऽपि । तदुपरि ऋजुभाषयाक्षरशो मूलकारैरेव संस्कृतभाषायां टीका कृता, तत्तदुपदेशानुसारि चागमोक्तप्रायं कथानकजातं गीर्वाणभाषायां प्राकृतभाषायां पैशाच्यादिभाषायां च विविधैः सरसैः सालङ्कारैः सयमकैर्वृत्तैश्छन्दोभिः क्वचिच्च गद्येनापि व्यरचि, एवं चाधिकशतं कथानकानामत्र कथितं । कथानकेषु प्रायः शब्दकाठिन्यं वर्णनकाठिन्यं च वर्णितं, व्याकरणप्रयोगाश्च नूतनाः कठिनाश्च प्रयुक्ताः, अतो ग्रन्थकर्तॄणां साहित्यज्ञानं व्याकरणज्ञानं चातीव समीचीनमासीदिति स्फुटं ज्ञायते । किं बहुना ? सर्वथाऽस्य काव्यरसस्यास्वादकारिणो विद्वांस एव । किंच काव्यरचनया ज्ञातेऽपि व्याकरणपाण्डित्ये पूज्यानां क्वचिदनुपसर्गपूर्वपदेऽपि[1] क्त्वो ल्यबादेशदर्शनाच्छङ्कितमेव हृदयं, कवीनां निरङ्कुशत्वे स्वीकृते तु समाधीयत एव तत् । एवमन्यत्रापि क्वचिच्चिन्त्यप्रयोगे ज्ञेयं । अत्र वर्णितोपदेशविषयाणां कथितकथानकानां चानुक्रमणिकावाचनेनैव तद्गौरवं ज्ञायत एवेति तां दृष्टिपथं नेतुं प्रार्थ्यते वाचकवर्गः । मूलं चास्य पाठतोऽर्थतश्चातीवरम्यं भव्यजनोपकारीति सर्वैर्विशेषतश्चोपदेष्टृभिः कंठे कार्यमिति पृथक्कृत्य प्रारम्भेऽपि मुद्रापितं । आशास्यते च विद्वद्वर्गोऽस्य बृहतो ग्रन्थस्य मुद्रापणप्रयासं द्रव्यव्ययं च पठनपाठनोपदेशदानादिना सफलतां नयेत् ।

१. असमासेऽपीत्यर्थः,

॥७॥

अस्य प्रशस्त्याश्चरमे (१४) श्लोके "नव्या सप्ततिका मुदा" इत्यत्र नव्यशब्दोल्लेखकर्त्रा ग्रन्थकर्त्रा इदमसूचि, दयुत-अब्धि-अश्वो मुनिवेदशरेन्दु (१५४७) प्रमिते विक्रमाब्दे हिसारकोट्टवस्तव्य दोदाभिधश्राद्धाग्रहेण पूज्यैः श्री क्षेमराजाह्वयै रचित इति प्रशस्त्यां शंसितं, एतत्प्राचीनश्चैतन्नामा [उपदेशसप्ततिनामा] एव ग्रन्थः पण्डितप्रवरैः श्रीमत्सोमधर्मगणिभिस्त्र्युत्तरपञ्चदशशततमे [१५०३] विक्रमाब्दे निर्मितः योऽत्रत्यया श्रीआत्मानन्दसंस्थया मुद्रापयित्वा प्रकटितोऽस्ति वर्षद्वयादर्वाक् इति तदपेक्षया योग्यमेवास्य नव्यत्वं । अनयोर्द्वयोरपि महान् विषयभेदः कृतिभेदश्च भिन्नभिन्नकर्तृकत्वात् । किंच प्राचीनः संक्षिप्तकथानक आसन्नसहस्रत्रयप्रमितः श्लोकानां, अयं च विस्तृतकथानक आसन्नसहस्राष्टकप्रमितः श्लोकानां, मूलमपि च द्वयोरपि भिन्नमेवेत्यतोऽपि नूतनत्वमस्यान्वर्थमेवेति ध्येयम् ।

ग्रन्थस्यास्य मुद्रापणे न्यायाम्भोनिधिश्रीमद्विजयानन्द[आत्मारामजी]सूरीश्वरपट्टविराजितश्रीमद्विजयकमलसूरीश्वरसदुपदेशामृतसिक्तेन गोधानिवासिना श्रेष्ठिवरेण मगनलालतनुजन्मना श्रीमद्धर्मचन्द्रेण द्रव्यसाहाय्यं दत्तं । संसच्छास्त्रिणा जेठालालशर्मणा लिखिताऽस्य प्रतिकृतिः प्रथमं पन्न्यासश्रीमणिविजयाह्वयैः पश्चाच्च पन्न्यासश्रीदानविजयाभिधैः संशोधिता, मुद्रायन्त्रणप्रतिकृतिसंशोधनेऽप्याभ्यामेव पन्न्यासवराभ्यामवधानं दत्तमित्यनयोः सूरीश्वराणां श्रेष्ठिवरस्य च महोपकारं मन्यामहे । ॥७॥

शुद्धिविषये चास्य कृतेऽपि यथाशक्ति प्रयासे कुतोऽपि हेतोर्या काऽप्यशुद्धिर्दृष्टिपथमवतरति विदुषां, तैः कृपापरैः शोधयित्वाऽऽदेश्या संसदियं, येन द्वितीयावृत्तौ तद्विषये यत्येत । इति शम् ॥

द्वितीयभाद्रपद शुक्लचतुर्थ्यां संवत् १९७३. प्रकाशयित्री श्री जैनधर्मप्रसारकसभा भावनगर

# ॥ विषयानुक्रमः ॥


| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| १ | मङ्गलम् | ...१ |
| २ | सर्वज्ञमतसेवन-शीलपालन-कूटकलङ्कादानं | ...५ |
| | सर्वज्ञमतश्लाघाधिकारः | ...६ |
| | तदुपरि केसरिचौरकथा (१) | ...७ |
| | शीलोपरि रोहिणीचरितम् (२) | ...१२ |
| | कूटकलङ्कोपरि वृद्धायाः कथा (३) | ...२६ |
| ३ | परच्छिद्राप्रकाशनं, रौद्रकर्माकरणं क्षुद्रस्यापि मित्रवद्गणनम् | ...२८ |
| | परच्छिद्रान्वेषणे दत्तकथा (४) | ...२९ |
| | रौद्रकर्मोपरि उज्झितकुमारकथा (५) | ...३२ |
| | क्षुद्रेऽपि मैत्रीभावप्रतिपत्तौ समरविजय-कीर्तिचन्द्रकथा-[६] | ...३६ |
| ४ | रोगादिप्राप्तेः पूर्वमेव धर्मोद्यमः कार्यः | ...४५ |
| ५ | रोगेण मनसोऽसमाधिः, तदभावे धर्म-बुद्ध्यभावः, तस्माच्च दुःखनाशासंभव | ...४६ |
| | तदुपरि श्रीसनत्कुमारचरितम् (७) | ...४६ |
| ६ | विरक्तचित्तःसदा सुखी, तदन्यस्तु तद्वि-परीतः, अतो नीरागमार्गे चित्तं धरत | ...६३ |
| | तदुपरि जिनपालितजिनरक्षितदृष्टान्तः (८) | ...६३ |
| ७ | परिग्रहारंभस्यादरास्य च सेवनेऽपि प्रान्ते जिनधर्मानुष्ठाने भवांभोधिपारगमनम् | ...७१ |
| | अत्रार्थे शशिशूरदृष्टान्तः (९) | ...७२ |

| गाथाङ्कः | विषयाः | पृष्ठं |
| --- | --- | --- |
| ८ | जिनाज्ञावहन–घोरोपसर्गसहन–धर्ममार्ग-प्रकटनेन संसारसागरोत्तारः | ...७४ |
| | अत्रार्थेऽर्जुनारामिकदृष्टान्तः (१०) | ...७५ |
| | धर्ममार्गप्रकाशनोपरि शिवभद्रश्रीयककथानकम् (११) | ...८२ |
| ९ | असत्यभाषात्यागः, भोगसुखेच्छात्यागः, पराशाया अभंगः, एवं च धर्मकीर्त्योरवाप्तिः, | ...८९ |
| | असत्यभाषापरिहारे श्रीकालिकार्यकथा (१२) | ९२ |
| | भोगपिपासोपरि द्विजसुतदृष्टान्तः (१३] | ... ९४ |
| | परमनोरथपूरणे नरवाहनदृष्टान्तः (१४) | ९६ |
| १० | मिथ्यात्वमहान्धकारमयेऽस्मिन् जगति शुद्धमार्गगामिन एव श्लाघ्या | ९८ |

| गाथाङ्कः | विषयाः | पृष्ठं |
| --- | --- | --- |
| ११ | शुद्धमार्गाचरणोपरि जात्याश्वदृष्टान्तः सोपनयः (१५) | ९९ |
| | संसारासारता | १०३ |
| | एतदुपरि द्रमकदृष्टान्तो राजदृष्टान्तश्च (१६–१७) | १०३ |
| १२ | जिनार्चनस्य स्वर्गापवर्गसाधनत्वम् | १०५ |
| | अत्रार्थे श्रीरत्नचन्द्रोदाहरणम् (१८) | १०६ |
| १३ | प्रमादपरिहारोपदेश | १११ |
| | अत्रार्थे मथुरामङ्ग्वाचार्यकथानकम् (१९) | १२२ |
| १४ | तपउपधानपूर्वं गुरुप्रणामपुरस्सरं सूत्रार्थपठनमनोरथः | १२४ |
| १५ | षडावश्यककरणमनोरथः | १२६ |


॥९॥

| गाथाङ्कः | विषयाः | पृष्ठं |
| --- | --- | --- |
| १६ | गुर्वाज्ञावहन–सूत्रार्थशिक्षण–क्रोधादित्यजन–मार्दवादिवहनमनोरथः | १२६ |
| १७ | सम्यक्त्वमूलाणुव्रतपालनमनोरथः | १२७ |
| १८ | पूर्वोक्तमनोरथकरणे फलम् | १२८ |
| | सन्मनोरथोपरि सिद्धदृष्टान्त (२०) | १२८ |
| १९ | उत्सूत्रपदोद्भावने महादोषः | १३१ |
| | उत्सूत्रपरिहारे सावद्याचार्यकथानकम् (२१) | १३२ |
| २० | जिनाज्ञातिक्रमकारिभिः कृतानि तपोज्ञानदानादीनि निष्फलानि | १४४ |
| | तदुपरि जमालिकथा (२२) | १४४ |
| २१ | जिनाज्ञाविरतानां पापाभावः, विना तपो विशुद्धिः सिद्धिसुखं च | १४७ |
| | अत्रार्थे श्रीपृथ्वीचन्द्रोदाहरणम् (२३) | १४८ |

| गाथाङ्कः | विषयाः | पृष्ठं |
| --- | --- | --- |
| २२ | जिनाज्ञाराधनं बहुश्रुतगुरुसेवया भवतीति तदुपदेशः | १५३ |
| | अत्रार्थे जयन्त्युदाहरणम् (२४) | १५४ |
| २३ | अगीतार्थसेवानिषेधः | १५६ |
| | अत्रार्थे सुमतिज्ञातम् (२५) | १५६ |
| २४ | कुमार्गसंसर्गलग्नानामुभयलोकहानिः | १७१ |
| | अत्रार्थे सूरचन्द्रयोः कथा (२६) | १७१ |
| २५ | इह दुःखमये संसारे षड्जीवनिकायरक्षादिपराणां साधूनामेव सुखसंभवो नान्येषाम् | १७४ |
| | एतदुपरि शालमहाशालदृष्टान्तः (२७) | १७५ |
| २६ | सामान्येन कषायपरिहारोपदेशः | १७८ |
| | एतदुपरि सेचनकदृष्टान्तः (२८) | १७९ |
| २७ | धनधान्यकुटुम्बाद्यसारं ज्ञात्वा धर्मकरणेन | |

| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| | दुःखपारगमनम् | १८० |
| | एतदुपरि थावच्चापुत्रकथानकम् (२९) | |
| | एतदुपरि थावच्चापुत्रोदाहरणम् | १८१ |
| २० | विषयाणामशाश्वतत्वं तेषु प्रतिबन्धप्रतिषेधश्च | १८९ |
| | एतदर्थे श्रीइलापुत्रचरितम् (३०) | १९० |
| २१ | जिनपूजा–गुरुसेवा–धर्मश्रवण–तत्त्वविचारण–तपोविधान–दान–दापननामानि सप्तकृत्यानि-श्रावकाणां नरकसप्तकनिवृत्तिकराणि | २०० |
| | जिनपूजाविषये धनदकथा (३१) | २०१ |
| | सद्गुरुसेवाविषये नमिविनमिज्ञातम् (३२) | २०४ |
| | धर्मश्रवण–तत्त्वविचारविषये चिलातिपुत्रोदाहरणम् (३३) | २०६ |
| | तपोविषये स्कन्दकदृष्टान्तः (३४) | २१० |

| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| | दानविषये श्रीभद्रनन्दिचरितम् (३५) | २१२ |
| ३० | कषायाणामनर्थकारित्वम् | २१९ |
| | तदुपरि दमदन्तराजर्षिकथा (३६) | २२१ |
| ३१ | परोपहास–परदोषवीक्षणनिषेधः | २२५ |
| | परोपहासविषये सागरश्रेष्ठिकथा (३७) | २२५ |
| | परदोषानाविष्करणविषये श्राद्धपुत्रकथा (३८) | २२७ |
| ३२ | दशविधो विनयः | २२७ |
| | एतदुपरि श्रीभुवनतिलकज्ञातम् (३९) | २३० |
| ३३ | तीव्ररोषेण पुण्यजलशोषः सर्वस्यानाशश्च | २३० |
| | एतद्विषये मण्डूकीक्षपकदृष्टान्तः (४०) | २३८ |
| ३४ | मानपरिहारोपरि उपदेशः | २४२ |
| | तत्र दशार्णभद्रकथा (४१) | २४२ |
| ३५ | मायात्यागोपदेशः | २४५ |

| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| ३६ | लोभविषय उपदेशः | २४५ |
| | भुवनभानुचरित्रानुगतं दृष्टान्तचतुष्कं चतुष्कषायगर्भितम् (४२–४५) | २४६ |
| ३७ | कठोरवचनपरिहारः | २५९ |
| | एतदुपरि वृद्धा–पुत्र्योर्दृष्टान्तः (४६) | २६० |
| ३८ | श्रावकस्य कुलोचितवेष–अन्यगृहप्रवेश–सज्जन–दुर्जनसमदृष्टि–दोषाजल्पनोपदेशः | २६२ |
| | कुलोचितवेषोपरि मम्मणश्रेष्ठिकथा (४७) | २६३ |
| | परगृहप्रवेशे कुलपुत्रकदृष्टान्तः (४८) | २६३ |
| ३९ | मुनेर्ज्ञानाभ्यासे दशभेदधर्मे चोपदेशः | २६४ |
| | तत्र सुबुद्धिदुर्बुद्धिकथानकम् (४९) | २६४ |
| ४० | हास्यादिषट्कपरिहार–व्रतषट्कपालन–पञ्चप्रमादनिर्दलन–पञ्चान्तरायनिवारणोपदेशः | २७० |

| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| | हास्योपरि हरिकेशिदृष्टान्तः (५०) | २७१ |
| | व्रतषट्कोपरि पुण्डरीककण्डरीकदृष्टान्तः (५१) | २७३ |
| | शोकावकाशाप्रदाने श्रीसगरचरितम् (५२) | २७८ |
| | भयाकरणे श्रीकामदेवदृष्टान्तः (५३) | २८४ |
| | दुगुंछोपरि सुनन्दवणिक्कथा (५४) | २९० |
| | पञ्चप्रमादविषये मदिरापानोपरि यादवानां कथा (५५) | २९३ |
| | विषयप्रमादविषये सत्यकिदृष्टान्तः (५६) | २९५ |
| | कषायप्रमादोपरि सुभूमचक्रिकथा (५७) | २९८ |
| | निद्राप्रमादे पुण्डरीकमुनिदृष्टान्तः (५८) | ३०६ |
| | विकथाप्रमादोपरि रोहिणीचरितम् (५९) | ३१० |
| | दानान्तरायोपरि धनसारकथा (६०) | ३१५ |
| | लाभान्तरायोपरि ढंढणकुमारकथा (६१) | ३२० |

| गाथाङ्कः | विषयाः | पृष्ठं |
|---|---|---|
| | भोगान्तराये सुदत्ताकथा (६२) | ३२३ |
| | उपभोगान्तराये श्रेष्ठिकथानकम् (६३) | ३२५ |
| ४१ | साधर्मिकवात्सल्यं निदानप्रतिषेधश्च | ३२६ |
| | सार्धमिकवात्सल्योपरि विशाखदत्ताकथा (६४) | ३२८ |
| ४२ | श्राद्धस्य द्वादशव्रताधिकारे प्रथमाणुव्रतोपदेशः | ३३१ |
| | तत्र क्षेमादित्यकथा (६५) | ...३३२ |
| ४३ | द्वितीयाणुव्रतम् | ....३३३ |
| | तत्र तुरगेशपुत्रकथा (६६) | ...३३४ |
| ४४ | तृतीयाणुव्रतम् | ...३३४ |
| | तत्र श्राद्धकथा (६७) | ...३३५ |
| ४५ | चतुर्थाणुव्रतम् | ...३३५ |
| | तत्र श्रीवीरकुमारकथा (६८) | ...३३६ |
| ४६ | पञ्चमाणुव्रतम् | ...३४२ |

| गाथाङ्क | विषयाः | पृष्ठं |
|---|---|---|
| | तत्र तिलकश्रेष्ठिकथा (६९) | ...३४६ |
| ४७ | पञ्चविषयाधिकारे प्रथमः शब्दविषयः | ...३४७ |
| | अत्र सुभद्राकथा (७०) | ...३४८ |
| ४८ | द्वितीयो रूपविषयः | ...३५० |
| | अत्र लोलाक्षकथा (७१) | ...३५० |
| ४९ | तृतीयो रसनेन्द्रियविषयः | ...३५३ |
| | अत्र रसलोलकथा (७२) | ...३५३ |
| ५० | चतुर्थो गन्धविषयः | ...३५६ |
| | अत्र नरवर्मकथा (७३) | ...३५६ |
| ५१ | पञ्चमः स्पर्शविषयः | ...३५७ |
| | अत्र सुकुमालिकाज्ञातम् (७४) | ...३५८ |
| ५२ | विषयाणां विपाकः | ...३६० |
| ५३ | विषयाणां दुर्जयत्वम् | ...३६१ |


॥१३॥

| गाथाङ्क | विषयाः | पृष्ठं |
|---|---|---|
| ५४ | सर्वज्ञमतनिरतानां क्रियासाफल्यम् | ...३६१ |
| ५५ | संसारभीरुकाणां संसारः सुरत एव | ...३६२ |
| | अत्रार्थे विमलश्राद्धोदाहरणम् (७५) | ...३६२ |
| ५६–५७ | संसारस्यास्थिरत्वम् | ...३६८ |
| | एतदर्थे महानिर्ग्रन्थसंबन्धः (७६) | ३६८ |
| ५८ | निकृष्टकर्मकारिणो दुःखिन एव | ३७३ |
| | एतदुपरि मृगापुत्रकथा (७७) | ३७३ |
| ५९ | जिनगुणोत्कीर्तनादिना बोधिलाभोऽवर्णवादेन चाबोधिलाभः | ३७८ |
| | अत्रार्थे श्रीसुबुद्धिसचिवोदाहरणम् (७८) | ३७९ |
| | अवर्णवादोपरि कौशिकवणिग्दृष्टान्तः (७९) | ३८१ |
| ६० | धर्मतत्त्वाज्ञानामुभयलोके दुःखमेव | ३८४ |
| | अत्र वधूचतुष्कज्ञातम् (८०) | ३८४ |
| ६१ | पुण्योदयं विना धर्मजागरस्य दुर्लभत्वम् | ३८७ |
| ६२ | मोक्षमार्गोन्मुखानामपि क्रोधादिवैरिणः पुण्यपाथेयं हरन्ति | ३८७ |
| ६३ | जिनधर्मविमुखानामज्ञानकष्टेन नरकपातः | ३८८ |
| | अत्रार्थे पूरणाख्यानम् (८१) | ३८८ |
| ६४–६५ | अष्टमदत्यागाधिकारः | ३९१ |
| | जातिमदोपरि विप्रकथा (८२) | ३९२ |
| | कुलमदे श्रीमहावीरदृष्टान्तः (८३) | ३९४ |
| | रूपमदोपरि सनत्कुमारकथा कथितपूर्वा–बलमद वसुभूतिकथा (८४) | ३९५ |
| | श्रुतमदोपरि सागरचन्द्रदृष्टान्तः (८५) | ३९६ |
| | तपोमदे द्रौपदीपूर्वभवः, लाभमदे आषाढभूतिः, ऐश्वर्यमदे रावणः, एते प्रसिद्धत्वान्नाममात्रेण दृष्टान्तिताः | ३९६ |
| ६६ | बालाग्रमात्रप्रदेशः स्वजन्मना न रिक्तस्त- | |

| गाथाङ्क | विषयाः | पृष्ठ |
| --- | --- | --- |
| | थापि सुखं न प्राप्तः | ३९७ |
| ६७ | मनुष्यभवादिदुर्लभत्वम् | ३९७ |
| | अत्रार्थे दृष्टान्तदशकान्तर्गतं भोजनोपरि कार्पटिकोदाहरणं प्रथमम् (८६) | ३९८ |
| | चाणक्यदृष्टान्तः (८७) | ४०० |
| | धान्यदृष्टान्तः (८८) | ४१४ |
| | द्यूतदृष्टान्त (८९) | ४१४ |
| | रत्नदृष्टान्तः (९०) | ४१५ |
| | मूलदेवराजपुत्रस्वप्नफलकथानकम् (९१) | ४१५ |
| | सुरेन्द्रदत्तकथानकम् (९२) | ४१६ |
| | चर्म [कच्छप] दृष्टान्तः [९३] | ४२० |
| | युगशम्या दृष्टान्तः [९४] | ४२० |
| | स्तम्भदृष्टान्तः [९५] | ४२० |

| गाथाङ्क | विषयाः | पृष्ठ |
| --- | --- | --- |
| | क्षमायां संवरमुनिकथा [९६] | ४२१ |
| | प्रमादाचरणस्थानज्ञापने स्थूलभद्रदृष्टान्त [९७] | ४२३ |
| ६८ | वयस्त्रिकेऽपि धर्मसमयस्य दुर्लभत्वम् | ४३७ |
| ६९ | शैशवादन्यत्र धर्मसमयस्य दुर्लभत्वम् | ४३८ |
| | अत्रातिमुक्तकक्षुल्लकसाधुदृष्टान्तः [९८–९९] | ४३८ |
| ७० | पूर्वकृतसुकृतमाहात्म्यम् | ४४४ |
| | अत्र मृगापुत्रचरितम् [१००] | ४४४ |
| ७१ | सम्यक्त्वलक्षणम् | ४५३ |
| | एतदुपरि श्रीमृगध्वजस्वरूपम् [१०१] | ४५३ |
| ७२ | प्रशस्तलेश्यावतां सप्तक्षेत्रद्रव्यव्ययवतां निर्मोहानां जन्मपावित्र्यम् | ४६२ |
| ७३ | अस्याः सप्ततिकायाः परमार्थज्ञानपुरस्सरं पठने फलम् | ४६३ |
| | प्रशस्तिः | ४६४ |


॥१५॥

# 卐 ॥ शुद्धिपत्रकम् ॥ 卐

| पृष्ठं | पंक्तिः | शुद्धम् |
|---|---|---|
| ३ | ५ | ०विच्छेदः क्षाणनं मलस्य यतः । |
| १८ | १३ | निकामकामायाम् |
| २६ | ३ | रोहिण्या |
| ३१ | ६ | निम्मज्ञाय |
| ३८ | १२ | कस्समाया |
| ३८ | १३ | तस्स धण |
| ४२ | ६ | रंगि |
| ४४ | ९ | अणुसासइ |
| ४८ | १० | दृढं |
| ४८ | ११ | शशिवद्विलक्षः |
| ४९ | ३ | स्वकन्याः |
| ४९ | १३ | भूपोऽथ |
| ५० | १४ | केनापि |
| ५२ | ८ | करुणास्वरेण |
| ५३ | १ | शृङ्गिशृङ्गे |
| ५७ | १ | महेन्द्रसिंहेन |
| ५८ | ४ | प्रयातौ |
| ५८ | ८ | समागतौ |
| ६० | ११ | ०वारणायाम् |
| ६४ | २ | वस्तूत्करैः |
| ६९ | १४ | कक्षीचक्रे |
| ७३ | १४ | जं अज्जिज्जइ |
| ७६ | १३ | हसंति विल्संति य |
| ८८ | १ | रोहिणिविज्ज |
| ८९ | ६ | सिद्धान्तोक्तं |
| ९० | ३ | स्वमाढ्यं |
| १०० | ७ | ०चिकीः |
| १०५ | ९ | पुणो वि |
| १०६ | ६ | ०प्पमोयकारं |
| ११० | ६ | जीहारस० |
| १२३ | १ | किमर्थं |
| १५६ | ८ | भावीति |

| पृष्ठं | पंक्तिः | शुद्धम् |
|---|---|---|
| १६१ | ४ | हुवंति |
| १६५ | ३ | तओ ते तेसिं |
| १७१ | ७ | कुमार्गास्तस्य |
| १७२ | ४ | तद्धर्मदेशना० |
| १७९ | १० | जूहनाहं जूहाहिवई |
| १८७ | १३ | जे नणु |
| १९६ | ६ | बुद्धी |
| २०९ | ८ | पायंयलं |
| २११ | ५ | भोक्तव्यं च |
| २२५ | १२ | चण्डिके चण्डे |
| २३३ | ४ | मुक्तं |
| २३७ | २ | मतिमनुपमां येन् |
| २४० | १४ | ०णारंभं |
| २७२ | ६ | दिट्ठो |
| २८१ | ३ | अवत्तव्वा |
| २८२ | १ | मरंति |
| २८५ | १२ | पालइ |
| २८९ | ४ | गुरुमुहि |
| ३०२ | ६ | इवाम्बुजिन्या |
| ३०३ | ११ | क्षत्रियो० |
| ३२८ | ११ | अन्नं |
| ३५० | ७ | काञ्चन |
| ३५७ | १ | माप्य |
| ३५८ | ४ | कुरुते |
| ३५८ | ८ | हेच्चित्ते |
| ३६६ | ४ | र्थव्यसनं |
| ३८१ | ६ | अथ अवर्ण० |
| ३९३ | ९ | सौम्यः |
| ४१२ | ५ | भूरितरं पराभवं |
| ४३१ | १० | दुर्गतः |
| ४४४ | १२ | सामुर्ग्या सामग्र्यां |
| ४६४ | ४ | यद्रेखा |

卐

卐

# ॥ श्री उपदेशसप्ततिका-मूलम् ॥

तित्थंकराणं चरणारविंदं, नमित्तु नीसेससुहाण कंदं । मूढोऽवि भासेमि हिओवएसं, सुणेह भव्वा सुकयप्पवेसं ॥१॥
सेविज्ज सव्वन्नुमयं विसालं, पालिज्ज सीलं पुण सव्वकालं । न दिज्जए कस्स वि कूडआलं, छिंदिज्ज एवं भवदुक्खजालं ॥२॥
पयासियव्वं न परस्स छिद्दं, कम्मं करिज्जा न कयाऽवि रुद्दं । मित्तेण तुल्लं च गणिज्ज खुद्दं, जेणं भविज्जा तुह जीव भद्दं ॥३॥
रोगेहि सोगेहि न जाव देहं, पीडिज्जए वाहिसहस्स गेहं । तावुज्जमं धम्मपहे रमेह, बुहा मुहा मा दियहे गमेह ॥४॥
जया उदिण्णो नणु कोऽवि वाही, तया पणट्ठा मणसो समाही । तीए विणा धम्ममई वसिज्जा, चित्ते कहं दुक्खभरं नरिज्जा ॥५॥
विरत्तचित्तस्स सयाऽवि सुक्खं, रागाणुरत्तस्स अईव दुक्खं । एवं मुणित्ता परमं हि तत्तं, नीरागमग्गम्मि धरेह चित्तं ॥६॥
परिग्गहारंभभरं करंति, अदत्तमन्नस्स धणं हरंति । धम्मं जिणुत्तं न समायरंति, भवन्नवं ते कहमुत्तरंति ॥७॥
आणं जिणाणं सिरसा वहंति, घोरोवसग्गाइ तहा सहंति । धम्मस्स मग्गं पयडं कहंति, संसारपारं नणु ते लहंति ॥८॥
भासिज्जए नेव असच्चभासा, न किज्जए भोगसुहे पिवासा । खंडिज्जए नेव परस्स आसा, धम्मो य कित्ती इय सप्पयासा ॥९॥
दुरंतमिच्छत्तमहंधयारे, परिप्फुरंतम्मि सुदुन्निवारे । न सुद्धमग्गाउ चलंति जे य, सलाहणिज्जा तिजयम्मि ते य ॥१०॥
असारसंसारसुहाण कज्जे, जो रज्जई पावमई अवज्जे । अप्पाणमेसो खिवई किलेसे, सग्गापवग्गाण कहं सुहं से ॥११॥
नरिंददेवेसरपूइयाणं, पूयं कुणंतो जिणचेइयाणं । दव्वेण भावेण सुहं चिणेइ, मिच्छत्तमोहं तह निज्जिणेइ ॥१२॥
दुक्खं सुतिक्खं मरए सहित्ता, पंचिंदियत्तं पुण जो लहित्ता । पमायसेवाइ गमिज्ज कालं, सो लंघिही नो गुरुमोहजालं ॥१३॥

तवोवहाणाइ करित्तु पुव्वं, कया गुरूणं च पणामपुव्वं । सुत्तं च अत्थं महुरस्सरेणं, अहं पढिस्सं महायायरेणं ॥१४॥
कमट्ठवाहीहरणोसहाणि, सामाइयावस्सयपोसहाणि । सिध्धंतपन्नत्तविहाणपुव्वं, अहं करिस्सं विणयाइ सव्वं ॥१५॥
आणं गुरूणं सिरसा वहिस्सं, सुत्तत्थसिक्खं विउलं लहिस्सं । कोहं विरोहं सयलं चइस्सं, कया अहं मद्दवमायरिस्सं ॥१६॥
सम्मत्तमूलाणि अणुव्वयाणि, अहं धरिस्सामि सुहावहाणि । तओ पुणो पंचमहव्वयाणं, भरं वहिस्सामि सुदुव्वहाणं ॥१७॥
एवं कुणंताण मणोरहाणि, धम्मस्स निव्वाणपहे रहाणि । पुन्नज्जणं होइ सुसावयाणं, साहूण वा तत्तविसारयाणं ॥१८॥
हवंति जे सुत्तविरुध्धभासगा, न ते वरं सुट्ठुवि कट्ठकारगा । सच्छंदचारी समए पलविया, तद्दंसणिच्छावि अईव पाविया ॥१९॥
अद्दवकमित्ता जिणरायआणं, तवंति तिव्वं तवमप्पमाणं । पढंति नाणं तह दिंति दाणं, सव्वं पि तेसिं कयमप्पमाणं ॥२०॥
जिणाण जे आणरया सयाऽवि, न लग्गई पावमई कयाऽवि । तेसिं तवेणंऽपि विणा विसुद्धी, कम्मक्खएणं च हविज्ज सिध्धी ॥२१॥
बहुस्सुयाणं सरणं गुरूणं, आगम्म निच्चं गुणसागराणं । पुच्छिज्ज अत्थं तह मुक्खमग्गं, धम्मं वियाणित्तु चरिज्ज जुग्गं ॥२२॥
तुमं अगीयत्थनिसेवणेणं, मा जीव भद्दं मुण निच्छएणं । संसारमाहिंडसि घोरदुक्खं, कयाऽवि पावेसि न मोक्खसुक्खं ॥२३॥
कुमग्गसंसग्गविलग्गबुध्धी, जो बुज्झइ मुध्धमई न धिध्धी । तस्सेव एसो परमो अलाहो, अंगीकओ जेण जणप्पवाहो ॥२४॥
छज्जीवकाए परिरक्खिऊणं, सम्मं च मिच्छं सुपरिक्खिऊणं । सिध्धंतअत्थं पुण सिक्खिऊणं, सुही जई होइ जयम्मि नूणं ॥२५॥
इमे चइज्जंति जया कसाया, तया गया चित्तगया विसाया । पसंतभावं खु लहिज्ज चित्तं, तत्तो भवे धम्मपहे थिरत्तं ॥२६॥
धणं च धन्नं च बहुप्पयारं, कुडुं(डुं)बमेयंऽपि धुवं असारं । जाणित्तु धम्मं कुरु सव्ववारं, जओ लहिज्जा लहु दुक्खपारं ॥२७॥
असासएसुं विसएसु सज्जो, जो मुज्झई मिच्छपहे अणज्जो । सो चंदणं रक्खकए दहिज्जा, चिंतामणिं कायकए गमिज्जा ॥२८॥
पूया जिणाणं सुगुरूण सेवणं, धम्मक्खराणं सवणं वियारणं । तवोविहाणं तह दानदापणं, सुसावयाणं बहुपुन्नभायणं ॥२९॥
कोहाइया सोलस जे कसाया, पच्चक्खरूवा नणु ते पिसाया । छलंति ते लोयमिमं समग्गं, दुक्खं समप्पंति तहा उदग्गं ॥३०॥

॥१९॥

परोपहासं न कहिंपि कुज्जा, लहुत्तणं जेण जणो लहिज्जा । परस्स दोसेसु मणं न दिज्जा, धीमं नरो धम्मधुरं धरिज्जा ॥३१॥
जिणिंदसिध्धायरियचेइयाणं, संघस्स धम्मस्स तहा गुरूणं । सुयस्सुवज्झायसुदंसणेसु, दसण्हमेसिं विणयं करेसु ॥३२॥
भणे मणागंपि हु तिव्वरोसो, न धारियव्वो कयपावपोसो । जओ भवे पुन्नजलस्स सोसो, संपज्जए कस्सऽवि नेव तोसो ॥३३॥
महारिसीणं अरिणा समाणो, न आणियव्वो हिययम्मि माणो । धम्मं अहम्मं च वियाणमाणो, हुज्जा जणो जेण जडोवमाणो ॥३४॥
सुसाहुवग्गस्स मणे अमाया, निसेहियव्वा सययंपि माया । समग्गलोयाणऽवि जा विमाया--समा समुप्पाइयसुप्पमाया ॥३५॥

जेणं भवे बंधुजणे विरोहो, विवड्डए रज्जधणम्मि मोहो । जो जंपिओ पावतरुप्परोहो, न सेवियव्वो त्तिसमो स लोहो ॥३६॥
जणो सुणित्ता नणु जाइ दुक्खं, तं जंपियव्वं वयणं न तिक्खं । इहं परत्थावि य जं विरुध्धं, न किज्जए तं पि कया निसिध्धं ॥३७॥
दव्वाणुरूवं विरइज्ज वेसं, कुज्जा न अन्नस्स घरे पवेसं । साहूणऽसाहूण तहा विसेसं, जाणिज्ज जंपिज्ज न दोसलेसं ॥३८॥
भत्तिं गुरूणं हियए धरित्ता, सिक्खिज्ज नाणं विणयं करित्ता । अत्थं वियारिज्ज मईइ सम्मं, मुणी मुणिज्जा दसभेयधम्मं ॥३९॥
हासाइछक्कं परिवज्जियव्वं, छक्कं वयाणं सह पालियव्वं । पंचप्पमाया न हु सेवियव्वा, पंचंतरायाऽवि निवारियव्वा ॥४०॥
साहम्मियाणं बहुमाणदाणं, भत्तीइ अप्पिज्ज तहऽन्नपाणं । वज्जिज्ज रिध्धीइ तहा नियाणं, एयं चरित्तं सुकयस्स ठाणं ॥४१॥
अहिंसणं सव्वजियाण धम्मो, तेसिं विणासो परमो अहम्मो । मुणित्तु एवं बहुपाणिघाओ, विवज्जियव्वा कयपच्चवाओ ॥४२॥
कोहेण लोहेण तहा भएणं, हासेण रागेण य मच्छरेणं । भासं मुसं नेव उदाहरिज्जा, जा पच्चयं लोयगयं हरिज्जा, ॥४३॥
असाहुलोएण य जं पवन्नं, बुहो न गिण्हिज्ज धणं अदिन्नं । अंगीकए जम्मि इहेव दुक्खं, लहइ लहुं नेव कयाइ सुक्खं ॥४४॥ ॥२०॥
समायरं वा अवरस्स जायं, मन्निज्ज छिंदिज्ज जणाववायं । जे अन्नकंतासु नरा पसत्ता, ते झत्ति दुक्खाइ इहेव पत्ता ॥४५॥
जे पावकारीणि परिग्गहाणि, मेलंति अच्चंतदुहावहाणि । तेसिं कहं हुंति जए सुहाणि, सया भविस्संति महादुहाणि ॥४६॥
सद्द सुणित्ता महुरं अणिट्ठं, करिज्ज चित्तं न हु तुट्ठरुट्ठं । रसम्मि गीयस्स सया सरंगो, अकालमच्चुं लहई कुरंगो ॥४७॥

पासित्तु रूवं रमणीण रम्मं, मणम्मि कुज्जा न कयाऽवि पिम्मं । पईवमज्झे पडई पयंगो रूवाणुरत्तो हवई अणंगो ॥४८॥
जलम्मि मीणो रसणारसेण, विमोहिओ नो गहिओ भएण । पावाउ पावेइ स तालुवेहं, रसाणुराओ इय दुक्खगेहं ॥४९॥
गइंदकुंभत्थलगंधलुद्धो, इंदिंदिरो घाणरसेण गिद्धो । हहा मुहा मच्चुमुहं उवेई, को गंधगिद्धिं हियए वहेई ॥५०॥
फासिंदियं जो न हु निग्गहेई, सो बंधणं मुद्धमई लहेई । दप्पुद्धुरंगो जह सो करिंदो, खिवेइ अप्पं वसणम्मि मंदो ॥५१॥
इक्कोऽवि इक्को विसओ उदिन्नो, दुक्खं असंखं दलई पवन्नो । जे सव्वहा पंचसु तेसु लुद्धा, मुद्धाण तेसिं सुगई निसिद्धा ॥५२॥
अईव दुट्ठा विसया विसाओ, पच्छा भवे जेहि महाविसाओ । जेहिं पया हुंति परव्वसाओ, न सेवणिज्जा खलु ते रसाओ ॥५३॥
तित्थंकराणं निउणा पमाणं, कुणंति जे उज्झिय चित्तमाणं । सव्वं पि तेसिं किरियाविहाणं, संजायई दुक्खसहस्सताणं ॥५४॥
अच्चंतपावोदयसंभवाओ, जे भीरुणो भव्वगणा भवाओ । तेसिं सुहाणं सुलहा इवाओ, नो संभविज्जा भवसन्निवाओ ॥५५॥
धणं च धन्नं रयणं सुवन्नं, तारुण्णरूवाइ जमित्थ अन्नं । विज्जुव्व सव्वं चवलं खु एयं, धरेह भव्वा हियए विवेयं ॥५६॥
पुत्ता कलत्ताणि य बंधुमित्ता, कुडुंबिणो चेव इहेगचित्ता । आउक्खए पाववसा समेए, न रक्खणत्थं पभवंति एए ॥५७॥
जेसिं मणे पावमई निविट्ठा, निव्वाहवित्ती पुण संकिलिट्ठा । कयाऽवि ते हुंति न हिट्ठतुट्ठा, सव्वत्थ पावंति दुहाइ दुट्ठा ॥५८॥
वन्नं वयंता जिणचेइयाणं, संघस्स धम्मायरियाइयाणं । कुणंति भव्वा सुलहं सुबोहिं, अवन्नवाएण पुणो अबोहिं ॥५९॥
अन्नाणया दोसवसाणुभावा, मुणंति तत्तं न हु किं पि पावा । भवंति ते दुक्खदरिद्ददीणा, परम्मि लोए सुहविप्पहीणा ॥६०॥
पुण्णोदएणं नणु कोइ जीवो, भिसं समुज्जोइयनाणदीवो । मोहंधयारप्पसरं दलित्ता, पिच्छेइ निव्वाणपहं पइत्ता ॥६१॥ ॥२१॥
तत्थंतराया बहवे पसिद्धा, कोहाइणो वेरियणा विरुद्धा (समिद्धा)। हरंति ते धम्मधणं छलेणं, को निज्जिणेई नणु ते बलेणं ॥६२॥
पावाई पावा परिसेवमाणा, धम्मं जिणुद्दिट्ठमयाणमाणा । अन्नाणकट्ठे हि कयाभिमाणा, खिवंति अप्पं नरए अयाणा ॥६३॥

न जाइगव्वं हिययम्मि कुज्जा, कुलाभिमाणं पुण नो वहिज्जा । रूवं नवं इस्सरियं अउव्वं, लद्धुं सुबुद्धी न धरिज्ज गव्वं ॥६४॥
अहं खु लोए बलवं तवस्सी, सुयाहिओ वा अहयं जसंसी । लाभेऽवि मंते मुइओ न हुज्जा, तहप्पणो उक्करिसं न कुज्जा ॥६५॥
वालग्गमित्तोऽवि न सो पएसो, जत्थोवइन्नो भुवणम्मि एसो । जीवो समावज्जियपावलेसो, न पाविओ कत्थ य सुक्खलेसो ॥६६॥
सुदुल्लहं पाविय माणुसत्तं, कुलं पवित्तं तह अज्जखित्तं । तत्तो सुणित्ता सुगुरूहि वुत्तं, तुज्झं पमायायरणं न जुत्तं ॥६७॥
बालत्तणं खिड्डपरो गमेइ, तारुण्णए भोगसुहे रमेई । थेरत्तणे कायबलं वमेई, मूढो मुहा कालमइक्कमेइ ॥६८॥
लहुत्तणाओ वि न जेण पुन्नं, समज्जियं सव्वगुणोहपुन्नं । थेरत्तणे तस्स य नावयासो, धम्मस्स जत्थ त्थि जरापयासो ॥६९॥
पुव्विं कयं जं सुकयं उदारं, पत्तं नरत्तं ननु तेण सारं । करेसि नो इत्थ जया सुकम्मं, कहं सुहं जीव लहेसि रम्मं ॥७०॥
लवेण पक्खालियकम्मलेवो, अन्नो जिणिंदाउ न कोइ देवो । गुरू सुसाहू जिणरायवुत्तं, तत्तं च सम्मत्तमिमं निरुत्तं ॥७१॥
पसत्थलेसं पकरंति चित्तं, जे सत्तखित्तेसु ववंति वित्तं । छिंदंति निम्मोहमणा ममत्तं, कुणंति ते जम्ममिमं पवित्तं ॥७२॥
पढित्तु एयं उवएससत्तरिं, सुणंति जिणो परमत्थवित्थरं । तरित्तु ते दुक्खभरं सुदुत्तरं, खेमेण पावंति सुहं अणुत्तरं ॥७३॥

॥ इत्युपदेशसप्ततिकामूलम् ॥

॥ अर्हम् ॥

तपागच्छालङ्कार तपोमूर्ति पूज्याचार्यदेव श्री विजयकर्पूरसूरिभ्यो नमः

खरतरगच्छीय श्री क्षेमराजमुनिविरचिता स्वोपज्ञवृत्तियुता

# ॥ उपदेशसप्ततिका ॥

। नमो गुरुचरणेभ्यः ।

विश्वाभीष्टविशिष्टकार्यघटनासामर्थ्यमत्यद्भुतं, बिभ्राणः शुचिसच्चरित्रविलसच्चित्रैः सदाऽलङ्कृतेः ।
प्रेङ्खत्प्राणिदयामृतेन भरितः सद्वृत्तताशालितः, श्रेयःश्रीशिरसि स्थितः सृजतु शं शान्तीश्वरः स्वर्घटः ॥१॥
श्रेयोराजिसरोजिनीदिनकरा भक्ताङ्गिभद्राङ्कुराः, सर्वाविद्यमहाद्रुसिन्धुरवरा ज्ञानश्रिया बन्धुराः ।
ये भूताः किल भाविनोऽपि भुवने ये वर्त्तमानस्तथा, ते सर्वेऽपि जिनेश्वराः सुखकराः स्युर्देहिनां सेविनाम् ॥२॥

 

वन्दे गणधरवृन्दं विवेकवच्छेकनिर्मितानन्दम् । यच्चरणनमस्करणं निबिडमहाजडिमभयहरणम् ॥३॥
श्री वाग्देवि कुरु प्रसादमसमं यस्मादहं सन्मतिः, स्यां दुर्बुद्धिरपि प्रविणपरिषत्सन्मानदानोचितः ।
किं कृष्णाञ्जनपर्वतोऽपि धवलीभावं भजेन्नाञ्जसा, गौरोदारसुधांशुदीधितिभरैः सम्बन्धमासादितः ॥४॥
सद्गुरुचरणं शरणं कुर्वे सर्वेऽपि यत्प्रसादेन । विद्याविनोदलेशा जायन्ते सफलताभाजः ॥५॥
नो वाचश्चतुरोचिता मम मुखे नो कौशलं पेशलं, किञ्चिच्चेतसि पाटवं न हि सदाचारे विचारेऽप्यहो ।
मौखर्यं रचयन्निहास्मि यदहं धर्मोपदेशच्छलात्तच्चिन्तामणिकल्पसद्गुरुपदद्वन्द्वप्रसक्तेः फलम् ॥६॥
अज्ञानान्धितलोचना न हि जनाः संविद्रते कुत्रचिन्मोक्षाध्वानममानमानविवशाः संसारकान्तारगाः ।
यावन्नो सुगुरूपदेशचतुराग्रण्यः समापद्यते, सत्यस्मिन्निह कौशलं सविपुलं दुर्बोधशास्त्राध्वनि ॥७॥
इह भव्यसत्त्वचेत प्रतिबोधकृते प्रतन्यते मयका । स्वकृतोपदेशसप्ततिकायाः स्पष्टाक्षरा टीका ॥८॥

इह हि भव्यजीवराजीवकाननसमुद्भासननव्यदिनकरादीधितितुल्याया अभङ्गसंवेगरङ्गचङ्गसदिक्षुक्षेत्रपरंपरापरिवर्धननिर्मलजलकुल्याया अगण्यगुणश्रेण्याधारजनमनोहारप्रसरत्पुण्यप्राग्भारप्रोत्तुङ्गशृङ्गमहाविहारशिरःपताकिकायाः श्री-उपदेशसप्ततिकाया वृत्तिर्विरच्यते । तस्याश्च प्राकृतमयमिदमादिकाव्यं तद्यथा—

तित्थंकराणं चरणारविंदं, नमित्तु निसेससुहाण कंदं ।
मूढो वि भासेमि हिउवएसं, सुणेह भव्वा सुकयप्पवेसं ॥१॥

**व्याख्या**—अहो भव्या यूयं शृणुत, अहं हितोपदेशं भाषे कथयामि । किंभूतोऽहं ? मुग्धोऽपि मुह्यतीति मुग्धः हेयोपादेयबुद्धिदुर्विधोऽपि । हितश्चासावुपदेशश्च हितोपदेशस्तं तथा । किंभूतं हितोपदेशं ? सुकृतप्रवेशं सुष्ठु कृतं सुकृतं तस्य प्रवेशो यस्माद्येन वा तं तथा । न हि हितोपदेशसमाकर्णनमन्तरेण कस्यचित्सुकृते शेमुषी सन्मुखीनतामस्कन्दति । किं कृत्वा ? चरणारविन्दं नत्वा नमस्कृत्य चरणावेवारविन्दं चरणारविन्दं । केषामिति साकाङ्क्षं वचनं स्यादतस्ती-

॥३॥ र्थंकराणामिति प्रोक्तं, तीर्थं हि द्रव्यभावभेदाद्विधाऽभ्यधायि । तद्यथा—"**दाहोपशमस्तृष्णाविच्छेदः** [illegible] **अर्थैस्त्रिसृभिर्बद्धं तत एव द्रव्यतस्तीर्थम् ॥१॥ सम्यग्दर्शनचरणज्ञानावाप्तिर्यतो भवेत् पुंसाम् । आचार्यात्प्रवचनतो वाप्येतद्भावतस्तीर्थम् ॥२॥**" तथा द्रव्यतीर्थं गङ्गापगाप्रयागादि, तत्र गतानां हि सत्त्वानां बाह्यमलप्रक्षालनं तृष्णाप-नोदश्च स्यात्, न पुनः कर्मकालुष्यप्रक्षयः संपद्यते । भावतीर्थं तु सम्यग्ज्ञानचारित्रात्मकं, तदापन्नानां पुण्यात्मनामात्य-न्तिकी दुष्टाष्टकर्ममलापगमरूपा सिद्धिः संजायतेति । तदात्मकं तीर्थं कुर्वन्तीति तीर्थङ्करास्तेषां भूतभविष्यद्भावितीर्थ-कृतां पदाम्भोजं प्रणम्य । किंभूतं तत् ? निःशेषाणि समस्तानि यानि मनुष्यस्वर्गापवर्गादिसौख्यानि तेषां कन्दो मूल-कारणं, यथा कन्दाद्वनस्पतीनामुत्पत्तिः संपद्यते । तथा भगवत्पदोपास्तिरेव समस्तसुखस्तोमस्य हेतुरिति युक्तमुक्तं । ॥३॥

**निसेससुहाण कंदं** इत्यतस्तच्चरणप्रणमनमादौ श्रेयस्करं । ननु यदुक्तं मूढात्मापि सन्नहं हितोपदेशं वच्मि तत्कथं घटा-मटाट्यते ? ये सर्वथा यथाजातास्तेषां धर्मोपदेशप्रथनसामर्थ्यं व्यर्थमेव, ये तु स्वयंबुद्धास्त एव परप्रबोधसाधकाः स्युर्नान्येऽनभिज्ञाः । तन्न, किञ्चिन्मात्रं वेत्तृत्वं गुर्वनुग्रहान्मय्यप्यास्ते, परं तत्सदप्यसत्कल्पं, सर्वज्ञत्वाभावात्, सर्ववेत्ता तु

भगवानेव न हि तत्परः कश्चिन्नरो विपश्चिद्भावमाप्नुयात् । न हि सहस्रकरमन्तरेण मणिप्रदीपादिर्विश्वविश्वंभराभावभरावभासप्रागल्भ्यमभ्यस्यतीति युक्तमुक्तं गर्वापहारव्याहारोच्चारणं कवेः । अथ यदेवं व्याकृतं–भो भव्या यूयं हितशिक्षां कर्णे कुर्वन्तु" तदप्यसङ्गतं, यतो जगत्प्रभुर्निर्विशेषशेमुषीकतया भव्याभव्यजीवपर्षत्समक्षं दक्षं प्रावृट्समयसमुन्नमत्सजलजलधरमधुरतरवाण्या योजनावधिविस्तारिण्या सद्धर्ममाख्याति, न च भव्याभव्ययोर्विषये किञ्चिद्विशेषमाधत्ते । सत्यं, भगवानविशेषवानेव धर्मोपदेष्टा तथाप्येतदेवमन्तरमजनिष्ट–ये भव्या जीवास्त एवार्हत्समुपदिष्टसर्वान्यधर्मगरिष्ठविशिष्टनिःश्रेयससौख्यसाधनपटिष्ठजीवरक्षणाद्यक्षूणहितोपदेशसमाकर्णनाधिकारिणः । तदनु च यथातथश्रेयः–पुरीपथानुसारिणः समयसमवायप्रतिपादितपवित्रचारित्रक्रियाकलापकारिणः । तथा ये चाभव्यास्ते सम्यक् श्रुतेऽपि श्रीमदार्हते सर्वसत्त्वहिते श्रुतेऽपि नैकान्तेन रुचिधर्त्तारः । तथा च न सम्यक् तपःसंयमानुष्ठानानुष्ठातारः । ततस्तेऽर्हद्धर्मेऽनधिकृता एव प्राकृता इव गौरवार्हनागरिकव्यवहारे । ततस्तेषामुपेक्षैव श्रेयस्करी । यदि सर्वसत्त्वोपकारस्रष्टरि भगवत्यपि समुपदेष्टरि न ह्यमीषामन्तःकरणे सदुपदेशलेशप्रवेशावकाशस्तदा तदीयप्राग्भवानन्त्यसंचितात्यन्तदुर्भेद्यावद्यानामेवान्तरायविस्फूर्जितं । न हि निर्दोषपोषस्य श्रीजिनेशस्य कश्चिद्दोषसंश्लेषः । यदुक्तं स्वोपज्ञमेघद्वात्रिंशिकायां–"**विश्वत्रातरि दातरि त्वयि समायाते प्रयाते महा—भीष्मग्रीष्मभरे प्रवर्षति पयःपूरं घनप्रीतिदम् । दुःखाच्छुष्यति यद्यवासकवनं पत्रत्राणाबाधिका, यद्दृक्छिन्नं पलाशशाखिनि महत्तत्कर्मदुश्चेष्टितम्** ॥१॥" अतः सुष्ठूक्तं भव्यानामेव धर्मश्रवणामन्त्रणं । उक्तं च–"**संक्रामन्ति सुखेन हि निर्मलरत्ने यथेन्दुरविकिरणाः । भव्यहृदये तथैव हि विशन्ति धर्मोपदेशभराः**

॥१॥" अर्हं तीर्थकृतां पदाम्भोजं नत्वा हितोपदेशं कथयामि, भो भव्या यूयं शृणुतेति संटङ्कः। इत्थमिन्द्रवज्राच्छन्दोरूपप्रथमकाव्यार्थः।

**सेविज्ज सव्वन्नुमयं विसालं, पालिज्ज सीलं पुण सव्वकालं ।**
**न दिज्जए कस्स वि कूडआलं, छिंदिज्ज एवं भवदुक्खजालं ॥२॥**

**व्याख्या**–हितोपदेशक्रमश्चायम्–सेवेत आश्रयेत सर्वज्ञमतं सर्वं भूतभवद्भाविवस्तुतत्त्वजातं जानन्ति द्रव्यपर्यायात्मकतयेति सर्वज्ञास्तेषां मतं शासनं सर्वज्ञमतं। किंभूतं तत् ? विशालं विस्तीर्णं वि विशेषेण सर्वान्यशासनेभ्यः सर्वोत्कृष्टतया शालते शोभत इति वा विशालं । न हि सर्वविच्छासनसमुपासनप्रधानधनप्रवर्द्धनमन्तरेणासङ्ख्यातदुःखजातप्रपातकपातकसंघातजनितात्यन्तदौर्गत्यरौद्रदारिद्र्योपद्रवप्रक्षयः कदाचित्संपनीपद्यते। न हि रत्नाकरसेवनं क्वापिनिष्फलं। तथा पालयेच्छीलं सर्वकालं निरन्तरं, अर्हन्मतोपास्तेरेतदेवाविकलं फलं, यत् साधुभिः श्राद्धैर्वा श्रद्धोद्बन्धुरतया सर्वदा सुशीलवत्तया स्थीयते, न पुनर्निश्चलनिर्मलशीलशैथिल्यमाद्रियते, "अद्यात्मा मुत्कलोऽस्तु कल्ये पुनर्नियमकष्टानुष्ठानादि पालयिष्यते" नैवं कदाचिच्चेतसि चिन्तनीयं चेतनावद्भिः। दृढधर्मिणामिदमेवाविकलं जीवितव्यफलं, यत्स्वकीयशीलं निष्कलङ्कतया पाल्यते रोहिण्यादिवत् तथा च **"न दिज्जए"** त्ति न दीयते कस्यापि कूडं आलं कूटकलङ्क इति संटङ्कः। एवं क्रियमाणे भवदुःखजालं छिन्द्यात्, जन्तुरित्यनुक्तोऽपि कर्त्ताध्याहर्त्तव्यः। भवनं भवः संसारस्तस्य दुःखमेव जालमिव जालं, यथा जालान्तःपतितः शफरः सुतरां दुःखी स्यात्, तद्धि विच्छिद्य यदा बहिर्निर्याति तदैव सुखी नान्यथा,

तथैव जन्तुर्भवजालनिर्दलने क्षम एव सौख्यभाक्, न चेतरथा वृथाकल्पानल्पविकल्पाकुलप्रबलालजालप्रायान्यमतोपासनप्रयासैरिति । अनेन श्रीजिनमताराधनशिक्षाप्रधानं जन्तोरात्यन्तिकानन्तसातजातसंपादनं प्रोक्तं । तथा चोत्तरोत्तरसुखलाभोऽस्मिन् काव्ये दर्शयाञ्चक्रे । यो जैनमतासक्तचेतास्तस्योज्ज्वलशीलप्रतिपालनेनात्यन्तं विश्वश्लाघनीयत्वं संपत्स्यते, अथ कुशीलश्चेत् सम्पन्नस्तर्ह्यवश्यमन्यस्य कलङ्कदायी न जाघटीति ज्ञाततत्त्वतयाऽस्य मृषाभाषाविरक्तत्वादिति-श्रेयस्करीयं हितशिक्षा दक्षात्मनामिति काव्यतात्पर्यार्थः ॥२॥

अथ श्रीसर्वज्ञमतश्लाघाधिकारः—

कंचणगिरी गिरीणं जहा गुरू सुरतरू तरूणं च । हत्थीण हत्थिमल्लो चिंतारयणं च रयणाणं ॥१॥
सरियाणं सुरसरिया जहोसहीणं च धम्ममिह धन्नं । तह सव्वऽन्नमयाणं सव्वन्नूणं मयं गरुयं ॥२॥
अइसीअलमहुररसं पाविय अइरामरत्त सुपवित्तं । कयपुन्नाणं सुलहं जिणमयममयं व पडिहाइ ॥३॥
सन्नाणचरणदंसणरयणुच्चयकंतकंतिरेहिल्लो । न हु मिल्हियमज्झाऊ जिणमयरयणायरो जयउ ॥४॥
न हु पावइ अत्थमणं संतावं कुणइ नेव कस्सावि । सच्छायकरुक्करिसो जिणमयसूरो अउव्वयरो ॥५॥
कुवलयमुब्भासंतो निव्वणओ अखंडिओ तमसा । ण हु सुन्नपहविलग्गो अहो णवो अरिहमयचंदो ॥६॥
अमई कहं कहेउं सक्को तस्सेस गुणगणमणप्पं । जस्साराहणवसओ पत्तं चोरेहिं साहुत्तं ॥७॥
इत्थीसिसुगोमहरिसिहच्चाइअकिच्चकारिणोऽणेगे । कूरा वि हु पडिबुद्धा जिणमयमाहप्पओ अहह ॥८॥

दुग्गइदुहसयवारण सुग्गइसुहकारणं च सत्ताणं । न हु जिणमयाऊ अन्नं वट्टइ भुवणत्तए वि अहो ।।९।।
जह सूराओ न परो सूरो भुवणंधयारसंहरणे । तह दुस्सहदुहदलणो जिणधम्माओ न दुज्ज परो ।।१०।।
निरेण विणा तण्हा अन्नेण विणा छुहा न जाइ जहा । एगंतियमिह जाणह नेव सुहं जिणमएण विणा ।।११।।
तम्हा जिणधम्मामयसेवा सव्वायरेण कायव्वा । जम्हाणेगे भविआ अयरामरभावमावन्ना ।।१२।।

---

## ।। केसरी चौर–कथा ।।

असाधुः साधुतां भेजे जिनधर्मप्रभावतः । यथाहि केसरी चौरः केसरीवौजसाऽजनि ।।१।।
सकामनरनारीकं पुरं **कामपुराख्यया** । आस्ते तत्रावनीनेता विजयी **विजयाह्वयः** ।।२।।
**सिंहदत्तो**ऽवसत्तत्र श्रेष्ठी श्रेष्ठगुणैकभूः । तदङ्गजः **केसरीति** जज्ञे शिक्षितचौरिकः ।।३।।
तेनान्यदोर्वीड् विज्ञप्तो महाराज मदङ्गभूः । अनार्यश्चौर्यकृज्जातः पातकोदयसंभवात् ।।४।।
निर्दूषणोऽस्म्यहं नेतरस्मिन् स्तेयं प्रकुर्वति । इत्युक्त्वा विनिवृत्तोऽसौ राज्ञाऽथ स मलिम्लुचः ।।५।।
देशान्निष्कासयामासे सोऽगाद्देशान्तरं द्रुतम् । विशश्राम सरस्येकस्मिन् शीतलजलोर्मिले ।।६।।
अचिन्तयत्तरुच्छायाऽऽसीनोऽसौ दौर्मनस्यभाक् । अद्य यावन्मयाऽपायि विना चौर्यं पयोऽपि न ।।७।।
धिङ् मामद्याम्बु तत्पेयमित्यालोच्य चिरं हृदि । अञ्जलिभ्यां पपिर्वारि शीतलं जिनवाक्यवत् ।।८।।

उपदेश-

तत्र स्नात्वा स भुक्त्वा च यानेदं फलसंचयम् । वृक्षारूढश्चिन्तितवान् दस्युरात्मनि निर्भरम् ॥९॥
कथं यास्यति हा मेऽद्य दिनं चौर्यविनाकृतम् । किञ्चित्कस्यापि चेद्वस्तु मिलेत्तच्चोरिकां क्रिये ॥१०॥
इतश्च कोऽपि विद्यावानुत्ततारम्बराम्बरः । पादुकाद्वयमुन्मुच्य प्रविवेशाम्भसोऽन्तरे ॥११॥
॥८॥ स्नानं निर्माय चास्वाद्य विशदाम्भोऽभवत्सुखी । चित्ते च निश्चिकायेति योग्यसौ भूलगत्पदः ॥१२॥
प्रविष्टः सरसो मध्ये दृष्टः स्पष्टमसौ मया । ममायं समयः स्तैन्यकर्म कर्तुमथ द्रुतम् ॥१३॥
अस्याकाशगतेर्हेतुर्निश्चितं पादुकाद्वयी । नान्यच्चिदानमस्यास्तीति निश्चित्य स्वचेतसि ॥१४॥
अपहृत्य क्षणादेतामुड्डीनो गगनाध्वना । पक्षिवद्यातवान् वेगान्निश्चलाः स्युर्न तस्कराः ॥१५॥
पादुकारूढ एवातिवाह्य क्वापि दिनं समम् । निश्यागान्निजकं धाम जनकं चेत्यतर्जयत् ॥१६॥
रे दुरात्मँस्त्वया राज्ञो मत्स्वरूपं न्यवेदि किम् । त्वामहं मारयिष्यामीत्युक्त्वा निष्कृपधीरधीः ॥१७॥
जघान पितरं शीर्षे विपन्नमवमुच्य तम् । अहार्षीदिभ्यवेश्मभ्यो नानाधनसमुच्चयम् ॥१८॥
यामत्रयं निशीथिन्याः स्थित्वाऽसौ नगरान्तरे । तुरीयप्रहरे याति पुनस्तत्र सरोवरे ॥१९॥
दिवाऽरण्यान्तरास्थाय रात्रौ यात्वा पुनः पुरम् । मुषित्वाऽभ्येति तत्रैव विगोप्य नगराङ्गनाः ॥२०॥
कियानपि ययौ कालः कुर्वतोऽस्यैवमन्वहम् । बिभ्युर्निशागमाल्लोकाः शोकार्त्ता अन्तकादिव ॥२१॥
राज्ञा तद्वृत्तमाकर्ण्य पुरारक्षः प्रजल्पितः । रे तूर्णमानय स्तेनमेनमादेशमाचर ॥२२॥

सप्त

॥८

बहुशः शोधयित्वाऽसावाचख्यौ क्षितिपं प्रति । स्वामिन्न स धराचारी वियद्गामीव लक्ष्यते ॥२३॥
असाध्यस्यैव दुर्व्याधेः प्रतीकारोऽस्य दुष्करः । ततः परोपकारोत्कहृदयः सदयो नृपः ॥२४॥
स्वयं प्रैक्षिष्ट तं दुष्टमल्पात्मीयपरिच्छदः । ग्रामारामसुरागारवापीकूपास्पदादिषु ॥२५॥
परं नैवाप पादस्य तस्य वार्ताऽपि प्रभुः । अभव्य इव मोक्षाप्तिमनल्पायासवानपि ॥२६॥
ततो राजा जगामाशु पुरोद्यानं सुदूरगम् । बन्धुरं गन्धमाघ्राय चम्पकादिसुमोद्भवम् ॥२७॥
गच्छन् ददर्श वेश्मासौ चण्डिकायाः पुरःस्थितम् । तन्मूर्त्तिमर्च्यमानां च कुसुमैश्चन्दनैर्घनैः ॥२८॥
अथार्चकमुपायातं पप्रच्छ स्वच्छधीर्नृपः । विस्मयापन्नहृत्तस्य वस्त्रं वीक्ष्य विशेषतः ॥२९॥
कोऽयं पूजाविशेषोऽद्य देवार्चक निवेदय । केनार्पितानि वासांसि महांसीव सुधाद्युतेः ॥३०॥
ततोऽवादीदयं स्वामिन्नहमायामि नित्यशः । अर्चितुं देवतामेतामभिप्रेतार्थदायिनीम् ॥३१॥
प्रतिप्रातः पुरः सुर्याः स्वर्णरत्नान्यहं लभे । तत्र त्रैकालिकीं पूजां कुर्वे प्रत्यहमादरात् ॥३२॥
राज्ञाऽज्ञायि ततोऽवश्यमचार्थं कोऽपि तस्करः । समेत्य रत्नस्वर्णाद्यं देव्यग्रे ननु मुञ्चति ॥३३॥
नान्यथा संभवत्येवं विज्ञायेति महीशिता । स्वावासमासदत्तूर्णं दिनकृत्यान्यसाधयत् ॥३४॥
रजन्यामागमच्चण्डीगृहं दण्डी भटान्वितः । दूरं दूरतरं शूरान् संस्थाप्य स्वयमुद्यतः ॥३५॥
चैत्यान्तस्तस्थिवान् स्तम्भान्तरे स्वां गोपयँस्तनुम् । अत्रान्तरे समायातः पारिपन्थिककेसरी ॥३६॥

॥९॥

पादुकायुगमुन्मुच्य बहिरन्तर्विवेश सः । प्रधानरत्नैर्देव्यर्चामाचरच्चतुरोचिताम् ॥३७॥
स्वामिनि त्वत्प्रसादेन निर्विघ्नं चौर्यमस्तु मे। इत्युदीर्य बहिर्यावद्ययौ तावन्नृपोऽवदत् ॥३८॥
रुद्धद्वारः कथं याता रे जीवँस्तस्कराधम । तर्जितोऽपीत्यसौ वेगान्निर्जगाम बहिर्भुवि ॥३९॥
नृपाभिमुखमुत्तालः पादुकाद्वयमात्मनः । निक्षिप्तवान् क्षणादेष विज्ञाय समयोचितम् ॥४०॥
तद्व्यथार्त्ते नृपे जाते जीवन् सोऽहं प्रयाम्यहो । निःससारेति जल्पन् स चण्डिकालयमध्यतः ॥४१॥
स्वस्थीभूतेऽथ भूनाथे याति यात्येष पातकी । तूर्णं बध्नन्तु धावन्तमहो धावत धावत ॥४२॥
पूत्कुर्वन्त इति क्ष्माभृद्भटाः शस्त्रबलोद्भटाः । अधावन् केटकेऽमुष्य मार्जारस्येव कुर्कुराः ॥४३॥
पादुके परिधायाथ क्षितिभुग्गगनाध्वना । निगृहीतुमनाश्चौरमन्वगच्छद्विहङ्गवत् ॥४४॥
लब्धोऽप्यहो गतः स्तेनस्तदेषा महती त्रपा । साम्प्रतं निगृहीष्यामीत्यन्तर्विहितनिर्णयः ॥४५॥
इतस्ततश्चरँश्चौरः पदानां गोपनाकृते । पक्षीव लूनपक्षः सन् मनसीति व्यचिन्तयत् ॥४६॥
यदासीत्पादुकाद्वन्द्वमर्घ्यं तद्गमितं मया । मुधा कुदन्धनेत्रेण क्व नश्याम्यधुना हहा ॥४७॥
राजा व्योमाध्वनाऽऽयाति तद्भटाश्च रणोद्भटाः । पापद्रुः फलितो मेऽद्य यः सिक्तश्चौरिकाम्बुना ॥४८॥
उपस्थितं मे मरणं शरणं नास्ति सम्प्रति । मनाग्नाराधितो धर्मः पिता व्यापादितस्तथा ॥४९॥
इतश्च भ्रमता तेन ग्रामारामे मुनीश्वरः । दृष्टः शुश्राव तद्वाक्यं श्रवणामृतसोदरम् ॥५०॥

आत्मध्यानं च समता तथा निर्ममता मता । सद्यः पातकहर्त्री स्याद्दीपिकेव तमःस्थितेः ॥५१॥
अर्हन्मतोपास्तिमतिः श्रुतिः श्रौती श्रुतिद्वये । अवद्योच्छेदिनी सद्यो वृक्षस्येव कुठारिका ॥५२॥
सिद्धेः सुखमसाध्यं यद्याश्च स्वःपदवीश्रियः । यच्च मानुष्यकं सौख्यं तत्साम्येनैव साध्यते ॥५३॥
॥११॥ श्रुत्वैतत्सुष्ठु तुष्टात्मा भेजे वैराग्यवासनाम् । स्थिरीकृत्य निजस्वान्तं सर्वेषु समतामधात् ॥५४॥
रे चेतश्चापलं मुञ्च सौहार्दं भज जन्तुषु । परस्त्रीधनधान्येषु मा वह स्पृहयालुताम् ॥५५॥
सर्वेषु भवभावेषु निर्ममत्वमुरीकुरु । एवं प्रध्यायतस्तस्य शुक्लध्यानैकचेतसः ॥५६॥
शेषरात्रिर्व्यतीयाय समभूद्भास्करोदयः । उत्पेदे केवलज्ञानमज्ञानतिमिरात्यये ॥५७॥
दुष्कर्मद्विरदश्रेण्या व्यपरोपणकर्मणि । केसरी केसरीवाभूत् प्रभूतोद्भूतसाहसः ॥५८॥
यथेह कतकक्षोदादच्छता मलिनाम्भसः । तथैव सद्ध्यानवशादात्मा कालुष्यमुज्झति ॥५९॥
सर्वत्रान्वेषयन्नत्रान्तरे क्षितिप आगमत् । दिश्येकस्यां भटाश्चापि रे रे निघ्नन्तु तस्करम् ॥६०॥ ॥११॥
इत्युच्चैः पूत्कृतिपराः प्रत्यक्षा यमकिङ्कराः । आजग्मुरथ तस्यर्षेः केवलोत्पत्तिवेदिनः ॥६१॥
द्वितीयस्यां दिश्यमराः खेचराः किन्नरास्तथा । चिकीर्षवस्तन्महिमामम्बरे स्वविमानगाः ॥६२॥
यावत्तत्पार्श्वमासीनाः प्रमोदभरनिर्भराः । ततश्च केसरी साधुर्दन्तद्युत्या दिशः समाः ॥६३॥
द्योतयन् देशनां चक्रे स्वर्णाब्जस्थो मरालवत् । चञ्चच्चरणविभ्राजी जीवराजीवसन्मनाः ॥६४॥

उपदेशावसानेऽथ पृष्टो राज्ञा स केवली । भगवन् कुत्र ते चौर्यवृत्तिः साधुस्थितिः क्व च ॥६५॥
क्व चायं केवलोद्बोधः सर्वसत्त्वसुखङ्करः । व्याजहार ततः साधू राजन्नार्यशिरोमणे ॥६६॥
तादृग्दुष्कर्मकर्त्ताऽहं यद्वृतः केवलश्रिया । तदेतत्साधुगीर्लब्धसाम्यावस्थाफलोर्जितम् ॥६७॥
महांहोराश्यरण्यानी विषयोद्यत्तृणाङ्कुरा । दह्यते दहनेनेव क्षणात्सामायिकेन वै ॥६८॥
सम्यक् सामायिकासेवा देवादिसुखदायिनी । सुधियां दुधियां चापि पापव्यापव्यपोहिनी ॥६९॥
श्रुत्वेति हृष्टहृद्राजा वैरं निर्मूल्य मूलतः । प्रणम्य शिरसा साधुमाससाद निजं गृहम् ॥७०॥
चिरकालं विहृत्योर्वीमण्डलं भव्यमण्डलम् । प्रबोध्य सिद्धिसौधाग्रवासी जज्ञे स केसरी ॥७१॥
सार्वज्ञशासनोपासनोदारफलमीदृशम् । धन्या विज्ञाय तत्सेवाहेवाकित्वं विधीयताम् ॥७२॥

॥ इति श्रीसर्वज्ञमतसेवायां प्रथमपदोदाहरणम् ॥

अथ द्वितीयगाथायाः **"पालिज्ज सीलं पुण सव्वकालं"** इति द्वितीयपदमद्वैतात्यन्तामलशीलगुणाविर्भावकं सोदाहरणमुद्भाव्यते–पालयेच्छीलं परयोषिज्जातिनिवृत्त्यात्मकं । योषितस्तु परपुरुषनिषेधात्मकं । पुनर्वारं वारं सर्वकालं निरन्तरमिति पदाक्षरगमनिका । पूर्वं तावत्सर्वज्ञमतोपासनोपदेशः सूचितस्तदनु पुनः शीलं पालनीयमित्यभिहितं । युक्तं हि जात्यजातरूपमुद्रिकोपरि रत्नयोजनं श्रीजैनमताराधनं तावत्सर्वधर्मेभ्यः श्रेष्ठतमं । तदाराधकः श्रावकः पुण्यप्रभावकश्चेच्छीलसंपन्नः स्यात्तदातीव प्रशंसास्पदतामास्कन्दतीति तात्पर्यार्थः ॥

दुर्लभमिह मानुष्यं तत्रापि हि निर्मलं कुलं श्रेयः । तत्रापि रूपसंपत्तस्यामपि जिनमतावाप्तिः ॥१॥
तत्रापि शीलमुज्ज्वलमुदितं मनुजेषु चापि नारिषु । तत्पालने प्रयत्नः कार्यश्चातुर्यवर्यनरैः ॥२॥
शीलेन विना न जनाः शोभाविर्भावभाजनं भुवने । वेगविहिनास्तुरगास्तुङ्गा अपि रङ्गदा न स्युः ॥३॥
रविमण्डलेन गगनं वनं यथा श्लाघ्यते फलभरेण । यद्वत्सलिलेन सरस्तथाङ्गिनां जन्म शीलेन ॥४॥
शीलालङ्कृतिधारी स्फारीभवदुज्ज्वलोरुतरसुयशाः । पञ्चजने स्यान्मान्यो धन्यो नान्योऽवनौ तस्मात् ॥५॥
स्त्रीजातौ प्राधान्यं विशेषतः शीलभूषणस्यैव । सुमहत्यपि वनवीथी न निष्फला श्लाघ्यतामेति ॥६॥
अत्रार्थे रोहिण्या अद्रोहिण्याः कुटुम्बवर्गस्य । संश्रृणुत भविकलोका अस्तोकानन्दतश्चरितम् ॥७॥
अस्त्यत्र भरतमध्ये स्वर्द्धयैव स्वर्गतुल्यमभिरामम् । पाटलिपुत्राख्यपुरं पुरं न तादृक् पुरो यस्य ॥८॥
यत्र धनी वसति घनीभवन् जनो वर्षणेन दानस्य । श्यामीकुरुते न मुखं स मनागप्येतदाश्चर्यम् ॥९॥
यत्रोत्तुङ्गाश्चङ्गाः श्रीअर्हच्चैत्यराजयो रेजुः । उत्तममनोरथा इव दूरोज्झितपापकालुष्याः ॥१०॥
मित्रोद्योतविधातरि स्नेहेन विनाऽप्यहो लसद्रूपे । यस्य प्रतापदीपे पतङ्गवत् पतति रिपुवर्गः ॥११॥
सज्जनजनितानन्दो नन्दो नामास्ति तत्र भूमिपतिः । रतिपतिरिव मूर्त्तिधरो यः सृष्टः शंभुना प्रसन्नेन ॥१२॥
श्रेष्ठी तत्र धनावहनामा कामाभिरामरूपश्रीः । अश्रीर्जगाम दूरं यत्सदनाच्छर्वरीव रवेः ॥१३॥
सश्रीकः कमलापतिरिव शिववत्सद्वृषोल्लसत्तेजाः । न जनार्दनः कदाचिन्नोग्रश्चित्रं महत्तदहो ॥१४॥

॥१३॥

जायाऽजनि निर्माया सुन्दरकाया शुभे कृतोपाया । शीलगुणैः सच्छाया रोहिण्यभिधा सुधाप्राया ॥१५॥
पररमणरमणविषये न मनसि यस्याः कदाचिदभिलाषः । किमहो मरालिकायाः कलुषाम्भःसेवनौत्सुक्यम् ॥१६॥
श्रेष्ठी [illegible] गुणवतीं सतीं पृष्ट्वा । विभवार्जनस्य हेतोर्नगरान्निरगादसौ वेगात् ॥१७॥
संपद्यते न विपुला देशान्तरमन्तरेण किल कमला । इति निश्चित्य स चित्ते वित्ते विहितोद्यमः समभूत् ॥१८॥
तत्प्रभृति निकृतिरहिताऽवहिता स्वहितार्थसाधने साध्वी । विचचार चारुवृत्त्या सदाचारेण चार्वङ्गी ॥१९॥
नोद्भटवेषं कुरुतेऽलङ्कारं स्फारमपि न परिधत्ते । भक्षयति न ताम्बूलं न मज्जनं नाञ्जनं च दृशोः ॥२०॥
न हि संस्कुरुते वेणीमेणीनयना न सानुरागतया । पुरुषेण सहालापं कुरुते सुरतेच्छया रहिता ॥२१॥
याश्च कुशीला महिलाः सकलास्ताः परिहरत्यसौ दूरे । शुचिरुचिशीलालङ्कृतिवती सती तिष्ठति सुखेन ॥२२॥
जनयन् सरसीशोषं पोषं सवितुः प्रतापपूरस्य । संवर्द्धयंश्च दिवसान् रजनीयामान् लघूकुर्वन् ॥२३॥
देहेषु देहभाजां सृजन्नजस्रं प्रभूतपरितापम् । पिशुन इवोद्वेगकरः प्रससार ग्रीष्मसमयोऽथ ॥२४॥
रन्तुमना उद्याने तदाऽन्यदा मेदिनीपतिर्नन्दः । स्वच्छोज्ज्वलवेषधरः शशधरवत्प्रीतिदः पुंसाम् ॥२५॥
मुक्ताकलापनिर्मलकलावलीमञ्जुलश्रियं कलयन् । पौरचकोरश्रेणीनयनानन्दोदयं तन्वन् ॥२६॥
दीप्तसुधादीधितिवत्सौम्यगुणाधिक्यबन्धुरतरश्रीः । शुभ्राभ्रहर्म्यनगराम्बरान्तरान्निर्जगाम बहिः ॥२७॥
पश्यन् विस्मेरदृशा कृशानुवद्दीप्तिभृत् पुरः कुतुकम् । प्रस्वेदमिश्रगात्रां वातायनमाश्रितां तन्वीम् ॥२८॥

मूर्तिमतीमिव देवीमुर्वीतटमागतां शुभैः पुंसाम् । तरुणगणचित्तहरिणीं ददर्श सो रोहिणीं तरुणीम् ॥२९॥
युवजनचेतःपुष्पप्रहारमल्लीमनङ्गपुष्पवल्लीम् । दृष्ट्वा दृष्ट्या तामतिहृष्टात्मा समजनिष्ट नृपः ॥३०॥
एषा यदा कथमपि यदि मद्गृहमेति रतिरिवोदारा । स्फारा भवति तदानीमतिनन्दिता भोगसामग्री ॥३१॥
किमुपवनैः किमु भवनैः सयौवनैः किं धनैस्तथा स्वजनैः । यदि न मिलति ललिताङ्गी नयनद्वितयाजितकुरङ्गी ॥३२॥
॥१५॥ इति चिन्तयन् स्वचित्ते मत्तेभ इवातिदुर्मदाक्रान्तः । शीतलघनगहनेऽपि द्विगुणं सन्तापमाप नृपः ॥३३॥
वेश्माजगाम कामार्दितस्ततः सत्वरं स पापमनाः । न गृहे न बहिर्वाऽपि हि सुखायते रागवशगानाम् ॥३४॥
पापप्रकृतिकामथ समाह्वयद्दूतिकामकार्यपराम् । नरकाध्वदूतिकामिव स महीमघवा भवाभिमुखः ॥३५॥
शृणु सुश्रोणि मदुक्तं वचनं न च निश्चयाद्विभेतव्यम् । न हि रोहिणीं विना मे मनोरतिः स्फातिमुपयाति ॥३६॥
विन्ध्याचलवनवीथीमिव हस्ती मालतीमिव भ्रमरः । चक्षुर्विकलो दृष्टिं जलधरवृष्टिं शिखण्डीव ॥३७॥
विद्यामिव सद्विद्यामनवद्यामात्मनः स्थितिं साधुः । तद्वत्स्मरति रतिप्रतिमूर्तिं तामनिशमात्मा मे ॥३८॥
ततो मदीयमङ्गं तद्विरहोष्मभीष्मतापेन । कुरु शैत्यपाटवमिति तत्संयोगामृतासिक्तम् ॥३९॥
आर्यमनार्यं वेदं यशःप्रदं वाऽयशःप्रदं विश्वं । नैवं मनसि विचार्यं कार्यं कार्यं न विस्मार्यम् ॥४०॥
इति वक्तरि भूभर्तरि हृदि हृष्टाऽवदत् सातिपापिष्ठा । न हि किञ्चिदसाध्यं मे कियदेतत्कृत्यमल्पतरम् ॥४१॥ ॥१५॥
रम्भा दम्भारम्भादपि मे तव जायते सुलभा भोः । किं पुनरेषा नारी तृणायते मत्पुरस्तूर्णम् ॥४२॥

मन्त्रैरपि यन्त्रैरपि तन्त्रैरथ कार्मणैर्महाप्रगुणैः । स्ववशीकृत्य त्वरितं दासीमिव ते करिष्येऽहम् ॥४३॥
नरपमि हषत्कठोरं स्ववचनरचनाम्बुना विभिद्याहम् । कुर्वे द्विधा मुधा तद्बलमबलायाः कियन्मात्रम् ॥४४॥
इत्याख्यायादायालङ्कारस्फारहारवस्तूनि । रोहिण्यागारमसावुपेत्य सविकारमिदमूचे ॥४५॥
रूपं तेऽप्रतिरूपं लावण्यमगण्यमङ्गमतिचङ्गम् । रम्भागर्वारम्भापहारि सौन्दर्यमनिवार्यम् ॥४६॥
दयिते गतेऽन्यदेशं क्लेशं विरहोद्भवं कथं सहसे । सद्भोगयोगशून्यं नृजन्म वन्ध्याङ्गजप्रायम् ॥४७॥
लोभाभिभूतचित्तो वित्तोपार्जनकृते वणिग्लोकः । बम्भ्रमते पृथिव्यां न तद्गृहिण्यः सुखिन्यः स्युः ॥४८॥
वणिग्भ्यः खलु वर्ण्याः पुण्यातिशयादवाप्ततारुण्याः । अभिलषितरमणरमणाद्याः सुखमिह भुञ्जते स्वैरम् ॥४९॥
भवतीमतिरूपवतीमिच्छति भूमिपतिः सुदति नन्दः । सर्वा अवरोधवधूरवधूय समृद्धलावण्याः ॥५०॥
किमिदं विफलीकुरुषे सखे सखेदेन जीवितव्येन । निजरूपयौवनश्रियमपास्य कान्तं मनःकान्तम् ॥५१॥
धन्याऽसि त्वं तरुणीवर्गे स्वर्गेऽपि यादृशी नान्या । यद्रूपगुणावर्जितचेता नेता भुवः समभूत् ॥५२॥
रूपं यस्य न तादृग् न दोर्बलं वैभवं न चाप्यतुलम् । न हि भोगयोगसंपन्न महत्त्वं किमपि न च सत्त्वम् ॥५३॥
कृपणेन तेन किमहो वणिजा गुणजातमुक्तदुर्मतिना । दूरस्थितेन तेन हि कः प्रतिबन्धस्तवेदानीम् ॥५४॥
इत्यादिकिंवदन्तीमिह निगदन्ती ह्यतीव निर्व्रीडा । निर्भीकाऽलङ्काराद्यं वस्तु समार्पयत्तस्यै ॥५५॥
न हि कश्चिदपि विपश्चित्कम्रं मुक्त्वाम्रफलमुदारमलम् । कटुनिम्बफलास्वादनलालसतामत्र खलु भजते ॥५६॥

त्वत्सौभाग्यमलङ्गुरमासीदाविर्बभूव तत्सुभगे । कुसुमशरः खलु तुष्ट पुष्टः प्राक्पुण्यसंभारः ॥५७॥
यत्त्वां मुक्तालतिकामिव कर्तुं कण्ठकन्दले नृपतिः । निर्मलतरोज्ज्वलगुणामभिवांच्छति यच्छति सुवस्तु ॥ ५८ ॥
निजहस्ते कुरु तूर्णं प्रसद्य सद्यः प्रशस्तवस्तूनि । यानीह न हि सुलम्भान्यसीमसुकृतैर्विना भुवने ॥ ५९ ॥
इति तत्समुदितवाचं वाचंयमिनीव सद्गुरोः श्रुत्वा । तत्त्वावबोधचतुरा व्यचिन्तयच्चेतसि स्पष्टम् ॥ ६० ॥
मुग्धायन्ते विबुधा रङ्कायन्ते च तेऽपि राजानः । शिष्टा दुष्टायन्ते हहा महामोहदुर्ललितम् ॥ ६१ ॥
स्वाधीनः क्षितिभर्त्ता कर्त्ता न्यायानयाध्वनोरपि हि । पातकिनी पुनरेषा कुशीलतादत्तसाहाय्या ॥ ६२ ॥
स्वयमन्यायासक्ता मामपि पातयति पातकाम्भोधौ । धिग्धिग्जीवितमस्याः प्रभूतपापप्रमादिन्याः ॥ ६३ ॥
क्षितिपतिरयं तु तावत्तद्वशवर्त्तिष्णुरखिलपूर्लोकः । प्रभविष्णुर्न हि तं प्रति कश्चिन्न हि चलति बलमत्र ॥ ६४ ॥
दर्पोद्धुरः करी किल कर्णं ध्रियते न केनचित्क्वचियद्वत् । तद्वत्कोऽपि न शक्तः कुपथान्नृपतिं निवर्त्तयितुम् ॥ ६५ ॥
जलधिर्यदि मर्यादालोपी कोपी प्रभुर्यदा भृत्ये । यदि हिमरश्मिस्तीव्रस्तत्कः शरणं शरण्यानाम् ॥ ६६ ॥
एष पुनः प्रभुरस्याः पुरः स्फुरच्चारुरूपदोर्वीर्यः । मत्पतिरतिदूरस्थः पुनरहमेकाकिनी सदने ॥ ६७ ॥
कस्याग्रे पूत्क्रियते यथा तथा शीलमुज्ज्वलं ध्रियते । प्राणान्तेऽपि न धीराः स्वशीलमालिन्यमुपयान्ति ॥ ६८ ॥
क्रियते कश्चिदुपायः स्वकीयसंशुद्धशीलरक्षार्थम् । वर्द्धितमपि हि क्षेत्रं व्यर्थं रक्षापरित्यक्तम् ॥ ६९ ॥
रूपश्रिया किमनया ययापि गतयाऽक्षिगोचरीभावम् । प्रतिपद्यते शरीरी क्षणेन खलु शीलशैथिल्यम् ॥ ७० ॥

॥१७॥

योषिज्जातिर्नातिप्रशंसनीया जनेऽपि महनीया । यदि सापि न शीलवती तदेकतः काञ्जिकं क्वथितम् ॥ ७१ ॥
इति निश्चित्य निजात्मनि तयान्यकान्तप्रसङ्गभीरुतया । ईषद्विहस्य मधुरैर्व्याहारैर्व्याहृता दूती ॥ ७२ ॥
यदि मामिच्छति भूपतिरथ यच्छति चारुचारुवस्तूनि । तत् किमिह कथनमास्ते वैद्यादिष्टं तथाऽभीष्टम् ॥ ७३ ॥
तदधीनरूपयौवनलावण्याहं सखेऽस्मि सर्वाहम् । परमेकमस्ति गुप्तं तत्संशृणु सावधानतया ॥ ७४ ॥
लोके लज्जाकारिणि मर्यादासद्गुणापहारिणि च । कर्मणि विधीयमानेऽमुष्मिन् विश्वोपहासः स्यात् ॥ ७५ ॥
छिद्रान्वेषी द्वेषी प्रायः सर्वोऽपि सत्त्ववर्गोऽयम् । तस्माद्दोषासमये प्रसरति पूरे तमिस्रस्य ॥ ७६ ॥
स्तोकपरीवारभृता भूमिभृता मद्गृहे समेतव्यम् । येन फलेग्रहिरेतन्मनोरथः सपदि जायेत ॥ ७७ ॥
इत्यादिमधुरवाण्या प्राण्यानन्दप्रदानकोविदया । कृत्वा प्रीतां दूतीं जगृहे तद्भूपतिप्रहितम् ॥ ७८ ॥
गत्वा प्रसन्नवदना सदनात्तस्याः ससंभ्रमा सापि । चक्रे शक्रेण समं सानन्दं नन्दभूपालम् ॥ ७९ ॥
तद्वदनामृतचषकाद्रोहिण्युक्तानि तानि वचनानि । अमृतानीव निपीयोल्ललास हृदये महीमघवा ॥ ८० ॥
भुङ्क्ते न चापि शेते कुरुते न हि रसिकगोष्ठिमिष्टेन । तुष्टेन चेतसा तामेवैकां संस्मरन्नास्ते ॥ ८१ ॥
तद्रमणलालसात्मा वासरमपि वर्षसन्निभं मनुते । तनुते रवितापादप्यधिकं तापं हि विरहोऽस्याः ॥ ८२ ॥
दुरिततमःश्यामायां श्यामायामथ निकामकामाय म् । श्यामायामनुरागी भोगी दुर्वृत्तजातस्य ॥ ८३ ॥
शृङ्गाररसनिमग्नः शृङ्गारमुदारमात्मनः कृत्वा । विरलीकृतनिजपरिधिर्वसुधाधीशः कृपाणकरः ॥ ८४ ॥

चैट्यादिष्टाभीष्टाध्वना मनाक् परभवादभीरुमना: । सह सचिवेन जगाम प्रमना भवनं स रोहिण्या: ॥ ८५ ॥
यद्योगिहृदयवत्किल विलसद्बोधप्रदीपपरिकलितम् । श्रीललितं सागरवद्दृष्ट्वा दृष्ट्या मुदं दध्रे ॥ ८६ ॥
रुचिरोरुचित्रशालं लसत्प्रवालं प्रशस्तवनमालम् । विलसत्सारसहंसं यद्गिरिकुलवद्विभाति सुविशालम् ॥ ८७ ॥
॥१९॥ तत्कालोत्थितदासीवर्गैरभ्युक्षणं विभो: प्रददे । विष्टरमुपविष्टोऽसौ रविरिव पूर्वाचलं सहसा ॥ ८८ ॥
तत्रस्थ: शतमन्युर्यथा तथा रूपयौवनं स्वीयम् । धन्यं मन्वानोऽसौ श्रिया दिदीपेऽधिकत्वेन ॥ ८९ ॥
रूपेण जिताप्सरसं लोचनयुगलेन रोहिणीरमणीम् । पश्यन् भूयो भूयोऽप्यमृतास्वादाधिकं मेने ॥ ९० ॥
विविधैर्मधुरालापैश्चेत:प्रीतिप्रदैर्नरेन्द्रस्य । सा रञ्जयितुं लग्ना मनो मनोज्ञाकृतिं दधती ॥ ९१ ॥
सज्जनहृदयविशालं स्थालमिलावासवाग्रत: प्रददौ । मधुरै: फलै रसालै: प्रपूरितं स्फुरदुरुज्योति: ॥ ९२ ॥
अथ तद्दास्य: प्राज्ञा: स्वामिन्यादेशसाधनानलसा: । आनिन्यिरे प्रशस्तानतिसरसान् रसवतीभेदान् ॥ ९३ ॥
क्षुद्वेदनापनोदकहृन्मोदकमोदकादिपक्वान्नै: । वरशालिदालिनानाव्यञ्जनभेदैरतिप्रचुरै: ॥ ९४ ॥
भोजितवती सती सा स्वकीयहस्तेन भक्तियुक्तिभरै: । आज्यै: प्राज्यैरशनै: खाद्यै: स्वाद्यैरतिस्वाद्यै: ॥ ९५ ॥ ॥१९॥
अथ सा सुशिक्षिताभि: सखीभिरत्यन्तदिव्यवस्त्रदलै: । श्वेतै: पीतैररुणै: कृष्णैर्नीलैर्महारम्यै: ॥ ९६ ॥
पिहितााननानि निर्मलशुचिशीतलपानकास्पदानि मुदा । आनाय्य पुरो नृपतेरढौकयद्दृष्टिमोहकृते ॥ ९७ ॥
प्रेक्ष्य पय:पात्राणि श्रद्धामधिकाधिकामसौ दध्रे । पानकविषये विषयेच्छया विहस्त: क्षिते: प्रणयी ॥ ९८ ॥

नवनववसनाच्छादनरम्याम्भःपानमाचरन्नृपतिः सर्वत्राप्येकरसं पयसः समवाप पापमनाः ॥ ९९ ॥
तस्माद्विस्मितचेता नेता पृथ्व्याः पृथूल्लसत्तृष्णः । तामित्याह सुधारसहृग्गिरा रञ्जयन् हृदयम् ॥ १०० ॥
नानाविधैः पिधानैः स्थानैः किमु भिद्यते रसः सुभगे । सर्वत्राप्येकरसं पयः प्रतीतं मया नान्यत् ॥ १०१ ॥
भवदुक्तमिदं सत्यं जानन्नपि देव नैव जानीषे । आलोचय तत्त्वधिया सुधियामग्रेसर क्ष्माप ॥ १०२ ॥
यदि न भवति रसभेदः स्थानैर्विविधैः पिधानकैश्चापि । तत्किमहो तव नवनवरमणीरूपे मनो रमते ॥ १०३ ॥
राजन् स्वयमेव भवान् विद्वान् किमपीह तदपि ते वच्मि । वेषविशेषैर्वपुषः प्रविभासन्तो स्त्रियः प्रशस्यतराः ॥ १०४ ॥
वैषयिकरसस्यापि स्फुरति कथञ्चिद्विभिन्नता किमहो । प्रायः शरीरभाजां परमेतन्मोहविस्फुरितम् ॥ १०५ ॥
सर्वा अप्येकरसा वशाः सुरूपास्तथाप्यतिविरूपाः । नृप निर्विचारता ते न चारुतामञ्चति नितान्तम् ॥ १०६ ॥
सर्वेऽपि मोहवशगाः सत्त्वास्तत्त्वावबोधमुग्धधियः । विषयव्याकुलिततया शुभाशुभं नो विदन्त्येते ॥ १०७ ॥
नवनवरूपाः सुन्दरवेषास्तोषावहा जने योषाः । बहिराडम्बर एष सर्वोऽपि मतिभ्रमं कुरुते ॥ १०८ ॥
जलधिर्जलस्य पूरैर्न वेन्धनैरपि घनैर्यथा वह्निः । न हि तद्वत्कामसुखैरसुभाजस्तृप्तिमुपयान्ति ॥ १०९ ॥
को न हि मुह्यति जन्तुस्तारुण्ये रूपसंपदाकीर्णे । ऐश्वर्येऽप्यतिवर्ये विषयेष्वतिसरसरूपेषु ॥ ११० ॥
दुर्बलबलिनामवनात्त्वमेव जनकोपमोऽसि जगतीश । स्वयमेवान्यायपथे प्रवर्त्तसे यदि हृदज्ञानात् ॥१११॥
अङ्गारास्तुहिनकराद्यदा कदाचित्तमोभराश्च रवेः । अमृताद्यदि विषलहरी तत्कः शरणं शरण्यानाम् ॥११२॥

सुखमसुखरूपमेव हि विषयजमिह तत्त्वतो विमृष्टमहो । काचः किमु दक्षधियां वैडूर्यमतिं सतां तनुते ॥११३॥
ये परवनिताविरता निरताः सन्न्यायवर्त्मनि प्राज्ञाः । ते वर्ण्याः कृतपुण्या नैपुण्या जगति विख्याताः ॥११४॥
इत्यादियुक्तियुक्तामुक्तामनया निशम्य मुग्धगिरम् । मोहमहाविषलहरीसंहृतिपीयूषरसकुल्याम् ॥११५॥
भूमिपतिः पदकमले लग्नः किल भृङ्गवत्सरङ्गमनाः । उद्घटितविवेकोज्ज्वलचक्षुस्तामेवमाचष्ट ॥११६॥
त्वं मम जननी जनकः स्वसा त्वमेवासि देवताऽपि गुरुः । पुण्योपकारकारिणि पापनिवारिणि नमस्तुभ्यम् ॥११७॥
प्रायश्चपलाचपलाः स्त्रियो वयोरूपसंपदोपेताः । दृश्यन्तेऽत्र जगत्यां तासु सुशीलाः पुनर्विरलाः ॥११८॥
अबला ह्यबलाजातिः सा जज्ञे बलवती सतीव्रततः । गुणवत्याऽत्र भवत्या अत्रभवत्या भुवः पीठे ॥११९॥
मकरध्वजतस्करतः शीलोज्ज्वलरत्नरक्षिका भवती । सुन्दरि शूरव्रतवति नाम्नाऽस्यबला परं न कृत्येन ॥१२०॥
त्वन्मतिविलसितममलं यदहं नरकान्धकूपमध्येऽस्मिन् । प्रपतन्नपि सदयतया समुद्धृतः साम्प्रतं सुतनु ॥१२१॥
इष्टाः कस्य न भोगाः कस्यानिष्टास्तथा वियोगाः स्युः । एकाऽसि त्वं साध्वी परमेका न त्वदन्या ज्ञा । १२२॥
इत्यादितद्गुणस्तुतिकृत्या सत्यापयन्निजां रसनाम् । धामाजगाम राजा मानसमिव राजहंसः स्वम् ॥१२३॥
अमितैर्वाणिज्यशतैः प्रचुरतरं द्रविणमर्जयित्वाऽथो । कतिपयदिवसैः श्रेष्ठी धनावहः प्राप निजसदनम् ॥१२४॥
प्रेक्ष्य प्रसन्नवदनामनुरागवतीमतीव निजकान्ते । चन्द्रकलामिव जलधिर्हर्षोत्कर्षं बभार भृशम् ॥१२५॥
श्रुत्वा कदाचिदास्याद्दास्याः स्वागारमागतं नृपतिम् । रोहिण्युज्ज्वलशीले मालिन्याशङ्कया व्यथितः ॥१२६॥

॥२१॥

स्त्रीजातिः खलु चटुला पावनादपि सा यदा सुरूपवती । अक्षतशीला सा कथमुद्धरति क्षितिपतेः पुरतः ॥१२७॥
गृहमागते नरेन्द्रे कथमुज्ज्वलशीलता गृहिण्याः स्यात् । मार्जारे तीरस्थे न हि दुग्धस्थालिकाऽच्छुप्ता ॥१२८॥
कुसुमायुधलालितस्य पुरतः सरसा रसवत्यहो कथं तिष्ठेत् । न हि कुसुमिता लताऽपि हि विमुच्यते षट्पदेनापि ॥१२९॥
न हि कामी कामिन्या एकाकिन्याः शशीव यामिन्याः । सङ्गतिमेत्य दुरात्मा स शीललोपं विना स्थाता ॥१३०॥
इत्याद्यनल्पमानसकुविकल्पोल्लोलमालयाऽऽकुलितम् । आत्मानमुदधिकल्पं चकार रजनीक्षणे श्रेष्ठी ॥१३१॥
तस्याः शीलकलङ्काशङ्कापङ्कापहारमिव कर्तुम् । कुर्वन् शीतलभावं तदङ्गसंतापविनिवृत्त्यै ॥१३२॥
तं तर्जयन्निवोच्चैर्गर्जितरावैरतीवघोरतरैः । अथ भापयन्निवामुं तडिद्झबत्कारकृत्खड्गात् ॥१३३॥
तावदतर्कित एवाकस्माद्विस्मापयन् जगल्लोकम् । आगात्पयोदसमयः शमयन् वनवह्निदावभरम् ॥१३४॥
शीलोज्ज्वलतरतेजःपुञ्जे सर्वत्र विस्तृते सत्याः । चन्द्रार्कयोः प्रभायाः प्राधान्यं किमिह तज्जहे ॥१३५॥
यावत्सप्तादिनीं घनवृष्टिः स्पष्टाऽत्र समजनिष्ट भुवि । सर्वं कृतमेकार्णवमुर्वीवलयं पयःपूरैः ॥१३६॥
तस्मान्मन्दाकिन्याः प्रससार पयोभरः क्षणेनैव । स्थूलानतिदृढमूलान् वृक्षानुन्मूलयामास ॥१३७॥
प्लाव्यन्ते स्म ग्रामा आरामाश्चापि सफलपुष्पभराः । प्रसृते पयःप्रवाहे मनुजैरतिदुरवगाहतरे ॥१३८॥
नगरं पूर्णं तूर्णं बहिरायातैः शतैर्नृनारीणाम् । नगरद्वाराणि नृपस्तदा रुरोधोद्धुरकपाटैः ॥१३९॥
प्रलयानिलोच्छलज्जलपूरैरतिदुस्तरोरुकल्लोलैः । प्रसरणशीलैरासीत् पुरमखिलं कलकलाकीर्णम् ॥१४०॥

हा दैव दैव जीवनपरं हि यज्जीवसंहतेरभवत् । तज्जीवनमपि जीवान्तकृत्कथं निर्ममे विधिना ॥१४१॥
किमु कुर्मः क्व नु यामस्त्रस्ताः कस्याश्रयाम इह शरणम् । मरणं तीरायातं ननाश खलु जीविताव्याशा ॥१४२॥
इति जनशतवदनोद्गतदीनरवाकर्णनात्सकरुणात्मा । दुर्गोपरि झटिति महीशिता स तावच्चटित्वाख्यत् ॥१४३॥
॥२३॥ अहह कथं पुरमेतत्सकलं सलिलैरलं विसर्पद्भिः । मम पश्यत एव जवात्संह्रियते हा कथं क्रियते ॥१४४॥
स हि कश्चिदस्ति जगति त्राता ख्याताभिधः सुधीरमनाः । यो जगदेतद्रक्षति निःशरणं हीनदीनमुखम् ॥१४५॥
तावद्गगनोपरि गीर्दैवी क्लीबीभवत्यवनिनाथे । आविर्बभूव लोकान्निःशोकान् कुर्वती महती ॥१४६॥
रोहिण्यस्ति सतीव्रतमादधती गुणवतीतरा सुदती । तामाहूय बहुमानादसमानां भूपते त्वरितम् ॥१४७॥
सा स्वयमेव करिष्यति सुखं हरिष्यत्युपप्लवं सकलम् । किं बहुभिर्भणितैः स्यान्मन्त्रैर्यन्त्रैस्तथा तन्त्रैः ॥१४८॥
इत्याकर्ण्य तदीयामुदारवाचं शुचं परित्यज्य । रोहिण्युत्तमसाध्वीमाहूय महादरेणैताम् ॥ १४९ ॥
आचख्यौ क्षितिभर्त्ता स्मर्त्ता तच्छीलसंपदः सपदि । सत्यसतीव्रतधारिणि कारिणि पुण्यस्य कुरु शान्तिम् ॥१५०॥
रक्ष महासति लोकं शोकं समुपागतं मरणभीत्या । सत्याः किमसाध्यं किल जनतायास्त्वमसि जननीव ॥ १५१ ॥
क्वापि प्रयाति तरसा किमु दिनपतिदीप्तिमन्तरेण तमः । चित्रकवल्लीं हि विना न चक्षुरुद्घटति चाघस्य । १५२ ॥
त्वामन्तरेण रोहिणि सुकृतारोहिणि हरिण्यपश्रेण्याः । कः स्याज्जगतस्त्राणं पतितस्योपद्रवाम्भोधौ ॥ १५३॥
इत्युक्ते सा दिव्यं नव्यं शुचि सिचयमाशु परिधाय । प्रध्याय नमस्कारं सारं श्रुतरत्नकोशस्य ॥ १५४ ॥

 

तदनु शुचिशीललीलावती प्रतीतार्हतार्हतरधर्मा । दुर्गारूढा प्रौढामिति वाणीमाह साहसिनी ॥ १५५ ॥
यद्यास्ते मम शीलं निश्चलमकलङ्कमद्य यावदहो । चेतःकायवचस्त्रिकशुद्धया सम्यक्तयाऽऽराद्धम् ॥ १५६ ॥
गगनोत्तुङ्गतरङ्गे गङ्गे सङ्गेन दलितकालुष्ये । स्वाम्भःपूरप्रसरं संहर दरमपहर नगर्याः ॥ १५७ ॥
 इत्याख्याय सती सा करकमलेना[illegible]जलं [illegible] । [illegible] सलिलं ननाश पवनादिवाभ्रभरः ॥ १५८ ॥
विषमिव जाङ्गुलविद्याऽतिशयात्सूर्योदयादिवोरुतमः । तत्करसंस्पर्शवशाज्जग्मुः सर्वाणि वारीणि ॥ १५९ ॥
शीलद्रुमरोहिण्याः पुरीजनानन्दचन्द्ररोहिण्याः । गुणवर्णनमुखरत्वं बभाज सर्वोऽपि पूर्लोकः ॥ १६० ॥
कृतपुण्या नैपुण्यातिशयात्किमु भारतीयमवतीर्णा । मूर्त्तिमती कल्पलता स्त्रीजातौ किमुदयं प्राप्ता ॥ १६१ ॥
नास्याश्चरणनमस्या कस्याघमगाधमाशु नाशयति । सद्गुणभणितिरमुष्याः सौख्याय न कस्य जायेत ॥ १६२ ॥
जय जय महासतीव्रतधारिणि दुःखौघवारिणि जनानाम् । परमप्रमोदकारिणि निस्तारिणि नगरलोकस्य ॥१६३ ॥
तव शीलरत्नममलं समलङ्करणं समस्तवनितानाम् । यन्निर्दूषणभूषणवशतःसन्मान्यताऽत्र भवेत् ॥ १६४ ॥
किं कीर्त्यते भवत्याः सत्याः सत्यार्जवप्रगुणमत्याः । प्रससार विश्वविश्वे सौरभ्यं यद्यशोराशेः ॥ १६५ ॥
स्त्रीजातिरत्नतुल्या कुल्या करुणासुधारसश्रेण्याः । साध्वाचारवतीयं जयति जगत्युत्तमा साध्वी ॥ १६६ ॥ 
इति जनशतकृतगुणवर्त्त(र्ण)नमात्मीयमात्मकर्णाभ्याम् । शृण्वानाऽपि न गर्वं स्वमनसि धत्ते मनागपि सा ॥ १६७ ॥
सन्मानिता नृपतिना नानाविधरत्नकाञ्चनार्पणातः । त्वमसि स्वसाऽस्मदीयाऽतः परमित्युक्तिमुक्तवता ॥ १६८ ॥

शीलकलङ्काशङ्कापङ्कालेपेन यो हि मलिनमनाः । आसीदविदिततत्त्वः सोऽपि श्रेष्ठी भृशं मुमुदे ॥ १६९ ॥
धन्योऽहमस्मि यस्येदृशी कृशीभूतशीलकालुष्या । निर्मायाऽजनि जाया सच्छायातुलितवनवीथी ॥ १७० ॥
सर्वासामबलानाममलद्युति वदनपङ्कजं विदधे । इति पुरपरिजनयोषिद्भिर्बहिरुत्कीर्त्यमानगुणा ॥ १७१ ॥
॥२५॥ सद्माजगाम सुदती मनस्यमन्दं प्रमोदमादधती । ददती दानममानं सन्मानं धार्मिकेष्वददात् ॥ १७२ ॥
कृत्वाऽग्रतः सतीं तामवनीपतिरुत्सवैर्नवैर्बहुभिः । चैत्यनमस्यामकरोज्जिनधर्मोद्भाविनीं विधिना ॥ १७३ ॥
सम्यक्त्वशीलनिश्चलचेता नेता नृणामभून्नितराम् । तच्छीलमहामहिमाप्राग्भारमपारमालोक्य ॥ १७४ ॥
तामभिवन्द्यावद्यापनोदिनीं मोदिनीं परिजनस्य । भूमिपतिर्निजसदनं संप्राप विपापहृष्टमनाः ॥ १७५ ॥
श्रेष्ठिधनावहमुख्या दक्षाः पौराः सुशीलमाहात्म्यम् । परिभाव्य भेजिरे खलु परवनितारमणमतिविरतिम् ॥ १७६ ॥
रोहिण्युज्ज्वलशीलप्रतिपालनलालसाऽलसा दुरिते । देवगुरुधर्मरक्ता तथा विरक्ता भवात्सुखं तस्थौ ॥ १७७ ॥
सा प्रतिपाल्य निजायुः प्रतिपूर्णं शुद्धधर्ममाराध्य । आराधनां विधाय च सम्यग्बुद्ध्या मनःशुद्ध्या ॥ १७८ ॥
प्रान्ते विहितानशना व्यसनाभावप्यनाप्तमिथ्यात्वा । त्रिदिवपदवीमवापद्ध्यापद्ध्याप्त्या विनिर्मुक्ता ॥ १७९ ॥ ॥२५
भुक्त्वा भोगान् विविधान् वैबुधभवसंभवान्नृजातीयान् । नैःश्रेयसीं गतिमपि प्राप्स्यति शीलानुभावेन ॥ १८० ॥

शीलप्रभावेन यशः समुज्ज्वलं, शीलप्रभावाज्ज्वलनं जलं भवेत्
स्थलीभवेद्भूरिपयाः पयोनिधिस्तत्किं न यच्छीलगुणेन जायते ॥ १८१ ॥

यत्सौभाग्यमभङ्गुरं गुरुतरं यच्चोज्ज्वलं सद्यशः, शौर्यं यद्भुजयोरजेयमतुलं वीर्यं यदार्योचितम् ।
उग्रव्याघ्रमहोरगामयभियो यद्यान्ति दूरं जवाज्जीवानामवशं समेत्यपि वशं तच्छीललीलायितम् ॥ १८२ ॥
इत्याकर्ण्य सकर्णवर्ण्यमतुलं शीलस्य सेवाफलं, रोहिण्या रमणीशिरस्सु विलसच्चूडामणेर्धर्मिणः ।
कुर्वीध्वं शुचिशीलनिर्मलगुणालङ्काररक्षाविधौ, यूयं यत्नमतीव देवमनुजश्रेयःश्रियः स्युर्यतः ॥ १८३ ॥



॥ इति शीलपालनोपरि रोहिणीदृष्टान्तः ॥

अथ द्वितीयगाथायास्तृतीयपदं व्याख्यायते—"न दिज्जाए कस्स वि कूड आलं" इति, पूर्वमुक्तं सर्वकालं शीलं पाल्यते, शीलवान् भूत्वा यदि कस्यापि कूटं कलङ्कं न दत्ते तर्हि युक्तमेवैतत् । शीलवतः शोभाधिका स्यान्मित-हितभाषकत्वेनेति हेतोर्न दीयते कस्याप्यसद्भूतः कलङ्कः । अत्रार्थे वृद्धायाः कथा कथ्यते—

॥ वृद्धा कथा ॥

शालन्ते शालयो यत्र ज्येष्ठमासेऽपि शाड्वलाः । शालिग्रामोऽभिरामोऽस्ति श्रेष्ठी तत्रास्ति सुन्दरः ॥ १ ॥
दीनानाथजनानेष पालयन्नतिवत्सलः । कृपापात्रमभूद्बाढमतिथिप्रियकारकः ॥२॥
नर्त्तकीव ननर्त्तास्य कीर्त्तिर्विश्वान्तराङ्गणे परोपकारिणां नृणां कः श्लाघां कुरुते न हि ॥३॥
तत्कीर्त्तिद्वेषिणी मुग्धा वृद्धैका ग्रामवासिनी । तं निन्दति सदाकालमालदानपरायणा ॥४॥
विदेश्यानेष पापात्मा विश्वासापन्नमानसान् । निपात्य धनलाभार्थं गर्त्तान्तः क्षिपति ध्रुवम् ॥५॥

मायावी मधुरालापी पापी वञ्चकमुख्यकः । प्रातः को नाम गृह्णीतेऽमुष्य वृद्धेत्यभाषत ॥६॥
अयस्कुशीं चोरयित्वा सूचीमेष प्रयच्छति । धर्मिताऽस्यास्ति विज्ञाता किमतः परमुच्यते ॥७॥
अन्यदा कोऽपि निश्यागात् पथिकः क्षुधयातुरः । तन्नाम पृच्छँल्लोकेभ्यस्तृष्णालुर्भोजनाशया ॥८॥
॥२७॥ तदा च तद्गृहे किञ्चिद्भोज्यं नोद्धरितं खलु । स दानव्यसनी बाढमतप्यत निजे हृदि ॥९॥
ततः कस्याश्चिदाभीर्याः सदनात्तक्रमानयत् । सघृष्टिकं याचनकं भोजयामास सादरम् ॥१०॥
स ममार क्षणादेव **दैवसूत्रमनीदृशम् । प्रतिकूले विधौ पुंसां हितमप्यहितायते** ॥११॥
आभीरिकाशीर्षगायां तक्रोषायां यतोऽपतत् । व्योमाध्वयातृशकुनिकामुखाहिमुखाद्विषम् ॥१२॥
प्रातर्जहर्ष जरनी दृष्ट्वा कार्पटिकं मृतम् । दृष्टं दातुश्चरित्रं भो दुराचारोऽयमीदृशः ॥१३॥
लोभाभिभूतचित्तेन हहाऽनेन निपातितः । लात्वा ग्रन्थिधनं कूटाद्वराकः कोऽपि याचकः ॥१४॥
इत्थं पूत्कुर्वती वृद्धा मौखर्येण पुरान्तरे । कूटमारोपयामास कलङ्कं दानदातरि ॥१५॥
अदृष्टमश्रुतं कर्म नर्मणाऽपि हि कस्यचित् । न हि प्रकाशयेद्विद्वानसद्वक्तुं तु नोचितम् ॥१६॥ ॥२९
असद्भूतं वदेद्यस्तु दोषं दोषैकदृङ्नरः । स हि तद्दोषभागी स्यात् परत्रात्राप्यसंशयम् ॥१७॥
अथ कार्पटिकी हत्या भ्रमन्ती चिन्तयत्यसौ । कस्याहं संस्पृशाम्यङ्गं सङ्गं कस्य भजेऽधुना ॥१८॥
दाता तावद्विशुद्धात्मा सर्पोऽज्ञः पारवश्यभाक् । सर्पाशिनी शकुनिकाऽऽभीरी मूर्खात्मिका तथा ॥१९॥

तस्मात्कोऽद्य मया ग्राह्य एवं संचिन्त्य चेतसि । वृद्धामेवाश्रयद्धत्या परावर्णपराननाम् ॥२०॥
तत्क्षणादेव सा जज्ञे मषीपुञ्जमलीमसा । हत्यापातकपङ्केन लिप्ताङ्गीव व्यलक्ष्यत ॥२१॥
कुष्टदुष्टामयार्ताङ्गी बीभत्सा कुब्जिकाऽजनि । दैवानुभावात्तत्कालं धिङ्मृषादोषरोपणम् ॥२२॥
ईदृग्विधामिमां वीक्ष्य विलक्षवदनश्रियम् । लोकः पातकिनीं प्रोचे निनिन्द च मुहुर्मुहुः ॥२३॥
कलङ्कदानमीदृक्षफलमालोक्य पूर्जनः । प्रायोऽभवत् परावर्णवादोल्लापपराङ्मुखः ॥२४॥
इत्थं पौराणिकीं श्रुत्वा कथामविदितामिमाम् । कलङ्कदानेऽनौत्सुक्यं कुर्यादार्यजनोचितम् ॥२५॥

॥ इति कलङ्कदाने डोलत्कारिकाकथा ॥

एवं कूटकलङ्कमददानः प्राणी पक्षिवद्भववदुःखजालं छिन्द्यादिति समग्रकाव्यस्यार्थः समर्थितः सोदाहरणः ॥

**पयासियव्वं न परस्स छिद्दं, कम्मं करिज्जा न कया वि रुद्दं ।**
**मित्तेण तुल्लं च गणिज्ज खुद्दं, जेणं भविज्जा तुह जीव भद्दं ॥३॥**

**व्याख्या**–पूर्वकाव्यतार्तीयिकपदे कलङ्कदानं सर्वथा निषिद्धं, तदनु परच्छिद्रान्वेषणमप्यसङ्गतमेव, यः कश्चित् परस्मिन् कलङ्कं नारोपयिष्यति स परच्छिद्रान्वेष्यपि न स्यात् । अत्रार्थेऽग्रेतनकाव्यव्याख्यामाह—"**पयासियव्वं**" इति प्रकाशयितव्यं परस्यात्मव्यतिरिक्तस्य च्छिद्रं दोषोद्घट्टनं, विशेषतस्तु गुरोर्धर्मदातुर्दूरीकृतभद्राणि च्छिद्राणि न निभालनीयानि. यतः **श्रीदशवैकालिके** प्रोक्तं—"**एवं तु अगुणप्पेही गुणाणं च विवज्जओ । तारिसो मरणंते वि नाराहेइ**

**संवरं** ॥१॥ **बहुं सुणेइ कन्नेहिं बहुं अच्छीहिं पिच्छइ । न य दिठं सुयं सव्वं भिक्खु अक्खाउमरिहइ** ॥२॥" तथा च—"**एतेहिं अवंतेहिं०** । एवं मत्वा गुरोर्गुणा एव ग्राह्या न तु दोषाः । अथ यः कश्चिन्मातृमुखो दुर्मुखो भाषते दोषान् स तु दुःखभागी स्यात् अनार्यः **सङ्गमस्थविरशिष्यदत्त**वदिति । तथा कर्म रौद्रं न कुर्यात् । तथा **क्षुद्रं दुष्टमपि** मित्रेण तुल्यं गणयेत् । एवं कुर्वतस्तव रे जीव भद्रं भवेत् इति तात्पर्यार्थः । अथ च्छिद्रान्वेषणे दत्तकथा कथ्यते—

**॥ अथ दत्तकथा ॥**

**कोल्लयरम्मि** य नयरे नयरेहारंजियाखिलजणम्मि । आसी **संगमथेरायरिया** बहुसाहुपरियरिया ॥१॥
सुबहुस्सुया य उज्जुयविहारिणो धारिणो गणिगुणाणं । पायबलविप्पहीणा एगट्ठाणे निवासिल्ला ॥२॥
संपत्ते दुब्भिक्खे दुक्खेणाऊरियम्मि लोयम्मि । अन्नदेसेसु तेहिं विसज्जिया साहुणो नियया ॥३॥
नवभागे काऊणं तं खेत्तं अप्पणाय विहरंति । थंडिल्लपरावित्ति अपमत्ता ते पकुव्वंति ॥४॥
पुरदेवया य तेसिं गुणेहिं आवज्जिया कुणइ भत्ति । तेसिं सीसो **दत्तो** विहरित्ता सुचिरमायाओ ॥५॥
पस्सामि कहं वट्टंति सूरिणो सुहिय असुहिया वावि । पुव्विल्ले चेव **उवस्सयम्मि** दिट्ठा सुदट्ठेण ॥६॥
निच्चनिवासी एए उवस्सए तेसि नो पविट्ठो सो । आसन्नतणकुडीरे ठिओ गुरुं नमिय मायाए ॥७॥
जाणित्तु भिक्खवेलं पत्तं गहिउं गुरूण पुट्ठीए । लग्गो य अवन्नाए पन्नापविहीणचित्तो सो ॥८॥

॥२१

विहरंति ते निसंगा नीउच्चकुलाइं कालदोसेण । पाविंति अंतपंताइं स संकिलस्सइनियमणम्मि ॥९॥
न हु सुट्ठु सड्ढगेहाइं दंसेई एस सढसहाविल्लो । खरदुट्ठत्तणओ सो विन्नाओ संगमगुरूहिं ॥१०॥
तच्चित्तरक्खणत्थं गुरू पविट्ठो धणड्ढगेहम्मि । रेवइदोसग्गहिओ तदंगओ रोयइ सया वि ॥११॥
॥३० ॥ संजाया छम्मासा ईसिं न सहइ सिसू समाहिं सो । मा रुयसित्ति भणित्ता चप्पुडिया वाइया गुरुणा ॥१२॥
तव्वयणायन्नणओ तक्कालं रेवई सुरी नट्ठा । सो रहिओ रोयंतो तुट्ठो जणओ य सुट्ठुयरं ॥१३॥
पडिलाभिया य गुरुणो मोयगमाईहिं गुरुयभत्तीए । सरसाहारं दाउं विसज्जिओ सो विचिंतेइ ॥१४॥
दावियमेगं तु कुलं विरस्स एएण मे सयं भमइ । सिरिमंधरेसु सव्वं संपज्जइ तत्थ एयस्स ॥१५॥
एयं विमंसमाणो उवस्सयं सूरिसंतियं न गओ । आयरिया सुइरं हिंडिऊण समुवागया वसहिं ॥१६॥
अंतं पंतमसित्ता सुत्थावत्था कुणंति सज्झायं । गोयरचरियपडिक्कमवेलाए गुरूहिं सो भणिओ ॥१७॥
आलोइसु अज्जत्तणं असणं तुब्भेहिं चेव सममहयं । आहिंडिओ किमालोएमि गुरूहिं समुल्लवियं ॥१८॥
तुगए धाईपिंडो भुत्तो तो सो कहेइ दुस्सीसो । सुहुमाइं परछिद्दाइं पिच्छसि नो अप्पणिज्जाइं ॥१९॥
इक्कं पि नत्थि लोयस्स लोयणं जेण नियइ नियदोसे । परदोसपिच्छणे पुण लोयणलक्खाइं जायंति ॥२०॥ ॥३०॥
एअं वीमंसंतो गओ कुडीरंतियं कुसीसो सो । इत्थंतरे सुरीए गुरुपयपउमेक्कभमरीए ॥२१॥
तदसब्भावे मुणिउं गड्डाए तस्स सिक्खवणहेउं । संजाय अद्धरत्ते वेउव्वियमंधयारभरं ॥२२॥

मेहुलई पसरिया तक्कालं मारुओ खरो जाओ । कक्करेणुच्छालणपरायणो तस्स सीसुवरिं ॥२३॥
भीओ वाहरइ गुरुं पत्थरखंडेहिं आहणिज्जंतो । एहि इहं आयरिया भणंति भो वच्छ करुणाए ॥२४॥
वज्जरइ नाहमीसि पेच्छामि पहं महंधयारभरे । तो तेहिं करंगुलिया आमुसिऊणं समुब्भविया ॥२५॥
दीवकलियव्व तो सा सहसा पज्जलिउमिह समाढत्ता । उज्जोओ संजाओ तो दुस्सेहो विमंसेइ ॥२६॥
॥३१॥ एस उवस्सयमज्झे सुगुत्तयं दीवयंपि रक्खेइ । तत्तो अमरी रुट्ठा तं दुट्ठं तज्जिउं लग्गा ॥२७॥
नम्मज्जाय अलज्जिर अविणीय निकिट्ठ धिट्ठ पाविट्ठ । गुरुछिद्दाणि पलोइसि न हु लज्जसि नियगुरूहिं तो ॥२८॥
अज्ज मर्माहिं तो तं अविणीयत्तणफलं खु पाविहिसि । इय वुत्तुं निट्ठुरदंडएण सो ताडिओ सीसे ॥२९॥
तो सो भयभीयमणो निवडिय चलणेसु सूरिपायाणं । भुज्जो भुज्जो खामेइ नवरि नामेइ नियसीसं ॥३०॥
मिच्छामि दुक्कडं देइ लेइ तस्सेव सरणमवंतं । न पुणो एवं काहं पडिवज्जइ सुगुरुपयभत्ति ॥३१॥
सूरीहिं धीरविओ मा भायसु सीस निब्भओ होसु । उवसंता वि सुरी सा सासणरक्खं कुणेमाणी ॥ ३२ ॥
नवभागेहिं खेत्तं काउं विहरंति आयरियपाया । निम्मम निरहंकारा संसारासारयाचउरा ॥ ३३ ॥
जाओ सग्गइभायणमेसि सीसो वि सगुणगाही । अमरीगिराइ वुद्धो आलोइत्ता सुहं पत्तो ॥ ३४ ॥ ॥३

॥ **इति छिद्रान्वेषणे दत्तकथा** ॥

अथ तृतीयगाथाया द्वितीयपदं व्याख्यायते—“**कम्मं करिज्जा न कया वि रुद्दं**” पूर्वस्मिन् पदे परच्छिद्रप्रकाशनं,

निषिद्धं, तदपि सङ्गतं तदैव यदि रौद्रं घोरं कर्म न क्रियते, अतः प्रोच्यते—कर्म कुर्वीत न कदापि रौद्रं, धर्मी जनः कदाचिद्रौद्रं भीषणं कार्यं न कुर्यादित्यर्थः । यस्मिन् दत्ताशर्मणि कर्मणि निर्मिते दुरन्तदुरितशतोप(¹निपातः स्यात् एतादृशं कर्म कल्याणेऽमुना प्राणीना न कार्यम् । अत्रार्थे **उज्झितकुमारकथा**, सा चेयं—पञ्चमगणभृज्जम्बूस्वामिनं प्रति वक्ति—

## ॥ उज्झितकुमार कथा ॥

**वाणिज्यग्रामनाम** नगरं, तस्योत्तरपौरस्त्यदिग्भागे दूतिपलाशनामोद्यानं । तत्र च सुधर्माभिधयक्षचैत्यमासीत् । तत्र नगरे **मित्राभिधानो** राजा । तस्य महिषी श्रीरित्यभिधयाऽभवत् । तत्रैव नगरे **कामध्वजा** नाम वेश्या गणिकासहस्रस्वामिन्यासीत् । तत्रैव च नगरे **विजयमित्रनामा** सार्थपतिः परिवसति । तस्य सुभद्रा भार्याऽभूत् । तयोरुज्झितनामा पुत्रोऽभवत् । तदा तत्र **श्रीमन्महावीरस्वामी** चरमतीर्थाधिपतिः समवसृतः । प्रजा धर्मश्रवणार्थं प्राप्ता । राजाऽपि कोणिकराजवत् सवैभवस्तत्र समागात् । भवगता सराजपर्षदि जीवाजीवादिहेयोपादेयज्ञेयविवेचनरूपो धर्मोपदेशः प्रददे । ततः **पर्षदः** स्वस्थाने गमनं । इतश्च महावीरभगवतः प्रथमगणधर **इन्द्रभूतिनामा** भगवदाज्ञापूर्वं गोचरचर्यार्थमुच्चनीचकुलान्यटन् राजमार्गे समागतः स च तत्रैकं पुरुषं सन्नद्धमिद्धाश्विकादिमध्यगतमपश्यत् । तं च पुरुषं बीभत्सनेपथ्यं स्वशरीरादेव त्रोटितानि सूक्ष्ममांसखण्डानि राजपुरुषैः खाद्यमानं ताड्यमानं "नो खल्वस्य कोऽपि राजा

1 इत आरभ्य १८ पत्रस्य २५ पंक्तिस्थभवतीत्येतदवसानः सर्वः पाठः मूलप्रतौ पत्रद्वयाभावात् कृतेऽपि गवेषणे प्रत्यन्तरलाभाभावाच्च स्थानाशून्यार्थं विपाकसूत्रतः साररूपेण विद्वन्मुनिना लेखयित्वा मुद्रापितः,

राजपुत्रादिर्वाऽपराध्यति, किं तु तस्य कर्माण्येवापराध्यन्ति" इत्युद्घोष्यमाणं च दृष्ट्वैवमचिन्तयत्—"अहो अयं पुरुषो-ऽत्रैव नारकतुल्यां वेदनां वेदयते"। ततो द्विचत्वारिंशद्दोषमुक्तैषणीयाहारं गृहीत्वा नगरान्निर्गत्य भगवतः सकाशमागत्य दर्शयित्वा च तमाहारं वन्दननमस्कारपूर्वं नगरवर्त्मदृष्टपुरुषचरितं पप्रच्छ—"भगवन् स पुरुषः पूर्वभवे किंरूप आसीत्? किं वैतादृशं कर्मानेन कुत्रोपचितं? येनैतादृशीमप्रतिमां वेदनामत्रानुभवन्नस्ति?"।

॥३३॥ भगवानाह—हे **गौतम** अत्रैव जम्बूद्वीपे भरतस्थं **हस्तिनागपुरं** नाम्ना नगरमभवत्। तत्र **सुनन्दनामा** नृपोऽभूत्।
तस्यैव पुरस्य मध्यभागे गोमण्डप आसीत्। तत्र च सनाथानाथा बहवो **गोबलीवर्दमहिषीवृषभादयः** पशवः प्रचुरतृण-
जलसंतुष्टा निर्भयाश्च सन्तस्तिष्ठन्ति। इतश्च तत्र पुरे **भीमनामाऽनेकजीवोपद्रावको** मनुष्योऽभूत्, तस्य **चोत्पलानाम्नी**
भार्या, सा च कदाचिदापन्नसत्त्वाऽऽसीत्। त्रिषु मासेषु व्यतीतेषु तस्या अयमेतादृशो दोहदः प्रादुर्भूतो गर्भप्रभावात्—
"ता मातरो धन्या याः सनाथानाथगवादिस्तनाद्यवयवान् पक्वान् तलितान् भृष्टान् शुष्कान् लवणसंस्कृतांश्च भक्षयन्त्यः
सुरादिकं च पिबन्त्यः स्वदोहदं व्यपनयन्ति, अहमपि तमपनयामि" इत्यचिन्तयत्। परमनपनीयमानेऽस्मिन् सा दुर्बल-
निस्तेजस्त्वादिविशिष्टाऽभवत्। तां च तथाविधां दृष्ट्वोदासीनामेकान्ते तत्पतिस्तामपृच्छत्—"किं त्वमुपहतसङ्कल्पेव
चिन्तयसि?"। एवं पृष्टे च तया पूर्वसूचितो दोहदोदन्तः स्वपतये प्रोक्तः। तं च श्रुत्वा स तां समाश्वासितवान्। ॥३
अथ मध्यरात्रसमये सन्नद्धः सप्रहरणश्च स स्वगृहान्निर्गत्य नगरमध्येन भूत्वा पूर्वोक्ते गोमण्डप आयातः। तत्रत्यगवादि-
स्तनाद्यवयवांश्छित्वा गृहीत्वा च स्वगृहमागत्य तांस्तस्यै दत्तवान्। सा च दोहदं तैर्व्यपनीतवती। नवसु मासेषु सम-

धिकेषु व्यतीतेषु सा दारकं प्रसूतवती। तस्य च विस्वरादिस्वरूपं रुदितं श्रुत्वा बहवो गवादयो भीता उद्विग्नाश्च पलायिताः। एतदनुसारेण तस्य दारकस्य **गोत्रास** इति मातापितृभ्यां नाम स्थापितं। सुनन्देन तत्पित्रा स कुलनायकत्वे निवेशितः। स चाधार्मिकः पापरतिश्च समजनि। स च सदाऽर्धरात्रे स्वसद्मनो निर्गत्य पूर्वोक्तमण्डपे गत्वा गवाद्यवयवान्निकृत्य गृहमागत्य तानास्वादयन् विचरति। पञ्चवर्षशतानि घोरपापद्वाराऽतिघनं कर्मोपचित्य **शर्करेति** द्वितीयनरकपृथिव्यां त्रिसागरोपमायुर्नारकोऽजनि। इतश्च पूर्वोक्त**विजयमित्र**सार्थपतिभार्या **सुभद्रा** मृतापत्यकाऽऽसीत्, तत्कुक्षौ च स **गोत्रास**जीवोऽवातरत्, जाते च तस्योज्झित इति नाम दत्तं मातापितृभ्यां, प्रथमं जातमात्रेऽवकरके त्यक्त्वा पुनरात्तत्वात्। स च पञ्चधात्रीपरिपालितो वर्धते। अन्यदा तत्पिता विजयमित्रसार्थवाहो गणिमादि चतुर्विधं भाण्डं गृहीत्वा पोतेन लवणसमुद्रेऽगच्छत्। पोते भग्ने विजयमित्रोऽशरणो मृतः। भृत्याश्च सर्वे स्वाधीनं द्रव्यं गृहीत्वा गताः। तां च प्रवृत्तिं श्रुत्वा सुभद्राऽमूर्छीत्। ततः स्वस्थीभूय स्वपतिमृतकार्यमकार्षीत्। सुभद्राऽपि यदा शोचन्ती मृता तदा राजपुरुषा आगत्य तं दारकं बहिः क्षिप्त्वा तद्गृहमन्यस्मै दत्तवन्तः। स च दारको दुःस्थतया सर्वत्र परिभ्रमन् वर्धते, परिपाट्या द्यूतादिव्यसनी जातः।

अन्यदा स **कामध्वज**गणिकया संप्रलग्नः। श्रीदेव्या सह योनिशूलत्वेन यदाऽन्यदा **राजा मित्रो** भोगान् भोक्तुमसमर्थस्तदा गणिकागृहादुज्झितं निष्कासितवान्, स्वयं च ताम् भुङ्क्ते। उज्झितकस्तु तस्यामत्यासक्तस्तदेकाग्राध्यवसायस्तस्याः प्राप्तयेऽवकाशमाकाङ्क्षति। कदाचिदवसरं लब्ध्वा गणिकागृहं प्रविष्टः। यावद्गणिकयोदारान् भोगान् भुङ्क्ते

तावत्तत्र मित्रराजः सर्वालङ्कारविभूषितः समागतः। तत्र चोज्झितदारकं तया रममाणं दृष्ट्वाऽतिकुपितः। ततश्च तेन
स नियन्त्र्य ताडयित्वा च व्यडम्ब्यतः वध्यश्चाज्ञप्तः। गौतम आह—"हे भगवन् स उज्झितः पञ्चविंशतिवर्षायुः पूर्णं
प्रपाल्याद्यैव त्रिभागावशेषे दिवसे शूलारोपितः सम्मृत्वा कुत्र गमिष्यति ?" भगवानाह—"हे गौतम स उज्झितक
इतश्च्युतो रत्नप्रभेति प्रथमनरकपृथिव्यां नारकत्वेनोत्पत्स्यते। ततश्चानन्तरमुद्वृत्तोऽत्रैव जम्बूद्वीपे भारते वर्षे वैताढ्य-
॥३५॥ पादमूले कपिकुले वानरत्वेनोत्पत्स्यते। तत्राप्यतिमूर्छितस्तैरश्चभोगेषु जातान् बालकपीन् मारयन् तत्प्रत्ययं प्रभूतकर्मोपार्ज्य
कालं कृत्वा एतज्जम्बूद्वीपस्थभारतवर्षे इन्द्रपुरे नगरे वेश्याकुले पुत्रत्वेनोत्पत्स्यते। तं जातमात्रं मातापितरौ वर्द्धितकं कृत्वा
नपुंसककर्माणि शिक्षयिष्येते, नाम च तस्य **प्रियसेन** इति करिष्यतः। ततश्च स यौवनं प्राप्तोऽनेकचूर्णवशीकरणादिभि-
र्वशीकृत्य राजेश्वराभिभोगान् भोक्ष्यते। एकविंशत्यधिकशतवर्षायुः परिपाल्य सुबहुपापकर्म च संचित्य रत्नप्रभायां नार-
कत्वेनोत्पत्स्यते। अपरिमितकालं यावत्तदनन्तरं संसारे परिभ्रम्य एतज्जम्बूद्वीपे भारतवर्षस्थचम्पापुर्यां महिषत्वेन भवि-
ष्यति। तत्र विनाशितः सन् तस्यामेव नगर्यां श्रेष्ठिकुले पुत्रत्वेनोत्पत्स्यते। यौवने तथारूपस्थविराणामन्तिके बोधिं
लब्ध्वा सौधर्मे संजातः सन् ततश्च्युत्वा यावद्भवान्तं करिष्यति।

॥ इति घोरकर्मणि उज्झितदारकदृष्टान्तः ॥

इत्थं निशम्योज्झितदारकस्य, घोरे कृते कर्मणि दुःखजातम्।
जिह्वेन्द्रियादेर्भवभोगतोऽमी, सन्तो विरज्यन्त्वतिदुःखदायिनः ॥१॥

एतत्प्रयासतो यत्, सुकर्म संचितमिहाभ्युदयकारि । तेनैष भव्यलोको, लभतां बोधिं शिवाभ्युदयाम् ॥२॥

एतत्परिज्ञाय भो आत्मन् रसनेन्द्रियविषयलाम्पट्यतो विरम । सर्वेषामिन्द्रियाणां जिह्वेन्द्रियमेव प्रबलं, यदुक्तं-- **"अक्खाण रसणी कम्माण मोहणी तह वयाण बम्भवयं । गुत्तीण य मणगुत्ती चउरो दुक्खेण जिप्पंति ॥१॥"** मत्स्या अपि तन्निमित्तकमेव सप्तमीं नरकपृथ्वीं गत्वाऽपरिमितकालं यावदनेकशतसहस्रशारीरमानसदुःखभाजो भवन्ति । यदाह **परमर्षिः---"आहारनिमित्तेणं मच्छा गच्छंति सत्तमिं पुढविं । सच्चित्तो आहारो न खमो मणसाऽवि पत्थेउं ॥१॥"** रसनातृप्तौ संजातायां शेषाण्यपीन्द्रियाणि विकारव्याप्तानि भवन्ति । विकारवेगे च सति ध्रुवमेवाध्यवसायविपरिणामो जायते । तस्मिंश्च सति निबिडघनकर्मसंतत्युपार्जनद्वाराऽवश्यमेवानन्तकालं यावच्छ्रुतकेवलिनोऽपि संसारे स्थितिः । यदुक्तं-"**जइ चउदसपुव्वधरो वसइ निगोएसुऽणंतयं कालं । निद्दापमायवसओ ता होहिसि कहं तुमं जीव ? ॥१॥**" घोरकर्मवर्जनमपि क्षुद्रसत्त्वैर्वैरासंपादनेन तद्धितचिन्ताकरणद्वारा तदुपरि मैत्रीभावसंरक्षणेनैव भवति इत्यतो हेतोर्युक्तमेवोक्तं--"**मित्तेण तुल्लं च गणिज्ज खुद्दं जेणं भविज्ज तुह जीव भद्दं**" इति तृतीयगाथायाः प्रान्तपदद्वयं विचार्यते । च पुनः मित्रेण सुहृदा तुल्यं समानं गणयेत् मन्येत **क्षुद्रं** दुष्टमपि अत्यन्तापकारिणमपि परमोपकारिणमिव गणयेथाः । न हि दुष्टेष्वनिष्टं कुर्याः । येन साम्यावस्थालम्बनेन हे जीव तव भद्रं मोक्षावाप्तिलक्षणं स्यादिति तात्पर्यार्थः ।

अत्रार्थे **कीर्त्तिचन्द्रसमरविजयभ्रात्रोः** सन्धिबन्धेन कथा प्रतन्यते--

## ।। कीर्त्तिचन्द्रसमरविजयकथा ।।

इह भरहखित्ति अच्छइ पसिद्ध, चंपा इय नयरी धणसमिद्ध । जिहिं धम्मकज्जि जणु अहियलुद्ध, परदव्वहरणि पंगुव्व सुद्ध ।। १ ।।

।।३७।। सुपयंडदंड जिणहरसिरेसु, न हु दीसइ पुण नायरनरेसु । जिहिं तिव्वलोह सुहडह करेसु, अइमलिणपंक गिम्हह सरेसु ।। २ ।।

तत्थत्थि नराहिव कित्तिचंद, जसु जसिहिं विणिज्जिय भमइ चंद ।
न हु पावइ कत्थ वि जाव ठाण, ता जडरइ सेवइ सुन्नठाण ।। ३ ।।
जुवराय समरविजयाभिहाण, जसु आस सहोयर दोसठाण ।
परिपालइ दोन्नि वि निययरज्ज, मणवंछिय साहइ सयलकज्ज ।। ४ ।।

जिणिभग्गउग्गसूरप्पयाव, विणिवारियव्वरिउप्पभाव । नवकंतकंतिविज्जुलिकराल करवाल करंतउ करि विसाल ।। ५ ।।
गज्जियरवि तज्जइ किरि दुरंत दुकालमहारिउबलमहंत । गयणग्गभवणि निम्मियनिवास, पूरंतउ तिहुयणलोयआस ।। ६ ।।
कसिणब्भपडलउब्भडगयंद, अह पाउसकालमहानरिंद । सालूरमोरगणबंदिविंद, जयजयरवपत्तअमंदमंद ।। ७ ।।
इत्थंतरि कोऊहलरसाल, आरूढ गवक्खिहिं भूमिपाल । उच्छलिरबहुलकल्लोलमाल, पिक्खइ नइपूर महाविसाल ।। ८ ।। ।।३८
उत्तरिय भूमिवल्लह दुरंत, तिहिं आगय नियपरिवारजुत्त । आरुहिय नावि पविसइ खणेण, नइपरमज्झि कोउगरसेण ।। ९ ।।
जलकेलि करइ जा परियणेण, सह भुवइ ता उवरि घणेण । वुठेण पवड्ढिउ नइपवाह, अइतिव्ववेगि पवहइ अगाह ।। १० ।।
उम्मग्गि जंति अह बेडियाउ, जह उक्कड नरवइचेडियाउ । न हु कन्नधार वावार कोइ, विप्फुरइ लोइ हलबोल होइ ।। ११ ।।

जलपूरिहिं [illegible]लिज्जइ हा नरिंद, पुक्करइ तत्थ इय लोयविंद । धावह धावह भो सुहड इत्थ, कड्ढइ नरवइ जगि सो समत्थ १२

जिहिं दीसइ दीहतमालसाल, निंबंबजंबुतरुवर विशाल ।

अह दीहतमालाडवीयरुक्खि, तरणी विलग्ग कह कह वि रुक्खि ॥ १३ ॥

उत्तरिय भूमिवासव जवेण, संजुत्तउ कइवइपरियरेण । वीसमइ इक्कखण तिहिं नरेस, नियनयणिहिं पिच्छइ वणपएस ॥ १४ ।

आसण्णअरण्ण अगण्णवग्घ, हरिहरिणजूह उच्छलइं जित्थ । भमरुव्व भमिर तिहिं भूमिनाह, आणइ उव्वेय महा अगाह ॥१५॥

मणिरुप्पकणयटंकय अपार, तारय जिम झिगमिग करइंतार । कूलंकससलिलुक्खणिय ताव, निहि पिक्खइ रयणुज्जलसहाव ।१६।

तं पिक्खिय नियमंदिरिहिं पत्त, **निवकित्तिचंदु** परिवारजुत्त । अह चिंतइ सरलसहाव राय, वंचिज्जइ अवसरि नेव भाय ॥१७॥

॥ घात ॥ दंसइ ते नरवर नियय सहोयर **समरविजय** आणे वि लहु ।

अइकुडिलसहाविण चिंतइ तक्खण सो पाविट्ठ सुदुट्ठ बहु ॥ १८ ॥

॥ भास ॥ रयणलोहेण निहणेमि नणु भायरं, जीवबहुअलियघणपावभरकायरं ।

रज्जमवि लेमि गयतुरयसयसज्जियं, गुरुअभुयदंडसारेण जं अज्जियं ॥ १९ ॥

कस्थ माया पिया भाय भत्तिज्जया, कस्स मित्ता य भयणी य वरपुत्तया ।

जस्स धण तस्स घण सयणसंबंधिणो, निम्ममाबहइ सव्वो वि नणु परियणो ॥ २० ॥

मुक्क निस्संकचित्तेण लहुभाइणा, घाय नियभायहणणत्थमुरुमाइणा ।

अहह किं जायमेयं महाणत्थयं, एम पुकरइ तिहिं सयलजणसत्थयं ॥ २१ ॥
कहमिमेणज्जगज्जेण मारिज्जए, मिलह सव्वे वि लहु जेण वारिज्जए ।
कहमिमस्सेरिसी कुमइ संपन्नया, तह पलोयंतु नयणेहिं जणसंचाया ॥ २२ ॥
एम जंपंतलोएण खग्गप्पहाराउ उव्वारिओ भूवई सव्वहा ।
॥३९॥ वज्जरइ रोसरित्तो महीवासवो, धरिय बाहाइ तं रइयनयऊसवो ॥ २३ ॥
किं तए भाय किज्जइ अणायारया, दिस्सए किं न संसारनिस्सारया ।
तुज्झ जइ कज्जमेएण रज्जाइणा, ता तुमं गिण्ह अलमित्थ खरकम्मुणा ॥ २४ ॥
जेण लज्जिज्जए इत्थ जणमज्झए, तं कुलीणेहिं कइया वि न करिज्जए ।
जंपिए एवमवि तस्स नो उवसमो, पल्लवुल्लासमावन्न पावद्दुमो ॥ २५ ॥
हत्थजुयलम्मि विच्छोडिऊणं गओ, जह य उक्खणिय आणालखंभं गओ ।
बुज्झई कह य धम्मोवएसाइयं, जस्स मणमज्झि पावंधयारुब्बयं ॥ २६ ॥
॥ भास ॥ दुच्चरिय वियाणिय चित्तिहिं आणिय पावखाणि भाउयतणओ ।
संवेगिहिं रंजिय कम्मि अगंजिय, अथिर मुणइ धण अप्पणओ ॥ २७ ॥ ॥३९॥
सुयणो वि हु दुज्जण हवइ लोइ, धणकारणि मित्त अमित्त होइ । निहिणा पज्जत्तमिमेण मज्झ, वीमंसिय इय गय नयरमज्झ॥२८॥

अह समरविजय नइतडि भमंत, म हु पिक्खइ रयणुच्चय महंत । पुरओ विहु संठिय कूरकम्म, कह पावइ कत्थ वि सुक्ख रम्म२९
गिण्हित्तु गओ नणु भूमिनाह, इय नियमणि धरिय सुदुक्खदाह । पुरनयरगाम चोरी करंत, सो वट्टइ परधणकण हरंत ॥ ३० ॥
नियभायदेस लुट्टइ निसंक, जण बंधइ रुंधइ सत्थ बंक । अह अन्नदिवसि निग्गहिय सोय, सामंतिहिं तक्कर जिम ससो य ॥३१॥
निवअग्गइ आणिय तेहिं एस, सामिय इणि लुंटिय सयल देस । जं रुच्चइ तं कीरउ इमस्स, इय जंपिय तेहिं नरवरस्स ॥ ३२ ॥
नरवइ मिल्हावइ जीवमाण, अप्पावइ बहुधणरयणदाण । सो निच्छइ अइसइदुट्ठचित्त, नरवइ पुणि हियइ दयापवित्त ॥ ३३ ॥
तसु वुत्त लेसु मह रयणरज्ज, अंतेउरपुरहिं न मज्झ कज्ज । सो जाणइ नरवइ दिन्न केम, लिज्जइ ही लिज्जइ अप्प एम ।३४।
उद्दालिय भुयबलि जो गहेमि, कयकिच्च सच्च अप्पओ गणेमि । सो बहु परिचुकओ रायदेहि, मुक्कउ तहा वि बंधवह नेहि ॥ ३५
जण तत्थ भणइं एरिस उवन्न, सिरिकित्तिचंदनरराय धन्न । जिणिपालिय सज्जणगुण अपार, लहु भायह किय जीवोवयार ३६।

किहिं छिल्लर किहिं सायर गभीर, किहिं कायर किहिं पुण धीर वीर ।
किहिं गयवर किहिं गद्दहउ सोय, इय अंतर तिहिं वागरइ लोय ॥ ३७ ॥

सुयभज्जरज्जमुच्छा अतुच्छ, वज्जंतउ सुरसरिसलिलसच्छ । संवेगरंग अंगीकरेइ, उव्विग्गचित्त निव घरि वसेइ ॥ ३८ ॥
अह सुगुरु तत्थ चउनाणजुत्त, पणसमिइ तीनिगुत्तीहिं गुत्त । आयरिय पबोहसुनामधिज्ज, पुरि समवसरिय चारी ससज्ज ।३९।
हरसियमण तसु आगमणि राय, जाएविणु भत्तिहिं नमइ पाय । सुगुरूवएस कन्निहिं धरेइ, वय बारसेव अंगीकरेइ ॥ ४० ॥
मह पुच्छइ नियबंधवचरित्त, कहमेस सामि बहुदोसजुत्त । उल्लवइ गुरू वि हु महुरवाणि, पुहवीसर निसुणइ इक्कझाणि ॥ ४१ ॥

मंगलवइ विजइ महाविदेह, सोगंध नयरि गुणरासि गेहि । तिहि मयणसिट्ठिलणुजम्म जाय, सागरकुरंग इय दोन्नि भाय ४२
कीलंति दोवि ते विविहभंगि, कीलाहि पुरंतरि मनह रंगि ।
कइया वि हु पिक्खइ दुन्नि बाल, इग बालिय रूविहि अइरसाल ।।४३।।
||४१|| के तुब्भे इय ते पुच्छिया य, ता एग भणइ ताणं तया य । इह अच्छइ मोहमहानरिंद, जसु आण वहइ सिरिइंदचंद ।।४४।।
अरिकरिकुलकेसरितुल्ल तास, नंदण भुवणंतरि सप्पयास । पिउभत्त रागकेसरी य नाम, तस्सुय हउं सागर मणभिराम ।।४५।।
मह पुत्त एस पुण विणयवंत, परिगहभिलास जगि विजयवंत । वेसानरधूया कूरय चिंत्ति, नामिहि जगि एसा पयडसत्ति ४६
इय निसुणिय तच्चरियप्पवंच, हरिसुद्धसंतरोमंचवंच । अन्नुन्नमित्तभावं पवन्न, जीविय पुण इक्क सरीर भिन्न ।।४७।।
सायर सायरकुमरेहिं सत्थि, न हु कूरयाइ मित्तीय अत्थि । तसु भाय कुरंग सरंगचित्त, सह कूरयाइ सविसेसरत्त ।।४८।।
अह ते वि तारतारुण्णपत्त, अइदिव्वरूव सोहग्गजुत्त । परिय नियसुहजणपरियरेण, विहवज्जणसज्जीकयमणेण ।।४९।।
परदेसगमण पुच्छंति माइ, पिउ वारइ ते वि हु अइविसाइ । तह वि हु पत्थिय देसंतरम्मि, ते दो य भाय इत्थंतरम्मि ।५०। ||४१||
ते भिल्लिहिं लुंटिय अडविमज्झि, घणतरुगणगिरिसात्रयअसज्झि ।
संगोवियथेवधणा पवन्न, ते धवलपुरिहिं पट्टणि अपुन्न ।।५१।।
तिहिं हट्ट एग मंडिय अखंड, ववसाय कुणंति महापयंड । विढवंति तत्थ दीणार दुन्नि, सहसाइ गरुयकट्ठिहिं पवन्न ।।५२।।
अह वड्ढइ तण्हा ताण चित्ति, अइलालस हूआ बहुयवित्ति । कप्पासतिलह किय भंडसाल, तिहिं बहुविह अजिय पावजाल ।५३।

उच्छूण खित्तकरसण करंति, तसजीवसहिय तिल पीडयंति । मुहुगुलियधाइसकूडमाइ, वाणिज्जि पवड्ढइं ते पमाइ ॥५४॥
तह करहसगडपुट्ठियह सत्थ, घणमोहलोहमच्छरिहिं घत्थ । देसंतरि पेसइ बहुय सत्थ, न गणइ ते पावह भर अणत्थ ॥५५॥

धणकज्जि रज्जअहिगार लिंति, करवुड्ढि अहिय दाणिहिं करंति ।
बंधंति हेडहयतणीय गेहि, अहनिसि ते मुच्छिय अप्पदेहि ॥५६॥



इच्चाइपावकोडीहि तेहिं, धणकोडि समज्जिय कइदिणेहिं । अह पत्थिय जलनिहिमज्झि तेहिं, पूरिय पवहण बहुवक्खरेहिं ।५७।
लग्गेवि कम्मि जंपिय कुरंगि, तो कूरयाइ मनि धरिय रंगि । नणु हणसु मित्तपिमरप्पणिज्ज, धणभागहरं जह सोविरा कज्ज ५८
जसु धण तसु सयण अणेग हुंति, अणहुंतवि धणबंधव मिलंति । धणवंतह आवास त्रिछलंति, लीलाइ मणोरहसय फलंति ५९

नियहत्थिहिं कुण नणु दविणजाय, तव्वयण हूय तणुमण सहाय ।
निच्चं पि कहिय पावोवएस, कस चित्तिहिं न वसइ भण अवस्स ॥६०॥

तो पाडिय सायर सायरम्मि, तो तेण जलुम्मीपूरियम्मि । सो खद्धदेह जलयरसएहिं, संपत्त नरय असुहोदएहिं ॥६१॥

मयकिच्च तेण निम्मिय असेस, मणि हरसिय तव्वसणम्मि एस ।
जा जाइ किंपि जलमग्गि जाव, फुट्टइ वाहण तक्खणि सपाव ॥६२॥

नीरंतरि वुड्डउ सयललोय, हुय खंड खंड खणमज्झि पोय । गय सयलवत्थवक्खर जलम्मि, जीविअसंसय सो पडिय तम्मि ।६३।
अह तुरियदिवसि पट्टिय लहेवि, उत्तिन्न सो य कट्ठिहिं करेवि । संपत्तउ कम्मिवि पट्टणम्मि, वाणिज्ज करइ सो पुणवि तम्मि ६४

॥४२॥

धण अज्जिय भुंजिसु विउलभोय, चिंतिसु एणिपरि सप्पमोय ।
वणगहणि भमिर अह भमर जेम, सो भविखय सोहिण एम तेम ॥ ६५ ॥

मरिऊण पत्त धूमप्पभाइ, जिहिं दुक्खलक्ख अस्संखयाइ । भव भमिय तओ अंजणगिरम्मि, केसरिकिसोर हुय कंदरम्मि । ६६ ।
॥४३॥ इकठाणकज्जि दो वि हु भिडंति, नरयम्मि चउत्थइ पत्तिय वंति । उव्वट्टिय उग्गभूयंग हूय, निहिकज्जाइं झुज्झइं सुप्पभूय ।६७।
॥ घात ॥ पाविय पंचत्तण रोरवसग्गिण, डज्झंता पत्ता नरय । धूमप्पहनामिहिं दुक्खह ठामिहिं तत्तो भव भमडइं बहुय ।६८।
उववन्न अहो वणियस्स भज्ज, ते मित्त दुन्नि कम्मिहिं अणज्ज । निहणम्मि गए नाहम्मि ते य, कलहं कुणंति घरधणकए य ।६९।
झुज्झित्तु छट्ठपुढवी य पत्त आजीविय बहु पावप्पसत्त । अह भमिय भवंतर भूरिभेय, निवइस्स जाय नंदण दुवे य ॥ ७० ॥
पियमरणिहिं रज्जि अईव लुद्ध, अन्नुन्न करिय समरं विमुद्ध । उप्पन्न तओ पुण तमतमाइ, पंचत्त लहिय दुहसंगमाइ ॥ ७१ ॥
धणलुद्ध मुद्धमोहियमणेहिं, बहुवेयण पाविय तत्थ तेहिं । न हु कस्सइ दिद्ध न खद्ध पिद्ध, धण अज्जिय अप्पा दुहिय किद्ध ॥७२॥
अन्नाणकट्ठ काउण सुट्ठु, सो सागरजीव हूअओ गरिट्ठ । तुमम वणिनाह इयरो य तुज्झ, उववन्न भाय लहु सयलवज्झ ॥ ७३ ॥
इत्तो य अवर जं तस्सरूव, विम्हायपुव्व सो तुज्झ सव्व । उवसग्ग करिस्सइ तुह अणज्ज, चरणम्मि ठियस्स महाअवज्ज । ७४ । ॥४३॥
सो कूरयाइ सह करिय मित्ति, तस थावर जीव वहे वि सत्ति । दुस्सहदुहरासि विसन्न बाल, भमिही भव भूरि अणंतकाल ।७५
इय सुणिय वयण सुगुरुहि वुत्त, वेरग्गरंग नियमा पवत्त । निय भायणिज्ज हरिकुमरि रज्ज, संकामिय निल गिण्हइ पवज्ज ७६
दुस्सहतवसोसियनियसरीर, मेरु व्व सुथिर अइधीरवीर । सुमुणियसिद्धंतरहस्सतत्त, उज्जुयविहार रिसिराय-पत्त ॥ ७७ ॥

उपदेश-

॥४४॥

कस्स वि पुरस्स बाहिरपएसि, ठिय काउसग्गि अह गुरुनिदेसि । अच्छइ जा उड्ढ पलंबबाहु, समरेण दिट्ठु ता गुणसणाहु ॥७८॥
समरिय नियमणि वेराणुबंध, खग्गेण वि खंडिय तेण बंध । मुहझाणगयस्स जइस्स तस्स, करुणा कहु चित्तिहि तारिसस्स॥७९॥
अइदुस्सहवेयण सहिय तेण, भूमंडलि तक्खणि निवडिएण । चिंतइ रे जीव परबसेण, तइं दिट्ठ दुट्ठदुह कंपिरेण ॥८०॥
नरतिरियनरयभवि भमिर जीव, किं किं न सहइ दुस्सह दुह अईव । अन्नाणवसंगय अविरओ य, कम्मट्ठदुट्ठरिउमारिओ य ८१
मा धीर विसाय करेसु चित्ति, आयरसु खमागुण अतणु झत्ति ।
उत्तरिय जलहि नणु गोपयम्मि, को बुड्डइ पंडिय सुहतरम्मि ॥८२॥
वज्झेसु जीव हिंसप्पओस, सतूण उवरि करि तोस पोस । परिहरसु सयल तं दोसमोस, अइदुद्धर मम करि मणिहिं सोस ।८३।
अक्कूरभाव चित्तिहि धरेसु, मायानियाणसल्लुद्धरेसु । समभाव सव्वसत्तेसु धारि, समरस्स विसेसिहिं गुण वधारि ॥८४॥
इणिपरि अणुसासइ अप्पि अप्प, तिणि दूरिहिं उज्झिय भववियप्प ।
दुव्वंतउ सुहझाणम्मि चित्त, तक्खणि दसपाणिहि सो विमुत्त ॥८५॥
सहसारदेवलोयम्मि पत्त, तत्थ ट्ठिय सुह भुंजइ समत्त । ततो चवित्तु लहिही विदेहि, सिवसुह उप्पज्जिय इब्भगेहि ॥८६॥
जह तेण दुट्ठुलहुबंधवो वि, बहुकूडकवडपरिपूरिओ वि । मित्तोवम गणिय न दुट्ठभाव, तसु उप्परि आणिय सुहसहाव ॥८७॥
॥ घात ॥ अन्नेहिवि तव किर निम्मिय मण थिर, धारिय जिणवर धम्म धुर ।
कायव्वा मित्ती सुकय पवित्ती, सव्वोवरि जग सुक्खकर ॥८८॥
॥ इति क्षुद्रेऽपि मैत्रीभावप्रतिपत्तौ समरविजयकीर्तिचन्द्रसंधिः ॥

सप्ततिका

॥४४॥

अथ धर्मार्थिनां साधूनां श्राद्धानामपि च दीर्घदर्शित्वमेव श्रेयस्करं । अनागते व्याधौ यद्यात्महितं साध्यते तदा साधीयः । पश्चात्पूरप्रसरेऽतिदुर्द्धरे जाते पालिबन्धनं अबन्धनप्रायमेव तथा समागतेऽप्यमेयामये जाते सति यदि श्रेयः समाचर्यते तथापि साधु । तदुपर्युपदेशमाह । प्राक्तनकाव्यप्रान्तपदे भद्रस्य प्राप्तिर्जीवस्य प्रोक्ता, साप्येवं क्रियमाण साधियसी, तद्यथा दीर्घदर्शित्वमेव व्यञ्जयति--

**रोगेहि सोगेहि न जाव देहं, पीडिज्जाए वाहिसहस्सगेहं ।**<br>
**तावुज्जया धम्मपहे रमेह, बुहा मुहा मा दियहे गमेह ॥४॥**

**व्याख्या**—रोगैः—वातपित्तकफश्लेष्मात्मकैः । शोकैः—पितृपुत्रभ्रातृविपत्तिजनितैः । यावत् देहं—शरीरं दिह्यते लिप्यते कर्मभिरात्माऽनेनेति तथा । पीड्यते बाध्यते । किंभूतं ? "**वाहिसहस्सेति**" त्ति विशेषेण आधिर्मानसिकी पीडा राजयक्ष्मादयोऽप्यामयास्तेषां सहस्राणि तेषां गेहं गृहं स्थानमित्यर्थः । तावदुद्यताः—कृतोद्यमाः सन्तो धर्मपथे—धर्ममार्गे रमध्वं । अहो बुधा इत्यामन्त्रणं, यतस्तेषामेवोपदेशावकाशः, न तु निर्मेधसां पुंसामिति हेतोः तदामन्त्रणं क्रियते प्रोच्यते च हितार्थः । यतः प्रोक्तं **वाचकमुख्यैः**—"**न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् । ब्रुवतोऽनुग्रहबुद्धया वक्तुस्त्वेकान्ततो भवति ॥१॥**" ततो हेतोर्बुधा इति प्रयोगः । मुधा वृथा मा इति निषेधार्थेऽव्ययं, दिवसान् गमयतेत्यक्षरार्थः ॥४॥ पुनरप्यमुमेवार्थं समर्थयन्नग्रेतनं पञ्चमकाव्यमाह--

॥४५॥

जया उदिण्णो नणु कोवि वाही, तया पणट्ठा मणसो समाही ।
तीए विणा धम्ममई वसिज्जा, चित्ते कहं दुक्खभरं तरिज्जा ॥५॥

**व्याख्या**—यदा कदाचिदुदीर्ण—उदयं प्राप्तो नन्विति निश्चये कश्चिदपि व्याधिस्तदा । किं स्यादित्याह—प्रकर्षेण नष्टः प्रणष्टो मनसश्चेतसः समाधानं समाधिः सौस्थ्यमित्यर्थः । व्याधौ समुत्पन्ने मनसः समाधानं कुत इत्यर्थः । पुल्लिङ्गेऽपि स्त्रीत्वनिर्देशः प्राकृतत्वात् । "तीए विणेत्यादि" तया (तेन) विना समाधिमन्तरेण धर्ममतिर्धर्मबुद्धिर्वसेन्निवासं कुर्यात् चित्ते मनसि कथंकारं । अथ च दुःखभरं कथं केन प्रकारेण तरेज्जीवः ? न कथमपीत्यर्थः । यदा रोगोत्पत्तिः शरीरे काचित्संपन्ना तदा चेतःसौस्थ्यं गतमेव । चेतःसौस्थ्यमन्तरेण धर्मश्रीर्नैव वर्द्धते । अथ च धर्मं विना जीवस्य सुखाभाव एव केवल इत्यन्योऽन्याश्रयेण तात्पर्यार्थः । अथ यथा वपुर्व्याधिसंभवश्रवणेऽपि श्रीसनत्कुमारचक्रिणः संवेगरङ्गः सुभङ्गः प्रादुर्बभूव तथाऽन्यैरपि प्राज्ञैर्धन्यैः स्वहितमाचरणीयम् । अत्रार्थे श्रीतुर्यचक्रिणः सनत्कुमाराह्वयस्य समासत एव कथानकमुद्भाव्यते । तच्चेदं कृतिजनकृतोल्लाससानुप्रासकाव्यभङ्गयैव निरूप्यते—

॥ सनत्कुमारचक्रिकथा ॥

श्रीवर्द्धमानांह्रियुगं प्रणम्य, सम्यक्तया तत्त्वधियाऽधिगम्य । सनत्कुमारस्य रसेन पुष्टं, चरित्रमेतत् कथयाम्यदुष्टम् ॥१॥
अस्तीह देशः कुरुजाङ्गलाख्यः, पुंसां धनोपार्जनबद्धसख्यः । विराजते तत्र च हस्तिनापुरं, महासमृद्धया जितदेवतापुरम् ॥२॥
संत्यक्तमोहा अपि मोहयुक्ता, विशालदोषा अपि मुक्तदोषाः । कुरूपयुक्ता अपि रूपवन्तः, पुरे च यस्मिन्निवसन्त सन्त ॥३॥

तत्रास्ति भूपः किल **विश्वसेनः**, स्फूर्जज्जयश्रीधरविश्वसेनः । स्वैरं क्षितौ यस्य यशोमरालश्चिक्रीड कुल्यापयसीव बालः ॥४॥
तस्यास्ति कान्ता **सहदेव्युदारा**, रूपेण रम्भाप्रतिमा सुतारा । चञ्चच्चतुःषष्टिकलासमेता, शरत्पयःश्रेणिरिवाच्छचेताः ॥५॥
॥४७॥ चतुर्दशस्वप्ननिदर्शसूचितः, सुतस्तदीयोऽजनि लक्षणोचितः । **सनत्कुमाराभिधया**ऽतिविश्रुतः, कलाकलापेन शशीव संश्रितः ।६।
क्रमेण तारुण्यमवाप्तवानयं, सीमन्तिनीहृन्मृगवागुरामयम् । मुखं मृगाङ्कोज्ज्वलमण्डलोपमं, नेत्रद्वयं चास्य पयोरुहोत्तमम् ।७।
भुजावपि द्वौ परिघोपमानौ, पदौ पुनः कच्छपवत्प्रधानौ । वक्षःस्थलं व्यूढकपाटरूपं, रूपं पुनश्चित्तभुवा सरूपम् ॥८॥
सर्वाङ्गशोभागुणवर्णनायां, शक्तिर्न कस्यापि तदीयकायाम् । तेजस्तदीयं रविबिम्बतुल्यं, तीव्रं द्विषत्कौशिकचित्तशल्यम् ॥९॥
अमुष्य रूपस्य तुलां मुरारिर्नलः कुबेरोऽपि च नासुरारिः । न लेशमात्रेण च पञ्चबाणः, प्रापो जयश्रीसफलप्रयाणः ।१०।
उल्लालसीति स्म सदैव चेतो, राकेव बाल्यादपि तस्य मैत्री । महेन्द्रसिंहेन समं शुभेन श्रीशूरभूवल्लभनन्दनेन ॥ ११ ॥
स यौवनेऽभ्यस्तसमस्तविद्यस्तेनैव साकं सुहृदाऽनवद्यः । द्रष्टुं वनं चारु वसन्तमासे, बहिः समागात् सुषमानिवासे ॥ १२ ॥
वाहावलीवाहनवानुदारः क्रीडापरो यावदभूत्कुमारः । अश्वाधिरूढोऽपहृतः क्षणेन, केनापि तावन्मरुताऽघृणेन ॥ १३ ॥
मुक्तो महाकर्कशकर्करायां, भयप्रदायामटवीधरायाम् । चिन्तां दधौ चेतसि रक्षसा वा, नीतोऽहमत्रास्मि सुधाभुजा वा ।१४। ॥४७॥
अश्वात्समुत्तीर्य सनत्कुमारः, सर्वत्र बभ्राम सुरानुकारः । शून्यां वनीं तां निशि यूथमुक्तः, स्याद्यादृशो बालमृगो वियुक्तः १५
यथा प्रदीपे पतितः पतङ्ग, सनत्कुमारेण विमुक्तसङ्गः । ममार तत्रोरुतरस्तुरङ्गः, श्रमेण संपन्नशरीरभङ्गः ॥ १६ ॥
अरण्यमध्यभ्रमलग्नतर्षः, शुष्कास्यकण्ठः परिभूतहर्षः । भ्रान्ताक्षियुग्मः पतितो जगत्यामचेतनोऽतीव मृदुः प्रकृत्या ॥ १७ ॥

एकेन यक्षेण वनस्थितेन, प्रसिच्य सज्ञः स कृतोऽमृतेन । मूर्च्छोत्थितोऽपृच्छदिदं क्व वारि, प्रवर्तते यक्ष जनोपकारि ।। १८ ।।
यक्षोऽप्यवोचत्सलिलं कुमार, स्यान्मानसेऽदः सुपदप्रचार । कुत्रास्ति तन्मानसमेवमुक्ते, प्रोत्पाटितस्तेन स देवशक्तेः ।। १९ ।।
सरोवरस्य स्फुटमानसस्य, प्रान्ते विमुक्तः पयसावृतस्य । कृत्वा प्रणामं ववले स यक्षः, परोपकृत्युन्नतिबद्धकक्षः ।। २० ।।
समुत्थलल्लोलतरोर्मिमालं, समीपदेशस्थितपक्षिबालम् । सुगन्धपाथोजचलत्प्रवालं, परिस्फुरत्कल्पलतालसालम् ।। २१ ।।
गोदुग्धवर्णिर्मलमिष्टनीरं, हंसावलीनक्रनिषेव्यतीरम् । स मानसं नाम सरो ददर्श, प्रोद्भूतनानाविधहृद्विमर्शः ।। २२ ।।
प्रातः सरोऽन्तः स्नानं विधाय, प्राप्तप्रमोदः कनकाभकायः । जग्राह विश्राममशोकहस्य, च्छायागतोऽधः सहसोपविश्य । २३ ।
तत्रागतस्तावदथासिताख्यः, प्रोद्दामयक्षः कृतलोहिताक्षः । सार्धं कुमारेण हढप्रहारः, प्राग्जन्मवैरात् समरं चकार ।।२४।।

यक्षेण मुक्तानपि नागपाशान्, विनिर्मिमीते स्म स सद्विनाशान् ।
शीर्षोपरिष्टादचलं च मुक्तं, चक्रे स्वमुष्ट्या कणसाद्विभक्तम् ।।२५।।

यक्षः कुमारेण हढं प्रहृत्य, प्राग्जर्जराङ्गो विहितः स्वकृत्यः । आराटिमाधाय ततः प्रणष्टः, परं सुरत्वान्न मृतः स दुष्टः ।।२६।।
पुण्यप्रभावेण जितः स यक्षः, कृतश्च यत्ने शशिवद्विवक्षः । प्रसूनवृष्टिर्गगनाद्विमुक्ता, देवैस्तदा मूर्ध्नि किलास्य युक्ता ।।२७।।
विद्याधरस्य क्षितिविश्रुतस्य, श्रीभानुवेगस्य नरेश्वरस्य । विमानमारोप्य सुरैः सभार्यां, मुक्तो नगर्यां प्रियसङ्गमायाम् ।।२८।।
शुद्धं कुलं मूर्त्तिरहो न रुद्रा, भुजोर्जितं भूरि मतिश्च भद्रा । अखण्डिताऽस्तु प्रभुता जय त्वं, वैतालिकस्तत्र पपाठ तत्त्वम् ।।२९।।
श्रीभानुवेगेन नराधिपेन, ओत्थाय तेन स्वसभास्थितेन । सन्मानितोऽयं सुधिया कुमारः, संस्थापितः सद्मनि निर्विकारः ।।३०।।

प्रस्तावमालोक्य पुनर्जगाद, क्ष्मापः कुमारं प्रति निर्विषादः । गृहेऽष्टसङ्ख्या मम सन्ति कन्यस्तासां वरस्त्वं भवितासि धन्यः ३१
चिन्हाद्यतो यक्षजयस्य मेऽर्चिमालीनाम्ना मुनिनाऽक्षजेत्रा । चक्री चतुर्थो गदितस्त्वमेव, प्रदृश्यसे चामरसृट्सेवः ॥ ३२ ॥

तुभ्यं प्रदत्ताः सुखिताः स्वकन्या, स्युः प्रीतिदात्र्योऽपि पितुर्जनन्याः ।
प्रसद्य प्राणिग्रहणं कुरु त्वं, तासां ततो देहि च मे महत्त्वम् ॥ ३३ ॥

॥४९॥ नृपाग्रहात्तत्र कृतो विवाहस्ततः कुमारेण सुखाम्बुवाहः । विद्याधरीणां कुलसंभवानां, सद्रूपलावण्यगुणैर्नवानाम् ॥ ३४ ॥
मुनेस्तु तस्यैव गिराऽवबुद्धं यक्षेण सार्द्धं तव यद्विरुद्धम् । मदुक्तमाकर्णय भानुवेगः, प्राहाथ तस्येति सुबुद्धिवेगः । ३५ ।

अत्रैव कम्बलपुरे नगरे समृद्धस्त्वं विक्रमादिमयशा नृपतिः प्रसिद्धः ।
अन्तःपुरीप्रवरपञ्चशतीविवोढा, संजातवान् विपुलराज्यभरस्य सोढा ॥ ३६ ॥

तत्रैव नाम्नाऽजनि नागदत्तः, सुसार्थवाहः श्रितभूरिवित्तः । विष्णुश्रियाऽत्यद्भुतरूपवत्या, स्त्रिया समेतः शुभहंसगत्या ॥३७॥
भार्याऽन्यदा सार्थपतेर्नृपेण, दृष्टा दृशाऽसौ विगतत्रपेण । अन्तःपुरान्तः सहसा गृहीता, श्येनेन वत्वत्रे चटकेव नीता ॥३८॥
सार्थाधिपः स्त्रीविरहाग्निदग्धस्तदा बभूव ग्रथिलो विदग्धः । विष्णुश्रिया वागुरया कुरङ्गः, क्ष्मापः स नीतः स्ववशं सरङ्गः ३९
नृपो विमुक्ताखिलराजकार्यस्तद्भोगलुब्धः समजन्यनार्यः । अदाय्यसूयावशतोऽपराभिस्तस्यै विषं चाथ नृपाङ्गनाभिः ॥४०॥ ॥४९॥
भूपोऽथ तस्या मरणाद्विषण्णः, सार्थेशवच्छून्यहृदाधिभिन्नः । ददाति कर्तुं न तदङ्गदाहं, यथा मरुद्वर्षितुमम्बुवाहम् ॥४१॥
दिने द्वितीये सचिवैर्विमृश्य, निर्माय द्रवञ्चनमीश्वरस्य । क्षिप्तं क्षणात्तन्मृतकं ह्यरण्ये, निधानवत्कूपपयस्यगण्ये ॥ ४२ ॥

नृपोऽप्यपश्यन्मृतकं विवर्णस्त्यक्तान्नपानश्च मषीसवर्णः । जज्ञे यदा मंत्रिवरैस्तदानीं, म्रियेत मेति प्रहितो वनानीम् ॥ ४३ ॥
जनैः समं तत्र जगाम यावत्, कलेवरं तस्य ददर्श तावत् । दुर्गन्धविस्फोटितलोकनक्रं, मेदोवसालोलुभगृध्रचक्रम् ॥ ४४ ॥
निर्यद्घनासृक्पिशितास्थिविश्रं, चलत्कृमिश्रेण्युपलब्धनिश्रम् । विखण्डितं चञ्चुपुटैर्वयोभिर्निष्कासिताक्षं च मुहुर्मनोभिः । ४५ ।
ईदृक् तदेव क्वथितं तदङ्गं, निरीक्ष्य दृष्ट्या निजया विरङ्गम् । वैराग्यमाप्तः कृतपुण्यनाशाद्दुर्वारसंसारविकारपाशात् ।४६।
विचिन्तयामास हृदीति यस्य, कृते मया ह्रीर्गमिता कुलस्य । शुद्धं यशो लुप्तमपि स्वकीयं, तस्यापि देहस्य दशेदृशीयम् ॥४७॥
धिगस्तु मां मौढ्यमवाप्तमेवं, रागादिदोषैः कृतनित्यसेवम् । धत्तूरभक्षी गणयेद्धिरण्यं, किं वा न शैलादिकवस्त्वगण्यम् ।४८।
कुचास्यदृग्दन्तगणा नवीनैः, कुम्भेन्दुपाथोजसुमैरहीनैः । अवापिता मूढतयोपमानं, यस्यैतदङ्गं तमसां निदानम् ॥४९॥
कर्पूरपारीमृगनाभिगन्धो,यो दीयतेऽङ्गस्य मलैकबन्धोः । स्यात्सोऽपि दुर्गन्धमयः समस्तः, पटो यथा स्यान्मलिनो रजस्तः ५०
अन्तर्विमृश्येति तृणावलीवत्त्यक्त्वा स्वराज्यं स्वपताकिनीवत् प्रव्रज्य पार्श्वे गुरुसुव्रतस्य, स्थैर्यं दधौ श्रेयसि सत्तपस्यः ।५१।
महर्द्धिकोऽभूदमरः कृतित्वात्सनत्कुमारे त्रिदिवे स मृत्वा । च्युत्वा ततो रत्नपुरे सुधामा, श्रेष्ठ्यङ्गजोऽभूज्जिनधर्मनामा ॥५२॥
स श्राद्धधर्मं कुरुते स्म विज्ञस्तीर्थेशबिम्बार्चनसद्विधिज्ञः । सोऽप्यार्तचेता अथ नागदत्तस्तिर्यक्षु कृत्वा भ्रमणं प्रमत्तः ॥५३॥
संजातवान् सिंहपुरेऽग्निशर्माऽभिधो द्विजन्मा भुवि भूरिकर्मा । स्वैनस्त्रिदण्डिव्रतवानहार्षीद्दित्रिद्व्येकमासक्षपणान्यकार्षीत् ॥५४॥
आकारितो रत्नपुराधिपेन, स्वकीयगेहे हरिवाहनेन । अथो चतुर्मासकपारणायां, समागतः सोऽप्यपहाय मायाम् ॥ ५५ ॥
केनापि कार्येण तदाप्तरेखस्तत्रागतोऽभूज्जिनधर्म एषः । वैरी पुनः पूर्वभवस्य तेन, त्रिदण्डिनाऽदर्शि स दुर्जनेन ॥ ५६ ॥

तं वीक्ष्य राज्ञे स जगाद कुष्ठस्तदाऽस्ति भो!कोऽस्य पृष्ठे निविष्टः । स्थालं यदा दास्यसि पृष्ठिदेशे, त्वमस्य राजन्मृदुलोमलेशे ।५७।
विज्ञाय तस्याग्रहमित्यनेन, तथैव चक्रे धरणीधवेन । तस्मिं त्रिदण्डी परमान्नमत्ति, प्रीत्याऽस्य पृष्ठिं शिखिना भिनत्ति ।५८।
श्रेष्ठी स्मरन् प्राक्तनकर्मयोगं, यतीव सम्यक् सहते स्म रोगम् । कृतेऽशने स्थालमिदं गृहीतं, दूरे वसामांसरसैः परीतम् ५९
गत्वा स्वगेहे स्वजनानशेषान्, जिनांश्च संमान्य गुरून् सुवेषान् । सङ्घं चतुर्धा परिपूजयित्वा, तेपे तपः शैलगुहासु गत्वा ६०
उत्सर्गमाधाय किलैकपक्षं, तस्थौ स पूर्वाभिमुखः समक्षम् । तथा तिसृष्वप्यपरासु दिक्षु, श्रेष्ठी प्रमोदेन दिवं दिदृक्षुः ।।६१।।
वयःश्रृगालैरपि भक्ष्यमाणः, प्रोद्दामपीडां स तितिक्षमाणः । मासद्वयान्ते मृतिमाप्य जातः, सौधर्मवासी हरिराप्तसातः ।।६२।।
त्रिदण्ड्यथैरावणनामकुम्भी, जज्ञेऽभियोगी मरुदेष दम्भी । निरीक्षते पूर्वभवे जनीनं, स्वयं पराभूतमिमं शचीनम् ।।६३।।
स हस्तिरूपं न करोति यावद्वज्रेण वज्री स जघान तावत् । च्युत्वा हरिस्त्वं ननु चक्रवर्ती, जातश्चतुर्थः शुभभाववर्ती ।।६४।।

सुरः स ऐरावणनामधेयस्तिर्यक्षु कृत्वा भ्रमणान्यजेयः ।
जातोऽसिताक्षोऽस्त्यलभन् प्रबोधं, सार्द्धं त्वयाद्याप्यसृजद्विरोधम् ।।६५।।

।।५१।। यक्षर्द्धिमज्ञानतपःप्रभावात्तस्माद्‌धानाददमस्वभावात् । सर्वेषु कार्येष्वपि शङ्कनीयं, त्वया प्रमत्तेन न वर्त्तनीयम् ।।६६।। ।।५१।।
कृत्वैकमप्यत्र निजं सपत्नं, संतिष्ठते यो न नरः सयत्नम् । स कृष्णसर्पं रचयन्नपुच्छं, दधाति सौख्यं शयनादतुच्छम् ।।६७।।
कीदृग्विधोऽयं समयः सहायाः, के मामकीनाः क इहाभ्युपायाः । के वैरिणः कायकलाऽप्यलं का, मुहुर्विधेया स्वहृदीति शङ्का ६८

उक्त्वेति विद्याऽरिजयस्य कर्त्री, श्रीभानुवेगेन विषादहर्त्री ।
दत्ताऽस्य सोऽष्टाभिरथाङ्गनाभिः, सुष्वाप रात्रौ सह धाम्नि ताभिः ॥ ६९ ॥

ततः समुत्पाट्य कृतप्रमीलः, सद्वंशजातः शिखरीव नीलः । यक्षेण मुक्तः सुकृती सलीलः, कुत्राप्यरण्ये सुविशुद्धशीलः ।७०।

यावत्प्रभातेऽजनि जागरूकः, स्वं पश्यति स्मैष तदेव चूकः [तदाऽवचूकः] ।
सनत्कुमारः पतितं विशाले, दुर्वारभूभृद्गहनान्तराले ॥ ७१ ॥

विचिन्तयत्येष किमिन्द्रजालं, कन्याष्टकं तत्क्व गुणै रसालम् । फेत्कारवत्यः परितो भ्रमन्त्यः, शिवाः किमीक्ष्यन्त इमा इयत्यः ७२
मम प्रहारैं रचितव्ययस्य, संभाव्यते वा छलनोद्यतस्य । विक्रीडितं वैरभृतः सुरस्य, प्रोद्दामरोषाकुलमानसस्य ॥ ७३ ॥
यावद्विशङ्कं चरति स्म तावत्सौधं समैक्षिष्ट महत्सुधावत् । शैलस्य शृङ्गे करुणावरेण, स्त्रियोऽथ कस्याश्चिदितं परेण ।७४।
प्रोच्चैर्गतः सप्तमभूमिकायां, ध्वनेर्विशेषं शृणुते शुभायाम् । एवं स्ववक्त्रेण कुलाङ्गना सा, तदा वदन्त्यस्ति धृतप्रवासा ॥७५॥
कुरुस्फुरद्वंशनभःशशाङ्क, श्रीवत्ससंशोभिभुजान्तराङ्क । सनत्कुमार त्वमहो न भर्त्ता, यदीह तत्प्रेत्य भवाधिहर्त्ता ॥७६॥
तदग्रतोऽभूत्प्रकटस्तदानीमयं नराधीशसुतोऽभिमानी । पप्रच्छ का सुन्दरि कस्य पुत्री, सनत्कुमारेण कुतोऽस्ति मैत्री ॥७७॥
दत्त्वासनं सा न्यगदत्कुमारं, शुभागमोऽमुत्र कुतस्तवारम् । त्वद्दर्शनान्मेऽस्ति मनः सहर्षं, वनं पयोदादिव सप्रकर्षम् ॥७८॥
सुता सुनन्दाऽस्म्यरिमर्दनस्य, द्रङ्गे किलोर्वीतिलके स्थितस्य । सनत्कुमारं प्रियमेव कर्तुं, जाता सरागा च सुखं विहर्त्तुम् ७९
तस्मै पितृभ्यामहमेकचित्ता, पयःप्रदानेन तदा प्रदत्ता । वज्राद्यवेगेन हृताऽथ विद्याभृता कुमार्यप्यहमस्म्यविद्या ॥८०॥

विनिर्मिते सद्मनि शृङ्गिशृगे, बलाद्विमुक्ताऽत्र विमानचङ्गे । रात्रिन्दिवं शोकसमुद्रमग्ना, कष्टेन वर्त्ते कदलीव भग्ना ॥८१॥
अत्रान्तरेऽसौ खचरः समागाद्दृष्टः कुमारः सहसा निरागाः । उत्क्षिप्त आकाशतले बलेन, विद्याभृता तेन कृतच्छलेन ॥८२॥
वज्राहतेवात्यसुखं भजन्ती, हाहारवं स्वीयमुखे सृजन्ती । भूमण्डलेऽसौ पतिता वराकी, कुमारिका बाणहतेव काकी ॥८३॥
 विद्यायिनी सत्पुरुषक्षयस्याभूवं विलापान् सृजतीत्यशस्यान् । अथो कुमारः खरमुष्टिघातैस्तं जीवमुक्तं विदधे हहा तैः ॥८४॥

पुनः सुनन्दापुरतः समागतः सनत्कुमारः कुशलश्रिया श्रितः ।
आश्वासयामास च तां महाद्भुतं, वृत्तान्तमाख्याय निजं बलोचितम् ॥८५॥

सा तेन गन्धर्वविवाहवृत्या, कक्षीकृता चेतसि वाचि सत्या । तस्यास्तु लावण्यकलां न कश्चिद्वक्तुं क्षमःस्याद्भुवने विपश्चित् ।८६।

मुखेन जिग्ये ननु पार्वणः शशी, स्फुरन्मयूरश्चिकुरैः कृतो वशी ।
गण्डौ पुनर्द्वावपि रत्नदर्पणौ. भुजौ मृणाले कृतभीसमर्पणौ ॥८७॥

पाणी धृताम्भोरुहकान्तिलम्भौ, कुचौ सुधापूरितहेमकुम्भौ । मृदू तदूरू कदलीदलाभौ, चक्षुःप्रदेशौ च तडिल्लताभौ ॥८८॥
स्त्रीदर्शनप्रेमरसप्रपूर्णः, क्रीडँस्तया भोगभरैरजूर्णः उवास तत्रैव गृहे सुखेन, त्यक्तस्तरां चेतसि शङ्कनेन ॥ ८९ ॥ ॥५३॥
सन्ध्यावली तत्र तदैव रंहसा, सा वज्रवेगस्य समागता स्वसा । विलोकयामास मृतं सहोदरं, निजं धरित्रीपतितं बलोद्धुरम् ९०
क्रूरेण केनापि विनाशितो मे, भ्राताऽत्र वाजीव विशिष्टहोमे । इतीव तन्मारणसावधानाऽभूद्यावता सप्रतिघप्रताना ॥ ९१ ॥
नैमित्तिकोक्तं वचनं तदेदं, तस्याः स्मृतं निर्मितचित्रभेदम् । भविष्यति भ्रातृविनाशकारी, भोक्ता त्वदीयो भुवि चक्रधारी ९२

साऽपि क्रमाम्भोरुहि तस्य लग्ना, क्षणात्प्रदत्तस्वविवाहलग्ना । भार्या कुमारेण निजा सुनन्दाऽनुज्ञावशात्तत्र कृता सनन्दा ।९३

श्रीचन्द्रवेगस्य महर्षिवाक्यतः, पतिः कनीनां भवितेष धीमतः ।
सनत्कुमारोऽस्य यतस्तदाय[तौ], राट् चन्द्रवेगः श्वशुरोऽस्य जायते ।। ९४ ।।



श्रीचन्द्रवेगश्वशुरेण तत्र, श्रीभानुवेगेन तथा स्वपुत्रः । प्रेष्यैकदाऽथो हरिषेण एकः, प्रचण्डवेगोऽपि लसद्विवेकः ।।९५।।
ताभ्यामुभाभ्यां प्रथमागताभ्यां, भूयिष्ठसन्नाहरथैर्युताभ्याम् । प्रोक्तं कुमाराय निशम्य जातं, तं वज्रवेगस्य सुतस्य घातम् ।९६।

विद्याधरोऽत्राशनिवेगनामभृत्त्वन्मारणार्थं समुपैति भूमिभृत् ।
आवां पितृभ्यां प्रहितौ त्वदन्तिके, ततो घनां धेहि धृतिं हृदि स्वके ।। ९७ ।।

द्वावावयोः साम्प्रतमेव तातौ, समेष्यतस्त्वन्निकटे तथा तौ । अत्रान्तरे व्योमनि तूर्यशब्दः, समुत्थितः प्रावृषि याद्दगब्दः ।९८।
तौ भानुवेगाभिधचन्द्रवेगौ, तत्रागतौ सैन्ययुतौ स्ववेगौ । नरेश्वरौ द्वावपि चारु कर्तुं, कुमारपार्श्वेऽरिबलं प्रहर्तुम् ।९९।
अथाधिकामर्षसमागतस्य, विद्याधरस्याशनिवेगकस्य । सैन्यारवेण प्रविधाय मुक्तं, नभोऽङ्गणं तन्मुखरत्वयुक्तम् ।।१००।।
तत्संमुखं व्योमनि तेन गत्वा, तदा कुमारेण बलं हि धृत्वा । विद्याभृदावलीसहितेन युद्धं, कर्तुं समारब्धमतिप्रसिद्धम् ।।१०१।। 
आक्रान्तविक्रान्तशिरोमणीकं, समुच्छलच्छोणितधोरणीकम् । भद्रेभमुक्तावृतमेदिनीकं, द्वन्द्वं करोति स्म तयोरनीकम् ।।१०२।।
तौ चन्द्रभान्वादिमवेगविद्याधरौ तदानेन विमुच्य विद्याः। जितौ क्षणेनाशनिवेगनाम्ना, विद्याभृता तौ रवितुल्यधाम्ना ।।१०३।।
अथो कुमारेण समं चकार, द्वन्द्वं स विद्याभृदुरुप्रहारः । विद्याभृताऽमोचि महोरगास्त्रं, मुक्तं कुमारेण च गारुडास्त्रम् ।।१०४।।

आग्नेयशस्त्रं जलशस्त्रमुक्त्या, तत्तामसास्त्रं रविशस्त्रयुक्त्या । निषेध्य खण्डीकृतचन्द्रहासः, कृतः कुमारेण स विप्रयासः ॥१०५॥
शस्त्रेण दोर्भ्यां रहितः क्षणेन, कृत्तो विशाखः शिखरीव तेन । कृतोद्यमो वज्रविमोचनाय, नीतो मृतिं छिन्नशिरा विधाय ।१०६।
चमूः समस्ताशनिवेगसत्का, लग्ना कुमारांह्रियुगे समुत्का । अङ्गीकृता तस्य रमाऽप्यखर्वा, प्राप्ता जयश्रीः सुकृतेन सर्वा ।१०७।
सचंडवेगादिनभोगवारः, प्राप्तः स वैताढ्यगिरिं कुमारः । स्थितः पुरे चाशनिवेगनेतुः, खेटाः स्थिताः स्वस्वपदे परे तु ।१०८।
मुहूर्त्तयोगोडुषु सुन्दरेषु, लग्नेषु वारादिषु चोत्तमेषु । विद्याधरालीविभुताऽभिषेकः, खेटैः कृतस्तस्य शुभातिरेकः ॥१०९॥
अथैष वैताढ्यगिरावपापश्चक्रित्वमाप्याजनि सप्रतापः । श्रीचण्डवेगेन नृपेण तस्य, विज्ञप्तमाप्यावसरं विहस्य ॥११०॥
मामेकदा भूमिपते ह्यनार्तार्चिर्मालिनोक्ता मुनिनेति वार्ता । त्वत्पुत्रिकोद्वाहविधेर्विधाता, चक्री चतुर्थो भविता प्रमाता ।१११।
जन्मास्तु तासां सफलं तदद्य, त्वदीयपाणिग्रहणेन सद्यः । उक्त्वेति ताभिः सममस्य सृष्टः, पुत्री विवाहोऽप्यमुना गरिष्ठः ॥११२॥
अष्टाह्निकां शीकल्यजितोडुचक्रे, चक्रूचेप वैताढ्यगिरौ विचक्रे । नित्येष्वनित्येष्वपि सुन्दरेषु, श्रीमज्जिनाधीश्वरमन्दिरेषु ।११३।
अन्येषु तीर्थेष्वपि तीर्थयात्रां, कुर्वन्नयं नाट्यमहर्हमात्राम् । एकत्र नीचैः सरसि प्रधाने, प्राप्तः स्फुरद्वृक्षलतावितानें ॥११४॥
निरीक्षते स्माधिककौतुकानि, स्त्रीवृन्दलोकैः सहितः शुभानि । तत्रागतस्तावदमुष्य मित्रं, महेन्द्रसिंहः शृणुते स्म चित्रम् ।११५।
जीया अजस्रं धरणावमुत्र, श्रीविश्वसेनक्षितिपालपुत्र । सनत्कुमार त्वमवाप्तशक्तिर्बन्दिव्रजस्तत्र तदेति वक्ति ॥११६॥
गृह्णन् सरःस्थायिसरोजगन्धं, तस्यैष शृण्वन् यशसः प्रबन्धम् । ददर्श फुल्लत्कदलीगृहस्थं, सनत्कुमारं सुखकार्यवस्थम् ॥११७॥
अनभ्रवृष्टिप्रतिमं विशिष्टं, तद्दर्शनं वीक्ष्य मनोऽस्य हृष्टम् । नीतः स्वपार्श्वे विभुना वयस्य, आलिङ्गितश्चाधिकसौमनस्यः ।११८।

॥५५॥

आगत्य सोऽपि प्रथितप्रणामः, प्राप्तासनोऽस्थात्सविधेऽभिरामः ।
अपृच्छदेतं नृपतिः सुखं ते, राज्येऽस्ति भद्रं च निजेऽतिकान्ते ॥११९॥
मातुः पितुर्भ्रातृकदम्बकस्य, श्रेयोऽस्ति मित्रोत्तम मामकस्य । अथाप्तपञ्चाङ्गपटुप्रसादश्चक्रे स विज्ञप्तिमनाप्तसादः ॥१२०॥
कायेन हे नाथ पितुर्जनन्याः, श्रेयःस्थितिस्त्वन्तरहो तदन्या । यस्तावकीनोऽश्वकृतापहारः, पित्रोर्व्यधात्तं रति यथा प्रहारः ॥१२१॥



त्वदीक्षणार्थं दशदिक्षु शोकात्संप्रेषितास्त्वज्जनकेन लोकाः ।
धृताधृतिस्ते सविताऽपि वृद्धः, स्वयं चलन् सोऽथ मया निषिद्धः ॥१२२॥
अहं ततः सैन्यभराभ्युपेतस्त्वदाप्तये प्रस्थित एव नेतः । चिरं परिभ्रम्य वनां तथा गां, निवृत्तसैन्यः क्रमतस्त्विहागाम् ॥१२३॥
दुर्वारकान्तारपुराकरेषु, प्रोद्दामदेशेषु महीधरेषु । एकाकिनो वेगवताऽथ मित्र, दृष्टो मया त्वं न हि कुत्र कुत्र ॥१२४॥
परं न दृग्गोचरतां प्रयातः, कियत्सु वर्षेषु गतेषु दातः ।
पुराकृतानां तमसां किलान्ते, त्वमद्य लब्धो निधिवत्सुकान्ते ॥१२५॥



वृत्तं विभो ब्रूहि निजं समूलं, निःशेषविद्वेषिशिरस्सु शूलम् । तदोक्तमेतेन ममैति निद्रा, भार्येयमेतत्कथयिष्यति द्राक् ॥१२६॥
जजल्प हृच्चित्रकर तदीयं, तदा चरित्रं कुवलयपीयम् । प्रज्ञप्तिकायाःप्रकटप्रभावात्, कायेन वाचा सरला स्वभावात् ॥१२७॥
मरुज्जयश्रीप्रभृतिर्दुरन्तः, श्रुतस्त्वदीयो ह्यमुनाऽप्युदन्तः । सुधारसास्वादसमा दशा सा, तयोस्तदाऽभूत्समनःप्रकाशा ॥१२८॥
अथैष वैताढ्यगिरौ प्रभुत्वाद्राज्यं पुनः पालयति स्म गत्वा । मित्रेण साकं परिवर्जयित्वा, सर्वाण्यवद्यानि रिपूंश्च जित्वा १२९

महेन्द्रसंह्निने पुनः सुशीतैः, प्रोक्तं वचोभिः स्वधियोपनीतैः । माता तवास्ते बहुदुःखतप्ता, विषण्णहृद्देव तथास्ति वप्ता ॥१३०॥

तस्मादतः प्रस्थितिरेव योग्या, बह्वी पितुः श्रीस्तु तवैव भोग्या ।
पाश्चात्यचिन्तामपि माऽथ मुञ्च, स्वीयं कुटुम्बं कुरु सोत्सवं च ॥१३१॥

तदीयबुद्धया कृतवान् प्रयाणं, सार्थं गृहीत्वा दलमप्रमाणम् । चक्री स युक्तो मणिभूषिताभिर्विमानमालाभिरिनप्रभाभिः ।१३२।

विद्याधरोद्दामरमाभिरामश्चलन्नभस्यद्भुतरूपकामः । प्रापाद्भुतं भूरि सृजन् जनस्य, श्रीहस्तिनापुर्नगरं प्रशस्यः ॥१३३॥

॥५७॥ पितृप्रसूनागरमानसान्तस्तदा प्रमोदः प्रबभूव कान्तः । तद्दर्शनोद्दामसुधाम्बुसिक्ता, जाता विशश्वासुखदाहमुक्ताः ॥१३४॥

षट्खण्डभृद्भारतवर्षभोक्ता निधीश्ववाप्यंह्नितले प्रयोक्ता । चक्रादिरत्नानि चतुर्दशायं, बभार चक्री दलयन्नपायम् ॥१३५॥

द्वात्रिंशदुर्वीशसहस्रसेव्यः, सोऽभूच्चतुःषष्टिसहस्रदेव्यः । विभूषयन्ति स्म गृहाणि तस्य, द्विपाश्वपत्तीश्वरथाश्रितस्य ॥१३६॥

वर्षाण्यपि द्वादश चास्य हृष्टः, पट्टाभिषेकः समभूपसृष्टः । गभस्तिमालीव पटुतापश्चक्र्येष जातो भरतक्षमापः ॥१३७॥

अथो सुधर्माभिधसत्सभायां, शक्रः सुरश्रेणिनिषेवितायाम् । श्रोतोमणीनामकमिष्टकृत्यं, प्रमोदतः कारयति स्म नृत्यम् ।१३८।

ईशानतः सङ्गम आजगाम, तदेन्द्रपार्श्वे त्रिदशोऽभिरामः । सज्ज्योतिषां सूर्य इवापरेषां, हरन् सुराणां रुचिरूपरेखाम् ।१३९।

प्राहुस्तदाखण्डलमादितेयाः, तेजःकलाऽमुष्य कुतोऽस्त्यमेया । ऊचे वृषाऽऽचाम्लकवर्द्धमानं, कृतं तपोऽनेन पुरा प्रधानम् १४०। ॥५७॥

खद्योतवत्तावदयं सुरोऽतिप्रौढं वराकः कुतुकं तनोति । युष्मासु यावन्न सनत्कुमारः, समीक्ष्यते रूपगुणैरुदारः ॥१४१॥

तद्वैजयन्तो विजयोऽप्यनिष्टं, द्वौ मन्यमानौ वचनं पटिष्ठम् ।
सुरौ मिथो मन्त्रयतः सदिव्यं, रूपं कथं स्यान्मनुजस्य नव्यम् ॥१४२॥

याहग्भवेत् पक्षिषु खञ्जरीटः, स्यात्ता हगभ्यान्तरितश्च कीटः। हीनो भवेत्ताहश एव मर्त्यः, किं नास्य जिह्वेति नु तावमर्त्यः॥१४३

प्रजल्पतां सत्यवचोऽपि किञ्चिन्नास्माहशां वा प्रभुता कथञ्चित्।

एताहशां यौक्तिकमाधिपत्यं, प्रकुर्वतां सत्यतयाऽप्यसत्यम्॥१४४॥

तच्चक्रिरूपस्य तदैव लेखौ, परीक्षणार्थं कृतविप्रवेषौ। द्वौ हस्तिनाख्ये नगरे प्रयातौ, तद्रूपमालोकयतस्तथा तौ॥१४५॥

एवं पुनश्चिन्तयतो मघोनाऽमुनाऽस्य सद्रूपकलोदितोना।

साऽस्मिन् घनाऽस्तीति गताभिमानौ, जातौ शिरोधूननसावधानौ॥१४६॥

प्रजल्पतश्चक्रभृताऽपि पृष्टौ, तत्कारणं तत्र तदीयहृष्टौ। त्वां चक्रिणं रूपधरं तुरीयं, श्रुत्वाऽवहत्प्रेम हृदस्मदीयम्॥१४७॥

सुमागतौ सम्प्रति दूरदेशात्त्वदन्तिके द्वाःस्थकृतप्रवेशात्।

रूपं सुरेभ्योऽप्यधिकं तवेदं, हृष्ट्वा मनो नौ मुदितं ह्यखेदम्॥१४८॥

तदा नृपेणोक्तमहो युवाभ्यां, किं मर्दनस्यावसरे शुभाभ्याम्। लिप्ते च तैलेन खलेन देहे, प्रेक्षा कृताऽऽगत्य मदीयगेहे॥१४९॥

क्षणं प्रतीक्ष्य प्रविलोकनीयं, रूपं शुभालङ्कृतिभृन्मदीयम्। इत्येवमागूर्य नरेश्वरेण, विसर्जितौ तौ च मदोद्धुरेण॥१५०॥

निर्मापिता मज्जनयुक्तिरेषा, देहे नरेन्द्रेण पुनर्विशेषात्। ततः स दिव्यांशुकसारहारः, सर्वाङ्गशृङ्गारविधिं दधार॥१५१॥

द्विजौ समाकारितवान् पुनस्तावुभौ सभायां नृपतिः पुरस्तात्। हृष्ट्वा विभुं रूपमदोपयुक्तं, धत्तो मुखं कृष्णतरं विरक्तम्॥१५२॥

तयोः पुनः प्राह नराधिनाथः, कुतो विलक्षावधुना विभाथः। निवेद्यतां कारणमेवमुक्ते, तावूचतुस्तस्य पुरः स्वशक्तेः॥१५३॥

यादृक्कृताभ्यङ्गविधौ शरीरे, चङ्गत्वमासीत्तव मेरुधीरे । तादृङ्न शृङ्गारसमाकुलेऽपि, प्रदृश्यते साम्प्रतमुल्बणेऽपि ॥१५४॥
कुव्याधयः सन्ति तवाङ्गमध्ये, संक्रान्तिमाप्ता बहुला अवध्ये । क्षणे क्षणे ते क्षयमानयन्ति त्वद्रूपशोभां विफलां सृजन्ति ।१५५।

बभाण चक्री बहुबुद्धिमद्भ्यां, ज्ञातं कथङ्कारमिदं भवद्भ्याम् ।
विद्या कला काप्यथवा निमित्तं, किं वाऽवधिज्ञानमिहास्ति वित्तम् ॥१५६॥

॥५९॥ इतीव पृच्छामुखरस्य तस्य, क्षितीश्वरस्य प्रथितादरस्या पुरश्चलत्कुण्डलशोभमानौ, जातौ सुरौ तौ प्रकटौ समानौ ॥१५७॥
निवेदयामासतुरिन्द्रवाण्या, मात्सर्यमाधाय मतिप्रहाण्या । प्राप्ताविहावां नरदेव तूर्णमालोकितस्त्वं गुणरत्नपूर्णः ॥१५८॥

धन्यस्त्वमत्राभरणं पृथिव्या, यस्य स्तुतिः स्वर्गपुरेऽपि भव्या ।
बन्दिभ्रमं देवपतिस्तनोति, सत्त्वं न ते कोऽपि सुधीर्मिनोति ॥१५९॥

शारीरिकस्ते सुषमाप्रपञ्चस्तेजश्च रूपं पटु यौवनं च । वृद्धिं गतं कालमियन्तमेतदनुक्षणं हानिमथैति नेतः ॥१६०॥
चित्तेऽस्मदीयेऽद्भुतमेतदेव, क्ष्मामण्डलान्तः प्रतिभाति देव । क्षणेन यद्व्याधिवशाद्विशिष्टास्त्वद्रूपहानिस्त्वियतीह दृष्टा ॥१६१॥ ॥५९॥
अतः परं स्यादुचितं यथा ते, तथा विधेयं नृप शुद्धजाते । उक्त्वेति यातौ निजदेवलोके, सुधाभुजौ द्वावपि नष्टशोके ॥१६२॥
अथैष चक्री तनुचङ्गिमानं, दृष्ट्वा प्रणष्टं मुमुचेऽभिमानम् । रूपे क्षणेनेयति हीयमाने, वर्षेषु किं भावि पुनर्न जाने ॥१६३॥

किं किं न कायस्य कृते मयाऽस्य, पापं कृतं प्राणिगणं विनाश्य ।
यद्यस्ति तस्यापि दशेदृशी हा, तदन्येषु राज्यादिषु कीदृशी हा ॥१६४॥

एतेन देहेन न कस्य कस्य, सृष्टानि कार्याणि मया परस्य । द्रष्टान्यवत्त्वं कथमार्त्तियुक्तः, स्वकार्यकर्त्तव्यविधावशक्तः ॥१६५॥
अभूत्कृतं यत्सुकृतं पुरा तद्गतं प्रकुर्वेऽस्य नवं प्रमादः । धर्मं न रुग्व्याप्तवपुः करिष्ये, व्यर्थीकृतात्मीयभवो मरिष्ये ॥१६६॥
सद्भोगभुक्तावसमर्थकायश्चित्ते परान् भोगभुजो निरीक्ष्य । ईर्ष्याविषादं परमं वहिष्ये, निरुत्तरः स्वात्ममुखं हरिष्ये ॥१६७॥
 जीवः समास्वादितपूतिवीर्यः, शकृन्मयस्त्रीजठरेऽवतीर्य । पावित्र्यवाञ्छां कुरुते वराकः, ज्ञानश्रिया शोभनयेव काकः ॥१६८॥
चिन्तामणिं को दृषदा जहाति, तृणेन कः कल्पतरुं ददाति । कणेन कः कामगवीं च राति, कायेन को धर्मधनं जहाति ॥१६९॥
अन्तर्विमृश्येति सुतं स्वपट्टे, निवेश्य कीर्त्युत्सुकभट्टवट्टे । श्रीअर्हदर्चागुरुसङ्घसन्मानाद्यैः कृतार्थीकृतमर्त्यजन्मा ॥१७०॥
पलालवत्किरमामगास्य, प्रोत्या सुरश्रेणिकृतोरुदास्यः । गत्वोपकण्ठे विनयन्धरस्य, जग्राह दीक्षां सुगुरूत्तमस्य ॥१७१॥
अहर्निशं स्वीकृतशुद्धभिक्षः, सम्यक्तया शिक्षितसूत्रशिक्षः । कृतोद्यमो मोक्षपथाय षष्ठं, तपः करोति स्म धृतप्रतिष्ठम् ॥१७२॥

निधानरत्नान्यखिला रमण्यः, पदातयो मन्त्रिजनोऽप्यगण्यः ।
अनुभ्रमन्ति स्म षडत्र मासान्, दृगंक्षताप्येष न तान् कृताशान् ॥१७३॥

अन्तर्मिलच्चीनककूरचक्रं, गलस्तनीजं पिबति स्म तक्रम् । तपस्य षष्ठस्य स पारणायां, कृतस्फुरद्दुर्गतिवारणायाम् ॥१७४॥ ॥६०॥
अस्मात्तपःकर्मवशात्सदाहे, देहे पयःपानवशाद्विवाहैः । जाता महर्षेः प्रकटाः कुरोगाः, कुष्ठादयो निर्मितकष्टयोगाः ॥१७५॥
तपःप्रभावादुदियाय लब्धिव्रजस्त्विवेन्दूदयतः सदब्धिः । तथाप्यसौ नोत्सहते चिकित्सां, कर्तुं स्वदेहे प्रवहन् यदृच्छाम् ।१७६।
जानाति यत्पूर्वभवार्जितानां, स्वकर्मणामत्र ममोदितानाम् । अवेदितानां न विमुक्तिरास्ते, स्ववेदनायां तदसावुदास्ते ।१७७।

कुक्ष्यक्षिपीडां परमं ज्वरं च, श्वासं च कासं ह्यशनारुचिं च ।
कण्डूमितः सप्तशतीं समानां, सोढुं स लग्नो व्यथनं रुजानाम् ॥१७८॥

॥६१॥ अस्य प्रशंसा रचितोर्ध्वलोके, पुनः शचीशेन यदत्र लोके । अक्षोभ्य एवैष मयापि कार्त्तस्वरप्रभश्चेतसि वेदनार्त्तः ॥१७९॥
तामेव कर्तुं मरुतौ च दीक्षां, प्रत्युत्सुकस्यास्य मुनेः परीक्षाम् । समागतौ निर्मितवैद्यवेषौ, कुशस्थलीभेषजसद्विशेषौ ॥१८०॥
एकस्य शैलस्य तले मुनीन्द्रः, स्वधैर्यनिर्भर्त्सितसत्करीन्द्रः । स्थितस्तनूत्सर्गविधिं विधाय, दृष्टः स ताभ्यां जितरोषमायः ॥१८१॥
मन्दारयुक्तागमवर्द्धमानश्चित्रं न कार्त्तस्वरशोभमानः । परिस्फुरत्पादधरो मुनीन्द्रश्चकास्ति नव्योऽभ्युदितो गिरीन्द्रः ॥१८२॥
आत्मीयनासाग्रनिवेशिताक्षश्चकास्ति निष्कम्पतनुर्जिताक्षः । निवेशितो धर्मनृपेण मोहद्विषज्जायस्तम्भ इव वोर्द्धरोहः ॥१८३॥

कुर्वात एतौ स्वमुखेन घोषणं, कुष्ठज्वरश्वासकुशूलशोषणम् ।
कुर्वः किलावां भिषजौ महीस्पृशां, द्रग्रोगनाशं च पुनर्गलद्दृशाम् ॥१८४॥
प्रपारितोत्सर्गविधिर्मुनीश्वरः, स प्राह तौ प्रत्यसमक्रियोत्करः ।
द्रव्येण भावेन पुनर्द्विधा रुजा, साध्या तदन्तर्युवयोस्तु काङ्क्षजा ॥१८५॥ ॥६१
या द्रव्यरुक् सा मयकापि हन्यते, न भावरुक् क्षीणबला वितन्यते ।
प्रदर्शिता दीपशिखेव निर्मलीकृत्य स्वनिष्ठिवनमर्दिताङ्गुली ॥१८६॥

व्याधिस्फुरद्व्याधिनिवारकौषधे, स्वकीयपार्श्वे द्वयमप्यहं दधे । प्रतिक्रिया नैव परं विरच्यते, पुराकृतांहः स्वमेव मुच्यते ।१८७।

अज्ञानिभिर्द्रव्यरुजां क्षितिः कृता, कैरद्य नो भावरुजोऽन्तिके धृताः ।
हृन्मध्यमध्यामयविच्छिन्नं गतं, कर्माष्टकस्य प्रकृतेः पुरा कृतम् ॥१८८॥
घोरक्रिया चात्र कृता निरीक्ष्यते, स्वादः कषायः कटुको विलोक्यते ।
स्नेहापहारः स्फुटसौख्यकारकः, सितोपलास्वादविधिर्विकारकः ॥१८९॥



एवं यदा भावरुजां विनाशे, सामर्थ्यमास्ते भवतोः सकाशे । निवेद्यतां तर्हि तदेव मह्यमाचर्यते यत्स्वधिया प्रसह्य ॥१९०॥
इत्युक्तिमाकर्ण्य मुनेःपुरस्तौ, जातौ सुरौ द्वौ प्रकटौ प्रशस्तौ । प्रजल्पतश्चेन्द्रकृतां प्रशंसां, तत्रासहिष्णू विरचय्य त्रिसाम् १९१
तावेव चावां मरुतौ पुरागतौ, स्वर्गाद्विनिर्गत्य पुनःसमागतौ । त्वदीयसत्त्वाधिकतापरीक्षया, न मूर्खता किं प्रकटी कृतेयंया १९२
मेरुं प्रहर्तुं यदिहोद्यतानां, भज्यन्त एते रदना गजानाम् । गुणस्तुतिं ते रचयन्नवीनः, स एक एवास्ति शुचिःशचीनः ॥१९३॥
आवां कृतार्थौ तव दर्शनेन, स्याद्वा किमन्येन । विमर्शनेन । नमोऽस्तु तुभ्यं मुनिपुंगवाय, श्रेयःपुरी मार्गशुभाध्वगाय॥१९४॥
संसारकाराक्षयकारकाय, स्वचक्रिलक्ष्मीत्यजनोत्सुकाय । विनिर्मितस्वात्महितव्रताय, स्वस्त्यस्तु तुभ्यं मुनिशेखराय ॥१९५॥
एकत्र संस्थायिसुपर्वचक्रे, यस्य स्तुतिस्ते हरिणापि चक्रे । तथापि धत्से न मनाक् प्रकर्षं, धत्से मदाद्रौ पविवत्त्वमर्षम् । १९६ ।
लब्धिष्वनेकास्वपि संगतासु, कर्ता चिकित्सां न हि रुग्लतासु ।
योगी त्वमेवासि मनीषिमान्यस्त्वया सदृक्षो मुनिरस्ति नान्यः ॥ १९७ ॥
समग्रवैराग्यनिधे महर्षे, कुरु प्रसादं विदिताऽत्र वर्षे । अज्ञानतो यत्तु तवापराद्धं, क्षमस्व सर्वं तदथो विराद्धम् ॥१९८॥

॥६२॥

एवं महर्षेः स्तवनं सृजन्तौ, पुनः पुनः पादयुगं नमन्तौ। प्रमोदरोमाञ्चितगात्रयष्ठी, स्वर्गं सुरौ जग्मतुरार्द्रदृष्टी ॥ १९९ ॥
धौरेयबद्धर्मधुरां दधानः **सनत्कुमारर्षिरपि** प्रधानः। महर्द्धिकोऽभूत्त्रिदशः स नाके, सनत्कुमारे शुभपुण्यपाके ॥ २०० ॥
इत्थं समाख्यातमदः पवित्रं, सनत्कुमाराख्यमुनेश्चरित्रम्। आकर्णनीयं कविभिः, श्रवोभिः, सुचार्वनुप्राससमूहशोभि ॥२०१॥

**॥ इति श्रीसनत्कुमारचरित्रम् ॥**

॥६३॥ अथ विरक्तचित्तः सत्त्वः सदा सुखी तदन्यस्तु महादुःखीत्येतदुपरि पूर्वकाव्यार्थसम्बद्धमेव षष्ठं काव्यमाह, तद्यथा–

**विरत्तचित्तस्स सया वि सुक्खं, रागाणुरत्तस्स अईव दुक्खं।**
**एवं मुणित्ता परमं हि तत्तं, नीरागमग्गंमि धरेह चित्तं ॥ ६ ॥**

व्याख्या–विरक्तचित्तस्य वैराग्यापन्नात्मनः सदापि निरन्तरमेव सुखमस्ति। अथ रागानुरक्तस्य रक्तात्मनोऽतीव प्रकामं दुःखमास्ते। एवं परमं तत्त्वं मुणित्वा ज्ञात्वा हि निश्चितं नीरागमार्गे निःसङ्गाध्वनि चित्तं धरत निवेशयध्वमिति काव्यार्थः ॥
अथ विरक्तरक्तचित्तानां सुखदुःखफलाविर्भावकः स्पष्टीक्रियते दृष्टान्तो **जिनपालितजिनरक्षितसत्कः**–

## ॥ जिनपालित–जिनरक्षित–कथा ॥ ॥६३॥

मधुराम्भोभृतपम्पा दुर्जनजातौ सदा निरनुकम्पा। शत्रुजननिष्प्रकम्पा **चम्पा** नाम्नाऽस्ति वरनगरी ॥१॥
सज्जनहृदयानन्दी **माकन्दी** तत्र वर्त्तते श्रेष्ठी। **जिनपालितजिनरक्षितनामानौ** तत्सुतौ जातौ ॥२॥

 नानाव्यापारपरावपरापरकार्यलब्धचातुर्यौ । तावेकादशवारानवगाह्येतौ सुखाज्जलधिम् ॥३॥ 
भूयोऽपि तौ प्रचेलतुरात्मीयसगीनवारितावपि हि । प्रवहणमापूर्य बहुप्रकारवस्तूत्करैः सुतराम् ॥४॥
यावज्जलनिधिमध्ये प्रभूतभूभागमागतावेतौ । प्रबलाशुगप्रयोगात्तावत्स्फुटमस्फुटत् पोतः ॥५॥
पुण्यादवाप्तफलकौ जलधेरुपकण्ठमाप्तवन्तौ तौ । उत्तीर्य प्रचुरपयःपूरं दूरं स्थितौ विपदः ॥६॥
 कथमपि रत्नद्वीपं प्राप्याश्नीतः पचेलिमफलानि । दुःखाद्दीनमनस्कौ वृक्षच्छायां निषेवाते ॥७॥
तावद्रत्नद्वीपाधिष्ठात्री क्षुद्रमानसा देवी । तत्राप पापमूर्त्तिः प्रत्यक्षेवोरुखड्गकरा ॥८॥
दृष्ट्वा दृष्ट्वा हृष्टा तौ पापिष्ठा मुखे स्फुटं मिष्टा । आचष्टेति निकृष्टा सार्धं भोगान् मया भजेतां भोः ॥९॥
दात्रेण शीर्षवत्किल नौ चेन्निशितासिनाऽमुना ह्यधुना । युवयोर्मस्तकयुग्मं हठान्निमेषाल्लुनिष्यामि ॥१०॥
भीत्या कम्प्रवपुर्भ्यामाभ्यामभ्यागताङ्घ्रितुल्याभ्याम् । प्रतिपेदे तद्वचनं मृत्युभयं सर्वतोऽप्यधिकम् ॥११॥
उत्क्षिप्य क्षणमात्रेणैषा रोषारुणेक्षिणी प्रायः । तावानिन्ये भुवने निजे महापातकोद्भवने ॥१२॥
संजह्रे निर्ह्रीका निर्भीका देहपुद्गलानशुभान् । देव्यनयोरस्तदयोदारस्फारोरुशृङ्गारा ॥१३॥
अमृतमयरसफलानामानीयाहारमेतयोर्दत्ते । भुङ्क्ते च कामभोगानभिरामानिष्टसंयोगान् । १४॥ 
साऽथ तयोरित्यवदत्कदाचिदतिसोन्मदाऽमरी क्रूरा । गन्तव्यं मम लवणोदधौ सुधाभुग्वरादेशात् ॥१५॥
सुस्थितसुरेण सार्द्धं तृणकचवरकाष्ठखण्डमृतकाद्यम् । संशोध्योदधिमध्यात् [1]कृत्वस्त्रिःसप्त वेगेन ॥१६॥

१ कृत्वः उत्तरपदे यस्येतिकृत्वा मध्यमपदलोपी समासः त्रिःसप्तपदेन सह कर्तव्यः ।

यावदहमिहायामि स्थातव्यं तावदत्र हि युवाभ्याम् । चिन्ता कापि न कार्या धार्या चित्तेऽधृतिर्नैव ॥ १७ ॥
यदि हृदि न स्फुरति रतिः स्थितिभाजोरत्र मामकीनगृहे । तत्पूर्वदिगुद्याने तथोत्तरे पश्चिमारामे ॥ १८ ॥
प्रावृण्मुख्यमृतुद्वयमेकैकस्मिन्निहास्ति नित्यमहो । द्वाभ्यामुत्तीर्यातस्तत्र स्वैरं विहर्तव्यम् ॥ १९ ॥
 न पुनर्दक्षिणदिग्वनभूभागे सर्वथाऽपि गन्तव्यम् । यदहो तत्रास्ति महाभयङ्करो विषधरो विषमः ॥ २० ॥
तावपि तथैव तद्गिरमङ्गीकुरुतः कृतान्तभीत्येव । सैवमुदीर्य जगाम क्षणतः क्षणदेव रविबिम्बात् ॥ २१ ॥
प्रतिषिद्धावप्येतौ रममाणौ रम्यविपिनवीथीषु । दक्षिणदिग्वनमारात्समीयतुर्वीक्षणोत्कमती ॥ २२ ॥
यावत्तन्मध्यभुवं प्राप्तौ दुर्गन्धदूषितघ्राणौ । तावत्करुणस्वरपरनरमेकमपश्यतां तत्र ॥ २३ ॥
प्रेतवनस्थितशूला भिन्नाङ्गमिमं महाविलापपरम् । संप्रेक्ष्य चास्थिपूरं परितस्तौ बिभ्यतुः सुतराम् ॥ २४ ॥
तत्पार्श्वादपृच्छतुरेतौ पूतंकमानसौ प्रायः । कोऽसि त्वं केनात्रानीतोऽसि कथं च दुरवस्थः ॥ २५ ॥
सोऽवादीद्गद्गदगीः काकन्दीवास्यहं वणिक्तनयः । स्फुटितप्रवहणमागामहमिह संवीक्षितः सुर्या ॥ २६ ॥
रमितं तया मया सह लघ्वपराधेऽपि कुपितवत्येषा । कर्त्तिकया छित्त्वाङ्गं शूलायामस्म्यहं दत्तः ॥ २७ ॥ ॥६५॥
एवमनेके लोकाः शोकाब्धौ पातितास्तया देव्या । कः कामिन्या वशगः कष्टमनिष्टं प्रपन्नो नो ॥ २८ ॥
तद्वाक्याकर्णनतः प्रोद्भूतात्यन्तभीतिकम्प्राङ्गौ । तं प्रत्याख्यातस्तौ चिन्तासंतापसंग्रस्तौ ॥ २९ ॥
त्वद्वदहो आवामपि तया महामायया गृहे नीतौ । तिष्ठावो निगृहीताविव का गतिरावयोर्भवित्री भोः ॥ ३० ॥

शृणुयाच्चान्यो हि यथा तथा पुमानुक्तवान् वचः शनकैः ! युवयोरपि दुरवस्था नूनं संभाव्यते मद्वत् ॥ ३१ ॥
तस्माद्दीनमनस्काभ्यामाभ्यामुक्तमार्त्तिवर्त्तिभ्याम् । अस्मन्मरणत्राणोपायं दर्शय दयामय ! भोः ॥ ३२ ॥
करुणापरिपूर्णमनाः स ना समाचष्ट कष्टगः स्पष्टम् । एकोऽस्ति जीवितव्योपायः कायस्य चेत् क्रियते ॥ ३३ ॥
इह पूर्वदिशारामेऽप्यभिरामे सेलकाह्वयो यक्षः । स तुरङ्गरूपधारी परोपकारी सदाऽप्यास्ते ॥ ३४ ॥
पूर्णामावास्यायामष्टम्यामथ चतुर्दशीदिवसे । आगत्य वक्ति स भृशं कं पथिकमवामि तारयाम्यहकम् ॥ ३५ ॥
अस्मांस्तारय पालय निर्नाथान् देशपुरपरिभ्रष्टान् । स करिष्यति तूर्णं मनोरथापूरणं निखिलम् ॥ ३६ ॥
विषयासक्तेन मया तद्वचनं नहि कृतं सुकृतगम्यम् । न भवद्भ्यां श्रुतविद्भ्यां प्रमादपरता विधातव्या ॥ ३७ ॥
स्वीकृत्यैतस्य गिरं दुरन्तदुःखार्त्तितप्तिघनवृष्टिम् । व्यावृत्य ततस्तत्रागत्य वने स्नानमाधाय ॥ ३८ ॥
आदाय धवलकमलान्याजग्मतुरेतकौ हि यक्षगृहे । पूजोद्युक्तमनस्कावमनस्कावङ्गनासङ्गे ॥ ३९ ॥
अभ्यर्च्य भूरिभक्त्या नवनवयुक्त्युद्भवादभिष्टुत्य । इति विज्ञप्तिमकार्ष्टामनिष्टकष्टोद्भवाद्भीतौ ॥ ४० ॥
त्वं यक्ष रक्षकोऽसि प्रत्यक्षः कल्पवृक्षवद्दाता । त्राता प्राणिगणानामार्त्तानामाश्रयस्थानम् ॥ ४१ ॥
एवं विज्ञप्तः सन् तुष्टः सुष्ठ्वेतदुपरि यक्षेशः । भक्त्या न हि कस्तुष्यति रुष्यति न हि कः परुषवाचा ॥ ४२ ॥
प्रोवाच वाचमनयोर्विनयोद्यतचेतसोरसौ सुमनाः । कं तारयामि कं पालयामि किल साध्वसाकुलितम् ॥ ४३ ॥
अब्रूतामेतौ तं कारुणिकशिरोमणे ! महायक्ष । वैदेशिकावशरणावावां तारय तथा रक्ष ॥ ४४ ॥

यक्षेणाहृद्याथि तदा सर्वमिदं सुस्थतां नयिष्येऽहम् । सुहृढतया मत्पृष्ठारूढाभ्यां खलु भवद्भ्यां भोः ॥४५॥
तस्या मायाविन्या मानिन्याः केटके समेतायाः । न हि श्रृङ्गारोदारा रूपरमा लोकनीया भोः ॥ ४६ ॥
तद्गीरप्यतिमधुरा स्मरानुरागप्ररोहसंजननी । न मनाक्कर्णे कार्या कटुकाऽपि न मानसे धार्या ॥ ४७ ॥
॥६७॥ यद्यनुरागवशंवदहृदयत्वं जातमेतदुपरिष्टात् । कथमपि युवयोस्तर्ह्यहमुच्छाल्य निजोरुपृष्ठतटात् ॥ ४८ ॥
क्षेप्स्याम्यन्तर्जलधेरथ यदि समभावतां समालम्ब्य । स्थास्यत उन्नतपदवीं तद्युवयोरर्पयिष्यामि ॥४९॥ ॥ युग्मम् ॥
प्रतिपेदाते तावपि तदुक्तमत्यादरात्तथेत्युक्त्वा । हृदयाश्विवर्त्य रागं तस्थतुरेकाग्रतरचितौ ॥ ५० ॥
अत्रान्तरे तुरङ्गमरूपं निर्माय झटिति निर्माय: । तावधिरोप्य कुमारौ वियदध्वनि संप्रतस्थेऽसौ ॥ ५१ ॥
पवमानजयनगत्या सत्याधारः प्रयात्यसौ यावत् । तावत्समाजगाम व्यन्तर्यात्मीयधवलगृहे ॥ ५२ ॥
स्वस्यापि तौ वृषस्यन्ती तत्रैतौ दृशा ह्यपश्यन्ती । विषसाद हृदि नितान्तं कुत्र गतौ वञ्चयित्वा तौ ॥ ५३ ॥
तावदवधिप्रयोगादवगतसम्यक्तदीयकसतत्त्वा । आगत्य लवणजलधावेषा तत्केटकेऽधावत् ॥ ५४ ॥
स्थित्वैयन्तं कालं मत्सद्मनि भोगभङ्गिमनुभूय । कथममिलित्वा चलितावहो भवन्तौ महाधूर्तौ ॥ ५५ ॥ ॥६७॥
निर्मुच्यैनं वञ्चकमश्वीभूतं कृतान्तमिव भूतम् । मामाश्रित्य पुनर्भोस्तथैव सुखिनौ युवां भवतम् ॥ ५६ ॥
नो चेन्निशितेनैतेनैव कृपाणेन पातयिष्यामि । मस्तकयोर्युगलमिदं प्रबलं कूष्माण्डफलवदलम् ॥ ५७ ॥
इत्याद्युदग्रवचनैर्न क्षुब्धौ तद्गुणेष्वपि न लुब्धौ । प्रबलैरप्यनलभरैर्न सह्यव विन्ध्याचलौ चलतः ॥ ५८ ॥

निरुपमरूपवती सा ह्यगण्यलावण्यमङ्गमादधती । शृङ्गारोदारगिरं जजल्प सङ्कल्पजन्मवशात् ॥ ५९ ॥
हा कथमनाथिकाऽहं दुस्सहविरहाग्निदाहसंतप्ता । अशरण्यारण्यगता हरिणीवाहं भ्रमिष्यामि ॥ ६० ॥
मुक्त्वा मामनुरक्तामबलामेकान्तकान्तकमनीयाम् । प्राप्तौ पथिकावस्थामस्थानोद्यानसन्मानौ ॥ ६१ ॥
न कदाचिद्धौ भवतोरपराधः क्वोऽपि कृतः कोऽपि । हेतोः कस्माद्दुष्टौ सन्तुष्टौ पश्यतोऽभिमुखम् ॥ ६२ ॥
सौवाङ्गसङ्गसलिलासेकादेकान्तशैत्यसमुपेतम् । विरहार्तितप्तमङ्गं मदीयमेतत्प्रकुर्वाताम् ॥ ६३ ॥
इत्यादीन्यपि भणितान्यवगणयित्वा न वै विलोकयतः । एतस्या अपि सन्मुखमेतौ यावत्सुदृढहृदयौ ॥ ६४ ॥
अवबुध्यावधिबोधात्सविरोधा दीप्तमानसक्रोधा । मद्वचसैष वलिष्यति जिनरक्षित इत्यवश्यतया ॥ ६५ ॥
प्रावर्त्तत सा वक्तुं युक्तुं किमदस्तवाप्यहो कर्तुम् । जिनरक्षित ! दक्षशिरोमणे ! कथं गणयसि तृणाय ॥ ६६ ॥
जिनपालितोपरिष्टादिष्टा वाञ्छा कदापि मे नासीत् । हृदयाभीष्टस्तु भवानेवाधिक्येन तत्त्वतया ॥ ६७ ॥
जिनपालितः कदाचिद्यदि न वदति रुष्टधीर्मया सार्द्धम् । तव पुनरेतन्मौनावलम्बनं नैव युक्तमहो ॥ ६८ ॥
त्वद्विरहे मम हृदयं निर्दय! संस्फुटति भृतसरोवरवत् । तत्प्रीतिपालिकरणाद्धारय वारय विषादभरम् ॥ ६९ ॥
नाहं त्वया विरहिता हितानि मन्ये वनानि गेहानि । हानिरियं महती ते यन्मामपहाय यासि रताम् ॥ ७० ॥
चरणरणन्मञ्जीरा क्षीरादपि मधुरवादिनी वदने । तदुपरि ववर्ष हर्षात्त्रिदशी सौवर्णकुसुमभरम् ॥ ७१ ॥
उत्कर्णतया स तया समुदीरितवाक्यमादराच्छृण्वन् । विद्धः स्मरशरनिकरैः स्मरंस्तदीयाङ्गरूपगुणान् ॥ ७२ ॥

तस्या मायाविन्या विज्ञानममानमङ्गजं ध्यायन् । विस्मारयन् समस्तं शूलादत्ताङ्गिगीःप्रसरम् ॥७३॥
प्रथमरतास्वादसुखोन्मुखीभवन्निर्भयत्वमाश्रित्य । सेलगयथाख्यातं त्रिदशद्विषमं समवधूय ॥७४॥

आघ्राय सुरभिगन्धान् घ्राणप्रियकारिणस्तथारूपान् ।
जिनरक्षितः प्रपश्यति तदभिमुखं विमुक्तसुकृतौघः ॥७५॥ चतुर्भिः कलापकम् ॥

॥६१॥ विषयामिषलवलुब्धं स्तब्धं स्वभ्रातृमोहनिर्मुक्तम् । अवगत्य सेलकाख्यस्तमपातयदम्बुधौ पृष्ठात् ॥७६॥
निपतन्तं गगनतलात् प्रवृद्धकोपानला बलादमरी । निःसंशयं मृतस्त्वं प्रपलाय्य व्रजसि रे दास ! ॥७७॥
श्रुत्या श्रुताऽपि नाहं दृष्ट्या दृष्टापि दुष्ट ! पापिष्ठ ! । भुक्त्वाऽभीष्टसुखानि प्रणष्टवानस्यथो धृष्ट ! ॥७८॥
प्रलपन्तीति सुनिष्ठुरमम्बरदेशादधत्त निपतन्तम् । तीक्ष्णक्षुरप्रधाराग्रेण बिभेदास्य सर्वाङ्गम् ॥७९॥
तदनन्तरं शरीरं निशितकृपाणेन खण्डशः कृत्वा । प्रददौ दिग्देवीभ्यो बलिमस्यासावनायासात् ॥८०॥
कुर्वाणा कलकलरवमतिभैरवभैरवीव सुर्येधा । लोभयितुं जिनपालितमगात्तुरङ्गाग्रस्तूर्णम् ॥८१॥
सोऽप्येकाग्रमनाः सन् सेलकमात्मीयसवयसं जानन् । देवीं स्ववैरिणीमिव मन्वानोऽलङ्घयन्मार्गम् ॥८२॥ ॥६१॥
संप्राप्य पुरीं चम्पामनुकम्पापूर्णमानसो यक्षः । स्वगृहे मुमोच चैनं कुशलेन स्वल्पकालेन ॥८३॥
मातापित्रोरग्रे निजानुजव्यतिकरं प्ररूपयति । अस्रप्रपातपूर्वं तावपि कुरुतोऽस्य मृत्युविधिम् ॥८४॥
**जिनपालितः** कदापि हि सद्गुरुसंयोगमाप्य निष्पापः । दीक्षां कक्षिचक्रे वक्रेतरनिर्मलस्वान्तः ॥८५॥

 

सम्यग्वीर्यैकादशसङ्ख्यान्यङ्गान्यनङ्गनिःसङ्गः । व्रतमुररीकृत्य चिरं द्विसागरायुः सुरः समभूत् ॥८६॥
सौधर्मादायुःक्षयमेत्य विदेहेऽवतारमासाद्य । चारित्रं सुचरित्वा स सिद्धिमुपयास्यति प्राज्ञः ॥८७॥
अत्रायमुपनयः खलु विज्ञेयः प्राणिभिर्महाप्राज्ञैः । आत्मप्रबोधहेतोर्वैराग्यविकाशनार्थं च ॥८८॥



अत्रार्थे सिद्धान्तगाथा :-

जह रयणदीवदेवी तह इत्थं अविरई महापावा । जह लाहत्थी वणिया तह सुहकामा इह जीवा ॥८९॥
जह तेहिं भीएहिं दिट्ठो आघायमंडले पुरिसो । संसारदुक्खभीया पासंति तहेव धम्मकहं ॥९०॥
जह तेण तेसि कहिया दुक्खाण कारणं घोरं । तत्तो च्चिय नित्थारो सेलगयक्खाउ न य अन्नो ॥९१॥
तह धम्मकहो भव्वाण साहए दिट्ठअविरयसहावो । सयलदुहहेउभूया विसयअविरइत्ति जीवाणं ॥९२॥
सत्ताण दुहत्ताणं सरणं चरणं जिणिंदपन्नत्तं । आणंदरूवनिव्वाणसाहणं तह य देसेइ ॥९३॥
जह तेसिं तरियव्वो रुद्दसमुद्दो तहेव संसारो । जह तेसि सगिहगमणं निव्वाणगमो तहा इत्थ ॥९४॥
जह सेलगपिट्ठाओ भट्ठो देवीइ मोहियमईओ । सावयसहस्सपउरम्मि सायरे पाविओ निहणं ॥९५॥
तह अविरईइ नडिओ चरणचुओ दुक्खसावयाइन्ने । निवडइ अपारसंसारसायरे दारुणसरूवे ॥९६॥
जह देवीअक्खोहो पत्तो सठाणं जीवियसुहाइं । तह चरणठिओ साहू अक्खोहो जाइ निव्वाणं ॥९७॥

॥ इति जिनपालितजिनरक्षितदृष्टान्तः ॥

अथैवं ये कुर्वन्ति ते संसारपारगामिनः कथं स्युरेतदुपरि सप्तमं काव्यमाह । पूर्वकाव्ये सरागनीरागतोपरि दोष-गुणावुदाहृतौ, तदपि सरागत्वं परिग्रहमूलं, परिग्रहस्तु प्रतिषेद्धुमशक्यः, तद्वर्जकाः संसारकान्तारपारं प्राप्नुयुः, इत्येतदर्थसूचकं काव्यमाह—

॥७१॥ **परिग्गहारंभभरं करंति, अदत्तमन्नस्स धणं हरंति ।**

**धम्मं जिणुत्तं न समायरंति, भवण्णवं ते कहमुत्तरंति ॥७॥**

**व्याख्या**—ये नराः परिग्रहारम्भभरं कुर्वन्ति, परि समन्तात् गृह्यते इति परिग्रहः, आरम्भणमारम्भः, परिग्रहश्चारम्भश्च तयोर्भरस्तं, परिग्रहमन्तरेण आरम्भो न स्यात्, आरम्भमन्तरेण परिग्रहोऽपि न स्यात्, द्वयोरपि पापमूलत्वमावेदितं, तं ये नराः कर्तारः तथाऽदत्तमवितीर्णमन्यस्य परस्य धनं स्वर्णरूप्यादि हरन्ति चोरयन्ति, एवमपि कृत्वा यदि जिनोक्तं धर्ममाश्रयन्ते तदा सिद्धिसौधाधिवासलालसाः संजायन्त एव, नास्त्यत्र सन्देहः । **चिलातिपुत्रदृढप्रहारिप्रभृतयो**ऽनेके प्रबुद्धाः श्रूयन्ते । अथ च ये परिग्रहारम्भपराः परधनस्य पश्यतोहरा अपि भूत्वा धर्मं जिनोक्तं न समाचरन्ति । ॥७१॥
भवनं भवः संसारः स एवार्णवस्तं कथं ते उत्प्राबल्येन तरन्तीत्यर्थः । अथ तात्त्विकोऽर्थः—गृहिणः प्रभूतं परिग्रहं प्रगुणयन्ति, तथा परकीयान्यपि वस्तूनि कर्मवशात्स्वीकुर्वन्ति । प्रान्ते चेज्जिनोदितं धर्मं कुर्युस्तदा भवाम्भोधेः पारं लभेरन् एवेति काव्यार्थः ॥ अत्रार्थे शशिशूरदृष्टान्तः—

## ॥ शशिशूरकथा ॥

नयरम्मि खिइपइट्ठियनामे सच्छायफलदलारामे । सोहंततुंगधामे दूरुज्झियवेरिसंगामे ॥१॥
ससिसूरनामधिज्जा तत्थ दुवे भायरो परिवसंति । रायजुवरायभूया भूआणुकंपिणो पायं ॥२॥
सूरो सूरसहावो इहपरभवियम्मि सयलकज्जम्मि । दोसाणंदियचित्तो ससी ससिव्वुल्लणकलंको ॥३॥
सूरो तहाविहाणं थेराणं निसुणिऊण उवएसं । पव्वज्जं निरवज्जं पडिवन्नो पावनिव्विन्नो ॥४॥
पत्तो गीयत्थत्तं निग्गंथत्तम्मि निच्चलम्मि ठिओ । नियभाउबोहणत्थं संपत्तो तत्थ सत्थरुई ॥५॥
भायावि वंदणत्थं समागओ परियणेण समणुगओ । मिउमहुरक्खरवाणीइ उवएसं देइ सूरमुणी ॥६॥
राय इमा रायसिरी चवला चवलुव्व हत्थिकन्नुव्व । पिप्पलपत्तुव्व तहा जोव्वणरूवाइरिद्धीओ ॥७॥
जं दीसइ पच्चूसे तं मज्झण्हे न तारिसावत्थं । जन्नारिसं निसाए न एगवत्था पयत्थाणं ॥८॥
जरजज्जरया य जया जाया जायइ तया न मन्नंति । तणुयं पि तणं व जणं अवमन्नंती हु तव्वयणं ॥९॥
जस्सत्थे बहु अत्थं अज्जिणसि घणेहिं पावकम्मेहिं । भूरिपरिग्गहपूरं दूरं धम्मं पमुत्तूणं ॥१०॥
जीवियमेयमसासयमवस्समवणीस मुणसु मणमज्झे । अन्नस्स हरसि धणधन्नपुन्नदेसाइयं कह णु ॥११॥
इच्चाइ बहुविहेहिं हिओवएसेहिं बोहिओ एसो । न हु पडिबुज्झइ सुज्झइ दुद्धेण कुतो य इंगालो ॥१२॥
काऊणं काएणं घणजीवविघायमायईविरसं । आमिसमसिऊण तणुं पोसित्ता मज्जपाणेणं ॥१३॥

नरयगईपाउग्गं उग्गं कम्मं समज्जिणेऊणं । कालक्कमेण मरिउं रयणप्पहनारओ जाओ ॥१४॥
अह साहु सूरनामो कामोयहिसोसणे अगत्थिसमो । निरवज्जं पव्वज्जं परिपालिय वालियप्पमणो ॥१५॥
संलेहणाविहीए अणसणमाराहिऊण पज्जंते । सोहम्मकप्पवासी भासुरबोंदी सुरो जाओ ॥१६॥
ओहोपउंजणेणं नियभायरमाइमाइ पुढवीए । उप्पन्नं जाणिय तक्खणेण घणवेयणाइन्नं ॥१७॥
॥७३॥ छेयणभेयणताडणदसणुप्पाडणपमुक्खदुक्खेहिं । अइविहुरियंगुवंगं अणुकंपाए समागम्म ॥१८॥
सूरो भासइ भाउय आऊकम्मं तया नरयजुग्गं । तुमए बद्धं सुदढं तेणेरिसवेयणो जाओ ॥१९॥
सामन्नमसामन्नं मए पुणो पालियं महापुन्नं । तेणम्हि अहं पत्तो तियसोचियरिद्धिवित्थारं ॥२०॥
ससिणा भणियं किमहं करेमि पडिओऽम्हि पारवस्सम्मि । ससिणेहचेयसा तो सुरेण उप्पाडिओ सहसा ॥२१॥
नवणीयस्स व पिंडो जलणुत्तविओ जहेह कत्थीरो । गलिउं गलिउं निवडइ करसंपुडओ तदा देहो ॥२२॥
जह जह उप्पज्जइ से अगाहबाहा सहुस्सहो बहुहा । विसरसरं आरसई सुट्ठुयरं तह तहा स हहा ॥२३॥
साहइ बंधव मुंचसु मामित्तो निट्ठुराउ कट्ठाओ । जह य निवित्ती हवई किं किज्जइ संपयं भाय ॥२४॥ ॥७३॥
ताहे अहे विमुक्को संजायकिवेण तेण देवेण । भणिओ य सहोयर पुव्वमेव बहुयाहिं जुत्तीहिं ॥२५॥
तुममंगमप्पणो किं पोसेसि असासयं अभक्खेहिं । मंसेहिं मज्जपाणप्पमुहेहिँ असंखपावेहिं ॥२६॥
देहस्स सारमिणमेव थेवकालीणजीवियव्वेण । अज्जिज्जइ धम्मो कम्मोरगजंगुलीमंतो ॥२७॥

अमियपरिग्गहकरणं परधणहरणं परत्थिगमणं च । न हु काउं जुत्तमिणं जओ भवे भवपरिब्भमणं ॥२८॥
तो भारएण तुमं ताणं अवउम्भिऊण गाढयरं । तं मह देहं गेहं सव्वाणत्थाण पावाणं ॥२९॥
छिंदसु भिंदसु कुट्टसु गंतूणं तत्थ दुक्खियं कुणसु । जेणाहं होमि इहं सुहिओ दुहवेयणम्मुक्को ॥३०॥
तियसेणुल्लवियं तो निज्जीवेणं किमंग अंगेणं । अमुणा दुहीकएणं निद्धणजणदंडणेणुव्व ॥३१॥
जइ पुव्वं सलिलाओ बंधिज्जइ पालिया तओ सुट्ठु । न हु पाणीयप्पसरे सक्किज्जइ बंधिउं सा य ॥३२॥
संपइ पुण किं किज्जइ कडाण कम्माण दुप्पडिकंताणं । पुव्विं दुच्चिन्नाणं वेइत्ता अत्थि नणु मोक्खो ॥३३॥
न पुणो अवेयइत्ता तवसा वा झोसइत्तु मुक्खो य । एवं भणिऊण सुरो संपत्तो अप्पणो ठाणं ॥३४॥
इत्थं जे नणु जीवा पुव्वं कुव्वंतणेगरूवाइं । पावाइं ते पच्छा पच्छणुतावं वहंति भिसं ॥३५॥
किच्चा बहुयमकिच्चं सव्वा जे धम्ममरिहसंदिट्ठं । पडंतेऽवि हु न कुणंति तेसिँ कहमित्थ नित्थारो ॥३६॥

॥ इति शूरशशिदृष्टान्त ॥७॥

अथ ये परिग्रहादत्तअविरतिभाजः श्रीसर्वज्ञाज्ञाविमुखास्ते संसारभ्रान्तिभाजः प्रोक्ताः, प्राक्तनकाव्ये प्रातिकूल्येन दृष्टान्तदर्शनादथानुलोम्येनाग्रेतनकाव्यमाह—

**आणं जिणाणं सिरसा वहंति, घोरोवसग्गाइ तहा सहंति ।**
**धम्मस्स मग्गं पयडं कहंति, संसारपारं नणु ते लहंति ॥८॥**

**व्याख्या**–ये जना आज्ञामादेशं जिनानामर्हतां शिरसा मस्तकेन वहन्ते, ये च पुनर्घोराश्च ते उपसर्गाश्च घोरोपसर्गास्तान् सहन्ते, अथ च धर्मस्य मार्गं प्रकटं निश्छद्मतया कथयन्ति ते, भन्विति निश्चितं संसारपारं लभन्ते । तच्छब्देन यच्छब्दोऽपि सूचित एवेत्यक्षरार्थः । अत्र काव्ये संसारपारप्रापणोपायः पदत्रयेण त्रिधा दर्शितः, एतैस्त्रिभिः प्रकारैरनेके सिद्धिं प्राप्ताः, ये जिनाज्ञां पुरस्कृत्य घोरोपसर्गसोढारस्त एव सिद्धिसौख्यभोक्तारो, न पुनः श्रीसर्वज्ञाज्ञाविमुखाः सर्वथाऽनिष्टभूयिष्ठवपुःकष्टस्रष्टारोऽपि पारप्रापका, बालतपस्विजनवत् । तथा सद्धर्माध्वनः प्राकट्येन कथयितारो भूरिशः सिद्धाः । ईदृग्विधाचारचारिमधरा नराः संसारावारपारगामिनः स्युरिति भावार्थः । ये पूर्वमेव जिनाज्ञाराधकास्ते सुखेनैव सिद्धिसाधकाः स्युरत्र किमाश्चर्यं ? ये तु जन्मनैव घोरकर्मकारिणः पश्चाच्छ्रीजिनाज्ञाधारिणस्तदनु तीव्रोपसर्गानुभूत्या जीवितान्तकारिण इति चित्रं ! एतेऽपि केवलश्रीभोक्तारः श्रूयन्ते श्रीभरतादयः । अत्रार्थेऽर्जुनारामिकदृष्टान्तः सूच्यते–

॥७५॥

### ॥ अर्जुनारामिककथा ॥

इत्थेव भारहे वासे पुरे रायगिहाभिहे । आसी पासीकयारामो अज्जुणो नाम मालिओ ॥१॥ ॥७५॥
पुव्वपूरुससेणीए अज्जिया रुक्खसज्जिया । तस्सत्थि वाडिया एगा पाडियाणेगपल्लवा ॥२॥
सो य बंधुमईभज्जासहिओ सुहिओ भिसं । पालेइ नियमारामं कडुम्बुव्व निरंतरं ॥३॥

तओ सुमाइं आणेत्ता विक्किणेइ पुरंतरे। विढवेइ बहुं दव्वं सव्वं कज्जं पसाहई ॥४॥
अन्नया सो सपत्तीओ वलित्ता वणभूमिओ। आगच्छइ पुरं पुप्फछज्जीविगपाणिओ ॥५॥
तस्सारामस्स पासम्मि कुलक्कमसमागयं। जक्खमुग्गरपाणिस्स अत्थि देवउलं महं ॥६॥
लोहस्स पलसहस्सनिम्मियं मुग्गरं करे। धारेइ सप्पभावो सो तओ मुग्गरपाणिओ ॥७॥
तस्स पूअं पसाहेउं तमिज्जंतं सभारियं। पासित्तु जक्खगेहम्मि पुव्विं चेव पविट्ठया ॥८॥
इब्भाणं नंदणा छच्च जुव्वणम्मायपेल्लिया। सल्लिया कामसल्लेणं महल्लेण अहन्नया ॥९॥
अन्नोन्नं गोट्ठिकत्तारो मंतमेवं कुणंति ते। रमामो रमणिं एयसंतियं मालियं बला ॥१०॥
बंधित्ता इय मंतित्ता पच्छन्नीभूय संठिया। जक्खगेहकवाडस्स पिट्ठओ धिट्ठदुट्ठया ॥११॥
नोलूओ पासई घस्से काओ न हु निसाभरे। अउव्वो कोवि कामंधो न पस्सइ दिवानिसं ॥१२॥
जुत्ताजुत्तं न याणंति हहा कामविडंबिया। कुलम्मि मलिणत्तं च न तत्तं न पवित्तयं ॥१३॥
जाविऽत्थ संपविट्ठो सो ताव उद्धाविउं लहुं। निबद्धो दढबंधेहिं तेहिं अज्जुणमालिओ ॥१४॥
तक्कंतं तस्समक्खं ते भुंजंति नणु निब्भया। लज्जामज्जायनिम्मुक्का ढुका य जह साणया ॥१५॥
कामुया ते जहिच्छाए हसंति विलसंति य। तीए सद्धिं सुनिद्धम्मा कम्माणज्जणसज्जया ॥१६॥
दुक्खं तिक्खं तितिक्खंतो सारीरं माणसं तहा। चित्तम्मि चिंतए एवं अनन्नसरिसा मए ॥१७॥

पत्ता विडंबणा एसा जा जम्मे वि अपत्तया । जम्माओ वि मए एसो सम्ममाराहिओ सुरो ॥१८॥
मुहा एयस्स सेवाए कालो निग्गमिओ मए । कायम्मि मणिबुद्धीए हहा मुद्धेण वत्तियं ॥१९॥
काओ मलिणकाओ वि हहा हंसो व्व जाणिओ । सियालो वि हु सीहुव्व मन्निओ मूढचेयसा ॥२०॥
॥७७॥ पच्चक्खं पिक्खमाणोऽवि ममेवं खु विडम्बियं । न जाओ पक्खवाइल्लो स बइल्लोव्व निच्छयं ॥२१॥
तस्साकूयमिमं नच्चा पच्चायणपरो लहुं । जक्खो तस्संगमाविस्स तोडेइ दढबंधणे ॥२२॥
मुग्गरेण सुतिक्खेण ते छव्व तरुणे नरे । इत्थिसत्तमए कोवापूरिओ सो विणासए ॥२३॥
अज्जुणो दुज्जणो भूओ लद्धुम्माउव्व रोसओ । पुरस्स सयलस्सावि पोराणपावदोसओ ॥२४॥
निच्चं हणइ रोसेण छन्नरे इत्थिसत्तमे । उवद्दविउमारद्धो जणो तेण पुरट्ठिओ ॥२५॥
एवं विन्नाय रायावि सेणिओ हु सुसंकिओ । पडहप्फालणापुव्वं घोसावइ पुरंतरे ॥२६॥
रायाणो वावि रंका य भो भो कम्मकरा नरा । सव्वे सुणंतु निस्संकं सावहाणेण चेयसा ॥२७॥ ॥७७॥
अज्जुणो मालिओ जो उ रोसपज्जालिओ य सो । टालिओ पुव्वपुन्नेहिं पावपूगेहिं मालिओ ॥२८॥
सत्तजीवविघाएण सव्वहा वेरिउव्व भो । संजाओ वट्टए एयपुरस्स नणु संपयं ॥२९॥
तओ पुराउ मा कोइ निग्गच्छउ गुरु लहू । अप्पणो जीवियं सव्वे रक्खंतु पुरवासिणो ॥३०॥
तहा चेव पकुव्वाणा जणा चिट्ठंति नायरा । धणाउ तह धन्नाओ जीवियं खलु वल्लहं ॥३१॥

जइ न पावइ सो पावो पुरवासिजणे तओ । पहिए वि हु हम्मंतो वट्टइ दुट्ठस्सहावओ ॥३२॥
अन्नया धन्नपुन्नंगिचक्कवायदिवायरो । सायरो सग्गुणस्सेणिमणीणं महिमागरो ॥३३॥
वद्धमाणोरुतेयस्सी जसंसी सुकिवालुओ । समोसढो जिणस्सामी वद्धमाणो पुरा बहिं ॥३४॥ युग्मम् ॥
संकडावडियाणेगलोगसोगावहारओ । तारओ भव्वजीवाणमणंताण भवंबुणो ॥३५॥
तव्वंदणकए कोवि नेव निग्गच्छई जणो । अज्जुणारामिउप्पन्नसज्झसाउलमाणसो ॥३६॥
ताव सव्वे वि धम्मिट्ठा उक्किट्ठायारधारया । संकडं वियडं जाव निअडं णोवजायई ॥३७॥
जिणिंदागमणं नच्चा हरिसंकुरपूरिओ । सुदंसणो महासिट्ठी सद्दंसणगुणालओ ॥३८॥
जणणीजणयाणग्गे विन्नवेइ जिणेसरं । वंदिउं जामि ते बिंति वंदाहि इह चेव भो ॥३९॥
पालओ सुद्धधम्मस्स निग्गओ नियमंदिरा । सुंदरायारसोहिल्लो रहरूढो य चल्लिओ ॥४०॥
जिणाभिनमणाकंखी एगागी जा पुरा बहिं । निज्जगाम महासत्तो पावेणन्नेसिओ तया ॥४१॥
सज्जगो दुज्जणेणेव वद्दलेणेव चंदओ । तेण सो दिट्ठमत्तो वि करे काऊण मुग्गरं ॥४२॥
भेसिओ भीसणायारधारिणा विग्घकारिणा । धाविओ केडए ताव दुरप्पा निज्जराहमो ॥४३॥ युग्मम् ॥
जावागच्छइ वेगेण ताव सेट्ठी सुदंसणो । अभीओ मणमज्झंमि रहा उत्तरिउं लहुं ॥४४॥
न मणागंपि संखुद्धो होऊण जिणसंमुहो । पासउमं भयवं वंदमाणमद्धाणसंठियं ॥४५॥

एवं संथुणमाणो सो काउं सागारमणसणं । पडिमाए संठिओ सेट्ठी मेरुसिंगुव्व निच्चलो ॥४६॥
इओ तओ भमंतो सो सिट्ठिणो य चउद्दिसिं । धम्मप्पभावसंरुद्धो न सक्को काउ विप्पियं ॥४७॥
दीणाणणो य निव्विन्नो सिट्ठिणो य पुरो ठिओ । पसन्नं सोमबिंबुव्व सिट्ठिणो पिक्खए मुहं ॥४८॥
॥७९॥ सिट्ठिधम्मप्पभावेण नट्ठो सो वाणमंतरो । मुच्छानिमीलियच्छो अ अज्जुणो पडिओ भुवि ॥४९॥
खणेण लद्धचेयन्नो किमकज्जं मए कयं । इइ वायाइ जंपंतो का एसा मज्झ मूढया ॥५०॥
सिट्ठिणा पारिउस्सग्गेणेसो एवं वियाहिओ । देवयाहिट्ठियंगेणं भो भद्द भवया कयं ॥५१॥
तं नो सरसि किं चित्ते जं नरा छन्निवाइया । रमणीसत्तमा रोसाबू(चू)रियारुणदिट्ठिणा ॥५२॥
निसम्म दारुणं कम्ममेयमप्पविणिम्मियं । इहन्नत्थाविदुक्खोहदायगं धम्मघायकं ॥५३॥
धिद्धी मह कहं सुद्धी एयम्हा पावकम्मुणो । अणायारपरेणेत्थ हारियं जम्ममप्पणो ॥५४॥
पडामि गिरिसिंगाओ विसामि जलणंतरे । करेमि अप्पणो घायं उव्वंधेमि किमप्पयं ॥५५॥
इच्चाइ पलवंतो सो वारिओ सिट्ठिएण तो । सामि पेच्छसु दीट्ठीए वीरं तेलुक्कबंधवं ॥५६॥ ॥७९॥
पावोवसमणोवायमापुच्छसु परिप्फुडं । जओ तुमं सुही होसि इत्थ वान्नत्थ वा भवे ॥५७॥
एवमेयंति तेणंगीकए तव्वयणे खणा । दोवि संचलिया सामिसमोसरणसंमुहं ॥५८॥
छत्ताइछत्तमाईयं जिणरिद्धिं तु पासिया । पमोयपुलयाइन्नदेहा भत्तिभरेण ते ॥५९॥

पंचंगपणिवाएण पणमित्तु जयप्पहुं। उचियट्ठाणमासीणा विणया णयमत्थया ॥६०॥
सुहारसस्स रेल्लिव्व पारद्धा धम्मदेसणा । पहुणा मंजुघोसेण सवणाणंदकारिणी ॥६१॥
पाविउं समयं सामिमापुच्छइ अहज्जुणो । भीरुओ भवपावाओ दवाउव्व महागओ ॥६२॥
जीवसंभारसंहारदुक्कयाउ अहं कहं । मुंचिस्समिह संसारे असारे पावकम्मुणा ॥६३॥
गोवाडयस्स मज्झम्मि जहा वच्छो समायरं। तहेव कम्मं कत्तारमणुजाइ असंसयं ॥६४॥
वेइत्ता कम्मणो मुक्खो अवेइत्ता पुणो न हु। झोसइत्ता तवेणं वा मुक्खो जीवस्स नन्नहा ॥६५॥
भो पवज्जेसु पव्वज्जमणवज्जं मणुन्नयं। काउं तिव्वाणि कम्माणि निहणेसु खणेणवि ॥६६॥
एवं गुणगणोवेयं सुणित्ता पहुभासियं, । अवगम्म पहं सम्मं मोक्खस्स सुहसाहगं ॥६७॥
अज्जुणेणाह विन्नत्तं जोडियंजलिणाऽमुणा। सुप्पसायं करेऊण नित्थारसु भवोदहिं ॥६८॥
पवित्तं देसु चारित्तं सकरंभोरुहेण मे। जेणाहं जरमच्चूणं न गणेमि भयं मणे ॥६९॥
एसो वयस्स जोग्गुत्ति विन्नाय जगसामिणा । दिक्खिओ सिक्खिओ सुत्तअत्थसिक्खं च तक्खणा ॥७०॥
वेरग्गमग्गमावन्नो धन्नो पुन्नोदएण सो। तिव्वं तवं करेमाणो छम्मासा सुहभावणो ॥७१॥
जइ अन्नं तो न पाणं सो जइ पाणं तो न भत्तयं । एवं परीसहं सम्मं सहमाणो निरंतरं ॥७२॥
सत्तुवग्गे न रूसेइ मित्तलोए न तूसइ । पोसेइ सुहझाणेणमप्पाणमणुवासरं ॥७३॥

सो एसो अज्जुणो पावो पावोदयसमन्निए । जेणुवद्दविओ लोओ निक्कारणपुरारिणा ॥७४॥
अहुणाइन्नपासंडो चंडो मोणव्वयस्सिओ । इमं मारेह ताडेह तज्जेह जणवेरिणं ॥७५॥
एवं तिगचउक्केसु चच्चरेसु य सव्वओ । वयणाइं सुणेमाणो माणोज्झियमणंतरो ॥७६॥
पुव्ववेरिलोयाणमुव्वेयस्स निबंधणो । सहमाणो महाघोरोवसग्गे दुस्सहे मुणी ॥७७॥
॥८१॥ खंति चित्ते निवेसित्ता अप्पाणमणुसासई । भासए संमुहं नेव मणागमवि निट्ठुरं ॥७८॥
घाइया जं जणाणेगे तुमए तिव्वरोसिणा । तक्कम्मं समुइण्णं ते सम्मं सहसु सव्वहा ॥७९॥
चवेडामुट्ठिलट्ठीहिं ताडिज्जंतोऽवि निट्ठुरं । सो दुट्ठेहिं निकिट्ठेहिं सुट्ठु कट्ठं तितिक्खई ॥८०॥
सुक्कझाणम्मि संपत्तो खवगस्सेणिमासिओ । छम्मासपरियायंते जाओ अंगतडो जई ॥८१॥
जिणिंदाणं सिरे किचा जे सहंति परीसहे । खवित्ता पुव्वकम्माइं ते सिज्झंति जहज्जुणो ॥८२॥

॥ इति पदद्वयोपरि कथानकमार्जुनम् ॥

अथ–"**धम्मस्स मग्गं पयडं कहंति**" इति पदं व्याक्रियते–ये धर्मस्य मार्गं प्रकटं निर्व्याजतया निवेदयन्ति, ॥८१॥
नन्विति निश्चितं, ते संसारस्य पारं पर्यन्तं लभन्ते । यदुक्तम्–"**उम्मग्गदेसणाए मग्गं नासंति जिणवरिंदाणं । वाव-न्नदंसणा खलु न हु लब्भा तारिसा दट्ठुं ॥१॥ फुडपागडमकहंतो जहट्ठियं बोहिलाभमुवहणइ । जह भगवओ विसालो जरमरणमहोअही आसि ॥२॥**"

 

अथार्थे शिवभद्रश्रीयकोदाहरणमुदाह्रियते—

॥ शिवभद्रश्रियककथा ॥

अत्थित्थि पुरी कोसंबिनामिया नामिया न वेरीहिं। जा हरिसहुव्व[1] रेहइ [2]सुतरकपज्जुन्नबलभद्दा ॥१॥

 तीए पुव्वदिसिट्ठिय उज्जाणुत्तुंगचेइयनिविट्ठो। अइनिसियपरसुपाणी वट्टइ जक्खो परसुपाणी ॥२॥

तब्भवणमज्झदेसे काउस्सग्गं सुनिच्चलं काउं। साहू सुदंसणो सो अहन्नया संठिओ अत्थि ॥३॥

तस्सेस तवोनिहिणो जक्खो पच्चक्खवेरिओ जाओ। अइघोरुवसग्गाइं करेइ तच्चित्तखोहत्थं ॥४॥

अहिरूवेणं सो उण डसइ धसइ काउ हत्थिणो रूवं। भीमट्टहासमइसयनिही कुणइ रक्खसो होउं ॥५॥

तहवि हु सो न हु बीहइ ईहइ सिवसुक्खमक्खयमबाहं। अह मुणिउं तम्मणगयभावं समुइन्नहरिसभरो ॥६॥

तुममुद्दविओ बाढं दाढं दाऊण सप्परूवेणं। हणिओ करिरूवेणं भणिओ अइनिट्ठुरं वक्कं ॥७॥

तं खमसु खमानिहिणो तुह पयपउमस्स सेवओम्हि अहं। अज्जप्पभिइ अभीयं मुणिमेयं विन्नवइ जक्खो ॥८॥ त्रिभिर्विशेषकम्।

इत्थंतरे पुरोहियसुत्ता सिवभद्दसिरियनामाणो। तत्थागया किसंगं नियंति मुणिमुग्गतवनिरयं ॥९॥ 

किमहो मुणिंद अप्पा दप्पाइ विवज्जइत्तु सव्वमवि। खविओ दुट्ठे कट्ठे निट्ठुरतवचरणकिरियासु ॥१०॥

किं भो सहसि परिसहवग्गं सग्गं च मोक्खमहिलससि। अत्थे अदिस्समाणे को एवं उज्जमइ सुमई ॥११॥

---

1 कृष्णसभेव. 2 गरुडप्रद्युम्नबलभद्रा यस्यामेतादृशी कृष्णसभा नगरी तु सुताक्षकामसैन्यभद्रवती.

तवकट्ठेणं धम्मो धम्मेण धणं घणं भवे भुवणे। तत्तो आरंभभरो तओ अणंतो य संसारो ॥१२॥
तम्हा तुह धम्मज्झणमजुग्गमुग्गोरुवंभयारिस्स। इय मुणिउवहासपरे ते दट्ठुमणिट्ठवयणिल्ले ॥१३॥
॥८३॥ तव्वारणिकताणो जक्खो पसरंतचित्तबहुमन्नू। उप्पाडियखरपरसू तन्निहणणहेउमुल्लसिओ ॥१४॥ युग्मम् ॥
तयणंतरं सुतरलियनयणा दीणाणणा दुवे ते य। अल्लीणा मुणिचलणे पहु रक्खसु अम्ह इय भणिरा ॥१५॥
अम्हाण तुमं सरणं मरणं समुवट्ठियं अयंडेवि। एआओ गइणाओ जीवियमम्हाण देहि पहो ॥१६॥
तहरूवे ते दट्ठुं जक्खो तेसिं पसन्नओ जाओ। तो पारिय उस्सग्गं मुणिणा ते सिग्घमिइ वुत्ता ॥१७॥
दुच्चरचारित्तभरं चरंति जइणो सिवत्थमेव फुडं। तं पाविज्जइ नीरागदोसमोहेहिं पाणीहिं ॥१८॥
जो पुण सरागधम्मो सो य समप्पेइ सग्गरज्जाइं। जायइ परंपराए परमपयपसाहणो धणियं ॥१९॥
धम्माओ धणलाभो जं भणियं वुत्तुमवि न जुत्तं तं। जं सव्वेऽवि पुमत्था धम्माओ सिद्धिमुवजंति ॥२०॥
जं रज्जभोगमाई भणियं संसारहेउभूयमहो। गुरुकम्माणंगीणं तं पुण न हु लहुयकम्माणं ॥३१॥
रज्जसिरिभुंजिरा विहु एगे लोयग्गठाणमल्लीणा। भिक्खाएवि भमंता एगे भमिया भवारन्ने ॥२२॥
सुबंति भरहसगराइणो महाभोगिणोऽवि भूवइणो। संपत्तसिद्धिसंगा निस्संगा सुद्धमणजोगा ॥२३॥ ॥८३॥
इच्चाइ सोउमेएहिं गरुअवेरग्गगुणसमेएहिं। पडिबुज्झिय खामिय मुणिमुरीकया भावओ दिक्खा ॥२४॥
जइजणजुग्गा किरिया धरिया जित्तम्मि तेहिं गुरुपासे। सुत्तत्थे कोसल्लं सुमहल्लमिमेसि संजायं ॥२५॥

तिव्वं तवंति सुतवं खवंति पुव्वाउ कम्मरासीओ । सज्झायज्झाणरया दुन्निवि विहरंति भूवलए ॥२६॥
अह पावकम्मसमुदयवसओ ससउव्व कायरमणो सो । विस्सरियसाहुकिरिओ सिरिओ सिढिलो अभू चरणे ॥२७॥
वहइ मणे जाइमयं अमयंपिव सुगुरुवयणमवि वमइ । रमइ पमायम्मि सया गमइ मुहा कालमविणीओ ॥२८॥
अह **सिवभद्दो** जंपइ तं पइ किं भाय एरिसं कुणसि । वहसि अविणीयभावं जाइमउम्मत्तउव्व तुमं ॥२९॥
जीवो जाइसु सव्वासु सव्वेसु य कुलेसुवि । सव्वासुंपि हु जोणीसुं सव्वट्ठाणेसु सव्वया ॥३०॥
अकयारिहधम्मो सो भमिओ य भमिस्सई । को कीरइ मयं जाईविसए विसए तहा ॥३१॥
अट्ठ मया बुद्धिमया न हु कायव्वा कयावि दुक्खमया । सेविज्जंता अमया पच्छा विसओऽवि अब्भहिया ॥३२॥
**हरिएसिबलो** साहू **सिरियौरो** तहय **चित्तसंभूया** । इच्चाइणो अणेगे जाइमया हीणजाइल्ला ॥३३॥
तत्तो नियदोसमिमं सम्मं गीयत्थगुरुसमीवम्मि । आलोइसु उज्जुमणो होउं जम्हा भवे सुद्धी ॥३४॥
जह बालो जंपंतो कज्जमकज्जं च उज्जुओ भणइ । तं तह आलोइज्जा मायामयविप्पमुक्को य ॥३५॥
आलोयणापरिणओ सम्मं संपट्ठिओ गुरुसगासे । जइ अंतरावि कालं करिज्जा आराहगो तहवि ॥३६॥
आगंतुं गुरुमूले जो पुण पयडेइ अत्तणो दोसे । सो जइ न जाइ मुक्खं अवस्स वेमाणिओ होइ ॥३७॥
जो पुण इय मुणिऊणवि सम्मं न हु उद्धरेइ नियसल्लं । वज्जेयव्वो तो सो निसीहसुत्तुत्तनाएहिं ॥३८॥
कस्सवि भूमीवइणो जह आसो आसि सव्वलक्खणओ । तस्सणुभावेण महीनाहो जाओ [1]महासबलो ॥३९॥

१. महाश्वबलः.

तम्मंदुराए दीसंति सुंदरा णेगतुरगसंदोहा । बहुहत्थिसत्थकलिया जायाओ हत्थिसालाओ ॥४०॥
कुट्ठागारा भंडागारा धन्नेहिं तह धणेहिंपि । तस्सासेसा भरिया जह नइपूरेहिं जलनिहिणो ॥४१॥
अह सीमाभूमिगया निवा असूयागया इय भणंति । सोऽवि हु को अत्थि भडो जो इणमस्सं अवहरेज्जा ॥४२॥
॥८५॥ बाहरियं तो तीरट्ठिएहिं नरपंजरंतरगओ सो । नो केणवि अवहरिउं सक्को सक्कोऽवि जइ एइ ॥४३॥
अह भणइ एगनरो जइ भण्णइ ठिओऽवि तत्थेसो । राया जंपइ एवंपि होउ न लहेइ अवगासं ॥४४॥
तत्तो तेण सरग्गट्ठिएण खुद्देण कंटएणस्सो । विद्धो मम्मपएसे कहमवि समयं लहेऊण ॥४५॥
सुहुमेण तेण सल्लेण सल्लिओ घल्लिओ य कट्ठम्मि । परिहायइ पइदियहं चारिज्जंतोऽवि जवचारिं ॥४६॥
रन्ना भणिओ कह एस दुब्बलो बलजुओऽवि वरतुरओ । घोडयबालेहुत्तं नाह तयं न हु वियाणेमो ॥४७॥
वेलाइ नीरपाणं घासग्गासस्स दिज्जए खाणं । तहवि हु जइ दुब्बल्लं एस असज्झो धुवं वाही ॥४८॥
तो रन्ना सो विज्जस्स दाविओ ठाविओ य तदभिमुहं । तो वज्जरियमणेणं न कोवि रोगुब्भवो अंगे ॥४९॥ ॥८५॥
अव्वत्तमत्थि सल्लं तुरयस्सेयस्स रज्जसारस्स । तत्तो तक्खणमेसो उल्लित्तो सुबहुमपंकेण ॥५०॥
सल्लट्ठाणे उण्हत्तणेण सुक्के जहग्गितावेण । नाउं कड्डिय सल्लं खणेण सज्जीकओ तुरओ ॥५१॥
जह घोडओ य अन्नो अणुद्धियंगट्ठिओरुसल्लदुहो । न हु संगामसमत्थो तहा ससल्लो मुणी नेओ ॥५२॥

सुचिरं पालिय चरणं सरणं भव्वाण भवभयत्ताणं। हारेसि 'मोरउल्ला ससल्लमरणेण मुणिवसहा ॥५३॥
भूओ वा पेओ वा वेयालो वा अही व रोसिल्लो। तं न कुणइ जं 'अप्पं पि भावसल्लं अणुद्धरियं ॥५४॥
इय बहुवारं विणिवारिओऽवि सिरिओ सभाउणा मुणिणा। अपडिक्कंतो मरिउं भुवणवईसुं समुप्पन्नो ॥५५॥
सिवभद्दो पुण भद्दयपरिणामेणप्पणो य अइयारे। आलोइय निस्सल्लो समाहिणा मरणमणुपत्तो ॥५६॥
सोहम्मे कणउज्जलकाओ जाओ सुरो सुकंतिल्लो। पूरिय तत्थ सुराउं उप्पन्नो एत्थ भरहम्मि ॥५७॥
वेयड्ढगिरिसिरट्ठियजणवल्लहगयणवल्लहपुरम्मि। निवकणयकेउपणइणिदेवइनामाइ कुच्छीए ॥५८॥
संपत्तो पुत्तत्तं सिवचंदो नाम कामसमरूवो। परिणित्तु वसंतसिरिं निवधूअं भुंजई भोए ॥५९॥ युग्मम् ॥
सिरिओ तल्लहुबंधू जाओ तत्तो चइत्तु आउखए। कयसोमचंदनामो जुव्वणमुल्लणगुणं पत्तो ॥६०॥
अह तस्स पढियनिरवज्जपउरविज्जस्स सोमचंदस्स। मायंगिअसुइविज्जासाहणमेहा समुप्पन्ना ॥६१॥
तीसे एसो य विही चंडालिणिगेहसंठिएण दिणे। कइवि हु विही विहेयो मायंगसुयं विवाहित्ता ॥६२॥
पडिसिद्धोऽवि निवेणं सहोयरेणावि वरिओ सोमो। असुइयविज्जारसिओ गओ कुणालाइ नयरीए ॥६३॥
तत्थ घणदव्ववियरणपुव्वं माइंगिणिं विवाहेओ। सिढिलीकयबहुविज्जावावारो सुद्धमइरहिओ ॥६४॥
अवगणियकुलायारो लज्जामज्जायवज्जिओ बाढं। कंताए आसत्तो जाओ पुत्ताइपरिवारो ॥६५॥

१. मुधा. २. अल्पमपि.

तेण कुमग्गावडिएण कम्मनडिएण तायभायाणं । दूरं गत्ता मत्ता भइवग चोक्खदस्सेव ॥६६॥
अह सिवचंदो चंदोव्व निम्मलो निक्कलंकमंडलओ । सव्वकलाकोसल्लोवगओ सुइसीलसीयलओ ॥६७॥
कइयावि कोउहल्लं अतुल्लमुल्लासवं वहंतो य । आरुहिय वरविमाणं सुंदरिगिज्जंतजसपसरो ॥६८॥
सिरधरियधवलछत्तो पत्तो जगईइ जंबुदीवस्स । महया विच्छड्डेणं किड्डं काउं स परियरिओ ॥६९॥
॥८७॥ किलित्ता तत्थ गिहं पइ चलिओ ललियकुंडलाहरणो । कहवि नयरी कुणाला उवरिं वच्चंतओ पत्तो ॥७०॥
नेहेण समुत्तारिओ भरिओ पुन्नोदएण पुन्नेण । नियभायरं पलोयइ अइनेहलनयणजुयलेणं ॥७१॥
इय जंपिउमारद्धं विरुद्धमेयं कहं समायरियं । तुमए अहो सहोयर लोवित्तु कुलक्कमं निययं ॥७२॥
मलिणीकओ कहप्पा तुमए निंदियकुले वसंतेण । मयगकलेवररत्तो काउव्व तुमं अहो जाओ ॥७३॥
अइदुरहिगंधफुट्टंतनासयं दूरओ पणस्संतं । किं न हु पस्ससि लोयं बुत्तिभया दूरओ जंतं ॥७४॥
अट्ठीणं उक्करडा एए दीसंति गेहपासम्मि । मच्छीहिं भणहणंता भंडा कुंडा य तुह सव्वे ॥७५॥
हंसोऽवि तुमं जाओ काओ काओ मणीवि तुममहवा । कप्पूरोऽवि हु लवणो महातलाओवि छिल्लरओ ॥७६॥ ॥८७॥
इय आइन्निय सोमो असोममुत्ती अईव विच्छाओ । लज्जाभरनमिरसिरो पयंपिउं एवमाढत्तो ॥७७॥
पुव्वभवज्जियदुक्कम्मदोसवसओ दुहं अहं पत्तो । जणनिंदणिज्जमायंगकुलनिवासेण सययमहो ॥७८॥
अहह करेमि इयाणि किमहं नियबंधुणो विरहमसहं । पत्तोम्हि पाववसओ जूहब्भट्ठो जहा हरिणो ॥७९॥

अह सिवचंदो विहिणा रोहिणीविज्जं सरित्तु पुच्छेइ । सामिणि साहसु सयलं महबंधवपुव्वभवचरियं ॥८०॥
ओहिन्नाणबलेणं जाणिय तप्पुव्वजम्मवुत्तंतं । अक्खइ रोहिणिदेवी पुरओ सिवचंदभूवइणो ॥८१॥
न हु जाइमयं काउं जमणेणालोइयं पुरा जम्मे । चंडालकुले तेणं पत्ता हु विडंबणा एवं ॥८२॥
अणुमित्तंपि हु खलियं तुमए सम्मं विसोहियं जम्हा । तेणुत्तमसुहभोई इय कहिय तिरोहिया अमरी ॥८३॥
इइ सोउं सिवचंदो पुव्वसिणेहेण भायरं भणइ । कुकुडुंबप्पणयभरं अज्जवि छड्डेसु लहु भाया ॥८४॥
दुच्चरियाइं आलोइऊण काऊण निच्च तवचरणं । एयस्स दुहसमूहस्स देसु सलिलंजलिं नियमा ॥८५॥
उल्लवइ सोमचंदो जाया [1]निस्सामिया कहं होही । आसन्नप्पसवा मह डिंभाइं कहवि वट्टंति ॥८६॥
कूडालंबणनिवडियमेयं मुणिऊण सकहाणरिहं । नियनयरं संपत्तो स [2]सोमचंदो महीनाहो ॥८७॥
सोमुव्व सोमपयई सोमो कईयावि सुगुरुपासम्मि । चारित्तमणुचरित्ता अक्खयसोक्खं गओ मुक्खं ॥८८॥
अन्नो अन्नो सुन्नो पुन्नेहिं सेविओ बहुं पावं । पत्तो दुग्गइमज्झे भमिही दुत्तरभवंभोहिं ॥८९॥
एवं जह सिवभद्देण साहुणा सिरियभाउसाहुस्स । निछम्मेणं धम्मक्खराइं पयडीकयाइं तया ॥९०॥
दोसुवि भवेसु तह चेव पुन्नवंतेण धम्मउवएसो । दायव्वो दक्खिन्नं कायव्वं नेव इह विसए ॥९१॥

॥ इति धर्ममार्गप्रकाशनोपरि दृष्टान्तः ॥

---

१ निःस्वामिका. २ सौम्येन चन्द्रः शिवचन्द्रनामा महीनाथः.

अथ स धर्ममार्गस्तदैव प्रकटीस्याद्यदाऽसत्या भाषा नोच्यतेऽतो द्वयमनुगतमेवेदं । तद्यथा—

**भासिज्जए नेव असच्चभासा, न किज्जए भोगसुहे पिवासा ।**
**खंडिज्जए नेव परस्स आसा, धम्मो य कित्ती इय सप्पयासा ॥९॥**

**व्याख्या**—भाष्यते नैवासत्यभाषा भाष्यते भाषावर्गणया पुद्‌गलोपादानेनेति भाषा। सद्भ्यो हिता सत्या तद्विपरीता
॥८९॥ त्वसत्या, वचस्तथ्यमेव वाच्यं महासङ्कटेऽपि न पुनरसत्यं कदाचित् । विशेषतस्तु धर्मविषये नानृता वाग्वक्तव्या कालि-
कार्यवत्। अथ सिद्धान्तोक्तं भाषास्वरूपं कथ्यते–"**सच्चाणं भंते भासा पज्जत्तिया कइविहा पन्नत्ता? गोयमा चउ-
विहावि पत्तेयं दसविहा पन्नत्ता तंजहा**

**सत्या भाषा दशधा–जणवय १ संमय २ ठवणा ३ नामे ४ रूवे ५ पडुच्चसच्चे ६ अ। ववहार ७ भाव ८
जोगे ९ दसमे ओवम्मसच्चे १० य ॥१॥**" कुंकणादिषु पयः पिच्चं नीरमुदकमित्यादि जनपदसत्यं १ । कुमुदादीनां
समेऽपि पङ्कसंभवे लोकस्यारविन्दानामेव पङ्कजत्वं सम्मतमिति सम्मतसत्यं २ । लेप्यादिषु अर्हदादिस्थापना स्थापना-
सत्यं ३ । कुलमवर्द्धयन्नपि कुलवर्द्धन इति नामसत्यं ४। लिङ्गधार्यपि व्रतीत्युच्यते तद्रूपसत्यं ५ । प्रतीत्यसत्यं यथा- ॥८९॥
ऽनामिकाया इतरेतरामाश्रित्य दीर्घत्वं ह्रस्वत्वं च ६ । तृणादौ दह्यमाने गिरिर्दह्यते इति व्यवहारसत्यं ७। भाव-
सत्यं यथा शुक्ला बलाकेति, सत्यपि हि पञ्चवर्णसंभवे शुक्लवर्णस्योत्कटत्वात् ८ । दण्डयोगाद्दण्डीति योगसत्यं ९।
समुद्रवत्तटाक इत्यौपम्यसत्यं १० ।

असत्यापि दशधा–"**कोहे १ माणे २ माया ३ लोभे ४ पिज्जे ५ तहेव दोसे य ६। हास ७ भए ८ अक्खाइय ९ उवघायानिस्सिए १० दसमे** ॥२॥" क्रोधेन अदासमपि दासं वदतः क्रोधनिश्रिता १। निःस्वमपि स्वमाढ्यं वदतः २। इन्द्रजालकादीनां नष्टोऽयं गोलक इत्यादि वदतो ३। वणिजादेः कूटक्रियादि वदतः ४। अतिरागाद्दासोऽहं तवेत्यादि वदतः ५। गुणवत्यपि निर्गुणोऽयमित्यादि वदतः ६। इह हासभये प्रतीते ७–८। आख्यायिकादिषु रमणार्थं वदतः ९। अचौरेऽपि चौरोऽयमित्यादि वदत उपघातनिश्रिता ॥१०॥

सत्यामृषाद्रि दशधा–"**उप्पण १ विगय २ मीसे ३ जीव ४ अजीवे य ५ जीवअज्जीवे ६। तह मीसगा अणंता ७ परित्त ८ अद्धाय ९ अद्धद्धा १०** ॥३॥" दश दारका अद्य जाताः, अत्र तन्न्यूनाधिक्ये सत्यामृषा उत्पन्नमिश्रा १। एवं मृता इति विगतमिश्रा २। उत्पन्नविगतमिश्रा यथा अत्र दश दारका जाता दश च मृता इत्यादि युगपद्वदतः ३। जीवन्मृतकृमिराशौ जीवराशिरयं ४। तस्मिन्नेव प्रभूतमृते स्ताकजीवति कृमिराशौ अजीवराशिरिति ५। प्रभूतमृतकृमिराशौ एतावन्तो जीवन्त्येतावन्तश्च मृता इत्यादि वदतो जीवाजीवमिश्रा ६। मूलकन्दादौ परीत्तपत्रादिमत्यनन्तकायिकोऽयं सर्वः ७। अनन्तकायत्वगादौ सर्वपरीत्तोऽयं ८। परिणतप्राये वासरे कार्यात्सुक्यादौ रजनी जाता इत्यद्धामिश्रा ९। अद्धा दिवसो रजनी वा तदेकदेशः प्रहरादिरद्धाद्धा, यथा दिवसस्य प्रहरेऽप्यतिक्रान्ते मध्याह्नसमयः संजात इति १०।

असत्यामृषा द्वादशधा—"**आमंतणि १ आणवणी २ जायणि ३ तह पुच्छणी य ४ पन्नवणी ५। पच्चक्खाणी**

॥९१॥ ६ य तहा भासा इच्छाणुलोमा ७ य ॥४॥ अणभिग्गहिया ८ भासा भासा य अभिग्गहम्मि ९ बोधव्वा । संसय-करणी १० भासा वागड ११ अव्वागडा १२ चेव ॥५॥" हे देवदत्तेत्यामंत्रणी १ । इदं कुर्वित्याद्याज्ञापनी २ । इदं मे देहीति ३ । कथमिदमिति ४ । हिंसादिप्रवृत्तो दुःखितादिः स्यात् ५ । इदं न ददामीति ६ । साधुपार्श्वे गच्छामीति प्रश्ने सुष्ठिवदमिति ७ । अनभिगृह्यार्थं योच्यते डित्थादिवदिति ८ । अर्थमभिगृह्य योच्यते घटादिवदिति ९ । अनेकार्थस्य साधारणा योच्यते सैन्धवमित्यादिवदिति १० । व्याकृता स्पष्टार्था देवदत्तस्यैष भ्रातेत्यादिवत् ११ । अव्याकृताऽस्पष्टार्था बालस्त्रीदीनादीनां भाषितेत्यादिवत् १२ । इत्थं भाषास्वरूपमवगत्य सत्या १ असत्यामृषा च २ विवेकवद्भिः सर्वदा वाच्या । तदन्या त्वसत्या १ सत्यामृषा च २ मिश्ररूपा न वक्तव्या ।

तथा "**न किज्जए**" इत्यादि, न क्रियते भोगसुखे वैषयिकसुखे पिपासा तृष्णा, तृष्णया न कार्यार्थसिद्धिः, केवलं पातककदम्बकमेवोपचिनोत्यात्मा । यदुक्तं **श्रीउपदेशमालायाम्**—"**अणवट्ठियं मणो जस्स झायइ बहुआइं अट्टमट्टाइं । तं चिंतियं च न लहइ संचिणई पावकम्माइं** ॥१॥" तथा खण्ड्यते नैव परस्य मार्गणस्य आशा मनोरथः । एव-कारो निश्चयार्थः । एवं पदत्रयोक्तसत्कृत्यकरणे प्राणिनां धर्मः प्रगुणीकृतः स्यात् । अथ च कीर्त्तिरपि सर्वदिग्गामिनी सप्रकाशा स्यात् चन्द्रादित्यजातवेदस्ताराररत्नतेजःप्राग्भारभासुरतरेति काव्यार्थः । एतावता ऐहिकामुष्मिकफलं दर्शितं । ॥९१॥
अथाद्यपदोपरि श्रीकालिकार्यकथोच्यते—

## ।। श्रीकालिकार्यकथा ।।

पण्यापूर्णविपण्यामगण्यतारुण्यरोचितरमण्याम् । तुरुमिण्यामभवत् पुरि जितशत्रुरिति क्षमारमणः ।।१।।
स्वकुटुम्बविहितभद्रा भद्रा तत्र द्विजन्मजन्यजनि । तत्पुत्रो दत्त इति ख्यातोऽभूद्भूपतिपुरोधाः ।।२।।
तन्मातुलोऽतुलोन्नतिपात्रं श्रीकालिकार्य इत्यासीत् । यच्चेत सरसीरुहि जिनेन्द्रगीर्भ्रमति भृङ्गीव ।।३।।
मदिरापानी मानी व्यसनी पिशुनैः सहेति सांगत्यम् । दत्तद्विजातिरीदृग्जज्ञे यज्ञेषु तत्परधीः ।।४।।
सोऽथ प्रधानपुरुषान् स्ववशीकृत्य प्रभूतदानाद्यैः । स्वयमेवाजनि राजा चिरंतनं भूपमुच्छेद्य ।।५।।
तेनारब्धाः क्रूराः क्रतिना क्रतिनामतीव वैरभृता । नानाभेदाः क्रतवस्तत्र वसु स्वं व्ययीकृतवान् ।।६।।
तत्रान्यदा सदागमकृतमतयः सुप्रशस्ततरमतयः । पार्श्वस्थितवरयतयः समाययुः कालकाचार्याः ।।७।।
तानित्युवाच गत्वा सत्वार्हतधर्ममत्सरी पापः । भगवन् भण निपुणतया फलमिह भो याज्ञिकं किं स्यात् ।।८।।
ते प्राहुराहिताग्नेः किं धर्मं पृच्छसि प्रसन्नतया । कथितेऽथ धर्मतत्त्वे सत्त्वेषु प्रगुणितप्रीतौ ।।९।।
पप्रच्छ पुनस्तदसौ नरकाध्वा किमिह पृच्छ्यते भवता । तदनूक्तमधर्मफलं भूयः स हि पूर्ववत् प्रोचे ।।१०।।
किमशुभकर्मोदयपृच्छकोऽसि तस्मिन्नपि प्रकथितेऽथ । तेनाभ्यधायि किं यज्ञकर्मणां घोषणां ब्रूहि ।।११।।
गुरुभिरवाचि वचस्विभिरिज्यायाः श्वभ्रगमनमेव फलम् । तद्वचसा रुष्टमनाः स उचिवान् प्रत्ययः कोऽत्र ।।१२।।
अस्मात्सप्तमदिवसे पतिष्यते त्वमिह शुनककुम्भ्यन्तः । तदपि कथं ज्ञेयं खलु दत्तेनोक्ते गुरव ऊचुः ।।१३।।

यदि पतति सप्तमेऽस्माद्घस्रेऽवश्यं भवन्मुखे विष्टा । दुर्गन्धेन निकृष्टाऽनिष्टा सत्यं तदेदं भोः ॥१४॥
दुष्टो रुष्टोऽवादीत्ततः स दत्तः कथं भवन्मृत्युः । गुरुराख्यत्सुचिरमहं संयममाराध्य शुद्धधिया ॥१५॥
यातास्मि देवलोकं सश्लोकं सर्वदापि निःशोकम् । श्रुत्वेति रुषितचेताः प्रेताधिष्ठित इवारुणदृक् ॥१६॥ युग्मम्॥
॥९३॥ वाडव एवमवादीन्महाविषादी स्वकीयमृत्युभयात् । एनं रुन्द्ध विरोधिनमहो भटा उत्कटास्तूर्णम् ॥१७॥
रुरुधुस्तेऽपि तदुक्त्या स्वयं जगामैव लोकाः स्वपुरीम् । अथ पौराः प्रच्छन्नं चिरंतनं नृपतिमाजुहुवुः ॥१८॥
वयमेनं निर्बुद्धिं दृढबन्धनबद्धमाशु दास्यामः । इत्यवगम्य स राजा गुप्ततया तीरगस्तथौ ॥१९॥
विस्मारितदिवसोऽसावसावधानत्वतः सुखावेशात् । सप्तमदिने दिनेशितुरुदये न दयेरितः क्वापि ॥२०॥
राजपथं संशोध्य स्वमानुषैस्तत्र रक्षकान्मुक्त्वा । सप्तमवासरसमये विनिर्ययौ यतिविनाशार्थम् ॥२१॥
अत्रान्तरे प्रभातप्राया यावत्तमी समस्ति तदा । कुसुमकरण्डकहस्तः प्रविशति नगरीमरीणजनाम् ॥२२॥
कोऽपि हि पुष्पाजीवी कृतदानुद्वारमुदरचलनेन । तदुपरि पुष्पान् क्षिप्त्वा स्वयं ननाशैष तस्करवत् ॥२३॥
निर्गच्छन् यावदयं पुरात्तरस्वी तुरङ्गमारुढः । तत्रायातस्तावत्तुरगखुरोत्खातमुच्छलितम् ॥२४॥
तदशुचि तन्मुखविवरं प्रविवेश गुरोर्विनिग्रहे भाषा । येनाभाष्यत परुषा तत्र हि युक्तस्तदापातः ॥२५॥ युग्मम्॥ ॥९३॥
वदनेऽनिष्टा विष्टा यदा निविष्टाऽस्य गुरुभिरुपदिष्टा । नवले बलेन समया रयान्निजं धाम स जगाम ॥२६॥
तावत्प्रधानपुरुषैरबन्धि दृढबन्धनैर्निगृह्य घनैः । आनीय पूर्वभूपः स्वस्थाने स्थापयामासे ॥२७॥

तेनैष कुम्भिकायां निचिक्षिपे पापपुञ्जभाग्दत्तः । पूर्वविरुद्धाः प्रायः कदर्थनां किं न कर्त्तारः ॥२८॥
मध्ये शुनकान् क्षिप्त्वा कुम्भीद्वारं च बन्धयित्वाथो । तदधस्तादस्ताधं वह्निं प्रज्वालयामासुः ॥२९॥
ताप्यन्ते भषणगणास्तथा तथा चिच्छिदुस्तदङ्गममी । एवं नैरयिक इव प्रकामकष्टानि सोढाऽसौ ॥३०॥
 प्राप विपद्य श्वभ्रं सूरीन्द्राश्चरणभारमाराध्य । प्रापुस्त्रिदशीभावं स्वभावतः प्रकटवक्तारः ॥३१॥
यथा महासङ्कटसङ्गमेऽपि, न कालिकार्यैर्नृपतेः पुरस्तात् । असत्यभाषा गदिता तथाऽन्यैर्मिथ्या न वाच्यं ननु धर्मकार्ये ॥३२॥

॥ इत्यसत्यभाषापरिहारे श्रीकालिकार्यकथा ॥

अथ "न किज्जए त्ति" द्वितीयपदोपरि दृष्टान्तः सूच्यते—

॥ द्विजसुतकथा ॥

कुत्राप्येकोऽभवद्विप्रः प्रायस्तुच्छधनार्जनः । कान्ताविपत्तिदुःखार्त्तः ससुतो निर्ययौ गृहात् ॥१॥
वैराग्यापन्नचित्तः सन्मोक्षमार्गं समीहते । साधुपार्श्वोपालब्धार्हद्धर्मश्चारित्रमात्तवान् ॥२॥
शीतवातातपाद्युग्रोपसर्गोपद्रुतस्तराम् । पित्राऽसौ क्षुल्लकः साधुः कृच्छ्रेणैव प्रवर्त्यते ॥३॥
कियत्यपि गतेऽनेहस्यसौ वप्तारमब्रवीत् । व्रतं धर्त्तुमशक्तोऽहमस्मि तात कथं क्रिये ॥४॥
बाधन्ते विषयग्रामाश्चेतो मे कपिचापलम् । धत्ते मत्तेभवद्वेतस्ततो धावति निर्भरम् ॥५॥
सोऽभ्यधे तेन गार्हस्थ्यमित्येष प्रतिपादयन् । तातेनात्याजि न श्रेयस्कर्यस्य प्रतिपालना ॥६॥

न हि धर्मेण मे कार्यं धनेनैव प्रयोजनम् । मत्वाऽसौ निर्जगामाशु सहवासिपुरं ययौ ॥७॥
ज्ञातो द्विजातिभिः सर्वैरमुकस्यायमात्मजः । कस्यचित्सदने तस्थौ दौस्थ्ये ज्ञातिः सुखङ्करः ॥८॥
कश्चिद्ददौ निजां कन्यां तस्मै तत्सद्मनः पुनः । कुरुते सर्वकृत्यानि परं भोगेषु लालसः ॥९॥
कदाऽहं सप्रियः स्वैरं भृशं वैषयिकं सुखम् । सेविष्ये मानसे ध्यायन्निति यावत्स तिष्ठति ॥१०॥
यावद्विवाहवेलाऽऽगादकस्मात्तावदञ्जसा । धाटी पपात भिल्लानां तया तन्मिथुनं हृतम् ॥११॥
स भोगस्पृहया मृत्वा तीव्रार्त्तध्यानवानिति । संजज्ञे महिषः क्वापि ग्रामे ग्रामेयकालये ॥१२॥
उपचर्य परिव्रज्यामेतस्य जनकः पुनः । दिवि देवत्वमापेदे सस्मार प्राग्भवं निजम् ॥१३॥
नन्दनं सैरभीभूतमवगम्यावधेर्बलात् । तत्रागाद्द्रुतमेवैष रूपं शौकरिकं दधत् ॥१४॥
क्रीत्वा तं गोदुहः पार्श्वाज्जघान लकुटादिभिः । भृत्वा दुर्वहभारेण तं स्थलीर्व्यमिचालयत् ॥१५॥
ततः साधुपितू रूपं कृत्वात्मानमदर्शयत् । देवः कारुण्यमाधाय सुतस्य हितकाम्यया ॥१६॥
पश्यतस्तादृशं रूपं चिन्ता चेतस्यजायत । दृष्टपूर्वं मयेदृक्षं क्वापि रूपं पुरा भवेत् ॥१७॥
तदावरणदुष्कर्मक्षयोपशमलाभतः । जातिस्मृतिरथोत्पेदे लुलायस्य शुभोदये ॥१८॥
ततः स्वभाषयाऽरावीत्तात मामव दुःखतः । ततस्तज्जनकोऽवादीद्रे रे शौकरिकाधम ॥१९॥
मैवं मारय निःशंकं क्षुल्लकोऽयं मदङ्गभूः । ततो माहिषिकोऽब्रूत शृणोति न भवद्गिरम् ॥२०॥

॥९५॥

त्वं तूर्णं दूरतो याहि येनैष चलति स्वयम् । ततस्तदभ्यर्थनया मुमुचेऽसौ सुमुत्कलः ॥२१॥
ततो दृष्टभयोद्भ्रान्तः प्रपेदे धर्ममार्हतम् । व्रतानि सम्यगाराध्य कृतभक्तविवर्जनः ॥२२॥
प्रपन्नानशनस्तमान्मृत्वा दिविषदादिमे । स्वर्गेऽभूज्जैनधर्मो हि सुरद्रुरिव सौख्यदः ॥२३॥
तिर्यग्गतेर्निवार्यैष पित्रा पुत्रः सुरीकृतः । जैनधर्मप्रदानेनासीमशर्मविधायिना ॥२४॥
यथा तेन कृता तृष्णा कृष्णाहिरिव भीषणा । दीक्षामपि प्रपद्यैवं विधातव्यं न धीधनैः ॥२५॥

॥ इति भोगपिपासोपरि द्विजसुतदृष्टान्तः ॥

"खंडिज्जए नेव परस्स आसत्ति" तृतीयपदं कथ्यते–परस्यान्यस्याशा वाञ्छा न खण्ड्यते । यत उक्तं–"देयं स्तोकादपि स्तोकं न व्यपेक्षो महोदयः । इच्छानुकारिणी शक्तिः कदा कस्य भविष्यति ॥१॥ वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताई । जइवि न पज्जत्तधणं थोवा वि हु थोवयं देइ ॥२॥ बोधयन्ति, न याचन्ते, भिक्षाहारा गृहे गृहे । दीयतदीयतां दानमदत्तफलमीदृशम् ॥३॥" एतदुपरि दृष्टान्तो यथा––

॥ नरवाहनकथा ॥

मालवेषु विशालायां विशालायां श्रियां भरैः । आसीत्सविक्रमोद्दण्डदोर्दण्डो विक्रमाधिपः ॥१॥
तस्यान्यदास्थानसभासीनस्याहीनसंपदः । भट्टः कोऽपि समागत्य नरवाहनभूपतेः ॥२॥
चकार सद्गुणश्लाघां तां निशम्याथ विक्रमः । प्राह किं भोः समस्त्येष मत्तोऽप्यधिकसद्गुणः ॥३॥

यदेवं मत्पुरस्तस्य ख्यातिरेवं विधीयते । का शक्तिस्तस्य ? का भक्तिः ? का मतिरतस्य ? का स्थितिः ? ॥४॥
भट्टेनाख्यायि भूभर्त्तः सावधानतया शृणु । वर्त्तते महती तस्य कीर्त्तिः स्फूर्त्तिमती भुवि ॥५॥
हिरण्यरूप्ययोः कोटीमेकैकामर्पयत्यसौ । आप्रभाताद्धवेद्यावत्सन्ध्यार्थिभ्यः कृपापरः ॥६॥
रात्रौ चाशोकवनिकावध्यशालामुपैत्यसौ । स्वदेहं खण्डशश्छित्त्वा तत्रायाताय रक्षसे ॥७॥
दत्ते पलबलिं नित्यं ततस्तृप्तः स राक्षसः । प्रयच्छति सदैवास्मै कोटीं हेमहिरण्ययोः ॥८॥ युग्मम् ॥
राज्ञोचे तत्तथा नैष कुरुते तर्हि किं भवेत् । तेनोक्तं तत्र दत्तेऽसौ स्वकीयाङ्गक्षतान्यथो ॥९॥
सज्जीकरोति संरोहिण्यौषध्या वसुधाधवः । ईदृशी शक्तिरेतस्य परेष्टापूर्त्तये प्रभो ! ॥१०॥
संप्रक्षिप्य महानिष्टकष्टेऽप्येष महामतिः । पराशाः पूरयत्येव धनैः पानाशनैर्धनैः ॥११॥
ततो विक्रमभूपालस्तस्य दुःखापनुत्तये । अग्निवेतालसान्निध्यादुड्डीय व्योम्नि पक्षिवत् ॥१२॥
क्षणाज्जगाम सुस्थामा नरवाहनसन्निधौ । रक्षःस्थानान्निषिध्यैतं सायं तत्पदमासदत् ॥१३॥
अत्रान्तरे नृचक्षाः स क्रूराकारभयङ्करः । अन्धकारभरश्यामः पापपुञ्ज इवाङ्गभृत् ॥१४॥
आययावथ पृथ्वीशस्तदीहापूरणोद्यतः । शूरः साहसिकश्रेणीग्रामणीः स्ववपुःपलम् ॥१५॥
आकण्ठमर्पयामास शस्त्रेणाच्छिद्य पाणिना । ततः पलाद आचख्यावक्षामस्थामसेवधिम् ॥१६॥
किमर्थं व्यर्थमात्मीयप्राणांस्त्वं भो मुमुक्षसि । तेनोक्तं विक्रमादित्योऽहमस्मि करुणावशात् ॥१७॥

॥९७॥

नरवाहनकार्यार्थं विमुञ्चन्नस्मि जीवितम् । तत्सत्त्वेनैष तुष्टात्मास्वदद्राजन् वरं वृणु ॥१८॥
ततस्तं प्रत्यवग्वाग्मी नरवाहनदेहजम् । पलं विनैव तद्रूप्यस्वर्णकोटीं प्रपूरय ॥१९॥
तथैव प्रतिपद्यैष वर्णयंस्तद्गुणोच्चयम् । आससाद निजं स्थानमस्थानसमापदाम् ॥२०॥

श्रीविक्रमोऽप्युज्जयिनीमेत्याभूद्भूतिभाजनम् । अहो पराशासंपूर्त्तिसाहसं नरवाहने ॥२१॥
ततोऽपि विक्रमादित्यः सात्त्विकः परिकीर्त्तितः । येन स्वदेहदानेन तोषितो रजनीचरः ॥२२॥
मत्वैवं नरवर्मराजचरितं सर्वोत्तमं मार्गणश्रेणीवाञ्छितपूरणे तदनु च श्रीविक्रमोर्वीशितुः ।
दुःस्थाशापरिपूरणे सुकृतिनः सज्जीभवन्तः सदा, धर्मं चापि यशः शशाङ्कविशदं सद्यो लभध्वं बुधाः ॥२३॥

॥ इति परमनोरथपूरणोपरि नरवाहनदृष्टान्तः ॥

अथ पूर्वोक्तधर्मस्याराधका एव सिद्धिसौख्यसाधकाः स्युर्नापरे इत्येतदुपर्युपदेशकाव्यमाह—

**दुरन्तमिच्छत्तमहंधयारे, परिप्फुरंतंमि सुदुन्निवारे ।**
**न सुद्धमग्गाउ चलंति जे य, सलाहणिज्जा तिजयंमि ते य ॥१०॥**

व्याख्या—दुःखेनान्तो यस्य तद्दुरन्तं तच्च तन्मिथ्यात्वमेव महान्धकारं तस्मिन् परिस्फुरति—विस्तृते सति । किंभूते ? सुदुन्निवारे—सुतरामतिशयेन दुर्वारे वारयितुमशक्ये । ये शुद्धमार्गान्न चलन्ति, ते च श्लाघनीयास्त्रिजगत्यपि ।

अत्र जात्याश्वदृष्टान्तः सूच्यते—

॥ जात्याश्वदृष्टान्तः ॥

आस्तेऽत्रैव हि भरते वसन्तपुरपत्तनं प्रमोदिजनम् । कौसुम्भवस्त्रभारैर्यत्र वसन्तः सदा वसति ॥१॥
तत्र यथार्थाह्वयभाग्जितशत्रुरिति क्षितीश्वरो जयति । यस्य यशःशशिमण्डलमुज्ज्वलमुद्योतते विश्वे ॥२॥
॥९९॥ तस्य सखा प्रास्तमृषाभाषाख्यानो जिनोक्तधर्मज्ञः । जिनदास इति श्राद्धः सश्रद्धः सत्यनामासीत् ॥३॥
तत्रान्यदाऽश्वपालैरश्वाली सुन्दरा समानीता । प्रीता सर्वा परिषन्नृपतिस्तल्लक्षणाभिज्ञान् ॥४॥
आह्वाय्यापृच्छदहो कीदृग्लक्षणधरा इमे तुरगाः । तैरेकोऽश्वकिशोरः सगुणः परिवर्णयामासे ॥५॥
राज्याभिवृद्धयेऽसावित्याकर्ण्याग्रहान्नृपो जगृहे । स्वगृहेऽबन्धि स नीत्वा दत्त्वा तद्द्रव्यमसमानम् ॥६॥
तदनु व्यचिन्ति चित्ते वित्तेनैतावता गृहीतोऽश्वः । परमेतदीयरक्षा दक्षात्मतया विधातव्या ॥७॥
न हि जिनदासादन्यो विज्ञोऽत्रार्थे मतो वयस्यो मे । स तु विश्वासैकगृहं सुनिःस्पृहः परधनग्रहणे ॥८॥
अस्थापयदिति गत्वा सत्त्वाधिकमेतमश्वरक्षार्थम् । राज्यसर्वस्वमेष प्रपालनीयस्त्वयेत्युक्त्वा ॥९॥
प्रतिपद्यादेशमसावसाधुना त्यक्तवाङ्मनोवृत्तिः । तत्किङ्करपरितं तुरगं निन्ये निजं धाम ॥१०॥
स्वयमेवास्मै यच्छति स घृतगुडग्रासचणकदाल्यादि । पाययति च पानीयं सरोवरे पृष्ठमारुह्य ॥११॥ ॥९९॥
अस्ति जिनस्यायतनं पुरातनं पुरसरोविचालाध्वे । सरसि व्रजन् जिनौकः प्रदक्षिणीकृत्य नित्यमसौ ॥१२॥
अश्वस्थ एव देवान् वन्दित्वा याति पाति जात्यश्वम् । मैनमपहृत्य कश्चिद्व्रजतीति हृदन्तरे ध्यायन् ॥१३॥

अर्हद्गृहगृहसन्निध्यामुन्मुच्य आत्यतुरगोऽसौ । वेत्यन्यं पन्थानं न हि बहिरन्तस्तथा क्वापि ॥१४॥
ईदृक्शिक्षादक्षात्मानं तादर्थ्यं विधाय जिनदासः । तमपालयद्दिवानिशमपास्तनिजगेहकृत्यभरः ॥१५॥
राज्यसमृद्ध्याऽवर्द्धत वसुधापतिरश्वरत्नलोभेन । ज्ञात्वोत्कटसैन्यबलं तं सीमाला महीपालाः ॥१६॥



अवहन्नतुच्छमत्सरमेनं चक्रुर्विमर्शमेकत्र । कथमप्यस्याश्वस्यापहृतिः स्याच्छोभनं तद्भोः ॥१७॥
एकस्याख्यत्तावन्मन्त्री छद्मप्रपञ्चचञ्चुरधीः । अहमस्य राज्यसारं हयं हरिष्ये हठाद्गेहात् ॥१८॥
तद्राज्ञानुज्ञातस्तथेत्युरीकृत्य कपटपाटवभाक् । साधुसमीपे श्रावकधर्ममसौ चारु शिक्षितवान् ॥१९॥
गत्वा च वसन्तपुरं चैत्यमथो साधुवृन्दमभिवन्द्य । जिनदाससद्मचैत्यप्रणतिचिकीः पार्श्वमस्यागात् ॥२०॥
तत्रत्यार्हत्प्रतिमाः प्रणम्य सम्यक्तया विनिर्गत्य । श्राद्धोचितवन्दनयाऽवन्दत जिनदासमेष मुदा ॥२१॥
सोऽपि तदभ्युत्थानप्रतिपत्तिपुरस्सरं सुखं पृष्ट्वा । को हेतुर्भो भवतामत्रागमने तमित्यूचे ॥२२॥
कपटाटोपी लोपी सुकृतस्यान्तस्तरामसौ कोपी । प्राहाहो सुश्रावक ! संसारोद्विग्नचित्तोऽहम् ॥२३॥
सर्वत्र तीर्थयात्रामासूत्र्यार्थं निवेश्य धर्मार्थे । दीक्षां गृहीतुकामोऽस्मि प्रेमस्थेममुक् स्वजने ॥२४॥
मध्ये भवतामागामथ जिनभृत्योऽवदन् महाभाग ! । स्वागतमार्येण समं गोष्ठीमिष्टां करिष्यामि ॥२५॥
तेनापि प्रतिपन्नं न दाम्भिकैश्छल्यते जनः को वा । गणिकाभिर्धर्ममिषादभयः सहसैव [1]निगृहीतः ॥२६॥

---

१ विषमिदममृतस्यान्तः प्रकाशपूरे त मोभरप्रसरः । माधुर्ये कटुकमिदं धर्मविधौ यच्छलं कुरुते.

स्वानादिदेश परिकरनरानरं सादरस्तदन्वेषः । सज्जीभवन्तु भो भो मज्जनभोजनविधावस्य ॥२७॥
भुक्त्युत्तरकालमथो विकथोपरतौ जिनेन्द्रसाधुकथाम् । कुर्वन्तावनवरतं तस्थतुरेतौ सुखेनैव ॥२८॥
जिनदासस्वजनकुले भुञ्जानः स्वेच्छया स तुच्छात्मा । छलमीक्षतेऽश्वहरणे दुग्धास्वादे यथौतुरिह ॥२९॥
सपरिकरः स श्राद्धस्तन्मधुरालापलालसमनस्कः । तं कपटिनमाचष्टे समानधर्माऽस्यहो त्वं यत् ॥३०॥
॥१०१॥ तस्मादश्वोऽयं एष सुरक्षितः स्याद्यथा तथा कार्यम् । न हि मोक्तव्यः शिथिलः कमप्यहं याम्यहो ग्रामम् ॥३१॥
आयात एव भवता सज्जीभवता तुरङ्गरक्षार्थम् । द्रष्टव्य इत्युदित्वा स्वयं बहिर्निर्जगाम गृहात् ॥३२॥
कौमुद्युत्सव आसीत्तस्मिन्समये समस्तपुरलोकः । निशि रंरमीति सुचिरं ततः प्रहृष्टः स दुष्टात्मा ॥३३॥
यम इव जीवितमङ्गादगारतस्तुरगरत्नमपहृत्य । प्रस्थितवानहहाऽयं धिग्धिग्विश्वस्तघातित्वम् ॥३४॥
निर्गत्य ततस्तरसा सहसा साहसिकपाश आयातः । आरुह्य यावदश्वं जिनसद्मोपान्तिकं तावत् ॥३५॥
तत्परितस्त्रिः कृत्वा प्रदक्षिणां तेन वार्यमाणोऽपि । कासारं प्रत्यचलत् स्वभ्यस्तं विस्मृतिं किमिह याति ॥३६॥ ॥१०
तस्मात् पश्चाद्वलिते बलेन जिनधाम यावदस्माच्च । निजगृहमागाद्वेगादहो सुशिष्यत्वमिदमीयम् ॥३७॥
दृष्टपथादन्यस्मिन् यातुं नैच्छत् स सर्वथा तुरगः । तेन प्रणोदितोऽपि हि ततः स निर्विण्णहृन्मुक्त्वा ॥३८॥
तं धनिकवेश्मनि द्राक् स्वयं प्रणश्य प्रयातवान् दम्भी । नापुण्यप्रगुणनृणामाशाः प्राप्तावकाशाः स्युः ॥३९॥
अत्रान्तरे दिनोदयसमये समियाय वेश्म जिनदासः । तावज्जगदुः पौराः समग्ररजनीं त्वयाऽद्याश्वः ॥४०॥

आमित इत्युक्तेऽसावाह श्यामास्यभाक् क्षणत एव । एवमिति प्रतिपाद्य प्राप स्वं धाम सविषादः ॥४१॥
तद्वीक्ष्योद्घटितकपाटसंपुटं मानसेऽतिसंभ्रान्तः । यावदपश्यत्तुरगस्थानं तावत् पथश्रान्तम् ॥४२॥
हरिमाकलय्य सहसा हर्षविषादद्वयीसमाश्लिष्टः । चिन्तितवानिति सन्मतिरहो छलं धर्ममार्गेऽपि ॥४३॥
ध्रुवमस्त्यगण्यपुण्याभ्युदयो मे कश्चनाप्यनिर्वाच्यः । व्यपहृत्य पापबुद्ध्या व्यमोचि यज्जात्यहयरत्नम् ॥४४॥
यद्यम्भसि दाहकता सूर्याभ्युदयेऽपि तीव्रतिमिरं स्यात् । चन्द्रेऽङ्गारकवृष्टिस्तत्किं करणीयमत्रार्थे ॥४५॥
ईदृगपि धार्मिकत्वं धृत्वा कृत्वा च तीव्रतरमायाम् । दुष्कर्मेहकर्ता धर्ता कस्तत्करद्वितयम् ॥४६॥
परमेष एव सुष्ठु श्लाघ्योऽनर्घ्योरुसद्गुणस्तार्क्ष्यः । येनोत्पथेन पादा न धृतास्तत्तर्जितेनापि ॥४७॥
सुष्ठुतरमिति विदित्वा नत्वाऽभिज्ञः सदैव जिनदासः । तमपालयत्प्रयत्नात्सुसाधुरिव सत्त्वसंघातम् ॥४८॥

अथोपनयः—

यथा स जात्यस्तुरगो न यातः, कुमार्गमात्यन्तिकताडनेऽपि ।
तथा न शुद्धाध्वन उत्तमानां, कदापि हि स्यात्स्खलनाऽल्पकापि ॥४९॥

अत्र जात्याश्वकल्पाः साधवः श्राद्धा वा । अथ च मिथ्यात्वान्धकारभरः सर्वत्र प्रसृतोऽस्ति । तत्र ये शुद्धमार्गाच्छुद्धदर्शनरूपान्न चलन्ति न भ्रान्तिभाजो भवन्ति त एव श्लाघास्पदं भवन्तीति भावार्थः ॥

॥ इति जात्याश्वदृष्टान्तः शुद्धमार्गाचरणोपरि ॥

अथ संसारासारताप्रतिपिपादयिषयाऽग्रेतनं काव्यमाह—

**असारसंसारसुहाण कज्जे, जो रज्जई पावमई अवज्जे ।**

**अप्पाणमेसो खिवई किलेसे, सग्गापवग्गाण कहं सुहं से ॥११॥**

**व्याख्या**—संसरणं संसारः, असारश्चासौ संसारश्च तस्य सुखानि वैषयिकादीनि तेषां कार्ये तदर्थे यः कोऽपि मन्दधीर्नरः पापोपरि बद्धमतिः अवद्ये पापकर्मणि रज्यते रागं प्राप्नुयात् । आत्मानमेष क्षिपति क्लेशे द्रव्यभावभेदभिन्ने, अथ च स्वर्गापवर्गयोः कथं सुखं स्यात् 'से' तस्येत्यक्षरार्थः ॥ यः संसारसुखं बहु मन्यते तत्र लालसः सन् सिद्धिसुखं च न तात्त्विकं मन्यते सोऽत्रापरत्र च क्लेशभाक् प्रचुरदुःखप्रयासभागी भवेदिति समुदायार्थः ॥ स्तोकलाभकृते बहुतरं न हार्यते इत्येतदुपरि दृष्टान्तद्वयमुच्यते श्रीउत्तराध्ययनस्थम्—



**॥ द्रमकदृष्टान्तः ॥**

एगो दमगो कत्थवि वासी आसी सया दरिद्दमणी । परदासवित्तिणा तेण अज्जियं नाणयसहस्सं ॥१॥
सो तं गहाय सगिहाभिमुहं संपट्ठिओ सुसत्थेण । भोयणहेउमणेणं रूवगो भिन्न कागणिए ॥२॥
दिवसे दिवसे कागिणिमेगं सो भुंजई किविणयाए । अवसेसा तस्सेगा कागणिया अत्थि लहुणिज्जा ॥३॥
हट्टे वणियस्स ठिया विस्सरिया चल्लिए तओ सत्थे । चिंतइ सो मज्झ इमो रूवयगो भिंदियव्वो त्ति ॥४॥
एगत्थ भूपएसे गोवित्ता नउलगं स दम्माण । कागिणिवालणहेउं पच्छा वलिओ विलक्खमुहो ॥५॥

कलहंतेण न लद्धा कागणिया तेण वणियपासाओ । सो नउलगोव्वि सच्छिल्लएण दिट्ठो ठविज्जंतो ॥६॥
सो तं गहित्तु नट्ठो रित्तं ठाणं पलोइउं दमगो । झूरंतो संपत्तो भवणं अहहा किमिह जायं ॥७॥ ॥ इति द्रमकदृष्टान्तः ॥

भूयोऽप्येतदर्थसूचकं दृष्टान्तं प्राह–



जहा कागिणिए हेउं सहस्सं हारई नरो । आवत्थं अंबगं भुच्चा राया रज्जं तु हारए ॥१॥

अथ राजदृष्टान्तमेतदर्थसूचकं द्वितीयमाह–

॥ राजदृष्टान्तः ॥

अंबफलाऽजिण्णेणं कस्सइ रन्नो विसूइया जाया । सा तस्स सुविज्जेहिं महया कट्ठेण निग्गसिया ॥१॥
भणिओ एवं जइ पुण खाहिसि अंबाणि तो विणस्सहिसि । तस्स य अंबाणि अइप्पियाणि तेण य महीवइणा ॥२॥
नियदेसे उत्थिन्ना अंबयरुक्खा स अन्नया राया । हयवाहणियाहेउं विणिग्गओ सह अमच्चेण ॥३॥
अस्सेणं अवहरिओ बहुमग्गविलंघणेण परिस्संतो । सहसा मओ य तत्तो अंबवणे भूवई पत्तो ॥४॥
चूअतरुच्छायाए स मंतिणा वारिओऽवि विणिविट्ठो । तस्स य हिट्ठे दिट्ठाणि तेण नणु अंबयफलाणि ॥५॥ 
पडियाणि वाउवसओ परामुसइ सो करेण ताणि लहुं । पच्छा अग्घाएउं लग्गो स गंधलोहेण ॥६॥
वारिज्जंतोऽवि अमच्चएण भक्खेइ ताणि सो राया । रसलोभत्तेण गओ निहणं हा हा अपंडिच्चं ॥७॥
एतावता दृष्टान्तद्वयेनैवं संसारसुखानां निस्सारतोक्ता, मोक्षसुखानां तु सारतान्तरङ्गवृत्त्याऽवसेया ।

अथ स्वर्गापवर्गसाधनोपायभूतं जिनार्चनमेव प्रतिपादयन्नाह–

**नरिंददेवेसरपूइयाणं, पूयं कुणंतो जिणचेइयाणं ।**

**दव्वेण भावेण सुहं चिणेइ, मिच्छत्तमोहं तह निज्जिणेइ ॥१२॥**

व्याख्या–नरेन्द्रा राजानो देवेश्वराश्चेन्द्रास्तैः पूजितानामर्चितानां पूजां कुर्वाणः श्रीजिनचैत्यानां जयन्ति रागादी-
॥१०५॥ निति जिनास्तेषां चैत्यानि चेतःप्रमोदजनकानि प्रतिमालक्षणानि तेषां द्रव्येण गन्धधूपपुष्पादिना, अथ च भावेनोग्र-
विहाराज्ञापालनादिना शुभं कर्म चिनोति श्राद्धः साधुर्वा, अत्र कर्ताऽनुक्तोऽपि स्वयमभ्यूह्यः कर्तव्यबलात् । मिथ्यात्व-
मोहनीयं कर्म तथा निर्जरयति जीर्णं करोतीत्यक्षरार्थः ॥ यथाऽत्राजीर्णं भस्मार्कवडवानलगुटिकाभक्षणादिना जीर्यते
तथा कर्माजीर्णमपि जिनार्चनमन्तरेण नो जिनार्चनेन भज्यत इति भावार्थः ॥ यदुक्तं श्री महानिशीथे–

**"पुणो वि वीयरागाणं पडिमाओ चेइयालए । पत्तेयं संथुणे वंदे एगग्गो भत्तिनिब्भरं ॥१॥**

**तेसिं तिलोगमहियाणं धम्मतित्थंकराण जगगुरूणं । दव्वच्चणभावच्चणभेदेण दुहच्चणं भणियं ॥२॥**

**भावच्चणमुग्गविहारया य दव्वच्चणं तु जिणपूया । पढमा जईण दुन्नि वि गिहीण पढमच्चिय पसत्था ॥३॥"**

यतेस्त्रिधा शुद्धया यच्चारित्रकष्टानुष्ठानद्वाविंशतिपरीषहाद्युपसर्गसहनं तत्सर्वं भावार्चनाधिकाररूपं बोद्धव्यं । श्राद्धः ॥१०
शुचिर्भूत्वा गन्धाम्भसा जिनप्रतिकृतीः प्रक्षाल्य कषायाम्बरेण वपुर्लूषयित्वा सचन्दनकुसुमस्रगाद्यैर्यदर्हदर्चोपक्रमं विधत्ते,
तत्सर्वं द्रव्यार्चानुगतं मन्तव्यं । अत्रार्थे श्रीरत्नचन्द्रोदाहृतिरुदाह्रियते––

॥ श्रीरत्नचन्द्रदृष्टान्तः ॥

अत्थित्थ भरहखित्ते जिणिंदचक्कीसजम्मसुपवित्ते । दुहओऽवि विजयवद्धणनयरं नयरेहरेहिल्लं ॥१॥
तत्थत्थि निवो दुत्थियसत्थेच्छा पूरणम्मि सुररयणो । निवरयणसेहरक्खो सिरसोहिररयणसेहरओ ॥२॥
सप्पणया तप्पणइणि वज्जासज्जा सुधम्मकज्जम्मि । रयणावलिव्व निम्मल चित्ता सा दित्तरूवधरा ॥३॥
रयणावलित्ति आसी दासीव जदंगचंगिमाइ पुरो । रइरंभागोरीओ हिरीइ न हु लोयभमिरीओ ॥४॥
रयणिव्व चंदमेसा सकलंजणलोयणप्पमोयरकरं । रयणमिव रयणगब्भा सुयं पसूया रयणचंदं ॥५॥
पइदिवसमेहमाणो ससिव्व पियदंसणो य सो जाओ । जाओ सव्वकलाओ ताओ नणु सिक्खियाओ य ॥६॥
आरूढो पोढवयं जा तावुव्वाहिओ निवेणेसो । वररूवइं कन्नं पुन्नंगि सुंदरगुणेहिं ॥७॥
जुवरायपए ठविओ महया स महूसवेण भूवइणा । किं तस्स दुल्लभं नणु सगुणो जो नंदणो हुज्जा ॥८॥
अह अन्नवासरे सो हयवाहणियाए निग्गओ कुमरो । वेगेण गंतुरेणं तुरएणऽवि खणा नीओ ॥९॥
पच्छा पडिया सव्वे तदणुचरा अस्सवारया पुरिसा । पत्तो रायकुमारो सुवेलसेलस्स विवरम्मि ॥१०॥
रायसुएणा सो सो निम्मुक्को दुव्विणीयसीसोव्व । गुरुण व्व तक्खणेणं को मुणइ पलाइओ कत्थ ॥११॥
गिरिनिज्झरनिज्जायं सुसीयलं निम्मलं जलं तेण । तण्हाउरेण पीयं सुसाउ अमयंव तो मुइओ ॥१२॥
फलमूलाइतरूणं भक्खंतो सो भमंतओ तत्थ । पिच्छइ अच्छेरकरं जिणहरमुत्तुंगसिहरधरं ॥१३॥

पउममिव छप्पओ सो दोसोदयवज्जिओरुचंकमणो । तम्मज्झमणुपविट्ठो सुकयसुगंधम्मि लुद्धमणो ।।१४।।
दट्ठूण दिट्ठिजुयलेणुज्जलजिणबिंबमिंदुसुंदरयं । अप्पाणमिमो मन्नइ धन्नं कयपुन्नसंभारं ।।१५।।
देवाण दाणवाणवि एसो देवो सयावि नमणिज्जो । रमणिज्जो रूवेणं संतो दंतो सुहागारो ।।१६।।
जस्सेरिसया मुत्ती दीसइ सोम्मं मुहं ससंकुव्व । नो इत्थे सच्छाइं तिक्खाइं इयरदेवुव्व ।।१७।।
।।१०७।। पूइस्समहमिमं ता एयं चिंतित्तु भूमिवइकुमरो । सुइभूओ सलिलेणं सुगंधकुसुमाणि गिल्लित्ता ।।१८।।
अच्चित्तु तित्थनाहं दाहं दुक्खस्स निम्महेमाणं । नीहरिय तओ बाहिं आसीणो मंडवुद्देसे ।।१९।।
पिच्छइ य अणिमिसच्छो जिणमुहसंमुहमईवहरिसेण । ता तत्थ समायाओ थविरो विज्जाहरो एगो ।।२०।।
तेणावि वावियाए न्हाणं सुद्धोदएण निम्माय । परिहियसियसिचएणं पुप्फेहिं जिणेसरो महिओ ।।२१।।
चियवंदणमेस तओ करित्तु विहिणा गुणोहमणिनिहिणा । थुइथुत्तेहिं थुणित्ता विणिग्गओ जिणहराउ तओ ।।२२।।
उवविट्ठो हिट्ठमणो मंडवमज्झंमि तो कुमारोऽवि । गंतूण तत्थ पणमिय वुड्ढमिमं पुच्छिउं लग्गो ।।२३।।
कारिय केणेयमहो जिणहरमुत्तुंगचंगसिहरिल्लं । को इत्थ अत्थि देवो कत्तो तुममागओ एत्थ ।।२४।। ।।१०
गंतव्वं तुह कत्थ य कत्थ निवासो य मे इमं कहसु । निसुणसु सुयण तुमं भो नहचारी भणिउमारभई ।।२५।।
वेयड्ढगिरिस्सुवरिं नयरंमि य गयणवल्लहे रम्मे । सूरप्पहाभिहाणो तत्थासि पियामहो मज्झ ।।२६।।
कारवियं तेणेयं जिणहरमित्थत्थि नाभिनिवपुत्तो । देवो सेवोचियपयकमलो कमलोहवुड्ढिअरो ।।२७।।

अहमागओऽम्हि तम्हा पुराउ नणु गयणवल्लहाउ इहं। न हु कत्थवि गच्छिस्सं मरियव्वमवस्समित्थ मए ॥२८॥
गयवासरे समेओ विज्जाचारणमुणी महानाणी। वंदित्तु इमो पुट्ठो मए पमाणं नियाउस्स ॥२९॥
तेणुत्तवियं तुह पंच वासरा अच्छि जीवियव्वं भो। तुरियं कुरु अप्पहियं परिहर आरंभसंभारं ॥३०॥
तव्वयणमिइ सुणित्ता समागओ इत्थ सिग्घमेवाहं। अणसणविहिणा मरणं पडिवज्जिस्सामि इह सेले ॥३१॥
तुज्झवि अओ परं नणु अरिहं देवो सुसाहुणो गुरुणो। धम्मो रम्मो केवलिकहिओ हिययम्मि वहियव्वो ॥३२॥
निम्मंतुजंतुनिवहा न हु थूला सव्वहा निहंतव्वा। वत्तव्वं न हु अलियं न गिण्हियव्वं अदिन्नधणं ॥३३॥
परिहरियव्वा विलया अन्नस्स परिग्गहो न बहु कज्जो। असणीयं न हु मंसं मज्जं पंचुंबरेहिं समं ॥३४॥
न हु आहेडयवित्ती न हु रत्तीभत्तमवि विहेयव्वं। भुत्तव्वमविन्नायं न फलं सफलं जओ जम्मं ॥३५॥
उवचरियव्वा अज्जा नेव अणज्जाण संगई नज्जा (कज्जा)। एसो सावयधम्मो सम्मं हियए धरेयव्वो ॥३६॥
तह भत्तमेगमहुणा गिहाण सुविहाणभूयमुत्तमयं। पंचनमुक्कारमहो जस्साइसओ जए गरुओ ॥३७॥
तस्साणावसवत्तिणो नरगणा देवावि सेवापरा, जक्खा रक्खपिसायसाइणिमहाभूआ न भीइप्पया।
संगामे न भयंकरा कविवरारूढा महावेरिणो, जच्चित्तम्मि निरंतरं रइवखो सारो नमुक्कारो ॥३८॥
झायव्वो पइदिवसं तिसंझमेसो गुणाण सुनिवेसो। जेणाभिमयसयाणं सिद्धी रिद्धी य विप्फुरइ ॥३९॥

मज्झ वि पाणच्चायक्खणे मणे सावहाणयोहेउं । नवकारो दायव्वो इत्थ पमाओ न कायव्वो ॥४०॥
तह मह पासे विज्जाजुयलं पुण पाढसिद्धमत्थि अहो । एगा आगासगमा बीया बहुरूवकरणी य ॥४१॥
तं तुमए गहियव्वं रहियव्वं पासवत्तिणा चेव । मज्झ दिणपंचयं जा तव्वयगमणेण पडिवन्नं ॥४२॥
॥१०९॥ पुणरवि भणइ कुमारं सिणेहसारं सहोयरा मज्झ । वेयड्ढे संति बहू परोप्परं नेहपडिबद्धा ॥४३॥
परमेक्को च्चिय अहयं पत्तो सुहमरणमप्पणो काउं । अकहित्ता बंधूणं इह सेले मज्झ साहिज्जं ॥४४॥
कुणसु महापुरिस अहो तहत्ति तेणोइए महामइणा । सो धम्मगुरू जाओ वोमचरो रायकुमरस्स ॥४५॥
तत्तो दुवेऽवि संविग्गमाणसा माणसाहणोम्मुक्का । उड्डिय कुसुमभरेणं पूइत्ता तित्थयरबिंबं ॥४६॥
चियवंदणं विहिए निम्मिय दोऽवि हु इमे विणज्जाया । दक्खिणदिसाविभागे तस्सेव जिणिंदगेहस्स ॥४७॥ युग्मम्॥
सुपमज्जिय सुविसालं सिलायलं तो अईव सुकुमालं । सिरिसूरतेयखयरो तत्थोववसिय [विसिय] समाहीए ॥४८॥
अणसणमुच्चरिय तओ सव्वन्नूसिद्धसाहुपच्चक्खं । वत्तुमिमं पारेभे सुमहुरगंभीरघोसेण ॥४९॥ युग्मम् ॥
अत्थु नमो अरिहाणं भगवंताणं सयंसुबुद्धाणं । इच्चाईकत्थयमओ परं पुणवि सो भणइ ॥५०॥
वंदे आणदेणामंदेणाणागए अईए य । संपइयवट्टमाणे जिणेसरे तिजयनमणिज्जे ॥५१॥ ॥११०
अह वंदे गणनाहे छत्तीसगुणिड्ढिअइसयसणाहे । चारणपरमोहिपुलायभेयभिन्ने अणेगविहे ॥५२॥
चरणे दंसणनाणे संजाया मज्झ जे अईयारा । तेहिं पडिक्कमामि प्पमायमयरागउम्मुक्को ॥५३॥

सुयमासाइय मह जं विकालसमयम्मि पढणपाढेहिं । उस्सुत्तमणुवइट्ठं जं सिट्ठं तमवि निंदामि ॥५४॥
सत्ताण संतई जं हणिया भणिया मुसा य जं भासा । लिद्धमदिन्नधणं जं रमियाओ जं महेलाओ ॥५५॥
जं मेलिओ पभूओ परिग्गहो लोहमोहलुद्धेण । जाया बयाइयारा अन्नेऽवि हु तेऽवि निंदामि ॥५६॥
पावोवगरणवारो दुव्वारो मीलिओ अपारो जं । इत्थन्नत्थवि जम्मे सो सव्वो अज्ज वोसिरिओ ॥५७॥

कोहो महाविरोहो केणावि समं न मज्झ सत्तेसु । माणो माया लोभो अणुरागो जो सव्वहा चत्तो ॥५८॥
जं जिहारसलोलुयाइ असणं पाणं तहा खाइमं, जं वा साइममुत्तमं जमसियं मंसं च मज्जाईयं ।
मूलं पुप्फफलाइयं बहुविहं जं निद्धलुक्खाइयं, भुत्तं भत्तमणेगहा तदखिलं निंदामि निस्सल्लओ ॥५९॥
सव्वन्नुसिद्धसाहूणमुत्तमं सरणमरिहधम्मस्स । काऊण तिविहतिविहं पंचपरमिट्ठिसरणपरो ॥६०॥
पडिजागरिज्जमाणो माणोज्झियमाणसेण कुमरेण । सज्झाणिक्कमणिल्लो पंचण्ह दिणाण पज्जंते ॥६१॥
संपप्प कालधम्मं समाहिणा सूरतेयखयरिंदो । पत्तो पंचमकप्पे सक्कसामाणिइंदत्तं ॥६२॥
सक्कारिय तस्स देहं तओ स संपट्ठिओ **रयणचंदो** । उत्तरदिसाइ संमुहमह दिट्ठं तेण वणमेगं ॥६३॥
तम्मज्झे उच्चयरं पासायवडंसयं स पासित्ता । तत्थारुहिय कुमारो सुरूवलावन्नपुन्नंगं ॥६४॥
कन्नाजुयलमपस्सं तं पुट्ठं रयणचंदनामेण । के भवईओ किं नामधिज्जया भणह सव्वमिणं ॥६५॥ युग्मम् ॥
तम्मज्झाओ एगा जंपइ भयकंपमाणसव्वंगी । भो सुपुरिस सुणसु तुमं संखित्तगिरा कहिस्सामहं ॥६६॥

वेयड्ढदाहिणस्सेणिमंडणे गगणवल्लहपुरम्मि । सिरिहेमचंदनामो निवसइ विज्जाहराहिवई ॥६७॥
तस्संगरुहा अहयं सम्मं जाणाहि मयणसुंदरिया । नेमित्तिसिद्धपुत्तो मज्जणएणन्नया पुट्ठो ॥६८॥
॥१११॥ एयाइ मह सुआए को भत्ता भाविओ भणसु भद्द । तत्तो तेणाइट्ठो मणिसेहरभूमिनाहस्स ॥६९॥
तणुजम्म रयणचंदो भूमिचरो तो अहं नियघरम्मि । चिट्ठामि सुहेणं चिय अब्भस्संती कला सयला ॥७०॥
दिट्ठा अहन्नयाहं विज्जाहरभाणुवेगतणएण । भाणुप्पहेण वम्महसराणुविद्धेण तेण तओ ॥७१॥
अवहरिय एत्थ भवणे वणम्मि मुक्का सयं स पावप्पा । विज्जासाहणहेउं गओ गओव्वंकुसविमुक्को ॥७२॥
एसा पुणो दुइज्जा कन्ना पुन्नाणुभावओ लब्भा । चंपाहिवस्स धूया नामेणं रयणमेहलिया ॥७३॥
तेणेवेसावि तओ उप्पाडित्ता ममंतिए मुक्का । मज्जायानिज्जाया कस्सवि न गणंति खलु लज्जं ॥७४॥
नियवुत्तंतो वुत्तो एसो सव्वो मएवि अविकप्पो । तुममवि पयडीकुरु नियगुत्तं नामाइ नीसेसं ॥७५॥
साहियमेईण पुरो सव्वोदंतो निओ जहावुत्तो । तस्सवणाउ इमाओ हरिसियहिययाओ जायाओ ॥७६॥
अम्हाण अज्ज उवरिं अणब्भओ अमयजलहरो वुट्ठो । तुट्ठो विही अणिट्ठोवचओ संचुन्निओ सिग्घं ॥७७॥
जं तुह अतक्कियं नणु संजायं दंसणं महाभाग । तं लहु पसायमाधाय कुणसु वीवाहमम्हाणं ॥७८॥
पच्छा स दुरायारो खयरो एही इमं निसामित्ता । परिणीया कुमरेणं ताओ धन्नाओ कन्नाओ ॥७९॥
ससरीरालिंगणग्गवट्टीए तुट्ठिमासु नीयाओ । भामिणिवणावणीओ विरहनिदाहेण तवियाओ ॥८०॥

जा चिट्ठइ तत्थ खणं मणम्मि साणंदओ कुमारो सो । तेणेग नहगमओ ताव स भाणुप्पहो पत्तो ॥८१॥
तं पिक्खिय सो अक्खइ रोसारुणलोयणो घणुव्वेगा । रे रे लहुं करे कुरु खग्गमहं मारइस्सामि ॥८२॥
इय निट्ठुरभासिल्लो पासमुवागम्म मुंचई खग्गं । गाढप्पहारमुग्गामिऊण कुमरस्स निरसंकं ॥८३॥
वंचित्तु तप्पहारं सारं पुन्नोदयं स धारंतो । जच्छइ पडिप्पहारं खगस्स महाउदग्गस्स ॥८४॥
पंचत्तमणुप्पत्तो तग्घायवसेण तक्खणेणेसो । मज्जाउ रंजियाओ पइपोरिसमसरिसं दट्ठुं ॥८५॥
गिण्हित्तु भारियाओ तत्तो तुरियं स चल्लिओ कुमरो । सोवद्दवठाणठिई न सुंदरा होइ कस्सावि ॥८६॥
जाव गओ थेवंतरमत्थमिओ ताव वासराहीसो । तो वंसजालियाए गेहागारं धरंतीए ॥८७॥
ठवित्तु भारियाओ तम्मज्झे सो हुओ सुनिच्चिंतो । तरवारिं करिय करे सयं ठिओ तद्दुवारंमि ॥८८॥
जाए पभायसमए जा पिच्छइ पणइणीजुयं कुमरो । ताव न पिक्खइ तत्थ ट्ठियाओ ताओ समहिलाओ ॥८९॥
ता विम्हयमावन्नो चिंतइ ताओ गयाओ कत्थ अहो । केणवि अवहरियाओ नीहरियाओ अहव ताओ ॥९०॥
एवं वीमंसंतो जा अच्छइ रायनंदणो चित्ते । पाउब्भूव तावेगसुरो स उज्जोइयदिगंतो ॥९१॥
पुरओ ठिच्चा सो अब्बवी य जाणासि मं न वा सुभग । कुमरेणुत्तं नाहं मुणामि तो बोल्लए अमरो ॥९२॥
निसुणसु सुयण अहं भो तुमए निज्जामिओ पुरा खयरो । जो सो अहं मरित्ता पंचमकप्पम्मि संजाउ ॥९३॥
इंदस्स समाणिड्ढी देवो सेवोचिओ सुरगणस्स । जिणधम्माराहणओ किं किं न हु लब्भए सुक्खं ॥९४॥

मा कुणसु नणु विसायं गयं वियाणित्तु पेयसीजुयलं । तं मिलही तुह अइरा गयरायसमाणदाणस्स ॥९५॥
गिण्हसु चितारयणं चिंतियसव्वत्थसाहगं भद्द । जेण मणे मह तुट्ठी संजायइ तुह वयंसस्स ॥९६॥
दिन्नो पुन्नोदयओ गहिओ चिंतामणी कुमारेण । लवियं सुरेण गच्छसु इओ तुमं सेलवेयड्ढे ॥९७॥
चिट्ठिज्जासु तुमं तिहि गंतुं निवहेमचंदगेहम्मि । तत्थट्ठियस्स सव्वं संपज्जिस्सइ तुह मणिट्ठं ॥९८॥
॥११३॥ धम्मे जिणप्पणीए तुमए निच्चुज्जमो विहेयव्वो । जम्हा धम्मायत्ता सव्वेऽवि य सुक्खसंजोगा ॥९९॥
जह जलहरवुट्ठीए वल्लीउ समुल्लसंति पत्तेहिं । तह पुन्नसमुदएणं रिद्धीबुद्धीसमिद्धीओ ॥१००॥
इइ जंपित्ता तत्तो पत्तो अमरो सुरालयं तुरियं । कुमरोऽवि गयणवल्लभनयरे चिंतइ इमं चित्ते ॥१०१॥
न हु ससुरगिहे गंतुं मह जुज्जइ लाहवं जओ तत्थ । तो **मयणमंजरीए** रूवं काउं जगाम तिहिं ॥१०२॥
जणणीजणया मिलिया कंठविलग्गा रुयंति गाढयरं । कत्थ गया आसि तुमं केणाणीया पुणो अहुणा ॥१०३॥
वुत्तं तीए सव्वं जह नीया खेयराहमेणाहं । आणित्तु रयणचंदेण रयणसेहरसुएणेत्थ ॥१०४॥
मुक्का कत्थ गओ सो संपइ तेहिं कुमारिया पुट्ठा । सा आह मं दुवारे मुत्तुं कत्थवि गओ न मुणे ॥१०५॥ ॥११
कहमेस अणाहूओ आगच्छइ मग्गिहम्मि इइ रन्ना । तस्सन्नेसणकज्जे सुहडा सव्वत्थ पट्ठविया ॥१०६॥
अन्ने य अस्सवारा तेहिं समग्गेहिं कत्थवि न दिट्ठो । तत्तो वलित्तु राया विन्नविओ नेव सो लद्धो ॥१०७॥
तव्वत्तावि न सुणिआ को जाणइ कत्थ सो तिरोहूओ । तो जाओ सविसाओ सह प्पियाए महीनाहो ॥१०८॥

उपदेश-

॥११४॥

अहह कहमागओऽवि हु गओ स जामाउओऽम्ह गेहाओ । अहवा चिंतारयणं कह ठाइ पुरे अपुन्नाणं ॥१०९॥
ता तेहिँ सुआ वुत्ता करे धरित्ता कहं स नाणीओ । तस्सासि तुमं दिन्ना वरिसम्मेयम्मि य विवाहो ॥११०॥
अह लिहिय लेहमवणीनाहो संपेसए नियं दूअं । पुरविजयवद्धणम्मि य स रयणसेहरमहीसस्स ॥१११॥
तस्स कहिज्जासु सया अम्हेहिं **मयणमंजरी** आसि । दिन्ना तुम्हंगयरयणचंदनामस्स सो इत्थ ॥११२॥
लहु पेसियव्वओ सो वीवाहो इत्थ वच्छरे होही । इय तेण तत्थ गन्तुं कहिओ संदेसओ तस्स ॥११३॥
इय सुणिय सो सखेओ उत्तरमेयं पइच्छइ कुमारो । तुरयारूढो केणवि अवहरिओ वेरिणा मज्झ ॥११४॥
कत्थवि तदीयवत्ताऽवि हु नो पत्ता नरिंद अम्हेहिं । इय सिक्खविउं दूओ विसज्जिओ तेण वेगेण ॥११५॥
लेहं वाइय राया इय झायइ झीणहीणचित्तो सो । **संसारो हु असारो छारोकरडुव्व विन्नेओ** ॥११६॥
ठाणद्दुगेऽवि दुक्खं तिक्खं समकालमेव संपन्नं । सुयजामाउअलाभे किं किज्जइ कम्मवेरि पुरो ॥११७॥
सामा खामा काणा खुज्जा कइयावि कुच्छियकुरूवा । जाया सुया तमिक्खिय सुदुक्खया हेमसुन्दरिया ॥११८॥
रायावि विम्हियमणो तेहिं दोहिंपि सुंदरी पुट्ठा । तुह किमिह विसरिसाइं रूवाइं कुमारि दीसंति ॥११९॥
तीए उत्तं समए रहस्समेयं कहिस्समवियप्पं । जं नाणाविहरूवं पयासियं नणु नदीइव्व ॥१२०॥
तम्मि य चेव दिणे सा रत्तीए अंजणा अदिस्संगी । भमिया पइगेहमिमा पुरे जणुत्ति निसामंती ॥१२१॥
एगंमि गिहे भणियं सुयाइ विज्जाहरीए इय वयणं । वच्छे संखित्ततया पउणीकुरु सव्वसामग्गिं ॥१२२॥

मचित्तानंदणनंदणेण कयमेघनादनामेण । पन्नत्तिनामधिज्जा विज्जा संसाहिया अत्थि ॥१२३॥
तेण सिरिनाभिनंदणजत्ता अज्ज पवत्तिया रण्णे । अन्नं च कन्नयाजुयमवणिचरीखेयरीनामं ॥१२४॥
आणीयमत्थि लायन्नपुन्नसव्वंगुवंगकमणीयं । नट्टकलाकोसल्लाहारं सारं मणुयलोए ॥१२५॥
॥११५॥ तज्जुग्गं नेवत्थं भोयणभोगोवभोगमाईयं । तणयाएसेण मए नेतव्वं तत्थ वेगेण ॥१२६॥
तम्हा सज्जीकुरु पुत्ति अज्ज सामग्गियं समग्गमवि । तीए वुत्तं विहिया तओ इमा गयणमग्गेण ॥१२७॥
चलिया ललियायारा तओ दुयं मयणमंजरीवि मणे । कोऊहल्लमतुल्लं धारंती पट्ठिया तयणु ॥१२८॥
महियलमवलोयंती संपत्ता मंदिरे जिणिंदस्स । खेयरखयरीनरनारिसंकुलं सुरहिगंधवरं ॥१२९॥
दिट्ठं दिट्ठीइ इमाइ आइजिणनाहबिंबमुज्जलयं । सुकयसमुज्जलरासिरइयमिव वेहसा भुवणे ॥१३०॥
तो तीइ रयणचंदस्स मुक्खरूवेण कमलकुसुमेहिं । अब्भच्चिओ जिणिंदो समुग्गओ किरि दिणिंदुव्व ॥१३१॥
तो संथुणेउमेसो लग्गो मग्गोवएसओ सामि । तुममित्थ भव्ववग्गस्स धम्मवरमग्ग(लग्ग)स्स ॥१३२॥
निब्बंधवाण बंधू असहायाणं तुमं सहाओऽसि । निस्सामियाण सामी गामी निव्वाणनयरस्स ॥१३३॥ युग्मम् ॥ ॥१
इच्चाइ थविय देवं सेवं सारित्तु सव्वभावेण । पेच्छामंडवमागम्म विट्ठरम्मी समासीणो ॥१३४॥
इत्थंतरम्मि सारालंकारा रयणमेहला कुमरी । अमरीव रूवसोहग्गअग्गला नच्चिया तच्छ ॥१३५॥
तस्सच्चनच्चणकलाकोसल्लमणन्नतुल्लमिक्खित्ता । जाओ रंजियलोयणमणो जणो जिणहरे सयलो ॥१३६॥

तत्तो गिरुयरविणयाए लोयाण मणचमकारं । जणयंती नच्चं सच्चवेइ तिहिं मयणमंजरिया ॥१३७॥
तीएवि तहा विहिओ लोओ चित्तम्मि विलसिरपमोओ । जह पप्पुरओ अमरीउ किंकरीओव्व स गणेइ ॥१३८॥
नच्चित्ता जिणपुरओ पिउपासं मयणमंजरी पत्ता । तेणवि य सिणेहिल्लोयणेहिं दिट्ठा य पुट्ठा य ॥१३९॥
जणयाणंदणि नंदिणि भणसु तुमं अप्पणो चरियमखिलं । तो तीइ नियसरूवं सव्वमवि य साहियं पिउणो ॥१४०॥
मग्गेहे तुह सरिसा कन्ना का अत्थि तुज्झ नामेण । समए समए नवनववेसधरा नणु नडिव्व त्थि ॥१४१॥
सा का कहसु ममग्गे जह भवई सच्च मयणमंजरिया । तीए वुत्तं नाहं मुणामि तव्विलसियसरूवं ॥१४२॥
धुत्ता सत्ताणेगे धरंति रूवाइं विविहरूवाइं । कूडकवडाण तेसिं को पारं जाइ धीमंपि ॥१४३॥
खंनव्वं ताय तए महिकदुव्विलसियं महाराय । जमणापुच्छिय पियरो अप्पा परणाइओ य मए ॥१४४॥
रन्ना भणियं नंदिणि सुट्ठुकयं समयमप्पणो मुणिउं । सो संपइ तुज्झ पई कत्थ गओ दिव्वरूवमओ ॥१४५॥
तत्तो तीए दिट्ठो साहावियरूवधारओ भत्ता । तप्पाससमासीणा दिट्ठा तह रयणमेहलिया ॥१४६॥
जाणाविओ य जणओ ताय इमं पस्स पुत्तिभत्तारं । तो तेणाहूओ सो समागओ सविहमेयस्स ॥१४७॥
तेणुत्तमहो नणु रयणचंद कत्तो भवं तमाह इमो । परितो परिब्भमंतो सुवेलसेलस्स कज्जवसा ॥१४८॥
जिणभवणमागओऽहं इइ वुत्ते सुट्ठु हिट्ठतुट्ठेण । सिरिहेमचंदराएणाणीओ नियपुरं कुमरो ॥१४९॥
तो सकलत्तो रन्ना पासाए ठाविओ रयणचंदो । सो ताहिं समं भोए भुंजइ रंजइ मणं तासिं ॥१५०॥

पिउणा पुट्ठा अह मयणमंजरी कहसु अज्ज मह वच्छे । तुह रूवधरो को आसि मग्गिहे नव्वरूवधरो ॥१५१॥
कत्थ गओ सो एण्हिं वत्तामित्तंपि मज्झ अकहित्ता । विन्नायवइयरा सा पियरं पइ जंपइ कुमारी ॥१५२॥
॥११७॥ तुह जामाउयविलसियमेयं सव्वंपि ताय जाणाहि । तत्तो रंजियचित्तो राया तस्सत्तिमभिथुणइ ॥१५३॥
भूचारिणोऽवि एवं रूवपरावत्तकारिणी विज्जा । अहह कहं संपज्जइ परमेस सुलद्धपुन्नुदओ ॥१५४॥
तत्तो दुगुणियनेहं वहूवरं नरवरो अपासिसु । नियपुत्तिनिरवसेसं बहुमन्नइ रयणमेहलियं ॥१५५॥
अह हरिय मेघनाओ नाओ केणावि नेव विन्नाए । [1]तव्भज्जरयणमेहलमामुत्तवमुच्चसेलंमि ॥१५६॥
सुवसंतसेलनामे झरंतनिज्झरणनीरअभिरामे । अइउव्भडलडतदंगरूवलावन्नलुद्धमणो ॥१५७॥ युग्मम् ॥
संपन्नचित्तखेएण हेमचंदेण सव्वमपि विइयं । विज्जाबलेण तस्य य जणाविओ विलसियं कुमरो ॥१५८॥
ठाणा ठाणादागच्छमाणखयरे नरिंदनिद्देसा । पडिसेहित्तु कुमारो एगागी चल्लिओ [2]सासी ॥१५९॥
पत्तो वसंतमेले दिट्ठो धिट्ठो य तत्थ घणनाओ । पइसोएण रुयंती पलोइया **रयणमेहलिया** ॥१६०॥
रे खयर पस्सओहर सज्जीभव अज्ज जुज्झकज्जम्मि । इममक्कोसिय एवं तप्पासमुवागओ कुमरो ॥१६१॥
तत्तो लग्गमुदग्गं जुज्झं तेसिं परोप्परमसज्झं । निठ्ठुरपहारविहुरं तं किच्चा तक्खणा जिच्चा ॥१६२॥ ॥११
तस्साउहमप्पकरे अकरिंसु कुमाररयणचंदक्खो । नियघायवेयणत्तं सज्जीकुणइ सकरुणप्पा ॥१६३॥

१ आमुक्तवान् २ स आसीत्.

उपदेश-

तं खयरमोसहीए संरोहणीयाइ मीलणबलेणं । सव्वत्थुवयारपरा धरायले उत्तमा पुरिसा ॥१६४॥
तत्तो रंजियचित्तो खयरो आणित्तु अत्तणो भइणिं । पप्फुल्लकमलनयणिं परिणाविय रयणमंजरियं ॥१६५॥
अप्पइ पमोयपुलयंकियकाओ रयणचंदकुमरस्स । अइपुकलं धणोहं लक्खगकोडीइ परिसंखं ॥१६६॥
॥११८॥ तो संपत्तकलत्तो जुत्तो खयरेहिं अणुचरेहिं च । स समागओ नियगिहं ससिणेहं राइणा दिट्ठो ॥१६७॥
भज्जातियसंजुत्तो सुहेण कालं गमेइ तत्थेसो । रयणत्तयसंजुत्तो मुणिव्व मगमाणनिम्मुक्को ॥१६८॥
अह जोहारिय रायं कुमरो विन्नवइ देव गच्छामि । पियरो मव्विरहदुहग्गिदूमिया तत्थ वट्टंति ॥१६९॥
जं तुब्भेहिँ अदिन्ना कन्ना एसा मए नियमईए । उव्वाहिया मणहिया तं खमियव्वं खु निस्सेसं ॥१७०॥
सव्वंसहुव्व सव्वंसहा महामाणवा इहं हुंति । रयणायरेण रयणा पत्थरया वि हु सुसंगहिया ॥१७१॥
अइउब्भडवियडअदब्भधयवड(एहिं)कओरुसिरसोहं । रयणुज्जलरुप्पसुवन्नसुंदरं सुकयकयसोहं ॥१७२॥
दिन्नं विमाणमेयस्स भासुरं हेमचंदभूवइणा । तत्थारुहित्तु चलिओ कुमरवरो वोममग्गेण ॥१७३॥ युग्मम् ॥
विज्जाहरेहिँ खयरीहिँ परिवुडो गिरिपुराइं पिच्छंतो । पत्तो खणेण पुरविजयवद्धणे जणयगेहम्मि ॥१७४॥
माइपियराण मिलिओ कलिओ भज्जातिएण रम्मेण । पणमिय तच्चरणेसुं विन्नवई वइयरं निययं ॥१७५॥
रूवसिरिसुरवहूओ वहुओ लग्गाओ सासुयाण पए । आसीवयणेहिँ सुपेसलेहिँ अभिनंदियाओ य ॥१७६॥
पुत्तंमि तम्मि सकलत्तयम्मि दिट्ठम्मि दिट्ठिजुयलेण । हरिसुल्लसिरसरीरा मायापियरो लहुं जाया ॥१७७॥

सम्माणिओ य बहुमाणिओ य सव्वोऽवि सयणजणवग्गो । वत्थालंकाराईपयाणओ परमविणएण ॥१७८॥
अह बहुभोगसमिद्धिं समणुहवंतस्स तस्स कुमरस्स । जाया तणया विणयालंकियतणुणो अइसुरूवा ॥१७९॥
वद्धावणयं विहियं भूवइणा विजयवद्धणपुरम्मि । अप्पाणं धन्नतमं अब्भहियं मन्नमाणेण ॥१८०॥
॥११९॥ विणिवेसित्तु कुमारं कयावि रज्जम्मि कोससज्झम्मि । धम्मट्ठाणेसु तहेव हीणदीणेसु नियदव्वं ॥१८१॥
दमघोसायरियाणं तप्पुन्नप्पेरणागयाण वणे । पासे पव्वज्जसिरिं पव्वन्नओ पुन्नउदएण ॥१८२॥ युग्मम् ॥
चरकालं पालिय संजमं च पक्खालियाहमलपूरं । तियसालयमालयसयणमोहरहिओ समणुपत्तो ॥१८३॥
मणुइंदरयणचंदो चंदोव्व समुज्जलो जसकरेहिं । आणंदइ [1]चउरचउरचक्कमरिचकदुज्जेओ ॥१८४॥
पालइ सज्जणलोयं टालइ [2]रिउवग्गसज्झसमसेसं । बहुमन्नइ धम्मियजणमणग्गलं रज्जमणुकलइ ॥१८५॥
पुरिसेणगेण स [3]अन्नयन्नदिवसे समेच्च विन्नत्तो । देव दयासुंदरनामयम्मि समणुन्नउज्जाणे ॥१८६॥
संपत्तो सरामंदमोदहरियालिसजलजलवाहो । दमघोसमुणिंदो चंदो इव सोमलेसागो ॥१८७॥
अप्पित्तु पारितोसियमिमस्स दाणं [4]धणंसुयपहाणं । अह एस सयं चलिओ वंदणवडियाइ सुगुरुणं ॥१८८॥ ॥११९॥
तिपयाहिणं करित्ता वंदित्ता सग्गुरूण पयकमलं । समुचियभूमिपएसे आसीणो विणयपणयसिरो ॥१८९॥
अन्नोऽवि जणो धन्नो तत्थ निसन्नो सया सुकयपुन्नो । पारद्धा धम्मकहा सुहासमाणाइ वाणीए ॥१९०॥

---

१ चतुरचकोरचक्रम्. २ रिपुवर्गजं भयम्. ३ अन्यदाऽन्यदिवसे. ४ घनांशुकप्रधानम्.

भो भो भव्वा सव्वायरेण धम्मम्मि कुणह उज्जोयं । उज्जोयं पावमहातिमिरससंभारसंहरणे ॥१९१॥
सम्मं सम्मत्ताऽऽउं धरेह दुद्धरसरं बुद्धिपुन्न ! जह लहु सिद्धिपुरीए लहेह वासं निरायासं ॥१९२॥
निम्मायव्वं निम्मायचेयसा चियवंदणं च तिकालं । तप्पहूपूयापुव्वयमउव्वसिवसुक्खलाभकरं ॥१९३॥
पूयापरिणामोऽवि हु भवइ भवावारपारतरणाय । हरणाय दुहसयाणं मपज्जइ सुक्खकरणाय ॥१९४॥
जो जयपहुणो पयपूयणम्मि निरओ भवाउ तह विरओ । अरओ विसयसुहम्मी अरओ सो लहइ परमपयं ॥१९५॥
तह पंचनमुक्कारो सारो संसारसायरे घोरे । रयणोव्व अइउदारो धरियव्वो बहुपयत्तेण ॥१९६॥
एसु चिय दुहसंचयहरणो सरणो अणंतसत्ताणं । भवकूवसमुद्धरणो मरणोवद्दवहरो होइ ॥१९७॥
जो झाएइ तिसंझं वियतियचउवारमट्ठसयमहवा । सो रज्जरिद्धिसिद्धीलद्धिसमिद्धी लहइ धन्नो ॥१९८॥
सव्वस्सुममुज्झित्ता बुज्झित्ता परमतत्तभूयमिणं । मरणखणे जो सरई अणुसरई सिवसिरिं सो उ ॥१९९॥
जो न लहइ मंतमिणं हीणो दीणो दरिद्दि(इ)ओ सो उ । रोगी सोगी जायइ दोहग्गी भमइ भूरिभवं ॥२००॥
गुरुवयणमिणं सुच्चा बहुओ लोओ सुसज्जियपमोओ । जिणपूयणिक्कताणो जाओ परिसिद्धिझाणपरो ॥२०१॥
अह पुच्छइ सच्छमई राया समए मए पुरा पुन्नं । किं कयमेरिसरिद्धीएँ भायणं जं जए जाओ ॥२०२॥
आह गुरू चउनाणी पुव्वभवे रायगिहपुरे आसि । अइआरंभी तह भद्दओ य मालिओ रायसेहरओ ॥२०३॥
सो अन्नया समेओ घेत्तुं कुसुमाइं जिणहरस्संतो । ण्हवणूसववेलाए सावयजणविहियमेलाए ॥२०४॥

पियदंसणमवलोइय जिणबिंबं तस्स भत्ति उल्लासिया । तो सुरहिपुप्फमालइमालाए महइ जिणनाहं ॥२०५॥
बहुभत्तीए नमिओ गमिओ पावोदओ पुरा विहिओ । बहुविहभोगसमिद्धी समज्जिया रज्जसंपत्ती ॥२०६॥
संपत्त कालधम्मं पुत्तसं रयणसेहरनिवस्स पत्तो पुन्नुदएणं अभंगसोहग्गसंसग्गं ॥२०७॥
जिणपूयाइ जमज्जियमइपुन्नमउव्वहिमगिरिसरिच्छं । तं संपइ तुह नरवर इत्थवि धम्मे धिई जाया ॥२०८॥
पाविता अमरत्तं लहित्तु तत्तो नरिंदतणयत्तं । संजममाराहित्ता गंता तुममक्खयं ठाणं ॥ ॥२०९॥
इय सोचा नियवित्तं रंजियचित्तो नरेसरो जाओ । अन्नायपहविरत्तो धम्मथिरत्तं चिरं पत्तो ॥२१०॥
सूरिं नमित्तु नियगिहमागच्च सुसम्ममग्गबद्धमई । सावयधम्मं सम्मं जहुत्तविहिणा अपालिंसु ॥२११॥
इय रयणचंदचरियं जिणिंदपूओवरिं निसामित्ता । कुणह जिणच्चणमणहं अणुहवह जहा सिवसुहाइं ॥२१२॥

॥ इति श्रीजिनार्चायां श्रीरत्नचन्द्रदृष्टान्तः ॥

अथ क्रमागतं प्रमादपरिहारोपदेशमाह—

**दुक्खं सुतिक्खं नरए सहित्ता, पंचिंदियत्तं पुण जो लहित्ता ।**
**पमायसेवाइ गमिज्ज कालं, सो लंघिही नो गुरुमोहजालं ॥१३॥**

व्याख्या—दुक्खमिति दुःखितानि खानि इन्द्रियाणि यत्र तत् दुःखं, सुतरामतिशयेन तीक्ष्णं कंटकवद्दुःसहं नरान् कायन्तीति नरका जातावेकवचनं, सहित्वा विषह्य, सप्तसु श्वभ्रेषु दुःखान्यनुभूय ततः क्रमेणैकेन्द्रियादिजातिषु परिभ्रम्य

॥१२१॥

ततश्च द्वित्रिचतुरिन्द्रियेषु, ततोऽपि पञ्चेन्द्रियतिर्यक्षु, ततश्च प्रभूतसुकृताभ्युदयेन पञ्चाक्षमानुष्यभवमासाद्य ततोऽपि श्रामण्यमुपचर्यैवमुत्तरोत्तरपदवीमुर्वीमारुह्य यः पुनः पुमान् [1]प्रमादसेवया गमयेत् कालं स दुर्मतिः कथं मोहजालं लङ्घयिष्यतीति काव्यार्थः । यतिना विशेषतः प्रमादसेविना न भाव्यं । अत्रार्थे मथुरामङ्गवाचार्यज्ञातमुत्कीर्त्यते–

॥ मथुरामङ्ग्वाचार्यकथा ॥

अत्रास्ते मथुरा नाम पुरी पृथुतरा श्रिया । राजते मन्थरो गत्या यत्र योषिज्जनो घनः ॥१॥
यस्यामश्यामवदना न हि शून्यपदाश्रिताः । धनिनोऽचपलाश्चित्रं घनायन्तेऽस्ततप्तयः ॥२॥
तत्राचार्यः साधुचर्यावर्यः पर्यायशालिनः । मथुरामङ्गुनामाऽऽगाद्विहरन् भूमिमण्डलम् ॥३॥
अवेत्य क्षेत्रमास्थाभृत्सश्रद्धश्राद्धबन्धुरम् । तस्थिवान् सपरीवारो विहारोद्विग्नमानसः ॥४॥
साज्यैर्भोज्यै रसप्राज्यैः पक्वान्नैश्च सदन्नकैः । यथा यथाऽऽस्तिकव्रातैः पोष्यते भक्तिरागतः ॥५॥
तथा तथा प्रसादाम्भःपूरैरम्भोधिवद्भृतः। मानमायोर्मिसंकीर्णः क्रोधोद्यद्वडवानलः ॥६॥
वसतिर्वासयोग्येयं शीतवातातपापहा । प्राप्यते वस्त्रपात्रादि सुखेनास्तिकवर्गतः ॥७॥
लभ्यन्ते दुग्धदध्यादिमध्वाज्यादीनि सादरम् । रसर्द्धिसातसंज्ञैः स गौरवैः सुतरां श्रितः ॥८॥



---

१ स प्रमादोऽष्टधा–पमाओ उ जिणिदहिं भणिओ अट्ठभेयओ । अन्नाणं संसओ चेव मिच्छानाणं तहेव य । १ । रागो दोसो मइब्भंसो धम्मंमि य अणायरो । जोगाणं दुप्पणीहाणं अट्ठहा वज्जियव्वओ । २ ।

किमथ व्यर्थमात्मीयवपुःक्लेशैर्दिवानिशम् । आत्मासी क्रियते दुःखी विहारोत्थश्रमैर्भृशम् ॥९॥
स्थानस्यस्यैव मे श्रेय इत्यवेत्य निजे हृदि । आर्यमङ्गुः सदैवास्थात्तत्रैव प्रतिबन्धभाक् ॥१०॥
अनालोच्यापि पर्यन्ते तत्प्रमादविचेष्टितम् । विपद्य व्यन्तरो जज्ञे पुरीनिर्धमनाध्वनि ॥११॥
यज्ञमूर्त्तेरधिष्ठाता ही प्रमादोदयो महान् । तादृग् युगप्रधानोऽपि येनेत्थं हि विडम्ब्यते ॥१२॥
॥१२३॥ विभङ्गज्ञानतो ज्ञात्वा प्राग्भवोदन्तमात्मनः । पश्चात्तापपरः सूरिर्निनिन्द स्वीयचेष्टितम् ॥१३॥
हा मया गृहमुत्सृज्य प्रपद्यापि जिनव्रतम् । रसज्ञालौल्यमाचर्य प्रमादवशवर्तिना ॥१४॥
नाराद्धः सद्धिया धर्मोऽशर्मोदयविभेदकः । हहा कथं भविष्यामि साम्प्रतं दुर्गति गतः ॥१५॥
चिन्तयित्वेति चेतोऽन्तर्यक्षो यक्षोऽसिलाश्रयम् । यक्षबिम्बास्यतो दीर्घां निष्कास्य रसनां स्थितः ॥१६॥
बहिर्यातां यतीनां स दर्शयत्यनुवासरम् । तं तादृशमवेक्ष्यैतं प्राहुर्विस्मितमानसाः ॥१७॥
योऽत्रास्ते राक्षसो वान्यो यक्षो वा व्यन्तरः सुरः । स ब्रवीतु किमेवं स्वामुल्लालयसि(ति) लोलिकाम् ॥१८॥
ततः स प्राह दुःखार्त्त आर्यमङ्गुरहं गुरुः । भवतामीदृशावस्थामाप्तोऽस्मि किमहं क्रिये ॥१९॥ ॥१२
प्रमत्ततामहादोषाद्रसज्ञारसलालसः । गौरवत्रिकदुर्व्यापैराप्तोऽहं दुर्दशामिमाम् ॥२०॥
जिह्वां संदर्शयन्नस्मि भवद्भ्योऽहमनारतम् सर्वोऽप्येतत्कृतो दोषः पोस्फुरीति महीस्पृशाम् ॥२१॥
युष्माकमपि चेत्कार्यमार्याः परभवश्रिया । दुरापं तद्व्रतं प्राप्य पापव्यापापहारकम् ॥२२॥

अप्रमत्तैर्विहर्त्तव्यमेकत्र प्रतिबन्धिभि: । न भाव्यं भावुकस्याशा वर्त्तते चेदसंशयम् ।।२३।।
अहं पुनरिदानीं भो: किं करोमि क्व यामि च । स्वकृत्तं झूरयन्नस्मि देवदौर्गत्यदूषित: ।।२४।।
उदित्वैतत्पुरस्तेषामदृश्योऽभूत्स गुह्यक: । दुर्दशामीदृशीमाप हृदि ज्ञानधरोऽपि स: ।।२५।।
तदन्यै: साधुभिर्धन्यैस्तत्त्वार्थज्ञैर्विशेषत: । न दातव्य: प्रमादस्यावकाशो लेशमात्रत: ।।२६।।

।। इति प्रमादपरिहारे दृष्टान्त: ।।

अथ साधुभि: श्राद्धैश्च प्रमादपरित्यागकृतोद्योगैर्धर्मोद्यममनोरथा: प्रत्यहमनुष्ठेया:, इत्येतदुपरि काव्यचतुष्कमन्यान्यधर्मकृत्याचरणप्ररूपणाप्रवणमाह—

**तवोवहाणाइ करित्तु पुव्वं, कया गुरूणं च पणामपुव्वं ।**
**सुत्तं च अत्थं महुरस्सरेणं, अहं पढिस्सं महयायरेणं ।।१४।।**

**व्याख्या**—तपांस्याचाराङ्गोपाङ्गऋषिभाषितप्रभृतिसूत्रसत्कानि सिद्धान्तोक्तानि, उपधानानि च श्रीमहानिशीथसूत्रप्रोक्तानि कृत्वा पूर्वं दीक्षाग्रहणानन्तरं कदा गुरूणां च प्रणामपूर्वकं वाचनावसरे वन्दनकक्रियामासूत्र्य, सूत्रं, च: पुनरर्थं टीकाभाष्यनिर्युक्तिचूर्णिप्रभृतिकं मधुरस्वरेणाहं पठिष्ये महता आदरेण प्रयत्नेनेत्यर्थ: । यत उक्तं श्रीजीतकल्पे—
"कालक्कमेण पत्तं सवच्छरमाइणा उ जं जंमि । तं तम्मि चेव धीरो वाइज्जा सो य कालो य ।।१।।
तिवरिसपरियायस्स उ आयारपकप्पनाममज्झयणं । चउवरिसस्स य सम्मं सूयगडं नाम अंगंति ।।२।।

सकप्पव्ववहारो संवच्छरपणगदिक्खियस्सेव । ठाणं समवाओऽवि य अंगे ते अट्ठवासस्स ॥३॥
दसवासस्स विवाहा इक्कारसवासयस्स य इमे उ । खुड्डियविमाणमाई अज्झयणा पंच नायव्वा ॥४॥
बारसवासस्स तहा आसीविसभावणं जिणा बिंति । पन्नरसवासगस्स य दिट्ठीविसभावणं तह य ॥५॥
सोलसवासाईसु य इक्कुत्तरवड्ढिएसु जहसंखं । चारणभावणमहसुमिणभावणातेयगनिसग्गे ॥६॥
एगूणवीसगस्स य दिट्ठीवाओ दुवालसममंगं । संपुन्नवीसवरिसो अणुवाई सव्वसुत्तस्स ॥७॥"

श्रीमहानिशीथेऽप्युक्तं अकालाविनयाबहुमानाद्यष्टविधज्ञानकुशीलानां मध्येऽनुपधानकुशीलस्य महादोषत्वं, यथा— "अट्ठस(न्हं)पि एयाणं गोयमा जे केई अणुवहाणेणं सुपसत्थं नाणमहीयंति अज्झावयंते वा समणुजाणंति तेणं महापावकम्मा महासुपसत्थनाणस्सासायणं पकुव्वंति । से भयवं जइ एवं ता किं पंचमंगलस्स णं उवहाणं कायव्वं । गोयमा पढमं नाणं तओ दया, एयाणं सव्वजगजीवपाणभूयसत्ताणं अत्तसमदरिसित्तं जाव सव्वुत्तमसोक्खंति ता सव्वं मा व अन्नाणाओ पव्वतिज्ज जाव गोयमा इमाए विहीए पंचमंगलस्स णं विणओवहाणं कायव्वं" इत्यादि । एतावतोपधानतपःकरणपूर्वकं सिद्धान्तार्थपठनपाठनं युक्तं, अन्यथा तु महत्याशातनाऽभिहिता । "एतद्विधिना कदाहं सूत्रपाठी स्यां ?" इति मनोरथः श्राद्धसाधुभिर्विधातव्य इति तात्पर्यार्थः । श्रीउत्तराध्ययनेष्वप्युक्तं—"वसे गुरुकुले निच्चं जोगवं उवहाणवं । पियं करे पियं वाई से सिक्खं लद्धुमरिहई ॥१॥" इत्यादि ।

अग्रेतनकाव्येऽपि मनोरथानाह—

॥१२५॥

 



कम्मट्ठवाहीहरणोसहाणि, सामाइयावस्सयपोसहाणि ।
सिद्धंतपसत्तविहाणपुव्वं, अहं करिस्सं विणयाइ सव्वं ॥१५॥

व्याख्या--कर्माष्टकमेव व्याधिस्तस्य हरणे भेषजोपमानि । सामायिकं च [1]आवश्यकशब्देन चतुर्विंशतिस्तववन्दन-प्रतिक्रमणप्रत्याख्यानकायोत्सर्गपौषधानि । कदा सिद्धान्तप्रशस्तविधानपूर्वं सूत्रोक्तविधिमुख्यतया । अहमेतानि षडावश्यकानि करिष्ये[2] ? अथ चाग्रेतनकाव्यवक्ष्यमाणविनयदशकवैयावृत्यादि सर्वं धर्मकृत्यं कदाऽहमाचरिष्ये ? इत्यपि मनोऽभिलाषः श्रेयस्काम्यया कर्त्तव्य एवेति भावार्थः ॥१५॥

भूयोऽपि धर्मकृत्येच्छामाचष्टे---

आणं गुरूणं सिरसा वहिस्सं, सुत्तत्थसिक्खं विउलं लहिस्सं ।
कोहं विरोहं सयलं चइस्सं, कया अहं मद्दवमायरिस्सं ॥१६॥

व्याख्या--आज्ञामादेशं गुरूणां धर्मदातॄणां शिरसा शीर्षेण वहिष्ये । एतावता गुरुपारतन्त्र्यमुक्तं । अथ च सूत्रार्थयोः शिक्षां विपुलां गुरुमुखाल्लप्स्ये । अथ च क्रोधं विरोधं च सकलं त्यक्ष्यामि । कदाऽहं मृदोर्भावो मार्दवं सौकुमार्यमाचरिष्यामीति शुभाभिलाषः प्रगुणनीयः ॥१६॥ 

१ (सामायिकं च) चारित्रेष्वावश्यकेष्वपि च मुख्यं, तेनादावुपन्यस्तं । २ केशोत्तारणमल्पमल्पमशनं निर्व्यञ्जनं भोजनं, निद्रावर्जनमहि मज्जनविधित्यागश्च भोगश्च नो । पानं संस्कृतपाथसामविरतं येषामिहेत्थं क्रिया, तेषां कर्ममहामय स्फुटतरं पुष्टोऽपि हि क्षीयते ।

अथ दर्शनमूलाणुव्रतपालनाभिलाषमुल्लासयन्नाह–

**सम्मत्तमूलाणि अणुव्वयाणि, अहं धरिस्सामि सुहावहाणि ।**
**तओ पुणो पंचमहव्वयाणं, भरं वहिस्सामि सुदुव्वहाणं ॥१७॥**

व्याख्या–सम्यक् तत्त्वावगमः सम्यक्त्वं क्षायोपशमिकौपशमिकसास्वादनक्षायिकवेदकलक्षणं पञ्चधा, तन्मूलानि-महाव्रतापेक्षयाऽणूनि सूक्ष्माणि व्रतानि प्राणातिपातविरमणादीन्यग्रे वक्ष्यमाणानि सदृष्टान्तानि कदाऽहं धरिष्यामि ? । सुखावहानि सुखकारकाणि । ततः पुनः । पंचमहाव्रतानां साध्वनुष्ठेयानां भरं भारं वहिष्ये सुदुर्वहाणां सुतरामतिशयेन दुर्धराणां धीरानुचीर्णानामिति काव्यार्थः । यथा **श्रीस्थानाङ्गेऽप्युक्तं**–"तिहिं ठाणेहिं समणे निग्गंथे महानिज्जरे महापज्जवसाणे भवइ । तं जहा–कया णं अहं अप्पं बहुं वा सुयं अहिज्जामि ? कया णमहमेगल्लविहारपडिमं पडिवज्जिस्सामि ? कया णमहमपच्छिममारणंतियसंलेहणाज्झूसणाझूसिए भत्तपाणपडियाइक्खिए पाओवगए कालमणवकंखमाणे विहरिस्सामि ? एवं समणस्स मणसा वयसा कायसा पागडमाणे समणे निग्गंथे महानिज्जरे महापज्जवसाणे भवइ । तिहिं ठाणेहिं समणोवासगे महानिज्जरे महानिज्जवसाणे भवइ । तं जहा–कया णमहमप्पं वा बहुं वा परिग्गहं परिचइस्सामि ? कया णमहं मुंडे भवित्ता अगाराओ अणगारियं पव्वइस्सामि ? कया णमहमपच्छिममारणंतियसंलेहणाज्झूसणाझूसिए कालं अणवकंखमाणे विहरिस्सामि ? एवं समणसा सवयसा सकायसा जागरमाणे समणोवासए महानिज्जरे महापज्जवसाणे भवइ" । तथा **श्रीहेमसूरिणाऽप्युक्तं–"त्यक्तसङ्गो जीर्णवासा मलक्लिन्नकलेवरः । भजन्माधुकरीं वृत्तिं मुनिचर्यां कदा श्रये ? ॥१॥"**

अथ प्रारब्धमेव प्रस्तूयते । उपसंहारकाव्यमाह–

**एवं कुणंताण मणोरहाणि, धम्मस्स निव्वाणपहे रहाणि ।**
**पुन्नज्जणं होइ सुसावयाणं, साहूण वा तत्तविसारयाणं ॥१८॥**

**व्याख्या**–एवमुक्तरीत्या कुर्वाणानां मनोरथान् मनोभिलाषान् मनोरथशब्दस्य प्राकृतत्वेऽपि नपुंसकनिर्देशः । कस्येति साकाङ्क्षं पदं तदर्थं धर्मस्येति पदं । किंभूतान् मनोरथान् ? निर्वाणस्य पन्था निर्वाणपथस्तत्र रथप्रायान् । यथा रथारूढः पुमान् सुखेनाध्वानमुल्लङ्घ्य पारं प्रयाति तथा शुभमनोरथैरपि संसृतिपारः प्राप्यते । अथ तत्करणे किं फलं तदाह–'**पुन्नज्जणमिति**' पुण्यस्यार्जनं पुण्यार्जनं भवति । सुश्रावकाणां साधूनां वा । किंभूतानामुभयेषां ? तत्त्वेषु जीवाजीवादिषु विशारदाः प्राज्ञास्तेषां तथाभूतानामिति काव्यार्थः । अथ सुमनोरथोपरि दृष्टान्तः प्रथ्यते–

॥ **सिद्धदृष्टान्तः** ॥

अत्थित्थ सुपसत्था सुत्थावत्था पहिट्ठजणसत्था । विलसंतरयणपगरा मगरायरभूमिसारिच्छा ॥१॥
दीसंतसज्जलोहा संतोसियपासियंगगोविंदा । पसरंतसत्तरंगा अचंतचरंतवरपोआ ॥२॥
तगरा नामेण पुरी सुरीतिसंपत्तनागरनरोहा । जोहाइन्ननरिंदा नंदियलोया विगयसोया ॥३॥
आसी तत्थ निवासी भासी महुरक्खराण वयणाण। सुपभूयकंचणवसू वसू सुविक्खायसिरिसेट्ठी ॥४॥
जाया तस्स सविणया **सेणो सिद्धो** य नामओ तणया। धम्मम्मि साहिलासा सपिवासा परवयारम्मि ॥५॥

तत्थन्नया कयाऽवि हु संपत्ता **सीलचंदसूरिंदा** । भुवणम्मि नणु दिणिंदा इव जे भव्वंबुरुहबोहे ॥६॥
पडिवन्नो तप्पासे पासे मोहस्स छिंदिऊण लहुं । **सेणो** सुणित्तु धम्मं दिक्खं कम्मारिपडिवक्खं ॥७॥
वुड्ढवयअणयजणणीपालणपउणो गिहम्मि निवसेइ । **सिद्धो** सुविसुद्धमई अईव इय चिंतिउं लग्गो ॥८॥
कइया उज्झियगिहवासपासमुम्मूलिऊण विसयाणं । गिण्हिस्समहं संजममसंजमं दूरमुज्झंतो ॥९॥
परिचत्तमित्तसंगो अंगोवंगाइं गोविऊण दढं । कुम्मुव्व सुहज्झणुज्जलजलमज्झम्मि चिट्ठिस्सं ॥१०॥
कइयाऽहं सुगुरूणं नूणं विणयं समाइरिस्सामि । पयपंकयभमरतुलं सेवारसिओ धरंतो य ॥११॥
कइया सुगुरूहिं समं रमंतओ संजमम्मि आरामे । नाणाविहदेसेसुं अप्पडिबद्धो चरिस्सामि ? ॥१२॥
कइया घरवावारं दुव्वारं वारिऊण नीसेसं । निस्सेयसपुरमग्गं पडिवज्जिस्सामि निरवज्जं ॥१३॥
होही दीहो सो कोऽवि कोविओ दुज्जणेहिं दुट्ठगिरा । उवसमरसनिम्मग्गो रोसकसायं चइस्सामि ॥१४॥
काऊणुवहाणाइं महानिहाणाइं पुन्नरयणाणं । कइया अंगोवंगाइसुत्तमहयं पढिस्सामि ॥१५॥
कइयाहमप्पदेहे निरीहभावं धरित्तु धीरमणो । उवसग्गवग्गमसहं सहिस्समुच्छाहमावन्नो ॥१६॥ ॥१२९॥
समिईउ पंच तहा गुत्तीउ तिन्नि महव्वए पंच । सीलंगाणट्ठारससहस्साइँ कया वहिस्सामि ॥१७॥
कइया गहित्तु चरणं चरणं सुगुरूण सेवमाणोऽहं । गामागरनगरेसुं अप्पडिबद्धो चरिस्सामि ? ॥१८॥
कइया गयावराहो नाहो होऊण सव्वसत्ताणं । पत्ताण पत्तरेहो देहोवगरणसुनिम्मुच्छो ॥१९॥

वेरग्गरंगवासियचित्तो सत्तोवयाररंगिल्लो । सिवरमणिरमणउक्कंठिओ य अहयं भविस्सामि ? ॥२०॥ युग्मम् ॥
इच्चाइसुहमणोरहमालामालंबिउं सयाकालं । कालं अइक्कमेई सिद्धो सुपसिद्धमाहप्पो ॥२१॥
अह अन्नया समेओ सेणमुणी सिद्धभायरं दट्ठुं । तत्थ पुरे पोरगणाइन्ने धन्नेहिं पडिपुन्ने ॥२२॥
सेणो सयं पमाई माई वाई अलीयवयणाणं । वट्टइ न तहा सम्मं चरणे सरणे सपुन्नाणं ॥२३॥
ते दोऽवि एगठाणे मिलिया ललियाइ महुरवाणीए । अन्नुन्नं उवएसं दिंता वट्टंति जा तत्थ ॥२४॥
अह दिव्वजोगवसओ ताणुवरिं निवडिओ असणिघाओ । तिव्वग्घायवसेणं खणेण निच्चेयणीभूया ॥२५॥
तद्दुक्खदुक्खियमणो जाओ परियणगणो समग्गोऽवि । किमकंडे हा जायं दुवेऽवि पंचत्तमावन्ना ॥२६॥
तत्थन्नया समेओ गेओ निम्मलगुणेहिं देवाणं । केवलनाणप्पवरो जुगंधरो नाम सुमहप्पा ॥२७॥
तप्पयपणमणहेउं सिट्ठि वसुनामओ समायाओ । सुणिओ धम्मुवएसो पावपवेसोवसमहेऊ ॥२८॥
अह सिट्ठिणा मुणिंदो पुट्ठो हिट्ठेण सुयगइविसेसं । सोहम्मकप्पगमणं कहियं सिद्धस्स गिहवइणो ॥२९॥
सेणो महिड्ढिवंतरसुरेसु अवयारमासु संपत्तो । किं कारणमित्थ पहू ? गईविसेसो जमेरिसओ ॥३०॥
सिद्धो सुद्धसहावो आसी निवसंतओऽवि घरवासे । जइधम्मधरणरसिओ तिसिओ तह समयमग्गंमि ॥३१॥
सेणो मुणी वि जाओ सपमाओ सव्वया सिढिलचित्तो । न हु मुणिधम्मे रम्मे रइमावन्नो मणागमवि ॥३२॥
एएण हेउणा तेसिमासि एयारिसो गइविसेसो । एगे सामन्नं पि हु पत्ता पत्ता न वेरग्गं ॥३३॥

अवरे घरे वि संता संता दंता जिइंदिया हुंति । तेसिं अप्पिड्ढिमहिड्ढिनिज्जराणं गई भणिया ॥३४॥
ते धन्ना कयपुन्ना गिहिणोऽवि हु जे धरंति वेरग्गं । मुणिणोऽवि सप्पमाया न साहुरेहावहा हुंति ॥३५॥
एयं निसम्म सम्मं गिहवासविरत्तया जणा जाया । नाणी जुगंधरोऽवि हु विहरइ अन्नत्थ महिवलए ॥३६॥
एवं ये सुमनोरथान् शिवपुरीसंप्रापणे सद्रथान्, कुर्वन्तीह गृहस्थिता अपि रताः सद्धर्मकर्मोद्यमे ।
ते शुद्धस्थिरमेधसः सुमनसः श्रेयःसुखं शाश्वतं, सेवन्ते खलु सिद्धवत्तदितरे स्युः संसृतौ भ्रामकाः ॥३७॥

॥ इति सुमनोरथोपरिसिद्धदृष्टान्तः ॥

अथोत्सूत्रपदोद्भावने महादोषसंभवमाह-

**हवंति जे सुत्तविरुद्धभासगा, न ते वरं सुट्ठुवि कट्ठकारगा ॥**
**सच्छंदचारी समए परूविया, तद्दंसणिच्छावि अईव पाविया ॥१९॥**

व्याख्या-भवन्ति ये सूत्रविरुद्धभाषकाः सूत्रं सिद्धान्तस्तस्माद्विरुद्धं विपर्यस्तं भाषन्ते ते तथाविधा उत्सूत्रवक्तारो नरास्ते न वरं न श्रेष्ठाः । किंभूतास्ते ? सुष्ठु सुतरां कष्टसोढारोऽपि शीतातपवातक्षुत्पिपासाद्यतनुतनुक्लेशकारका अपि सन्तः । ते किंभूता ज्ञेयाः ? स्वच्छन्दचारिणः स्वेच्छाविहर्त्तारः समये सूत्रे प्ररूपिताः प्रोक्ताः । अथ च तद्दर्शनेच्छापि तन्मुखावेक्षणमनीषापि कृता सती अतीव पापैव पापिका भृशं दुष्कृतोत्पादिकेति काव्यार्थः । यत उक्तं श्रीबृहत्कल्पे-

उपदेश-

"उस्सुत्तभासगा जे ते दुक्करकारगा वि सच्छंदा । ताणं न दंसणं पि हु कप्पइ कप्पे जओ भणियं ॥१॥"
"जे जिणवयणुत्तिन्नं वयणं भासंति अहव मन्नंति । सम्मद्दिट्ठीणं तद्दंसणं पि संसारबुड्ढिकरं ॥१॥"
अत्रार्थेऽनार्य(र्थं)स्फुरच्चातुर्यसावद्याचार्यस्वरूपं प्ररूप्यते—

॥१३२॥

॥ सावद्याचार्यकथा ॥

पवज्जं निरवज्जं सज्जिय जो भासई य सावज्जं । उस्सुत्तमणुवउत्तो सो दुग्गइभायणं भवइ ॥१॥
जह सावज्जायरिओ तरिओऽवि हु रुद्दभवसमुद्दं तु । पुणरवि भवम्मि पडिओ महानिसीहम्मि वागरिओ ॥२॥
सिरिवीरेण गोयमपुरओ तस्सेव पंचमज्झयणं । तह तस्सरूवमहयं मंदमई वि हु कहिस्सामि ॥३॥ युग्मम् ॥
किं तेणं पावियमेरिसम्मि पुट्ठम्मि सामिओ वीरो । गोयममुद्दिस्सेमं पयडत्थं कहिउमाढत्तो ॥४॥
चउवीसियाइ एयाइ आनि अइक्कंतणंतकालम्मि । अन्ना किर चउवीसी सीसीकयदेवमणुओहा ॥५॥
तीए चउवीसइमो जाओ धम्मरिसिनामतित्थेसो । वन्नेण य माणेणं मज्झ सरिच्छो पसंतच्छो ॥६॥
तित्थे तस्स य जाया अच्छेरा सत्त चित्तचित्तयरा । अह सिद्धिसुहं पत्ते चरमजिणे पणयदेवगणे ॥७॥
जायमसंजयपूआनामं भुवि विप्फुरंतमच्छेरं । बहुयं लोयसमूहं जाणित्तु असाहुजणभत्तं ॥८॥
अह तेणं कालेणं तेणं समएणमासि एरिसयं । नामायरिया बहुसड्ढगेहि पडिगाहिउं दव्वं ॥९॥
ते कारविंति चेईहराइं सुमणोहराइं नयरम्मि । नीयावासम्मि रया दयाविहूणा अजियकरणा ॥१०॥ युग्मम् ॥
सिढिलीकयचारित्ता रित्ता तवणियमसच्चसोएहिं । दूरुज्झियलोयभयासंका वंका गुणविमुक्का ॥११॥

निवसंति सुहेणं चेइएसु अच्चंति धूवकुसुमेहिं । देवे सेवंति य सव्वया वि पंचप्पमायाइं ॥१२॥
सव्वे सत्ता पाणा जीवा भूया य नेव हंतव्वा । सुहुमा य बायरा तह मुणीहिं नोवद्दवेयव्वा ॥१३॥
एयं पवयणनिस्संदकप्पमरिहंतदेसियं वयणं । विज्ञवणुव्व गएहिं तेहिं विस्सारियं निउणं ॥१४॥
खंडियपडियाइं समुद्धरंति ते चेइयाइं सयमेव । न गणंति जीवहिंसं समयायारं अवगणिंति ॥१५॥
॥१३२॥ मेहुणमेगंतेणं वज्जियमह तेउआउआरंभं । साहूण साहुणीणं समयम्मि य मुणियतत्ताणं ॥१६॥
धारित्तु समणलिंगं संगं तिविहेण नो विवज्जित्ता । पूयंति जे जिणिंदं सयं विचित्तेहिं मल्लेहिं ॥१७॥
ते अणहिगारदोसा पन्नत्ता मिच्छदिट्ठिणो दुट्ठा । बलिभोइणो य देवचगा य वीरेण निद्दिट्ठा ॥१८॥ युग्मम् ॥
तेसिमणायाराणं आयरियाणं पमायभरियाणं । मज्झे मरगयसामलवन्नो कुवलयपहायरिओ ॥१९॥
परमुज्जलो गुणेहिं हंसुव्वचंतचरणरागिल्लो । पंकाउ विरत्तमणो न जडासयसेवओ नवरं ॥२०॥ युग्मम् ॥
अच्छइ सुट्ठु तवस्सी अणगारो सारचरणकरणरओ । संसारभमणभीरुअहियओ हियओ य सत्ताणं ॥२१॥
न कयावि हु उस्सुत्तं वज्जरई चरइ सुद्धमग्गम्मि । जिणवयणामयवासियचित्तो रत्तो चरित्तम्मि ॥२२॥
वट्टुमणायारिल्लं बुल्लंतं हासखिड्डुवयणाइं । जणमज्झे पासत्थं खणं पि न सहेइ सो सूरी ॥२३॥ ॥१३३
गामणगरनगरेसुं विहरंतो दुक्कयं परिहरंतो । संपत्तो तत्थ पुरे चियवासिमुणीणमावसहं ॥२४॥
सक्कारिओ य तेहिं अब्भुट्ठाणाइणा य विणएणं । धम्मकहाकहणपरो सुहेण सो संठिओ तत्थ ॥२५॥

कइवयदिणाणि ठिच्चा तत्तो सो पुणवि विहरिउं लग्गो । नेगरिकत्तम्मि ठिई चिरं सुसाहूण सोहकरी ॥२६॥
तत्तो दुरंतपंतंगलक्खणा तक्खणाउ ते मिलिया । दुल्ललियायारमुणीण चक्कवाला महाबाला ॥२७॥
जइ तुब्भे इत्थ पुरे भयवं गुणवंतयाण सिरमुणिणो । इक्कं कुणह पसाया वासारत्तम्मि चउमासं ॥२८॥
तो तुम्हाऽऽणत्तीए बहुआणं चेइयाण निप्पत्ती । संपज्जइ किज्जइ सड्ढगेहिं अम्हेहिं तह महिमा ॥२९॥ युग्मम् ॥

इय दव्वलिंगिवयणाइन्नणओ भणियमित्थ सूरीहिं । जइवि हु जिणालयाणं सेणी सिवगेहनिस्सेणी ॥३०॥
तहवि हु सावज्जमिमं मम निम्ममविरत्तिवत्तिणो समणा । वायामित्तेणवि नाहमेयमिह आयरामि अहो ॥३१॥ युग्मम्॥
एवं पवयणसारं निस्संकं तेण वागरंतेण । कुवलयपहेण गोयम समज्जियं तित्थयरगोत्तं ॥३२॥
तेणेगभवावसेसीकओ महादुत्तरोऽवि भवजलही । अह तेण तत्थ दिट्ठो असमंजसंघमेलावो ॥३३॥
लिंगिणियालिंगीहिं मिलित्तु एगत्थ तालिया दिन्ना । हंहो इमस्स दिट्ठं पंडिच्चं सच्चवाइत्तं ॥३४॥
एवं पयंपिरेहिं निच्चं थुणिरेहिं अप्पचरियस्स । कुवलयपहस्स विहियं सावज्जायरियनामंति ॥३५॥
नीयं च पसिद्धीए धिद्धी संगो असाहुवग्गस्स । तहवि हु सो नवि रूसइ तूसइ विहिएऽवि हिए ॥३६॥

अह तेसिमणायाराण तत्थ लिंगोवजीविसाहूण । आइन्नो पावेणं संपन्नो आगमवियारो ॥३७॥
सड्ढाणमसब्भावे भावेणं साहुणोऽवि जिणभुवणं । पडिजागरंति खंडियपडियं च समुद्धरंति तहा ॥३८॥
अन्नमवि चेइयाणं कज्जं सज्जंतयाण समणाणं । नत्थि किर कोइ दोसो कोसो सुकयस्स चेव भवे ॥३९॥

अह तेसि तेऽवि भणिउं लग्गा सग्गापवग्गदायारो। भणिओ खलु चरणभरो नरो हवइ जेण बहुसुहिओ ॥४०॥
अन्ने कहंति केई लवेह किं एत्थ मोरउल्ला भो। सारं धम्मस्सवि जीवियस्स जिणपूयणं धणियं ॥४१॥
मुक्खंगमसंदिद्धं बुद्धं सिद्धंतमज्झयारंमि। उस्सिसक्कयमाणं ताणं को कुणइ नणु गणणं ॥४२॥
जाओ सत्थविवाओ दुग्गइगमणम्मि जो महोवाओ। परमत्थि नेव कुसलो तम्मज्झे कोऽवि तत्तन्नू ॥४३॥
तत्थेगे इय भणिरा अमुगे गच्छम्मि अमुग आयरिओ। अन्ने वयंति अमुगो साहू जं भणइ तं सच्चं ॥४४॥
केऽवि हु जंपंति इमं किमित्थ बहु पलविएण एएण। अम्हाणं सव्वेसिं पमाणमायरिय सावज्जो ॥४५॥
तव्वयणं पडिवन्नं सव्वेहिवि एवमेव होउत्ति। हक्काराविंति तओ लहुमेए सूरि मावज्जं ॥४६॥
सो संपत्तो तत्तो सत्तहिं मासेहिं दूरदेसाओ। निम्ममनिरहंकारो सारो चरणुज्जलगुणेहिं ॥४७॥
दिट्ठो तत्थेगाए अज्जाए धम्मकज्जसज्जाए। तवसा तणूकयतणू घणुव्व भव्वंगिसिहिसुहओ ॥४८॥
तद्दंसणखणविम्हियमणाइ एयाइ चिंतियं चित्ते। किं एस मुत्तिमंतो अरिहंतो कंतिदिप्पंतो ॥४९॥
अह धम्मो रूवधरो अहवा निज्जरतरू सुरतरू वा। इय चिंतिय तिपयाहिणपुव्वि सा पणमिया पाए ॥५०॥युग्मम्॥
संघट्टिओ य सहसा निउत्तमंगेण हरिसविवसाए। न हु पडिसिद्धा मुद्धा तेण य स साहुणी गणिणा ॥५१॥
दिट्ठो दुट्ठमणेहिं समणेहिं तेहि तीइ वेलाए। तत्थागएहिं तव्वंदणत्थमच्चंतपावेहिं ॥५२॥
अह सो सूरी चिट्ठइ तत्थेवाऽवितहसिद्धिपहदाया। मायानिम्मुक्कमणो गुणोअही मुणियसुत्तत्थो ॥५३॥

॥१३५॥

मियमहुरमंजुलाए सोमालाए गिराइ भव्वाणं । सुत्तत्थमुवइसंतो खंतो दंतो कहइ धम्मं ॥५४॥
तह चेव सद्दहंति य वहंति तस्साणुवित्तिमग्गेसु । संसारुव्विग्गमणा समणोवासगगणा तत्थ ॥५५॥
तस्स य वक्खाणखणे चउदसपुव्वंगसारमाधायं । गच्छायारपवत्तगमहानिसीहस्स पंचमज्झयणं ॥५६॥
एसा तग्गयगाहा समणायारम्मि जा निराबाहा । अवइन्ना पडिपुन्ना गुणेहिं समणाण बहुमन्ना ॥५७॥
जत्थित्थीकरफरिसं अंतरियं कारणेऽवि उप्पन्ने । अरिहावि करिज्ज सयं तं गच्छं मूलगुणमुक्कं ॥५८॥
तो गोयम सावज्जायरिएणं अप्पसंकिएणेव । चिंतयमेवं चित्ते सुत्ते निस्संकिएणावि ॥५९॥
जइ इह एयं गाहं जहट्ठियं नणु कहेमि जणमज्झे । तो तइया अज्जाए वंदणवडियाए महपाया ॥६०॥
संघट्टिया सिरेणं तं दिट्ठुमिमेहिं दुट्ठसमणेहिं । जह मह सावज्जायरियनाममारोवियं सहसा ॥६१॥
तह किमवि अन्नमवि मे काहिंति कुनामधिज्जमज्ज धुवं । को वा सलमज्झगओ साहूवि न हासमिह वहइ ॥६२। त्रिभिर्विशेषकम्।
सुत्तत्थमन्नहा जइ अहं निरूवेमि गव्विओ संतो । आसायणा य गरुई तो जायइ जाणगस्सावि ॥६३॥
ता किं किज्जइ इत्थ उ फुडमेयं संकडं महावडियं । एगादिसाए वग्घो नइपूरो वहइ अन्नत्थ ॥६४॥
वक्खाणेमि किमन्नह अहवा हा हा न जुत्तमेयं मे । जो सुयनाणस्स दुवालसंगरूवस्स एयस्स ॥६५॥
खलिओऽवि पमायवसा न साहए सच्चमत्थवित्थारं । सो दुत्तरभवजलहिं न हु तरइ अणंतसंसारी ॥६६॥ युग्मम् ॥
जं हवइ होउ तं चिय जहठियं चेव पन्नविस्सामि । गाहत्थं परमत्थं जाणंतो नेव बुड्डिस्सं ॥६७॥

वीमंसंतेणेमं तेणावितहो निरूविओ अत्थो । सुगुरूवएसमग्गाणुसारियं न हु मुयंतेण ॥६८॥
एयम्मि खणे तेहिं निसुणंतेहिं दुरंतपंतेहिं । दुल्लक्खणेहिं समणेहिं चोइओ सूरि सावज्जो ॥६९॥
जइ खलु एसो अत्थो सव्वो तुममेव ताव पब्भट्ठो । मूलगुणेहिं संभरसु तद्दिणे तीइ अज्जाए ॥७०॥ ॥१३७॥
संघट्टिओऽसि सिरसा तरसा पाएसु निवडमाणीए । निस्संकमिमेहुत्ते जाओ विच्छायवयणो सो ॥७१॥ युग्मम् ॥
एयं नायमिमेणं पावहेएहिं मह कयं नामं । सावज्जायरिउत्ति य तह्ा करिस्संति अन्नमवि ॥७२॥
तो सावज्जंणिभिणा तक्कयदुन्नामधिज्जभीएण । चिंतियमेयाणमहं जहा तहा उत्तरं देमि ॥७३॥
तत्तो पुणरवि एसो दोसोवहओऽवि दुट्ठलिंगिहिं । एयारिसचिंताए चियाए पज्जलिउमाढत्तो ॥७४॥
गोयम आयरिओ वा गच्छाहिवई व सुयहरो होउं । जे केऽवि हु तित्थंकरवयणं मयणंव सुकुमालं ॥७५॥
न समायरंति हु सयं न हु अणुमन्नंति मंदपुन्नत्ता । तत्तावबोहसुन्ना पुन्ना तिहिं गारवेहिं सया ॥७६॥
कोहेणं माणेणं मायाए लोभहासदप्पेणं । जाए पमायखलिए दिया व राओ व एगे वा ॥७७॥
परिसागए व सुत्ते जागरमाणे व तिविहतिविहेणं । एगमवि विराहिज्जा से भिक्खू निंदणिज्जे य ॥७८॥ चतुर्भिः कलापकम् ॥
से बहुवेयणपरिगयदेहे गेहे समग्गदुक्खाणं । उक्कोसठिइं संसारसागरं परिभमिज्ज चिरं ॥७९॥ ॥१३७॥
तो मह पमाइणो हीणसत्तसत्ताण खलु सिरोमणिणो । आवडिया दुहनडिया इहयं नणु आवई महई ॥८०॥
जेण न सक्कंमि अहं पडिवयणं भणिउमित्थ थणियमहो । ता कहमन्नत्थ भवे छुट्टिस्सं दारुणदुहाणं ॥८१॥

इय झायंतो सूरी दूरीकयहेउजुत्तिदिट्ठंतो । उवलक्खिओ विलक्खीभूओ भूओव्व दिवसम्मि ॥८२॥
तेहिं दुरायारेहिं तो तं पइ एरिसं समुल्लवियं । हंहो अम्हाणेगोऽवि न छिन्नो संसओ तुमए ॥८३॥
जइ तुज्झ अत्थि कावि हु विज्जा चुज्जारिहा सविन्नाणं । ता परिहारगमज्जवि वज्जरसु असंसयं अम्ह ॥८४॥
अविइन्नजुत्तउत्तरमेए मं अक्खमंति जाणित्ता । अवहीरिस्संति हहा दाहामि किमुत्तरमिमेसिं ॥८५॥
एयमिमो चिंतंतो बहुहा अप्पं मणे विसूरंतो । वागरिओ गरहियदंसणेहिं तेहिं पुणो सूरी ॥८६॥
किं भो दुत्तरचिंतासायरमज्झम्मि निवडिओऽसि तुमं । किंचि कहेसु इहुत्तरमव्वभियारि प्पयत्तेण ॥८७॥
समानशुचिवेषडम्बरधनानाम्। उत्क्षिप्ताऽथो शिबिका राजसुतानां सहस्रेण ॥९२॥ पुरतोऽष्टमङ्गलानि प्रतस्थिरे मङ्गलैकहेतूनि। प्रत्येकं चाष्टशतं चचाल रथतुरगगजसत्कम् ॥९३॥ असियष्टिध्वजकुन्तप्रहरणभरधारिणः प्रभूतनराः। जयजयरवमुखरमुखास्तदनु पथि प्रस्थिताः प्रचुराः ॥९४॥ कल्पद्रुरिव प्रथयन्नर्थभरं प्रार्थनापरनरेभ्यः। दक्षिणकरेण नृणामञ्जलिमालाः प्रतीच्छँश्च ॥९५॥ महिलाभिरङ्गुलीभिः परस्परं दर्श्यमानरूपकलः। प्रोत्फुल्ललोचनजनैर्निरीक्ष(क्ष्य)-माणः प्रसन्नास्यः ॥९६॥ संप्रार्थ्यमानसङ्गः सहृदयहृदयैः परिस्फुरन् प्रीत्या। संस्तूयमानमहिमा हिमांशुरिव मुच-लुरचकोरैः ॥९७॥ संप्राप पापहरणं शरणं संसारभीतजन्तूनाम्। विश्वश्रीभरशरणं कुमारराजः समवसरणम् ॥९८॥ दृक्पथमुपागते श्रीवीरे तरसाऽवतीर्य शिबिकातः। कृत्वा प्रदक्षिणात्रयमेष ववन्दे मुदा नाथम् ॥९९॥ प्रणिपत्य प्रभु-मेवं विज्ञपयामासतुस्ततः पितरौ। एकोऽयमस्मदात्मज इष्टः स च जातभीर्भवतः ॥१००॥ युष्मच्चरणोपान्ते प्रव्रज्यामी-हते वयं तुभ्यम्। दद्मः सचित्तभिक्षामक्षामधियाऽद्य गृह्णन्तु ॥१०१॥ प्रभुणाऽभाणि न कार्यः प्रतिबन्धस्तदनु भद्रनन्दि-रथो। गत्वेशानदिशं स्वयममुचद्भूराभरणभारम् ॥१०२॥ केशकलापमलुञ्चन्निष्ठुरतरपञ्चमुष्टिभिरनिष्टम्। दुष्कर्मजा-लमिव स प्रसन्नधीर्देव्यधत्त पटम् ॥१०३॥ हंसविचित्रं नेत्राश्रुवारिधाराप्रवर्षिणी घनवत्। जगृहे साऽऽभरणालीमा-लीनमना जिनाज्ञायाम् ॥१०४॥ अस्मिन्नर्थे वत्सक यतितव्यं मा कृथाः प्रमादभरम्। जननीत्युदीर्य तनयं प्रति सद्म निजं जगाम ततः ॥१०५॥ आह कुमारः स्वामिन्नेष भवो ननु दवोपमाचारी। यत्रानेके सत्त्वा दुःखाग्निभरेण दह्यन्ते ॥१६०॥ तदुपशमाय घनाघनसर्वोत्कृष्टोरुवृष्टिसृष्टिसमाम्। देहि प्रसद्य दीक्षामीर्ष्यार्तिविषादतापहराम् ॥१०७॥ तदनु

स्वमुखेन विभुर्दत्त्वाऽस्मै सुव्रतानि रत्नानि । अनुशिष्टिमित्यभाषत प्रवर्त्तितव्यं यतनयैव ॥१०८॥ स्थाने याने पानेऽशने
तथा समुपवेशने शयने । वचने विहाररचने प्राणिपरित्राणकृद्भव भोः ॥१०९॥ तत्र गीस्तथेति नेतः प्रपद्यमानः स
भद्रनन्दिमुनिः । अध्ययनार्थं स्थविरोपान्तेऽथ स्थापयांचक्रे ॥११०॥ विधिवत्कृतोरुतपसा व्रतपालनतत्परेण नवमुनिना ।
 एकादशाङ्ग्यधीता स्तोकेनानेहसाऽनेन ॥१११॥ सुचिरं प्रपाल्य संयममन्ते संलिख्य मासमेकमसौ । आलोचितसर्वैनाः
सौधर्ममवाप सुरलोकम् ॥११२॥ तत्रोपभुज्य भोगानवियोगानायुषः क्षये च्युत्वा । प्राप्योत्तमकुलजन्म प्रपाल्य धर्मं
गृहस्थानाम् ॥११३॥ प्रान्ते प्रपद्य दीक्षां भावी देवः सनत्कुमारेऽसौ । एवं ब्रह्मणि शुक्रानतनामन्यारणे चापि ॥११४॥
तत्सा(स्मा)त्सर्वार्थाख्ये चतुर्दशस्वेषु जन्मसु सुरेषु । विषयसुखान्यनुभूत्वा(य च) ततो विदेहे नरो भूत्वा ॥११५॥
प्रतिपद्य प्रव्रज्यामज्यायःस्थानवर्जनोद्युक्ताम् । प्रक्षिप्तसर्वकर्मा केवलमासाद्य वरबोधम् ॥११६॥ प्राप्स्यत्यक्षयमोक्षान-
न्तसुखं ज्ञानदर्शनसहायः । ज्योतिर्मयतामयते यथात्माऽसौ प्रदीप इव ॥११७॥ श्रीभद्रनन्दिचरितं भरितं गुणौघैरा-
कर्ण्य कर्णपुटकैः पटवो मनुष्याः । सत्पात्रदानविधये निधये शुभानां, नित्योद्यताः सुविदितार्थभरा भवन्तु ॥११८॥ 

॥ इति सुपात्रदानोपरि श्रीभद्रनन्दिचरितं श्रीविपाकश्रुताख्यातं समाप्तम् ॥

अथ सर्वकषायपरिजिहीर्षयोपदेशकाव्यमुपदर्श्यते—

**कोहाइया सोलस जे कसाया, पच्चक्खरूवा णणु ते पिसाया ।**

**छलंति ते लोयमिमं समग्गं, दुक्खं समप्पंति तहा उदग्गं ॥३०॥**

व्याख्या–क्रोध आदिर्येषां ते क्रोधादिकाः । षट् च दश च षोडश ये कषायाः प्रसिद्धरूपाः । कषायेषु क्रोध एव मुख्यस्तदनुवर्त्ती मानश्च, द्वयोरेतयोरविनाभावः, यत्र क्रोधस्तत्र मानेनावश्यं भाव्यम् । यत्र च माया तत्र लोभः एतयोरपि एकाश्रयित्वं, यः पुमान् मायावान् सोऽवश्यं लोभाभिभूत एव, यः कश्चिन्निर्मायः स निर्लोभ एव । ते च कषायाः क्रोधमानमायालोभरूपाश्चत्वारः प्रत्येकं संज्वलनप्रत्याख्यानाप्रत्याख्यानानन्तानुबन्धिभेदेन षोडश बोद्धव्याः । सं ईषत् ज्वलयन्ति चारित्रिणमपीति संज्वलनाः । प्रत्याख्यानावरणाः सर्वविरतिनिषेधकाः । विद्यते प्रत्याख्यानं देशसर्वविरतिरूपं येषु तेऽप्रत्याख्यानाः । अनन्तं भवमनुबन्धन्तीति अनन्तानुबन्धिनः । यद्यपि चैषां शेषकषायोदयरहितानामुदयो नास्ति तथाप्यवश्यमनन्तसंसारमूलकारणमिथ्यात्वोदयाक्षेपकत्वादेषामेवानन्तानुबन्धित्वव्यपदेशः । यदुक्तं—"जाजीववरिसचउमासपक्खगा निरयतिरिनरा अमरा । सम्माणुसव्वविरईअहक्खायचरित्तघायकरा ॥१॥" व्याख्या–यावज्जीवं (व) वर्षादीन् गच्छन्तीति डप्रत्ययः । व्यवहारत इत्युक्तं, अन्यथा बाहुबल्यादीनां पक्षादिपरतोऽपि संज्वलनाद्यवस्थितिः श्रूयते । अन्येषां संयतादीनां चानन्तानुबन्ध्यादीनामुदयस्य श्रवणात् अन्तर्मुहूर्त्तादिकं कालं यावत् । कारणे कार्योपचारात् कषाया अनन्तानुबन्ध्यादयोऽपि नरकादिदाः । इदमपि व्यवहाराश्रितमेव, अन्यथा ह्यनन्तानुबन्ध्युदयवतामपि मिथ्यादृशां केषांचिदुपरितनग्रैवेयकेषूत्पत्तिः श्रूयते । प्रत्याख्यानावरणोदयवतां देशविरतानां देवगतिः । अप्रत्याख्यानोदयवतां च सम्यग्दृष्टिदेवानां च मनुष्यगतिः । अथ एभ्यः षोडशभेदेभ्यः चतुःषष्टिभेदा अप्युद्भाविताः संभवन्ति । यथा संज्वलनः संज्वलनक्रोधः, संज्वलनः प्रत्याख्यानक्रोधः, संज्वलनोऽप्रत्याख्यानक्रोधः, संज्वलनोऽनन्तानुबन्धिक्रोधः । एवं

प्रत्याख्यानाप्रत्याख्यानानन्तानुबन्धिक्रोधाः प्रत्येकं चतुर्भेदाः कृताः षोडशभेदभाजः स्युः । एवं मानमायालोभा अपि प्रत्येकं षोडशषोडशभेदाः स्युः । सर्वे मिलिताः चतुःषष्टिर्भवन्ति । यद्येषां चतुःषष्टिभेदत्वं न स्यात्तर्हि **श्रीकृष्णश्रेणिकसत्यक्यादयः** क्षायिकसम्यक्त्वधारिणोऽपि कथं नरकगतिभाजः स्युः । परं तत्र सञ्ज्वलनानन्तानुबन्ध्युदय एव कारणमिति तत्त्वं । "**पच्चक्खेति**" प्रत्यक्षरूपा क्षयरूपाः । ननु निश्चितं । ते कषायाः पिशाचा एव मन्तव्याः । तेषां कर्त्तव्यमाह—छलयन्ति ते कषाया लोकं इमं प्रत्यक्षोपलक्ष्यमाणं समस्तं । तथा दुःखं शारीरमानसादिकं समर्पयन्त्युदग्रं महाविषमिति गाथार्थः ॥३०॥

ये च कषायपिशाचैर्न छलितास्त एव धीराः प्रख्याप्यन्ते न त्वितरे । तदुपरि श्रीमद्दमदन्तराजर्षिसन्धिमाह—

॥ **दमदन्तराजर्षिकथा** ॥

भूभामिणिभालत्थलि पसत्थ, तिलओवम जिहिं जण वसइ सुत्थ । अज्जउ (उ) ववहारि य लोय अत्थ, न हु दीसइ जिहिं दुरवत्थसत्थ ॥१॥ चिंतिज्जु चित्ति अइविसम अत्थ, करयलि कलंनवरवन्नसत्थ । सुसिलोयजुत्तिकारणि पसत्थ, जिहिं पंडियसम नणु सुहडसत्थ ॥२॥ जिणहरट्ठियकंचणकंतिसीस, कलमुज्जलजोइहिं रयणिदीस । अंतरु न मुणिज्जइ जगिहिं वीसु, तं नयरु अत्थि इह हत्थिसीसु ॥३॥ कुंदुज्जलमंजुलसवलदंत, दुत्थियदीणहवणदाणदित्त । अमरिंदतुल्लनवरूववंत, **दमदंत** तस्थ **वसुमईकंत** ॥४॥ जेणुद्धरभूयबलसाहसेण, समरंगणि जिणियवेरिगणेण । हिमकिरणरुप्पसेलुज्जलेण, भूमंडल धवलिय नियजसेण ॥५॥ सो **जरासिंधु** पडिवासुदेव, संमेत्रण कज्जिहिं मणुअदेव ।

॥२२१॥

दवदंत रायगिहपुरिहि पत्त, बहुमन्निय तेणवि मिन्नजुत्त ॥६॥ इत्थंतरि हत्थिणपुरवराउ, निग्गच्छियविण नाहिण ववराउ । तसु देसुल्लूरिय पंडवेहिं, पंचहि मंडियबलतंडवेहिं ॥७॥ तं बइअरमाइन्निय जवेण, दवदंतभूमिवइणा चरेण । हत्थिणपुर वेढिय नियबलेण, जह नहयलं सयलुवि बद्दलेण ॥८॥ जाणावइ पंडव चरमुहेण, निवसंत देस अम्हह सुहेण । उव्वासिय तासिओ न हु बलेण, तुम्हेहिं किंतु निच्छइ छलेण ॥९॥ न हु एस वीरलोयाण मग्ग, ज किज्जइ छल काउरिसजुग्ग । तुम्हे उत्तमवंसुब्भवाय, तत्थवि पुण पंच य पंडवाय ॥१०॥ जइ अच्छइ परक्कम कोवि तुम्ह, निग्गच्छिय दुग्गवराउ अम्ह । संमुह आवेविण जुज्झ लेहु, पडिणीयचक्कसिरि पाय देहु ॥११॥ अज्जवि न किंचि गयमत्थि तुम्ह, भूयकंडू खिज्जउ रणिहिं अम्ह । इय दूअवयणि ते तज्जिया य, दुग्गंतरि संठिय लज्जिया य ॥१२॥ जह मूसग मज्जारियभएण, चिट्ठंति बिलंतरि विग्गहेण । तह अप्पा रक्खिय पंडवेहिं, हत्थिणपुरदुग्गि निलुक्कएहिं ॥१३॥ तिहिं दुग्गरोह बहुदिण करे वि, बाहिरठियनर बंदिहिं धरेवि । दवदंतराउ नियठाणि पत्त, नयमग्गि रज्ज पालइ पवित्त ॥१४॥ अह कइवइ दिवसंतिरिहिं तत्थ, सिरिनेमिनाहगणहर पसत्थ । सिरिधम्मघोससूरिंदचंद, जिव हरिविय धम्मियकुमुयविंद ॥१५॥ तत्थागयमुणिगणमहुअरेहिं, अरविंद जेम सेविय सुरेहिं । तव्वंदणकज्जि समेइ राओ, पणमइ बहुभत्तिहि सूरिपाओ ॥१६॥ तद्देसणरंजियमाणसेण, सेवियवेरग्गरसायणेण । धणधन्नरज्जमुज्झियमसेस, विसयाइसुक्ख चइऊण एस ॥१७॥ पडिवज्जइ संजममायरेण, परियणसयणाइ न गणिय तेण । अह सुत्तअत्थसिक्खं लहेवि, गुरुआण मउड सीसिहि गहेवि ॥१८॥ गीयत्थगुणिहि अग्गंजणीय, सुरमाणवदाणवपुज्जणीय । एकल्लउ स मुणि करइ विहार,

अट्ठारसहससीलंग धार ॥१९॥ दवदंतरायरिसि गयपुरंमि, समुवागय पंडवपुन्नणम्मि । किरि मुत्तिमंत जगि धम्म एह,
वेरग्गरंग अइचंग देह ॥२०॥ सो पुरदुवारि ठिय काउसग्गि, अक्खोहिय सुरनरखयरवग्गि । मेरुव्व निप्पकंपंगुवंग,
अक्कोहमाण परिचत्तसंग ॥२१॥ (घात) रयवाडीकज्जिहिं, परियणसज्जिहिं दिट्ठउ पंचहि पंडविहिं । सो मुणिवर-
॥२२६॥ तक्खण देइ पइक्खण वंदिय भत्तिपरव्वसिहिं ॥२२॥ कयपुन्न धन्न मुनिवर महंत, दवदंत रायरिसि विजयवंत । एयस्स
नमंसणदंसणेण, दूरेण दुरिय नासइ खणेण ॥२३॥ निस्संगसिरोमणि समणसीह, मुणिमज्झि इमस्स उ पढमलीह । तिण
जेम जेण परिचत्त रज्जधणपरियणसुंदररूवभज्ज ॥२४॥ पंचहि पडवि किय परमभत्ति, इय कन्नि सुणंतुवि अप्पकित्ति ।
न हु आणइ चित्तहमज्झि माण, इक झायइ नियमणि सुक्कझाण ॥२५॥ चलिएसु नेसु इय मुणि थुणित्तु दुज्जोहण इत्थं-
तरइ पत्तु । पडिमट्ठिय दिट्ठउ तेण साहु, तदुवरि अइरुट्ठउ सो असाहु ॥२६॥ एएण अम्ह अइअजस दिद्ध, गढरोह
करिय जयसिरीय लिद्ध । इय पुव्ववेर संभरिय चित्ति, सो बीजपूरि ताडेइ झत्ति ॥२७॥ तं दट्ठु तस्स परियण असेस,
उप्पन्नतिव्वअमरिसविसेस । पाहाणखंडि आहणइ साहु, सुहभावि सहइ सो निरवराहु ॥२८॥ रइवाडियचलियजुहि- ॥२२७॥
ट्ठिलेण, मुणिरायमपिच्छिय पत्थिवेण । बहुपत्थर पिक्खिय परियणो य, अह पुच्छिय तेण य अप्पणो य ॥२९॥ सो
कत्थ साहु जो इत्थ हुंत, जियरागदोस मुणिगणमहंत । तेणवि दुज्जोहण तणिय वत्त, वज्जरिय सुणिय सो दुक्ख पत्त ॥३०॥
दूरिहिं अवसारिय उवल तेण, आसासिय मुणि सह परियणेण । तसु देह सज्ज काऊण राय, खामीय संपत्तउ गेह-
भाय ॥३१॥ दवदंतरायरिसि सुद्धचित्त, इय भावण भावइ सुप्पवित्त । खणभंगुर देह असार एह, मलमुत्तपुरीसहत-

गउ गेह ॥३२॥ जइ इत्थ सहिज्जइ किंपि कट्ठ, सिवसुह पाविज्जइ तेण इट्ठ । न हु कोइ मित्त मह सत्तु तेम, फरुसक्खर हउ वागरउ केम ॥३३॥ अवराहपरेसुवि पोरवेसु नहु रोस वहउ जीवियहरेसु । उवयारिसु गुणसंथवपरेसु, समचित्तवित्ति तह पंडवेसु ॥३४॥ कइयावि कुहिट्ठिलभूमिपालु, सेवा समुवागय अइकिवालु । दुज्जोहणमइदुज्जणमणिट्ठ, इय तज्जइ रे रे धिट्ठ दुट्ठ ॥३५॥ कुलकमलहुयासण हीणचित्त, तुह जम्मवि जीविय अप्पवित्त । अवहेलिय किंपि कारणि मुणिंद, तइ सीयलसोम जहेह चंद ॥३६॥ तइया तउ कत्थवि गयउ आसि, गिज्जंती न सुणीय गुणहरासि । हत्थिमउर वेढिय नियबलेण, जइया दवदंतनरेसरेण ॥३७॥ पढमं पंचवि अम्हे जिया य, पच्छा पंचवि नियइंदिया य । तो पंचमहव्वय धरिय भार, जिप्पिय कुण सक्कइ मुणि उदार ॥३८॥ नमणिज्ज एह जगवंदणिज्ज, पुज्जाणवि मुणिवर एह पुज्ज । इत्थंतरि दुसह महंत पीड, दवदंतरायरिसि सिरिकिरीड ॥३९॥ नियआउतणउ पज्जंत जाणि, चत्तारि कसायह करीय हाणि । मुणि लीणउ निच्चलसुक्कझाणि, चंचलजिय आणीय इक्कठाणि ॥४०॥ पडिवज्जिय झाणंतरियमेस, पज्जालिय कम्मिधण असेस । आरुहिय खवगसेणि मुणिंद, संपत्तउ केवलसिरिममंद ॥४१॥ न हु लब्भइ जसु गुणतणउ अंत, भगवंत नाणदंसण अणंत । दवदंतरायरिसि संत दंत, सो हूअउ निव्वुइरमणिकंत ॥४२॥ (घात) इणिपरि दवदंतह चरिय सुणंतह पुन्नवंत भवीयह नरह । भवपाव पणासइ मण उल्लासइ सासयसुहवंछापरह ॥४३॥ ॥ इति श्रीदवदन्तराजर्षिसन्धिः ॥

अथ परोपहासकरणमुत्तमानामतीवानुचितं तद्विषयोपदेशमाह—

**परोपपहासं न कहिंपि कुज्जा, लहुत्तणं जेण जणो लहिज्जा ।**
**परस्स दोसेसु मणं न दिज्जा, धीमं नरो धम्मधुरं धरिज्जा ॥३१॥**

**व्याख्या**—परः स्वस्मादन्यस्तस्योपहासः परोपहासः परदोसोद्घाटनं तं न कुत्रापि समविषमदशायामपि कुर्वीतेति शिष्टाचारः, येन कृतेन जनो लघुत्वं लभेत[1] । तथा परस्य दोषेषु मनो न दधीत । धीमान्नर एवं कुर्वन् धर्मधुरां धरेदिति काव्यार्थः ॥३१॥

एतदुपरि दृष्टान्तमाह—

**॥ साधारण श्रेष्ठिकथा ॥**

एकदा निर्मदात्माऽगादनगारशिरोमणिः । चित्रकूटमहादुर्गं साक्षात् स्वर्गमिव श्रिया ॥१॥ **जिनवल्लभसूरीन्द्रः** शिष्यप्रग्रहभासुरः । विहरन् संहरन् सूर इव मिथ्यात्वदुस्तमः ॥२॥ वसतौ याचितायां तद्वासिलोकोऽददात्तदा । सोपहासं चण्डिकायाश्चैत्यमत्यन्तदुर्धियः ॥३॥ धर्मैकतानधीः सूरिरवात्सीत्तत्र शिष्यकः । रात्रावेकः समुत्थाय प्रायः केलिप्रियत्ववतः ॥४॥ भैरवीचक्षुषोर्द्वन्द्वमुत्खानातिकोपतः । शिशोरुत्पाटयामास नेत्रेऽसौ (स) दुःखितोऽरुदन् ॥५॥ गुरुर्ज्ञात्वा समाकृष्य पशुवद्ध्यानरज्जुतः । तामाह चण्डिके दण्डे शिष्यकस्यास्य का गतिः ॥६॥ वेगाद् दृग्युगमेतस्य

---

श्रीठाणांगे—"चउहिं ठाणेहिं हासुप्पत्ति सिया, तंजहा-पासित्ता भासित्ता सुणित्ता संभरित्ता । यथाच—"आयारपन्नत्तिधरं, दिट्ठिवायमहिज्जगं । वायववखलियं नच्चा, न तं उवहसे मुणी ॥१॥" इत्यपि ज्ञेयं ।

॥२२५॥

देहि मुग्धाशयो ह्ययम् । तया दिव्यानुभावेनाकारि व्याकोशलोचनः ॥७॥ ततः साधारणश्राद्धः श्रद्धावान् साधुभ-
क्तधीः । सूरिमानीय शून्यैकवेश्मन्यस्थापयन्मुदा ॥८॥ स्वौकस्तीरे गुरोः सेवामकृतासौ दिवानिशम् । स प्रायस्तुच्छवि-
त्तत्वात्सकलैः परीभूयते ॥९॥ द्विवेलं यात्यसौ सार्धं गुरुणा बहिरन्यदा । अधिकार्यहसद्राजस्तद्द्वयं वीक्ष्य वर्त्मनि
॥१०॥ कीदृक् सदृग्युगलिका मिलिता मलिनाम्बरा । यादृग्गुरुस्तथैवैष यजमानोऽप्यहो जनाः ॥११॥ ततोऽसौ
गुरुणाऽभाणि न श्रियः क्वापि हि स्थिराः । प्रायोऽधिकारिवर्गस्य दुःशीला महिला इव ॥१२॥ त्वदीयहृदयादेष समु-
त्तारयिता शिलाम् । न सामान्यजनो ज्ञेयस्त्वया गर्वान्धचक्षुषा ॥१३॥ ततस्तदनुगाः प्रोचुः स्वामिना सह सोन्मदाः ।
स कीदृग्वासरो भावी यत्रास्यैश्वर्यभवम् ॥१४॥ तस्य भाग्यदशावेशादाचख्युः सूरयोऽन्यदा । भवता क्रियते भद्र न
किं वाणिज्यमुद्यमात् ॥१५॥ सहेतुकैवोक्तिरियमित्यवेत्य चतुष्पथे । यावज्जगाम स श्राद्धस्तावत्सूरिवरा जगुः ॥१६॥
यदद्य प्रासुकं वस्तु लभ्यते तत्खलु त्वया । ग्राह्यमार्य विचार्यं नो किञ्चिद्बहोऽल्पमूल्यकम् ॥१७॥ श्रीपथान्तर्गतो
यावदेष द्वेषकरो नृणाम् । तावदाभाषितः शौल्कशालिकैरिव सोल्कैः ॥१८॥ उपहासपरैरेवमेहि वस्तु गृहाण भोः ।
तेनावादि न हि ग्रन्थौ देयमास्ते धनं मम ॥१९॥ उद्धारकेण चेत् किञ्चिल्लभ्यते तर्हि गृह्यते । तैराख्यातमहो लाहि
मदनस्तम्भकानिमान् ॥२०॥ धनं विक्रीय विक्रीय दास्येऽहं साम्प्रतं न हि । तैः प्रपन्ने समुत्पाट्यानिनाय स निजौ-
कसि ॥२१॥ ततो गुरव आचख्युर्दक्षत्वेनैतकं प्रति । एते संशोध्य संशोध्य विक्रेतव्या न चान्यथा ॥२२॥ यावद्र-
ज्ज्वार्जवोपेतौ दम्पती भेत्तुमास्थितौ । तावन्मध्याद्विनिर्जग्मुस्तपनीयमयाः कुशाः ॥२३॥ हृष्टस्तुष्टस्ततः श्रेष्ठी संगोप्य-

तान् गृहान्तरे। शनैः शनैः सुविक्रीय ददौ तद्देयमादरात् ॥२४॥ ईश्वरत्वं क्रमेणापाकारि ताद्दग्गृहाङ्गणम्। चुकोपा-
धिकृतस्योपर्युर्वीशस्तु कदापि हि ॥२५॥ चतुष्पथान्तः सोऽपाति मूर्त्तिमत्पातकैरिव । भूपादिष्टैर्भटैर्दुष्टैर्लभ्यद्रव्यकृते-
ऽन्यदा ॥२६॥ वक्षस्यदायि च शिलाऽथान्तरे दुःखिनाऽमुना । श्रेष्ठी साधारणो दृष्टः स्पष्टमाचष्ट तं प्रति ॥२७॥
अहो निजगुरोर्वाक्यं पालय त्वं महामते । गुर्वादिष्टा निकृष्टा मे सा वेला समुपस्थिता ॥२८॥ अतस्तेन दयार्द्रेण तद्दे-
यद्रव्यसञ्चयम् । विधाय मूर्धनि स्वीये व्यमोचि नृपसंकटात् ॥२९॥ यथाऽनेनोपहासस्यात्रैव राजाधिकारिणा । फलं
॥२२७॥ लब्धं तथाऽन्योऽपि भुङ्क्ते हास्यवशंवदः ॥३०॥ तस्मान्नैवोत्तमेनात्रोपहस्यः कोऽपि सद्धिया । सधनो निर्धनो वापि
स्वगौरवभरार्थिना ॥३१॥ ॥ इति साधारण(श्रेष्ठि) दृष्टान्तः ॥

**"परस्स दोसेसुत्ति"** परस्य दोषाः सन्तोऽपि नोद्भाव्याः । एतदुपरि श्राद्धात्मजदृष्टान्तमाह—

॥ **श्राद्धपुत्रकथा** ॥

पुरे **पोतनपूर्नाम्नि** धाम्नि धान्यधनश्रियाम् । वसन्ति सप्त तरुणाः करुणारिक्तचेतसः ॥१॥ एकः श्रावकपुत्रोऽस्ति
तन्मित्रं मितभाषकः । परदोषविरक्तात्मा तत्र शत्रुसुहृत्समः ॥२॥ वने जग्मुर्धनाढ्यास्तेऽन्यदा लोकैः समं मधौ । अदे- ॥२२७॥
विषुस्ते दासीभिः सार्धं मधु पपुस्तथा ॥३॥ घस्रस्यार्धे व्यतिक्रान्ते तेषामेवं प्रकुर्वताम् । सश्राद्धैरपराह्णे तैर्दृष्टैका गणि-
कोत्तमा ॥४॥ पुष्पमञ्जर्युदाराङ्गस्वर्णाभरणधारिणी । नगरान्तर्गतं नैतैः पापैरिति विचिन्तितम् ॥५॥ व्यापाद्यैनां
ग्रहीष्यामः समग्राभरणोच्चयम् । मिथश्चालोचितं धूर्तैर्मूर्त्तैः पापकलापकैः ॥६॥ तद्व्यापादनधीग्रस्तान् श्राद्धस्तान् प्रत्य-

षेवयत् । ततो जीवन्त्यसौ मुक्ता श्रावकोऽपि निवारितः ॥७॥ त्वया न हि प्रकाश्यं भो दुश्चरित्रमिदं पुरे । स्वयं प्रविष्टाः पापिष्ठाः पुरे सस्वर्णभूषणाः ॥८॥ कस्यापि हट्टे विक्रीयागृह्णन् धनसमुच्चयम् । सा मद्यपानविवशा नाज्ञासीन्मोषकान्नरान् ॥९॥ हा प्रमादो भवेऽत्रापि परत्रापि च हानिदः । इतः क्षितीशभृत्यैः सा निन्ये सद्म वनान्तरात् ॥१०॥ उक्ता कथमिहास्थास्त्वं सोचे किञ्चित्प्रमादतः । प्रातः क्षणं नृपस्यैतदुक्तमारक्षकैर्नरैः ॥११॥ स्वामिन् वारवधूः कैश्चिन्मुषिता दुःखिता कृता । पटहो वादयामासे नृपेण नगरान्तरे ॥१२॥ वेश्यालङ्कृतयः स्फारहारकुण्डलमुख्यकाः । दृष्टाः श्रुता वा केनापि गेहे हट्टेऽथ कानने ॥१३॥ नोक्ताश्चेत्तद्वधो भावी चौरवत्सर्वदण्डनात् । एवमाकर्ण्य ते पापाः शङ्किता हृद्यचिन्तयन् ॥१४॥ किमस्माभिरथो कार्यं श्राद्धेनोक्तं भविष्यति । येन केनाप्युपायेन जीवं रक्षामहे निजम् ॥१५॥ निश्चित्येत्यस्पृशन् गत्वा पटहं कपटप्रियाः । भूपेनाहूय ते पृष्टा इति भूपं व्यजिज्ञपन् ॥१६॥ वयं सखायः सप्तैवा (व) सुहृदा वणिजा सह । उद्यानान्तर्गता आसन् वेश्याभिः क्रीडितुं मुदा ॥१७॥ यावत्तत्रागता भूयोऽपराह्ले मिलिता हि षट् । मिमिले सप्तमो नैव विमोह्यास्मान् गतोऽग्रतः ॥१८॥ ततश्चिन्तितमस्माभिः किमुत्तालः प्रयात्यसौ । गम्भीरवणिजोऽद्वेगात्तावदेष त्यादव्रजन् ॥१९॥ अस्माभिर्दूरतो दृष्टं वेश्याभरणमण्डलम् । विक्रीणन्नथ मुंचन्वा प्रभूतधनलोभतः ॥२०॥ वञ्चिताः स्मो वयं तेन कुमित्रेणातिदम्भिना । हेतुना तेन तेऽस्माभिरुक्तमास्तेऽथ रोचते ॥२१॥ तथा कार्यमधीशोऽत्र यूयं तु च्छुटिता अहो । इत्युक्त्वा भूपतिं नत्वा निर्ययुस्ते दुराशयाः ॥२२॥ पश्यद्भिर्भूपपुरुषैर्दृष्टस्तन्मित्रमास्तिकः । द्यूतकारापणान्निन्ये क्षोणिभुक्पार्श्वमञ्जसा ॥२३॥ पृष्टो नृपतिमद्राक्षीन्नैतज्जानाम्यहं प्रभो । जानन्नप्येष नो वक्ति पर-

दो॰ मदोषधी: ॥२४॥ शिष्टानामेष आचार: प्रोच्यते नान्यदूषणम् । दुष्टास्त्वसन्तमाख्यान्ति परदोषमभीरुका: ॥२५॥
भूपति कुपित: प्रोचे हन्तव्योऽयं हि मायिक: । शूलिकाग्रे समारोप्यो दुष्कर्मफलमश्नुते ॥२६॥ श्रावक: प्राप्तसंवेग-
स्ततश्चिन्तितवानिदम् । अहो संसारवैरस्यमीदृक्कर्मायियौ मम ॥२७॥ कृतमन्येन दुष्कर्म भुङ्क्तेऽन्य: समुपस्थितम् ।
॥२२१॥ कस्योपरिष्टाद्रुष्यामि तुष्यामि च विसंशयम् ॥२८॥ नैवात्मीयमुखेनाद्य परदोषानहं ब्रुवे । कुसाङ्गत्यफलं ह्येतन्ममोदय-
मुपागतम् ॥२९॥ तावद्भटैर्वेष्टयित्वा नीतोऽसौ वध्यभूमिकाम् । गुडवन्मक्षिकावृन्दैः पौरलोकैः परिवृत: ॥३०॥ ततोऽपी
चिन्तयांचक्रे वक्रेऽस्मिन् समुपागते । कष्टादमुष्मान्मुक्तश्चेत्तदाऽहं स्यां महाव्रती ॥३१॥ एवं विचिन्तयन्नेष ढौकित:
शूलिकान्तिकम् । मातङ्गस्तावदाचष्टे रे स्मराभीष्टदेवतम् ॥३२॥ अवाचि श्रावकेणाथ भो भो: शासनदेवता: । साध-
र्मिकसुखासक्ता: शृण्वन्त्वेकं वचो मम ॥३३॥ दुष्कर्मणोऽस्य कर्ताऽहं यद्यस्या(स्म्य)शुभदायिन: । तदा यूयं विजा-
नीध्वमर्हद्धर्मोपकारिका: ॥३४॥ इत्युदीर्य स्वयं शूलामारुरोहैष साहसी । नमस्कारं स्मरँश्चित्ते परलोकपराङ्मुख: ॥३५॥
तावत्सिंहासनं जज्ञे शूलास्थाने महत्तमम् । चकासामास तत्रैष व्योमाग्र इव चन्द्रमा: ॥३६॥ सुरैर्जयजयारावश्चक्रे
तद्गुणरञ्जितै: । भूप: सन्मुखमेत्यैनं निन्ये गाढोत्सवै: पुरम् ॥३७॥ गजेन्द्रस्कन्धमारोप्य प्राप्य स्वगृहमादरात् । दुकूलै: ॥२२१
स्वर्णवस्त्राद्यै: सत्कृत्य गृहमानयत् ॥३८॥ यथा श्रावकपुत्रेण न हि दोषा बभाषिरे । तथाऽन्यैरपि धन्यैर्नो कार्यं दोष-
प्रकाशनम् ॥३९॥ ॥ इति परदोषाप्रकटनोपरि श्राद्धपुत्रकथा ॥

अथ दशविधं विनयं प्रकटयन्नाह–

जिणिदसिद्धारियचेइयाणं, संघस्स धम्मस्स तहा गुरूणं ।
सुयस्सुवज्झायसुदंसणेसु, दसण्हमेसिं विणयं करेसु ॥३२॥

**व्याख्या**—जिनाः सामान्यकेवलिनस्तेषामिन्द्रा जिनेन्द्राः, तथा कर्मक्षयं कृत्वा ये सिद्धिमुपयातास्ते सिद्धाः पञ्चदशधा, आर्या आचार्याः पञ्चधाचारे साधव इति, चेतःसमाधिजनकानि चैत्यानि जिनप्रतिमाः, जिनेन्द्राश्च सिद्धाश्चाचार्याश्च चैत्यानि चेति द्वन्द्वस्तेषां । संघः साधुसाध्वीश्राद्धश्राद्धिकारूपश्चतुर्भेदस्तस्य । दुर्गतिप्रसृतान् जीवान् धारयतीति धर्मस्तस्य । (तथा) गृणन्ति धर्माध्वानमिति गुरवो धर्मोपदेष्टारस्तेषां । श्रूयते श्रुतिभ्यामिति श्रुतं द्वादशाङ्गीरूपं तस्य । उप समीपे समेत्याधीयते येषां ते उपाध्यायाः द्वादशाङ्गीपाठकाः, तथा शोभनं दर्शनं सुदर्शनं सम्यक्त्वं औपशमिकक्षयोपशमादिरूपं, उपाध्यायाश्च सद्दर्शनानि चेति द्वन्द्वस्तेषु इति सम्बन्धः । एतेषु पूर्वोद्दिष्टेषु सर्वेष्वहो भव्य विनयं कुरुष्व, एतेषु कृतविनयः पुमान् सम्यक्त्वशुद्धिमाधत्ते, यतो हेतोर्विनय एव धर्ममूलमुपन्यस्तस्तीर्थेशैः । इहार्हन्मते दर्शनामी विनयार्हाः, नापरे । एतद्विनयभाजः स्वःसिद्धिपुर्यैश्वर्यभोक्तारः संपत्स्यन्ते । अत्रापि स्वाम्यमात्यमातृपितृभक्तिपरा नरा यदि न विषीदन्ति तदाऽर्हदादिविनयवतां सतां अत्र परत्राप्युत्तमपदव्येव निःसन्देहं भवित्रीति काव्यार्थः ॥३२॥

दशविनयोपरि श्रीभुवनतिलकज्ञातमातन्यते, तद्यथा—

॥ भुवनतिलककथा ॥

यत्रानेके कुसुमालीढभ्रमरास्तरुत्कराः प्रबभुः । तदिहास्ते कुसुमपुरं कुसुमामोदोद्यशःसुरभि ॥१॥ दीनजननिवह-

धनदो **धनदो** वसुधाधवो नवोत्साहः । राज्यं तत्र प्राज्यं भुङ्क्तेऽस्व:पतिरिव स्वर्गम् ।।२।। **पद्मावतीति** तस्य प्रेयस्याभानि
भाऽतिरेकेण । रत्या भारत्या अपि जयिनी प्रतिभासमृद्धया या ।।३।। अजनि तयोस्तनुजन्मा जन्मावधिदानपुण्यनैपुण्यात् ।
।२३१। भुवनोपकारकर्ता धर्ता विनयस्य च नयस्य ।।४।। **भुवनतिलकाभिधानः** प्रधानविज्ञानविस्फुरज्ज्ञानः । येन तिलकायितं
खलु विपुले भुवनाङ्गनाभाले ।।५।। विद्यानामेकपदं जज्ञेऽसौ शैशवेऽप्युपाध्यायात् । अध्ययनैरश्रान्तं सर इव जलदा
ज्जलालीनाम् ।।६।। विनयाविनयाद्विद्या तस्याशोभिष्ट सर्ववैशिष्ट्यात् । विद्युल्लतेव जलदाभ्युदयादानन्दसंजननात् ।।७।।
अन्यस्मिन्नथ दिवसे दिवसेश्वरवन्महाप्रतापनिधौ । भूभर्तर्यासीने सदसि जनामात्यसंपूर्णे ।।८।। द्वाःस्थः समेत्य नत्वा
विज्ञपयामास वासवं पृथ्व्याः । स्वामिन्रत्नस्थलपूर्महीपतेरमरचन्द्रस्य ।।९।। आस्ते प्रधानपुरुषः स्थितः प्रतोल्याममन्द-
मोदमनाः । तस्यादेशः कः खलु समर्प्यते प्राह भूमीन्द्रः ।।१०।। तूर्णं प्रवेश्य मध्ये मदन्तिकं प्रापय प्रसन्नोऽहम् ।
तेनापि समानिन्ये नत्वाऽऽसीनोऽथ नृपमाह ।।११।। हे नेतरमरचन्द्रः स्वामी नः सादरं गतदरं च । प्रतिपत्तिपूर्वक-
मिदं ज्ञापयति प्रति भवन्तमहो ।।१२।। अस्माकमस्ति पुत्री तारुण्ये नेत्रहर्षजनयित्री । निःप्रतिमरूपसंपद्विनिर्जिताशे-
षलेखयोषा या ।।१३।। चम्पककलिकायामिव यस्यामश्यामदेहदीधित्याम् । युवजनमनांसि षट्पदकुलानि सम्यग्निली-
नानि ।।१४।। नाम्ना **यशोमती** सा यशोमती बिभ्रती सती युवती । त्वन्नन्दनस्य हृदयानन्दकरं सद्गुणप्रकरम् ।।१५।। ।।२३१।।
शुश्राव श्रवणसुधाधारास्फारानुकारवरमेषा । खेचरनारीवृन्दैरुद्गीतं स्फीतमात्ममुदा ।।१६।। तत्प्रभृति सानुरागा तस्मि-
न्नवनिष्ट चित्तधार्ढ्येन । कथमपि धरति प्राणान् प्रहता पञ्चेषुणा बाणैः ।।१७।। तस्याः पाने नान्ने न परिजने न हि

जने धने न वने । प्रसरति चेतःप्रीतिः किंतु रतिस्तद्गुणध्याने ॥१८॥ तस्मादस्मद्वचसा तरसा स्वकुमारमादरात्स्वामिन् । संप्रेषय मत्सार्थे नात्रार्थे स्ताद्विलम्बस्ते ॥१९॥ तस्या मनोरथः स्यात्फलेग्रहिर्ननु यथा घनैर्घस्रैः । व्यर्थीक्रियते सद्भिर्न ह्यन्यस्यार्थनमवश्यम् ॥२०॥ स्वीकृत्य तद्वचः क्षितिनेता जेताऽहितावनीशानाम् । सत्कृत्य सत्यमनसा तं स्थाने स्थापयामास ॥२१॥ आज्ञा राज्ञा दत्ता निहिता निजमस्तके कुमारेण । सश्रीका चूडामणिवद्दृढसौन्दर्यसंजननी ॥२२॥ अथ शुभलग्ने सुदिनेऽवनीशसूः परिजनेन सह सचिवैः । चतुरङ्गबलाकलितः प्रस्थितवांस्तस्थिवान्न पथि ॥२३॥ उल्लङ्घितोरुपन्था यावद्बहिराययौ स सिद्धपुरात् । तावत्सहसा नृपसूरपीपतन्निजरथोत्सङ्गे ॥२४॥ [1]तदवस्थमीक्ष्य सर्वस्तत्परिकरनरगणः क्षणात्कुमरम् । दुःखभरात्कोलाहलमुखरमुखस्तत्र संजज्ञे ॥२५॥ आभाषयन्ति धीसखमुख्याः परमेष किमपि नाख्याति । पाषाणमूर्त्तिवदलं न वेत्ति हितमहितमपि किञ्चित् ॥२६॥ आहूय मान्त्रिकवरानुपचारान् भूरिशोऽप्यमी चक्रुः । तस्यासाधोरिव खलु कोऽपि प्रबभूव नैव गुणः ॥२७॥ क्रियमाणेऽप्युपचारेऽपारे वारेण परिजनस्यास्य । ववृधेऽत्यर्थमनर्थप्रवर्धिनी वेदनैकैव ॥२८॥ निश्चेष्टं काष्ठमिव प्रकृष्टकष्टोदयेन तं दृष्ट्वा । विललाप परिधिलोकः सशोकचेतास्तदात्यर्थिया ॥२९॥ हा सेवककामफलप्रसूतिसुरवृक्ष दक्षशीर्षमणे । हा सेवकरत्ननिधेऽभिधेहि खल्वेकवारमहो ॥३०॥ यक्षेण रक्षसा वा निःकारणवैरिणा घृणात्यागात् । त्वमसि च्छलितः किमहो महोदधे गुणमणिश्रेण्याः ॥३१॥ रहितास्त्वया वयं किल न हि स्वकीयास्यदर्शने शक्ताः । कृतहत्या इव शङ्कितचेतोवृत्त्याऽवनीभर्तुः ॥३२॥

१ भूतग्रस्तो ह्यथवा व्याधिध्वस्तोऽस्तचैतन्यः । प्राज्ञैरज्ञैर्वाऽपि ज्ञातुं कैरपि न शक्येत ॥२५॥

एवं परिदेवनगिरमुदीरयामासुराशु तेऽनुचरा: । यावद्विहगारावैस्तरून्करान् रोदयन्त इव ॥३३॥ तावद्विबुधमधुव्रतराजीपरिचर्यमाणपदपद्म: । धुर्य: साधुषु समवासरदुद्याने शरद्भानु: ॥३४॥ अधिरुह्य देवनिर्मितहैमाम्भोजन्म केवलज्ञानी । भव्येभ्य उपदिदेश ध्वनिना पीयूषमधुरेण ॥३५॥ भो भव्या: समवाप्य प्राग्भवपुण्यानुभावतो नृभवम् । तत्किमपि कुरुत सुकृतं येनात्यन्तं लभत सातम् ॥३६॥ अथ देशनावसाने सामन्तेष्वग्रणीर्गुणी सिंह: । आयोज्य हस्तकमलं पप्रच्छ स्वच्छहृत्सुगुरुम् ॥३७॥ भुवनतिलकस्य भगवन् भूपकुमारस्य विश्वसारस्य । अत्रायातस्य सत: कथमायातेयती व्यापत् ॥३८॥ सुगुरुरिति स्माह तत: शुचिदन्तद्युद्भिभासितोष्ठपुट: । भरतेऽस्ति धातकीस्थे भुवनागारं पुरं रुचिरम् ॥३९॥ तत्रान्यदा पयोदागमवद्दुष्पापतापसंहर्ता । सगुण: सगण: सूरिर्भूरियशा आजगाम वने ॥४०॥ तच्छिष्यवासवाख्यो दक्षोचितसत्क्रियापरित्यक्त: । दुर्विनयमहाम्भोधावास्ते मग्न: स मीन इव ॥४१॥ अनुशिष्टो दुष्टात्मान्यदा सदाचारधारकैर्गुरुभि: । साधो विनयपरस्त्वं भज मात्सर्यं त्यज प्राज्यम् ॥४२॥ यत उक्तम्–"**विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् । ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोध: ॥४३॥ संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् । तस्मात्क्रियानिवृत्ति: क्रियानिवृत्तेरयोगित्वम् ॥४४॥ योगनिरोधाद्भवसन्ततिक्षय: सन्ततिक्षयान्मोक्ष: । तस्मात्कल्याणानां सर्वेषां भाजनं विनय: ॥४५॥ मूलाउ खंधप्पभवो दुमस्स खंधाउ पच्छा समुविन्ति साहा । साहप्पसाहा विरुहन्ति पत्ता तओ से पुप्फं च फलं रसो य ॥४६॥ एवं धम्मस्स विणओ मूलं परमो अ से मुक्खो । जेण कित्तिं सुयं सिग्घं निस्सेसं चाभिगच्छई ॥४७॥**" इति विनयवाक्सुधाम्बुधिलहरीसिक्तोऽपि तस्य कोपाग्नि: । न

॥२३३॥

शशाम काममेधो विनापि जज्वाल चित्रमिदम् ॥४८॥ तस्य हिताऽपि हि शिक्षा न सुकृतपक्षावहा मनाग् जज्ञे । ज्वरितस्य हि घृतपानं किमु पुष्टिकरं शरीरस्य ? ॥४९॥ मत्तः करीव कोपाच्छिक्षादानेऽन्यदा मदाक्रान्तः प्रति गुरुम-धावतासौ न विचारः कोपि रुषितानाम् ॥५०॥ सर्वेऽप्येते यतयश्छलमलमालोकयन्ति मम दुष्टाः । पापिष्ठाः खलु रुष्टाः सृष्टाः कष्टाय मे स्रष्टा ॥५१॥ इत्थं प्रलपन् स यथा तथाऽन्यथाऽसत्पथा व्यतिक्रान्तः । गुरुघाताय जलान्तश्चिक्षेप विषं प्रपानस्य ॥५२॥ प्रपलाय्य स्वयमगमत्सर्वत्र सुशङ्किता हि पाप्मानः । स्थातुमशक्ताः स्थाने विधाय विविधान्यकृत्यानि ॥५३॥ पयसः पानाच्छासनसूर्याऽवार्यन्त सर्वथाचार्याः । न हि विपदः सुकृतवशामापद्यन्ते कदा-चिदपि ॥५४॥ सोऽरण्ये ह्यशरण्ये भ्राम्यन्नश्रान्तमात्मभीत्याऽथ । शीतोष्णक्षुत्तृष्णाःविव्याधिविबाधिताङ्गः सन् ॥५५॥ न्यपतद्दवानलान्तः पतङ्ग इव कज्जलध्वजशिखायाम् । मृत्वा सप्तमनरकावन्यामज्ञानधीः प्रययौ ॥५६॥ तत्रादभ्रां भ्रश्राविर्भूतां वेदनां समनुभूय । उदपद्यत तिर्यक्षु प्रसभं मत्स्यादिषु स पापः ॥५७॥ नरकेषु ततः शतशः कर्कशता-दृग्विधानि दुःखानि । भुक्त्वा भुक्त्वा भूयः सत्त्वाघाताद्यघसमूहैः ॥५८॥ भ्रान्त्वा भवेषु भूरिषु सूरिषु निर्हेतुकेन कोपेन । तादृग्व्रतलोपेन च विषह्य चासह्यकष्टानि ॥५९॥ कृत्वा बालतपांसि प्रयाससाध्यान्यकामनिर्जरया । दुष्कर्म-लाघववशात्कथञ्चिदुद्यद्गुणोत्कर्षः ॥६०॥ घनवक्षोणिभुजोऽभूत्तनयो विनयोज्ज्वलो भुवनतिलकः । पित्रोरतीव हृदय-प्रमोदसंजीवनः सोऽयम् ॥६१॥ ऋषिहत्याभिप्रायप्रभूतदुष्कर्मणोऽवशेषवशात् । एतादृग्दुरवस्थाभाजनमजनिष्ट चाक-स्मात् ॥६२॥ कण्ठीरवस्तदुक्तं वृत्तं श्रुत्वाऽथ भीरुकः प्रोचे । केवलिनमसौ स्वामिन् कथमपि भविताऽपि नीरोगः

॥६३॥ ज्ञानी तमाह भोः शृणु कर्मास्य क्षीणतामगात्प्रायः । निर्वेदनोदयोऽयं भविताऽस्मिन् वर्तमानदिने ॥६४॥ कर्णाभरणीकृत्य ज्ञानिवचः शुचि शुभेन सानन्दाः । सैनिकजनास्तमीक्षांचक्रुर्व्यथया व्यतिक्रान्तम् ॥६५॥ सचिवाद्यै-र्निरवद्यैर्वचोऽमृतैः शीतलैः स सिक्तः सन् । अभजच्चैतन्यकलामिलापतेर्नन्दनो भुवनः ॥६६॥ स्वप्राग्भवस्वरूपं सम्यक् तेभ्योऽवबुध्य राजसुतः । सममेव हर्षशोकव्याकुलचेता अजायत सः ॥६७॥ सूरिं ननाम भक्त्या बहुयुक्त्या विनयवृ-त्तिमाधाय । भूपोद्वहः प्रसन्नः प्रवक्तुमेवं समारेभे ॥६८॥ संजातजातिसंस्मृतिरहमेतस्माद्भवोत्थपातकतः । कथमपि मुच्ये भगवन् पाशान्तःपतितहरिण इव ॥६९॥ आह श्रीसूरिरथो कुपथोन्माथो विना न जिनधर्मम् । तत्रापि संयमा-दतिरात्यन्तिकमोक्षसौख्यकरी ॥७०॥ द्रव्यस्तवमाराध्य प्रयाति सुधाशनोऽच्युतं कल्पम् । भावस्तवतः श्रमणः पुनर-न्तर्द्विघटिकात् सिद्धिम् ॥७१॥ सुगुरोर्व्याहारसुधाधारास्वादान्निवृत्तरागगदः । प्रतिपेदे नृपसूनुश्चरणं शरणं शुभाच-रणम् ॥७२॥ कण्ठीरवादिकतिचित्तदनुचरा अपि नृपाद्भयभ्रान्ताः । प्रतिपद्येरन् संयममसंयमात्प्रतिनिवृत्तहृदः ॥७३॥ युवती यशोमती सा दुःखप्राग्भारमान्तरं दधती । पत्युर्निशम्य सम्यग्वैराग्यमभङ्गमापन्नम् ॥७४॥ तद्विरहार्त्तिमगाधा-मसहन्ती दुःसहामथात्यर्थम् । मकरीव सलिलशोषं विललाप पुनः पुनस्तत्र ॥७५॥ व्यलुठच्च भूमिपृष्ठे कष्टेऽनिष्टेऽम्बुधाविवाप-तिता । हा प्राणनाथ कस्माद्दूरादपि ननु विरक्तोऽसि ॥७६॥ न मया तवापराद्धं किमपि कृपापाङ्गगात्रलतिकेयम् । शुष्यति लतेव सलिलासिक्ता वनवीथिकामध्ये ॥७७॥ हे सख्यः शृणुत कथं विरहमहास्थलपथं दुरवगाहम् । लघु लङ्घयामि पत्याशाकरभीतः समुत्तीर्णा ॥७८॥ प्राहुरथ तां वयस्या यस्याप्रतिमश्रिरूपसौन्दर्यम् । अन्यं धन्यं वृणु वर-

॥२३५॥

मलममुना विलपितेन मुधा ॥७९॥ कृतशीलयशोरक्षा दक्षा नृपनन्दिनी जजल्पाली: । वाचोयुक्त्या ह्यनया पर्याप्तम-
नाप्तदर्शितया ॥८०॥ हंसी हंसेन विना न पद्मिनी पद्मबान्धवादन्यम् । यद्वत्कामयतेऽहं न तथाऽन्यं रमणमिच्छामि
॥८१॥ इत्याख्याय सखीनामापृच्छ्य स्वपितरं तथा चाम्बाम् । ज्ञानसद्गुरुपार्श्वे प्रतिपेदे पावनीं दीक्षाम् ॥८२॥
जज्ञे महासतीनामाधारधरा समग्रगुणराशे: । वैराग्यैकनिधानं यशोमती संयमस्थानम् ॥८३॥ इतरेऽथ सैनिकभटा-
स्तटाकत: सारसा यथा सायम् । स्थानात्ततो निवृत्ता: समेत्य भूमीभुजो जगदु: ॥८४॥ स्वामिन् भवत्सुतेनाददे
स्वदेहव्यथासमुद्रेकात् । ज्ञानिगिरा वैराग्यावेशात् क्लेशापहं चरणम् ॥८५॥ अथ भुवनतिलकसाधु: साधुगुणाधारभू-
रभूताध: । स्वं पूर्वभवाभ्यस्तं जनाप्रशस्तं हि दुर्विनयम् ॥८६॥ निन्दन्नात्मनि नितरामर्हत्सिद्धप्रसिद्धचैत्येषु ।
आचार्योपाध्यायश्रमणश्रुतधर्मगुरुविषये ॥८७॥ प्रवचनदर्शनयोश्च प्रकाममेतेषु दशसु सद्भक्त्या । वैयावृत्याचरणाचर-
णाराधकगुरुं भेजे ॥८८॥ त्रिभिर्विशेषकम् । रुष्यति न रोषवचनैस्तुष्यति न प्रेमपेशलालापै: । आचरति निरतिचारं
व्रतं श्रुतं पठति चाशाठ्यात् ॥८९॥ तद्विनयगुणावर्जितहृदो मदोदयमवीक्ष्य कुत्रापि । गुरव: सुसाधुवर्गा:श्लाघन्ते तं
महाश्रमणम् ॥९०॥ धर्मं स विनयमूलं तथाऽऽराध प्रधानतरवृत्त्या । अभजद्यथा विनयिनामाद्यां रेखामदोषात्मा
॥९१॥ अभ्युत्थानाञ्जलिनाऽऽसनप्रदानेन भक्तिभावाभ्याम् । शुश्रूषया च सुगुरो: स विनयमभ्युल्लति नित्ये ॥९२॥
दशधा विनयाचरणाचरणात्यन्तानुरक्तधी: स सुधी: । दुर्विनयजनितदोषान्नि:शेषान् शोषयामास ॥९३॥ इत्थम-
शीतिप्रमितान् स पूर्वलक्षान्निजायुरापूर्य । सुकृती सपादपोपगमनशमनमादृत्य पर्यन्ते ॥९४॥ प्रतिपद्य केवलज्ञानर-

मामन्तेन कर्मणामेषः । सिद्धिश्रियमुपयेमे रेमे साकं तयाऽजस्रम् ॥९५॥ भुवनतिलकस्यैवं मत्वा चरित्रमनाविलं, निजकहृदये भव्याः श्रव्याऽमृताक्षरपद्धतिः । श्रयत विनये तीर्थेशादिष्वनारतमुत्तमां, येन मतिमनुपमां स्याद्वः समीहित-सङ्गमः ॥९६॥

॥ इति दशविधविनयोपदेशविषये श्रीभुवनतिलककुमारचरितम् ॥

॥२३७॥

—०—०—

पूर्वं कषायस्वरूपं सप्रपञ्चमुदाहृतं, अथ चतुर्णां कषायाणां व्यक्तमेव काव्यचतुष्केणोपदेशमाह–

**मणे मणागंपि हु तिव्वरोसो, न धारियव्वो कयपावपोसो ।**

**जओ भवे पुन्नजलस्स, सोसो, संपज्जए कस्सवि नेव तोसो ॥३३॥**

व्याख्या–मनसि मनागपि स्तोकोऽपि हुरवधारणे तीव्रश्चासौ रोषश्च तीव्ररोषः न धारयितव्यः धार्यः । किंभूतः? कृतः पापपोषो येन स तथा । पुनर्यतः कोपाद्भवेत् पुण्यमेव जलं पुण्यजलं तस्य शोषः शुष्कता । अथ चोत्पद्यते कस्यापि नैव तोषः । क्रोधः समुद्भूतः सन् पापस्यैव पुष्टिमाधत्ते, न धर्मस्य, यत उक्तम्–**क्रोधाद्भवति विरोधः सुष्ठुप्रेमापि याति दूरेण । क्रोधाग्निश्रितधर्मः शर्म न चित्ते न चाङ्गेऽपि ॥१॥ सामान्येनापि जनेन नाश्र भाव्यं सुदीर्घरोषेण । पुनरिह तपस्विनां किं कथनं निश्छद्मधर्मभृताम् ॥२॥"** तस्मात्कोपप्रलोप एव श्रेयानिति काव्यार्थः ॥३३॥ ॥२३७॥

क्रोधस्य धरणे परिहरणे च मण्डूकीक्षपकदृष्टान्तः सूच्यते—

॥ मण्डूकीक्षपक कथा ॥

कत्थावि संनिवेसे कत्थवि गच्छम्मि पगइसच्छम्मि। खवगो वट्टइ साहू सद्धिं सो खुड्डएण गओ ॥१॥ गोयरचरियाहेउं पारणदिवसम्मि मासियतवस्स। तप्पायाणं हिट्ठा समागया लहुअमंडुकी ॥२॥ तह मद्दिया मया जह अन्नाणत्ताइ तेण खवगेण। सा खुड्डएण दिट्ठा नियदिट्ठीए न उण तेण ॥३॥ तो भणइ चेल्लओ तं तुमए विणिवाइया य मंडुकी। खवगो रुट्ठो वुल्लइ अहो महादुट्ठधिट्ठेसा ॥४॥ चिरकालमया वट्टइ पायपहारेण नो मए हणिया। इय कलहंता पत्ता सालाए गुरुसगासम्मि ॥५॥ गमणागमणालोयणवेलाए खुड्डएण तह चेव। वाहरिओ नालोयइ तं साहूरि पयप्पहयं ॥६॥ संजाए आवस्सयखणम्मि रत्तीइ नेव मंडुकी। आलोइया तओ सो भणिओ इय चेल्लएण पुणो ॥७॥ आलोएहि तयं भो किं वीसरिया पयेण जा मलिया। मज्झण्हे भिक्खाए गएण तव्वयणओ रुट्ठो ॥८॥ सो खमओ अक्खमओ तम्मारणदुट्ठवयणमसहंतो। ओढाइओ य तं पइ उप्पाडिय खेलमल्लगं ॥९॥ गुरुसरणमहल्लीणो हीणो दीणो स चिल्लओ सहसा। थंभेण तस्स सीसं फुट्टं अइसंकडट्ठाणे ॥१०॥ रोसपिसायवसगओ स मओ खमओ खणेण वीयणाए। जोइसिएसु सुरत्तं पत्तो तत्तो चविता सो ॥११॥ दिट्ठी विससप्पाणं कुलम्मि दिट्ठीविसो अही जाओ। सप्पेणिक्केण पुरे परिब्भमंतेण निवतणुओ ॥१२॥ तव्वंसजेण खइओ अह जंगुलिएण रायनिद्देसा। आहूआ बहुअहिणो मंतबलेणक्खए खविउं ॥१३॥ सव्वे मंडलमज्झे पवेसिया भासिया य तो तेण। डक्को जेण निवसुओ सो चिट्ठउ तदियरे जंतु ॥१४॥ सव्वेवि

गया सप्पा एगो तत्थेव निच्चलीहूओ । सो मंतवाइणुत्तो आवियसु विसं नियं मुक्कं ॥१५॥ जइ न पियसि तो निवडसु
जलिरज्जलणम्मि जलणकुंडम्मि । दो जाईओ अहीणं अगंधणा गंधणा चेव ॥१६॥ सो य अगंधणनामो तन्नामाणो
अईव माणधरा । अग्गिम्मि तओ पडिओ नडिओ नियमाणदोसेण ॥१७॥ वंतं विसं न गहियं नूणं तेणाहिणा सुदुम्म-
इणा । रायंगओवि हु मओ विसमाहप्पं अहो पयडं ॥१८॥ रुट्ठेण महीवइणा पच्छा घोसावियं सरज्जम्मि । आणेइ जो
॥२३९॥ अहीणं सीसं तस्साहमप्पेमि ॥१९॥ दीणारमेगमित्तो लोओ लोहाउलो अहिउलाई । मारित्तु मत्थयाइं तेसिमहाणेउ-
माढत्तो ॥२०॥ दीणारे देइ निवो अह तम्मि कुलम्मि साहुखवगजिओ । उप्पन्नो तं जाइसरं सहावेण नागकुलं ॥२१॥
रत्तिं हिंडणसीलं णदिम्मि तं भमइ नेव कत्थावि । जीवाण हिंसणभया नयणुब्भवदाहदोसेण । २२॥ अह हिंडएण
केणवि नरेण सप्पाण सीसलुणणकए । न दिवा दिट्ठो सप्पो कोवि तओ रत्तिभमिरेण ॥२३॥ दिट्ठं दिट्ठीइ फुडं खवगा-
हिस्सेव तस्स गुविलबिलं । तद्दारम्मि ठिओ सो तो चिंतइ विसहरो चित्ते ॥२४॥ अहह मए तायव्वं न य दियहे निस्स-
रामि पावभया । तहवि अणेणं रुद्धो मज्झे पुण ठाउमसमत्थो ॥२५॥ दिट्ठो कोवविवागो कस्सवि उवरिं करेमि न हु
रोसं । गच्छिस्समहिमुहो जइ तो हु डहिस्सामि तद्देहं ॥२६॥ निग्गच्छइ पुच्छेणं चेव तओ जित्तिओ विणिग्गइओ । तित्ति- ॥२३९॥
यमित्तो छिन्नो अहितुंडियमाणवो कूरो ॥२७॥ सीसंपि तेण छिन्नं जाव मओ दिट्ठिविसअही सो य । परिहिट्ठिओ सुरीए
सुमिणं दिन्नं महीवइणो ॥२८॥ जह मा सप्पे मारह नागकुलाओ भविस्सई पुत्तो । जम्हा तुम्हाण घरे तस्स य पुण
दारगस्स अहो ॥२९॥ नामं गुणाभिरामं दिज्जा नणु नागदत्त इय पयडं । इत्तो सो खमगअही पाणपरिच्चायमावन्नो

॥३०॥ तस्सेव भूमिवइणो पत्तो पुत्तत्तमुत्तमगुणड्ढं । तन्नाम नागदत्तोत्ति कयं पियरेहिं उच्छवओ ॥३१॥ समणप्पसंगवसओ उवएससुहारसं तओ पिच्चा । नच्चा भवस्सरूवं विणस्सरं लहुवए चेव ॥३२॥ पव्वइओ गुरुपासे आसेवंतो य दुविहसिक्खाओ । संजाओ गीयत्थो सुत्थावत्थो भणइ गुणई ॥३३॥ तिरियभवब्भासाओ छुहाउलो सो अईव संजाओ । आरब्भ दिणयरुग्गमवेलं जा होइ अत्थमणं ॥३४॥ भुंजंतो ता चिट्ठइ अंतं पंतं सुनीरसं सरसं । न हु रत्तदुट्ठचित्तो उवसंतो धम्मसद्धिल्लो ॥३५॥ रूसइ न हु कडुएहिं कसायवयणेहिं दुज्जणुत्तेहिं । तूसइ न थुणिज्जंतो वट्टइ समभावमावन्नो ॥३६॥ अह तम्मि चेव गच्छे अच्छेरयकारि दुक्करतवस्सी । चत्तारि संति खमगा चाउम्मासियतवो पढमो ॥३७॥ तेमासिओ य बीओ तीओ दोमासिओ मुणेयव्वो । इगमासिओ चउत्थो एवं चउरोवि ते संति ॥३८॥ परओ तेसिं खुड्डगमुणी महप्पा स अत्थि आसीणो । चउरोवि समुल्लंघिय खमगे तह कोहमाणिल्ले ॥३९॥ आगम्म देवयाए तीए सो वंदिओ महाभागो । अइभत्तिनिब्भराए गिराइ महुराइ संथुणिओ ॥४०॥ इय पासित्तु पकुविया खमगा चउरोवि देवयाचरियं । निग्गच्छंति वत्थे गहिया चउमासिणा मुणिणा ॥४१॥ भणिया दुव्वयणेहिं रे धिट्ठे दुट्ठचित्ति पाविट्ठे । इगदुतिचउमासाईदुक्करतवकारिणो अम्हे ॥४२॥ कीस न वंदसि मुद्धे सुरत्तणं तुह धिरत्थु धीवियले । एयं खु कूरभायणमुणिमणवरयं च पणमेसि ॥४३॥ तिरिउव्व जो छुहालु चिट्ठइ परिभुंजमाणओ निच्चं । तेण कह मोरउल्लावे कुणसि थुत्तिं च ॥४४॥ तो देवता पयंपइ भावक्खमयं अहं खु वंदामि । न हु पूयासक्काराभिलासिणो साहुरूवधरे ॥४५॥ पच्छा विलक्खवयणा अमरिसमसमं वहंति खुड्डुवरिं । न हु निग्गुणा गुणीणं सहंति गुणवण्णणारंभं ॥४६॥

तो अमरी वीमंसइ मा एए खुड्डयं खरंटेंति । पज्जलिरो किमु जलणो अन्नं सुक्कं च पिच्छेइ ॥४७॥ तप्परओ संनिहिया
चेव सुरी चिट्ठई य खुड्डस्स । पडिबोहिस्समवस्सं इमे खमे नो खमाकज्जे ॥४८॥ संदेसाणयणत्थं बीयदिणे चिल्लओ स
इक्किल्लो । गंतूण पडिग्गहगं दोसीणन्नेण पूरित्ता ॥४९॥ आगम्मालोइत्ता सव्वेवि हु साहुणो निमंतित्ता । जा भुंजिउ-
माढत्तो नियतणुजवणट्ठया एसो ॥५०॥ चाउम्मासियमुणिणा पडिग्गहे थुक्कियं मनिकारं । तो चेल्लओ पयंपइ मिच्छादु-
॥२४१॥ क्कडमहो तुम्ह ॥५१॥ न कह पणामियं तणु खेलस्स य मल्लगं गुविम्हरियं । तं तेण उप्पराओ चेव निच्छूढमवणीयं
॥५२॥ पक्खित्तं खेलगमल्लगंसि अदुगंछगेण चित्तम्मि । तह चेव तिदुगइगमासिएहिं निच्छूढमणिगूढं ॥५३॥ पुव्वि
न तेण निप्फेडियं तमीसाविसायमुक्केण । जम्हा नीरागमणा समणा निद्दोसरोसिल्ला ॥५४॥ निट्ठुरवयंपिरेणं अरे कहं
अज्ज पव्वदिवसेऽवि । भुंजसि अणज्ज चउमासिएण मुणिणा स खुड्डागो ॥५५॥ बाहाइ बला गहिओ रहिओ अहि-
माणरोसपसरेण । लेसाहिं विसुज्झंतो जंतो परिणाममइसुद्धं ॥५६॥ धन्ना एए खवगा तवस्सिणो पुण अहं खु मंद-
मई । ढोरुव्व भुंजिरो सयकालं निल्लज्जिरो य तहा ॥५७॥ निंदंतस्स य अप्पं दप्पं घत्तं परिच्चयंतस्स । आवरणकम्म- ॥२४१॥
विगमे उप्पन्नं केवलन्नाणं ॥५८॥ ता वज्जरइ सुरी सा समुन्नई सासणस्स कुणमाणी । भो कह णु वंदियव्वा तुम्हे
अइकोहमाइल्ला ॥५९॥ सनियाणसल्लचिता महा य मायाभिभूयचित्ता य । ताहे ते खमगावि हु उदग्गसंवेगमावन्ना
॥६०॥ मिच्छादुक्कडमम्हाण अइकसाईण तहय माईण । बालोवि एस गरुओ जो सुमहप्पा पसंतमई ॥६१॥
आसाइओवि कामं मणे मणागंपि नेव जो कुविओ । अम्हेहिं पावकम्मेहिं दूरपरिचत्तधम्मेहिं ॥६२॥ सोहणमज्झव-

 



साणं पत्ताणं ताणमेवमुक्कोसं । तत्थ चउण्हंपि खणा केवलनाणं समुप्पन्नं ॥६३॥ जह तेण खुड्डगेणवि मुणिणा गुणिणा पसंतवयमइणा । निग्गहिओ नणु रोसो तह अन्नेहिंपि कायव्वं ॥६४॥ तद्दिट्ठंतं दट्ठूण सुट्ठु परितुट्ठमाणसा चउरो । जह ते खमगा जाया समुल्लसियकेवलन्नाणा ॥६५॥ अन्नेवि तहा धन्ना कयपुन्ना उत्तरित्तु भवजलहिं । पावंति सिद्धिसुक्खं दुन्निग्गहकोहनिग्गहिणो ॥६६॥

॥ इति क्रोधपरिहारोपरि श्रीकूरगडुकदृष्टान्तः ॥

अथ मानपरिहारोपर्युपदेशमाह–

**महारिसीणं अरिणा समाणो, न आणियव्वो हिययम्मि माणो ।**
**धम्मं अहम्मं च वियाणमाणो, हुज्जा जणो जेण जडोवमाणो ॥३४॥**

**व्याख्या**–महान्तश्च ते ऋषयश्च महर्षयस्तेषां महर्षीणां अरिणा वैरिणा समानः सदृशः न ह्यानेतव्यो हृदये मानोऽहङ्कारः धर्मं च पुनरधर्मं वि विशेषेण जानन् भवेत् नरः येन मानेन जडोपमानः मूर्खसदृशः माने मनस्यायाते सति ज्ञानवानप्यज्ञान एव स्यादविनयशीलत्वादिति काव्यार्थः ॥३४॥

तदुपरि दृष्टान्तमाह–

॥ दशार्णभद्रकथा ॥

**श्रीमद्दशार्णपुरपत्तनमस्ति चङ्गं**, प्रोत्तुङ्गतीर्थकरचैत्यकृताभिषङ्गम् । मुक्ताधिकः शुभकरः करटीव भद्रः, क्षोणीपतिर्ज-

यति तत्र दशार्णभद्रः ॥१॥ दशार्णशैले जिनराजवीरस्तत्रान्यदागाद्धविकारमुक्तः । तदाऽवनीशो वनपालकेन, प्रवर्द्धितस्तीर्थकरागमेन ॥२॥ वैकक्षकृत्प्रीतमना नरेशः, पीठोत्थितोऽस्ताभिनिवेशलेशः । गत्वा ववन्दे प्रभुमेष सप्ताष्टकं पदां संमुखमर्थिवप्रा ॥३॥ स्वपीठमास्थाय पुनर्धुरीणस्तस्मै महद्दानमदादरीणः । ततः परं भक्तिसमुल्लसिष्णुश्चेतस्यदश्चिन्तितवान् विजिष्णुः ॥४॥ वन्दिष्ये एतं जिनपं तथा श्वः, केनापि नावन्दि पतिर्यथा स्वः । ततः पुरं कारयति स्म साकं, नानोत्सवैर्निश्युदयत्पताकम् ॥५॥ कृताट्टभूपं विमलैः पयोभिः, सुगन्धिभिः सिक्तमगण्यशोभि । पाञ्चालिकातोरणचारुचञ्चन्मञ्चातिमञ्चं मणिभिश्चितं च ॥६॥ दंदह्यमानागरुधूम्रिताभ्रं, प्रज्वाल्यमानप्रसरत्सिताभ्रम् । गृहे गृहे निर्मितनव्यलास्यं, पुरं बिभाति स्म गुणैरुपास्यम् ॥७॥ प्रातः शुभालङ्कृतिशालमानः, सामन्तमालासमुपास्यमानः । आरूढवानुत्कटगन्धनागं, सर्वर्द्धिभिर्मूर्तमिवाञ्जनागम् ॥८॥ स्वरूपनिर्भर्त्सितदेवताभिः, प्रत्येकमुच्चैः शिबिकाश्रिताभिः । अन्तःपुरीभिः सुकृतोद्यताभिः, समन्वितः पञ्चशतीमिताभिः ॥९॥ नृपोऽनुगच्छच्चतुरङ्गचक्रः, स निर्ययौ स्वावसथादवक्रः । जगत्तृणाभं हृदि मन्यमानः, श्रीवीरपद्वन्दनसाभिमानः ॥१०॥ वादित्रनृत्यादि विलोकमानः, पदे पदे वन्दिभिरीड्यमानः । मनोरथातीतधनं ददानः, श्रुताङ्गनामङ्गलगीतगानः ॥११॥ दशार्णभद्रोऽपि दशार्णशैलं, प्राप्तो लवङ्गक्रमुकाधिकैलम् । प्रोत्तीर्णवांस्तत्र महागजेन्द्रस्कन्धोपरिष्टादसकौ नरेन्द्रः ॥१२॥ अन्तर्गतः समवसृत्यवनेश्चिकुत्वः सृष्टप्रदक्षिण उपामितगर्वबत्त्वः । नत्वार्हतश्चरणतामरसे निविष्टः, स्थानं यथासमुचितं नृपतिः सदिष्टः ॥१३॥ ज्ञात्वाऽस्य भावं हरिरन्तरङ्गं, दध्यावहो अस्य मनः सरङ्गम् । जिनार्चनायां परमत्यजेयं, मानं वहन् सम्प्रति दूष्यतेऽयम्

॥२४३॥

॥१४॥ यथाप्यशेषैरसुरैः सुरेशैः, सर्वर्द्धिभिः सर्वबलैर्नरेशैः । पूज्यन्त एते युगपज्जिनेशाः, स्युः पूजिता नैव तथापि लेशात् ॥१५॥ गुणैर्जिनाः स्युः पुनरप्रमेयाः, पूजा कृता स्याद्भविकैस्तु मेया । शक्त्याऽहमेतस्य ततो यतिष्ये, मानस्य मोक्षाय शुभं करिष्ये ॥१६॥ अथो चतुःषष्टिसहस्रदन्तावलान् हरिर्जैनमताधिगन्ता । ऐरावणाख्यत्रिदशादभङ्गान्नि-र्मापयामास गिरीन्द्रतुङ्गान् ॥१७॥ एकत्र चैकत्र गजेऽधिलीना, मूर्ध्नामभूत् पञ्चशती नवीना । युक्तोपरि द्वादशभिः समन्तात्, प्रत्येकमष्टाष्ट शिरस्सु दन्ताः ॥१८॥ जाताश्च वाप्योऽनुरदं तथाऽष्टौ, वाप्यां च वाप्यां कमलानि चाष्टौ । प्रत्येकमंभोरुहि पत्रलक्षं, मध्यस्थरैकर्णिकया सुलक्षम् ॥१९॥ प्रासाद एकोऽजनि कर्णिकायां शचीयुगध्यास्त हरिस्त-कायाम् । पत्रेष्वयं नाट्यविधिं नवेषु, प्रत्येकमालोकयति स्म तेषु ॥२०॥ स्वाराज्यलक्ष्म्या च सुपर्वराजस्तत्रान्यथा-ऽपश्चिमतीर्थराजः । कर्तुं नमस्यां समुपेयिवानक्लेदादृशार्णाख्यगिरावबानः ॥२१॥ प्रदक्षिणीकृत्य जिनं गरीन्द्रे, गजोप-रिस्थे प्रणमत्यपीन्द्रे । गजाग्रिमांह्री भुवि तत्र मग्नौ, यतोऽम्बुसिक्तार्द्रभुवीव लग्नौ ॥२२॥ तीर्थं गजाग्रपदकं तत एव जातं, क्ष्मापोऽथ तं हरिमवेक्ष्य नवर्द्धिजातम् । चिन्तामिमां हृदि चकार हरेर्यदाहो, स्वैणं रमाबलमनुत्तररूपमाहो ॥२३॥ ही कूपमण्डूक इवात्र गर्वं, धृत्वाऽऽसदं लाघवमत्यखर्वम् । ततोऽनयाऽनर्थसमूहकर्त्र्या, कृतं ममर्द्ध्योत्तमधर्महर्त्र्या ॥२४॥ ध्यात्वेति सद्बुधिरिव प्रवालान्, स पञ्चभिर्मुष्टिभिरात्मबालान् । क्षणात्समुत्खाय चरित्रभारं, समाददेऽर्हन्निकटेऽनि-वारम् ॥२५॥ अथो जितंमन्य इतप्रमोदः, प्रोचे प्रणम्यामरनायकोऽदः । राजर्षिमेतं त्वमिहासि धन्यः संपुरितात्मीयगु-रुप्रतिज्ञः ॥२६॥ जगाम संस्तूय सहस्रनेत्रः, पुमः पुनस्तं मरुदालयेऽत्र । क्रमेण कर्मक्षयतोऽपवर्गं, राजर्षिरप्याप

चतुर्थवर्गम् ॥२७॥

॥ इति श्रीदशार्णभद्रकथा ॥

अथ मायापायसत्कं काव्यमाह—

॥२४५॥ सुसाहुवग्गस्स मणे अमाया, निसेहियव्वा सययंपि माया ।

समग्गलोयाणवि जा विमायासमा समुप्पाइयसुप्पमाया ॥३५॥

व्याख्या–सुष्ठु शोभनाश्च ते साधवश्च सुसाधवस्तेषां मनसि अमाता न स्थितिमाप्ता तैर्मनसि न धृता । निषेधयितव्या प्रतिषेध्या सा सततमपि सदैव समस्तलोकानामपि या विमातृसमा सपत्नीमातृतुल्या किंभूता सा ? समुत्पादितः सुतरामतिशयेन प्रमादो दुःखव्यतिकरो यया सा तद्रूपा इति काव्यार्थः ॥३५॥ साधुना माया न कार्या अयं परमार्थः– निश्छद्मधर्मेण भाव्यम् ॥

अथ लोभविक्षोभकृत्काव्यमाह—

जेणं भवे बंधुजणे विरोहो, विवड्डुए रज्जधणम्मि मोहो ।

जो जंपिओ पावतरुप्परोहो, न सेवियव्वो विसमो स लोहो ॥३६॥ ॥२४५॥

व्याख्या–येन भवेत् बन्धुजने सगीन(स्वजन)वर्गे विरोधो विग्रहः, अथ च विवर्धते राज्ये धने च मोहः स्नेहः, यश्च जल्पितो भगवद्भिस्तीर्थंकरैः पापतरोः पापवृक्षस्य (प्ररोहः) अङ्कुरः न सेवितव्यः विषमः स लोभः विशेषतः

साधूनां निर्लोभतैव श्रेयसीति काव्यतात्पर्यं ॥३६॥ क्रोधमानोपरि ज्ञातद्वयं पूर्वमुक्तं । अथ पुनरेकत्रैव दृष्टान्ते कषायचतुष्कमुद्भावयत बलिराजचरित्रानुगतमित्यर्थः । भयवं एस जीवो कोहाईहिं कहं रोलविज्जइ ? भयवं समाइसइ—

॥ कषायचतुष्के कथा ॥

सो संसारियजीवो पभूयकालं भमित्तु भवमज्झे । पुण्णोदयप्पसाया मणुस्सखित्तम्मि वरगामे ॥१॥ जिणदासो जिणदासो सिट्ठी दिट्ठीइ सो मए सहिओ । तद्दुहियत्तं पत्तो नामं लद्धं जिणसिरित्ति ॥२॥ सम्मद्दंसणवासियमस्स कुडुंबं समग्गमवि अत्थि । चंदणतरुसंसग्गी सुवासियं कुणइ सव्ववणं ॥३॥ नियपरियणाणुरूवायारवई जिणसिरीवि संजाया । परिणीया भोगपुरट्ठिएण सा विमलसड्ढेण ॥४॥ तग्गेहे सा जिणवरधम्मं सम्मं करेइ गुरुपाए । वंदइ निसुणइ धम्मं गुरूण पासे गुणावासे ॥५॥ संजाया से पुत्ती कुडुंबवड्ढत्तणं समणुपत्ता । जिट्ठसुओवि विणीओ परिणीओ धणसिरिं कन्नं ॥६॥ इत्तो विन्नत्तो मोहमूवई गयवरेण दोसेण । मह जिट्ठबंधवेणं नामेणं रागकेसरिणा ॥७॥ तायस्स चित्ततोसो तेण कओ भूरिभवभमाडणओ । तब्बहुभाउस्स महऽज्ज विलसियं पिच्छह खणद्धं ॥८॥ युग्मम् ॥ इय उल्लविरो पणमिय पाए पिउणो तओ स निज्जाओ । सामरिसो जिणसिरिअंतियम्मि तस्संनिहाणेण ॥९॥ सा नियबहूए उवरिं संपन्ना बहुयदोसरोसिल्ला । दिट्ठाएवि हु दिट्ठीइ तीइ सा जलइ जलणोव्व ॥१०॥ पजलयंपि हु पुट्ठा रुट्ठा धिट्ठा भणेइ गालीओ । न हु किंपि खिवइ य तहा भायणे भोयणावसरे ॥११॥ केवलमेईइ तहा अक्कोसे देइ नेइ संतावं । आहणइ मत्थयम्मि य चट्टुअअग्गेण निट्ठुरया ॥१२॥ तक्कयगिहकम्माणि य दूसइ रूसइ खणे खणे दुट्ठा । नं हु तक्करेण दावइ भिक्खं

भिक्खायराणंपि ।।१३।। न सहइ तक्करफासं पसत्थवत्थूण गेहमज्झम्मि । भोयावइ न हु अन्नं मन्नंती वेरिणिं बहुअं ।।१४।।
सो कोवि नत्थि विणओ जो साहिज्जइ न तीइ सस्सूए । तहवि न तुस्सइ पस्सइ छिद्दं मूसी बिलाडुव्व ।।१५।। पाए
पक्खालइ सा अहन्नया तहवि पन्हियाइ हया । निब्भच्छिया य बाढं रे उट्ठसु जाहि दूरेण ।।१६।। जइ संवाहइ अंगं
||२४७|| तीए हत्थाइं तोऽवसारेइ । गेहदुवारं न मुयइ मा भक्खइ खंडगुडदुद्धं ।।१७।। न हु वंदइ गुरुदेवे चिंतइ मणसावि
नेव धम्मविहिं । पुव्वं संभग्गपिहाणियाइ भंडाइ संभरिइ ।।१८।। रे कह भग्गा एसा उसा मुसा दोसमुल्लवइ एसा ।
अक्कोसंती तीए वहुं महारोसदोसवसा ।।१९।। चिट्ठइ सा जिणसिरिया निहिरीया मुक्कजायमज्झाया । रोसेण धमध-
मंती मणे वहुअदोसझाणिल्ला ।।२०।। न हु पडिभासइ किंचिवि धणसिरिया वहुखमा खमुव्व वहू । सव्वेण परियणेणं
सुणिओ तव्वइयरो सव्वो ।।२१।। विमलेणवि विन्नायं तद्दुव्विलसियमसेसमवि नित्ते । जइ तेण उवालद्धा तो लग्गा संमुहं
चविउं ।।२२।। उव्वहइ कोहमसमं विसमं जं किंचि जंपए मुहरा । सव्वेगवि तो चत्ता असज्झवनुव्व जिणसिरिया
।।२३।। सम्मद्दंसणभट्ठा मिच्छादंसणमयम्मि कयनिट्ठा । मोहबलेणुक्किट्ठा सा जाया धिट्ठपाविट्ठा ।।२४।। जलणुव्व पज्ज-
लंती संपन्ना तिव्वरोसदोसेण । इत्तो कोवि महिड्ढी सगीणओ विमलसिट्ठिस्स ।।२४।। तग्गेहम्मि समेओ अहन्नया तेण भोयणे ||२४७|
पिच्चा । दिट्ठा गिहट्ठिएणं अजंपिरिं नियन्हुसं बहुहा ।।२६।। अक्कोसंती जिणसिरिनामा वामाभिभासणुम्मत्ता । तो
तेणं वज्जरियं मुद्दा कहं खिज्जसि इमीए ।।२७।। कस्सेयं नणु गेहं देहंपि असासयं तहा लच्छी । कइवइदिणावसाणे न
तुमं न हु लच्छिविच्छड्डी ।।२८।। मुद्धसहावा एसा बहुआ पच्चक्खमेव नणु दिट्ठा । संतावेसि पइदिणं किमिमं बहुकोहक-

लहेहिं ॥२९॥ कल्लेवि घरो होही वहुयाइत्तो किमित्थ कहियव्वं । इय वुत्ते तेणेसा तदुवरि अहणच्छिया जाया ॥३०॥
मायाविणि दुट्ठि हले किलेसकारिणि ममोवरि इमो को । संकेइय आणीओ सुमासियाभासओ पुरिसो ॥३१॥ अइवा-
यालो नणु वाउलुव्व मह अत्थि नेव एअ भयं । इय निट्ठुरभणिरी सा पहाविया पालियाहत्था ॥३२॥ आसन्नठिया
वहुया निवाडिया केवले महीवट्टे । आकड्ढिऊण वेणीइ सुनिग्धणाए जिणसिरीए ॥३३॥ तीए उवरिं चडिया नडिया
निविडेण रोसदोसेण । कंठे दाउं पायं सकसायं हणिउमाढत्ता ॥३४॥ हाहारवमुहरमुहो परियणलोगो पहाविओ झत्ति ।
अहह अहो मारिज्जइ किज्जइ वहुरक्खणोवाओ ॥३५॥ परियणमवि प्पओसा लग्गा हणिउं महापिसाइव्व । तो लेट्ठुलगु-
डमुट्ठीहिं सोऽवि तहा मारिउं लग्गो ॥३६॥ जह उवरि निवडियाए तीए वहुया हया मया झत्ति । जिणसिरियावि
हु तत्तो निवाइया घाइया पावा ॥३७॥ असमंजसमवलोइयमेयं दुच्चिट्ठियं सभज्जाए । विमलो विमलसहावो सकुडुंबो
लहु लियइ दिक्खं ॥३८॥ जिणसिरिजीवो तत्तो मरिउं नरयं गओ सरोसत्ता । मच्छेसु तओ एगिंदियाइजाईसु बहु भमिउं
॥३९॥ अणुहविय तिक्खदुक्खं मणुस्सजाईए जलणसिहनामो । जाओ विप्पो सप्पोव्व जम्मप्पभिई सरोसिल्लो ॥४०॥
कम्मपरिणामरन्ना कओ धणड्ढोय धम्मवंतो य । देवगुरुसंगमाओ सम्मद्दंसणमिमस्सासी ॥४१॥ धम्मं सेवंतो सो चिरं
ठिओ रम्मनयरवासेण । तं तारिसमाकलिउं अह मोहमहानरिंदेण ॥४२॥ कुविएणं निद्धणया तप्पासे पेसिया तओ
जाया । दारिद्दया दुयं तस्सहचरिया दोसभरभरिया ॥४३॥ दोहिवि तेहि सुनिब्भरमवगूढो जलणसिहदिओ सहसा ।
पव्वंतगामवासी अभिव्वहुंतो स संपत्तो ॥४४॥ तत्तो सयमेव हलं वाहइ साहइ किसिं किसंगोवि । इत्तो विभत्तो दोस-

गयवरो सहरिसं समागम्म ॥४५॥ अणवंधिकोहनामेणऽहवा वेसानराप(व)रक्खेण । जिट्ठसुएणं तस्स य ताय अहं जलणसिहपासे ॥४६॥ पुव्वमभूवमहं खलु विचालए परमहो समागच्च । सम्मद्दंसणसत्तू पविट्ठओ ता वयं नट्ठा ॥४७॥ संपइयमत्थि (तत्थ स नत्थि) तुम्हे नणु वीसमेह निच्चंता । आइसह मज्झ अज्ज नियभुयविरियं खु दंसेमि ॥४८॥ तायप्पसायओ तं पच्छा वालेमि इक्कहेलाए । ता पिउणाणुन्नाओ जलणसिहस्संतियं पत्तो ॥४९॥ तस्संनिहाणवसओ जहत्थनामो इमो हु संपत्तो । थेवेवि हु अवराहे रूसइ न हु तूसइ कहिंपि ॥५०॥ भज्जं ताडइ फोडइ भंडे चंडेण कोहकलहेण । वट्टइ घट्टइ पाएहिं मायरं दुव्विणीयतया ॥५१॥ पियरंपि हु अवमन्नइ न गणइ नियबंधुणो तणसमेवि । देवगुरूणवि विमुहो स संमुहं भणइ दुव्वयणं ॥५२॥ ततो सो परिचत्तो सव्वेणवि परियणेण रोगिव्व । विज्जेहिऽसज्झरोगो सोगोवगओ हुओ बाढं ॥५३॥ अह अन्नया अ निव्वहमाणो नाणोवओगपरिमुक्को । चंडालकुले लग्गो खित्ताणं खिडणकज्जेसु ।५४॥ पत्तो वासारत्ते लंगलयं खेडए नवे खित्ते । न चलइ इक्कबइल्लो गलियारत्तेण तरुणोवि ॥५५॥ **वेसानरेण** एसो अहिट्ठिओ गाढमेव खित्तम्मि । ता ताडइ निस्संकं आराहिं दूहवइ वसाहं ॥५६॥ तहवि अचलंतमेयं मम्मम्मि य आहणइ हयासो सो । कड्ढियजीहो दीणो पडिओ गोणो महीवीढे ॥५७॥ ता वेसानरविवसो अच्चत्थं वाडवो सुपिस्संता । दंताइं पुत्थमेयस्स मोडए तोडए केसे ॥५८॥ तहवि न उट्ठइ जा भुयलयाउ ता खिडियखित्तडलएहिं । तह पिट्टिओ जहेसो पाणेण खणेण परिचत्तो ॥५९॥ तहवि न रोसग्गिभरो उवसमिओ तस्स समहिओ चेव । वड्ढिउमाढत्तो लहु मणम्मि जह वणदवोऽरन्ने ॥६०॥ सम्मद्दंसणचत्तस्स तस्स पाणा पलाइया झत्ति । मिच्छादं-

॥२४९॥

सणपमुहे गलगहिओ सो गओ नरयं ॥६१॥

तो भमिय भूरिकालं भवाडवीए मयव्व निस्सरणो । कम्मपरिणइवसेणं तओ **धणंजय**महीवइणो ॥६२॥ रुप्पि-णिभज्जाए सावियाए जिणधम्मम्मसज्जाए । जाओ **कुबेर**नामो पुत्तो पत्तो य तारुण्णं ॥६३॥ कुसलत्तणेण स कलासु वल्लहो हवइ माइपियराण । इत्तो विसमा पल्ली वल्लीवणभीसणा अत्थि ॥६४॥ वग्घोव्व विहियदिग्घो वग्घक्खो पल्लिवासवो तत्थ । जो अवि धणंजयपुव्वएहिं न हु साहिओ कइया ॥६५॥ सो लुंटइ रायधणंजयस्स गामागराणि नगराणि । बंधइ रुंधइ सत्थं सत्थेहिं हणेइ जणनियरं ॥६६॥ तम्मि खणे तेण पुणो तद्देसोवद्दवो कओ बाढं । तदुवरि तओ ससिन्नो कुमरो पट्ठाविओ पिउणा ॥६७॥ तस्स गएण मणेणं तद्दुग्गो दिव्वजोगओ गहिओ । साहि-यपल्लीदेसो जियकासी आगओ सपुरं ॥६८॥ तो तक्कित्ती गिज्जइ गीएसु जणेहि भट्टघट्टेहिं । सत्थंदछप्पयाई तस्स पढिज्जंति रासा य ॥६९॥ तत्तो अवगयसमओ समओ समुवागओ गउव्व तहिं । वेमानरस्स भाया अणंतअणु-बंधिओमाणो ॥७०॥ दोसगइंदंगरुहो विक्खाओ सेलरायनामेणं । तस्संनिहाणओ सो उत्ताणमणो समुब्भूओ ॥७१॥ उड्ढी-कयनयणिल्लो अंगम्मि न माइ माणदोसेण । थंभोव्वाणम्मतणू नयरम्मि रमेइ लीलाए ॥७२॥ भणइ य मुहरत्ताए किं विहियं अम्ह पुव्वपुरिसेहिं । जेहिं नपुंसगेहि व गलियभुयबलभरेहिं अहो ॥७३॥ पद्धरओ उद्धरिओ न हु चरडो कंटउव्व पायस्स । रंकुव्वभरियमुयरं सजीवपरिरक्खणपरेहिं ॥७४॥ एसो धणंजओ पुण विणओ हणिओ अरीहिं नणु हुंतो । जइ न हु जाओ हुंतो सुओ जए विस्सुओ अहयं ॥७५॥ तच्छंदवत्तिणो तह तहेवमेयंति सामिय वयंति । न हु तुह्माण

सरिस्सो पुरिसो कोवित्थ साहसिओ ॥७६॥ जह जह निसुणइ नियनामवन्नणं कन्नसुक्खसंजणणं । तह तह मन्नइ अप्पं
दप्पंधो मेरुगिरिगरुअं ॥७७॥ जह जह थुव्वंति गुणे अणेगबंदिव्वया मुहस्सुवरिं । तह तह देहे गेहे नहंगणे माइ न
जएवि ॥७८॥ इच्चाइचाडुवयणेहिं सम्ममुप्पासिओ कुबेरक्खो । अइसुक्कखयरकट्ठव्व नमणसीलो न कस्सावि ॥७९॥
॥२५१॥ जयलच्छिसमेओ आगओ य तत्तो अईव मयमत्तो । पियराणं न हु मिलिओ नियबाहुबलेण दुल्ललिओ ॥८०॥ पत्तो निय-
आवासे वत्तामित्तं न साहियं पिउणो । का वत्ता नणु परियणजणस्स मिलियस्स सयमेव ॥८१॥ गुरुदेवेवि न वंदइ
निंदइ नियसेवगाण मज्झम्मि । बुड्ढाणवि नालवई लवई तद्दोसनिउरंबं ॥८२॥ केवलमुज्जलवेसालंकरणोदारफारसिंगारो ।
उक्किट्ठविट्ठरग्गोवविट्ठओ सो नियट्ठाणे ॥८३॥ तंबोलफुल्लगल्लो मल्लोव्वातुल्लबाहुगव्विल्लो । लीलाइ गग्गयगिरं भासंतो
वक्कदिट्ठीए ॥८४॥ पासंतो परलोयं तणं व मन्नेइ तिहुयणं सयलं । नडविडपेडयगुट्ठीरसिओ जा वसइ नियठाणे ॥८५॥
कइयावि धणंजयनरवरेण सिक्खं पदाय नियसचिवा । पट्ठविया पुत्तंतियमिमेहिं आगम्म संलत्तं ॥८६॥ आइसइ कुमर
निसुणसु राया पायावहारणत्थं ते । उक्कंठिया हु अम्हे बाढं तुब्भाण मिलणकए ॥८७॥ आगंतव्वमवस्सं पस्संताणं
घणं व तुह मग्गं । अम्हाण गिहे एवं तव्वक्कमिमो निसामित्ता ॥८८॥ मोडियनियघाणग्गो सावन्नमउन्नसंगओ चवइ । ॥२५१॥
किं तत्थागमणेणं पओयणं मज्झ भो भणह ॥८९॥ केणावि कुवियमइणा अरिणा करुणाविवज्जियमणेण । किं अज्ज
पाडिओ संकडम्मि जइ पुण इमं सच्चं ॥९०॥ ता कहह लहु जहाहं बंधित्तु सुरिंदमवि समप्पेमि । आगच्छामो न वयं
कस्सवि पासम्मि को जणओ ॥९१॥ जइ अम्हेहिं कज्जं सयमागच्छइ कहं न ता ताओ । अम्हे न तदायत्ता जओ जए

 लद्धजसपसरा ॥९२॥ अभणिसु ता अमच्चा सच्चा एसा गिरा धुराधरणे । पइ साहसिक्कभवणे भवणे सइ नंदणे निउणे 
॥९३॥ सक्कोवि नेव सक्को आबाहं काउमाउविगमेवि । परमेवमसरिसुल्लाववलालसत्तं न ते जुत्तं ॥९४॥ जं नागमिस्स-
महयं माणवणो सपिउणोवि तीरम्मि । भो रायनंदणाणंदजणणजणमज्झयारम्मि ॥९५॥ विणयगुणविप्पहीणा हीणा
 सव्वे गुणा समक्खाया । सहयारतरुविमुक्का वणराई रायए नेव ॥९६॥ उत्तमकुलुब्भवाणं विणयपहाणा गुणा थुणिज्जंति ।
तप्परिहीणाण इमाण गोरवं नेव विप्फुरइ ॥९७॥ तत्थवि अम्मापियरो विसेसओ गोरवारिहा भणिया । तुम्हारिसाण
कुलवंतयाण इय नेव उचियं भो ॥९८॥ सो पडिभणिउं लग्गो अहिट्ठिओ सेलरायनामेण । रे रे गच्छह गेहं बाढं
दुवियड्डया तुम्हे ॥९९॥ विन्नाणनाणजुत्तस्सवि मह जं उज्झया हु सिक्खवणे । एयं सिक्खं अप्पह माउयपियराण गंतूणं
॥१००॥ इइ वुत्तुं ते सव्वे कंठे घित्तूण अमरिसेण तओ । निक्कासिया खणेणं रायमुवागम्म साहंति ॥१०१॥
तो पिउणा विण्णायं माणी मन्नंदणो भिसं एसो । रज्जमवज्जनिहाणं परिवइस्सं किमेएण ॥१०२॥ जत्थ विडंबिज्जंति
य जंतुणो मोहरायसिन्नेण । एवं ता मज्झ अलं भोगेहिं दत्तसोगेहिं ॥१०३॥ पउणीकिज्जइ ता अज्ज रज्जसामग्गिया
कुमारस्स । इय चिंतियं न साहिय परमेयं कस्सवि नरस्स ॥१०४॥ अह अन्नदिणे रन्ना आहूओ सो पहाणपुरिसेहिं ।
तेहिं पणमित्तु वुत्तं पओअणं अत्थि हु महंतं ॥१०५॥ आगच्छह पिउपासं खणमेगं मा विलंबमिह कुणह । तो सेलरा- 
यवसओ ते तह अवहीलिया पुरिसा ॥१०६॥ जह अइविलक्खवयणा नयणागोयरपहं गया तुरियं । तत्तो सामंता
मंडलीयवग्गो य तह चेव ॥१०७॥ धिक्करिय तेण विसासिओ य माया तओ तहिं पहिया । निब्भच्छिय तमवि इमो

निक्कासइ परमवेरिव्व ॥१०८॥ तत्तो वलित्तु एसा अवच्चमोहेण वाउला संती । तस्स य विलग्गित्तु पए सए गिहे आणइ
कुमारं ॥१०९॥ महया कट्ठेणाहूयमेयमवगम्म सम्ममवणीसो । दावइ महतमासणमिमस्स अवि दुव्विणीयस्स ॥११०॥
तत्थोवविट्ठओ सो धिट्ठो न हु नमणमवि कयं पिउणो । उड्ढीकयनयणमुहो असंमुहो रायजणयस्स ॥१११॥ आभा-
॥२५३॥ सिओ तहावि हु बहुणा नेहेण वच्छ तुज्झ सुहं । तुह सुंदेरिमगुणरंजिएहिं निवईहिं नियदूय ॥११२॥ पहिया कन्ना पाणिग्ग-
हत्थमवत्थ मुइयहियएहिं । तासिं पूरेसु मणोहराइं नियपाणिदाणेण ॥११३॥ युग्मम् ॥ तह लहु गहेसु रज्जं मए सयं किज्जए
य अभिसेओ । परिभुत्तसुचिरभोगा वयमणुजामो य दिक्खपहं ॥११४॥ तो विहियकण्णजावो स सेलराएण निविडकय-
पावो । भालयलरइयभिउडी रायं पइ भणइ वयणमिणं ॥११५॥ इत्तिय महग्गहेणाहमिहाणीओ घराओ जणणीए ।
एअं न किंचि कज्जं रज्जमहं दिन्नमवरेण ॥११६॥ न हु गिण्हिस्सं इय निच्छओ य सो वासरो खयं जाउ । साऽवि
निसा पलयमई जत्थ परदिन्नरज्जसिरी ॥११७॥ युग्मम् ॥ इय वुत्तुं पण्हिपहारदाणओ आहणित्तु पीढग्गं । सहसा समु-
ट्ठिओ सो गच्छंतो दारदेसेण ॥११८॥ रन्ना सपरिगरेणं उवक्खिओ रक्खिओ न मणयम्मि । किमणेण निग्गुणेणं नंदण-
पासेण धरिएणं ॥११९॥ तह सम्मदंसणेणं चत्तो संपत्तओ य मिच्छेण । तह सेलरायमोहयनडिओ नगराउ निस्सरिओ ॥१२०॥ ॥२५३॥
बाहिं पत्तो य महाडवीए विनडाइ सावयसएहिं । राया मायाममयामुत्तो तत्तो पव्वइओ ॥१२१॥ नियलहुयभाउणो
नीलयस्स दाऊण परमरज्जसिरिं । अह सो कुबेरनामो परिब्भमंतो महारन्ने ॥१२२॥ संगामकालनट्ठेण वग्घपल्लीवइस्स
तणएण । चित्तेण पिक्खिओ सो तओ स जलणोव्व पज्जलिओ ॥१२३॥ त्रिभिर्विशेषकम् ॥ सहसा चलिओ तम्मारणत्थ-

तत्थासेसो, लोओ सोओवगयचित्तो ॥१२॥ साहूहिं वारिओ तो, बाहिं निग्गच्छ मा तुमं वच्छ । जेण जणुड्डाहभरो,
दुव्वारो पसरिओ लोए ॥१३॥ तो चिट्ठइ वसहीए, चेव इमो तस्स अन्नपाणाई । आणित्तु दिंति मुणिणो, गुणिणो
गुणगारवुम्मुक्का ॥१४॥ दिवसे वा रत्तीए, काउस्सग्गं करेइ सो निच्चं । निच्चलचित्तत्ताए, मेरुव्वाकंपणिज्जतणू
॥१५॥ सासणसुरीए तत्तो, विहिओ सो सुरहिदेहवासिल्लो । किरियाणुट्ठाणपराण, दुल्लहं किमिह लोयम्मि ॥१६॥ ॥२९१॥
बंधुरगंधुद्धुरदेहयाए पुणरवि तहेव जणमज्झे । जाओ अ वण्णवाओ, तस्स तओ देवयाए पुणो ॥१७॥ साहाविय-
सगंधो, कओ इमो पालई नियं चरणं । सम्मं धम्माराहणपरो मुणी सग्गइं पत्तो ॥१८॥ एयं सुनंद वुत्तं, चित्तम्मि
विसारया निवेसित्ता । परिहरह दुगंछभरं, जह सुहिय होह परजम्मे ॥१९॥

॥ इति जुगुप्सोपरि दृष्टान्तः ॥

अथ व्रतानां षट्कं साधुयोग्यमुपदिश्यते—किं तत्? प्रथमं तावत्प्राणिघातविरतिव्रतं त्रिधा मनसा वचसा कायेन पालनीयं। द्वितीयं मृषावाक्यविरतिव्रतं त्रिधा मनसा वचसा कायेन तदपि पालनीयं। तृतीयमदत्तग्रहणविरतिव्रतं तदपि त्रिधा धार्यं। चतुर्थमब्रह्मविरतिव्रतं तदपि त्रिधा पालनीयं। पञ्चमं मूर्छापरिग्रहत्यागरूपं। षष्ठं रात्रिभुक्तविरतिरूपं। यदुक्तं श्रीपाक्षिकवृत्तौ—"सव्वाओ पाणाइवायाओ वेरमणं, सव्वाओ मुसावायाओ वेरमणं, सव्वाओ अदिन्नादाणाओ वेरमणं, सव्वाओ मेहुणाओ वेरमणं, सव्वाओ परिग्गहाओ वेरमणं, सव्वाओ राइभोयणाओ वेरमणं"। तद्यथेत्युपदर्शनार्थः। सर्वस्मान्निरवशेषात्त्रसस्थावरसूक्ष्मबादरभेदभिन्नात्कृतकारितानुमतिभेदाच्चेत्यर्थः। अथवा द्रव्यतः षड्जीवनिकायविषयात्, क्षेत्रतस्त्रिलोकसंभवात्, कालतोऽतीतादे रात्र्यादिप्रभवाद्वा, भावतो रागद्वेषसमुत्थात्, प्राणानामिन्द्रियोच्छ्वासायुरादीनामतिपातः प्राणिनः सकाशाद्विभ्रंशः प्राणातिपातः प्राणिप्राणवियोजनमित्यर्थः, तस्माद्विरमणं सम्यग्ज्ञानश्रद्धानपूर्वकं निवर्त्तनमिति। तथा सर्वस्मात्सद्भावप्रतिषेधा १ ऽसद्भावोद्भावना २ ऽर्थान्तरोक्ति ३ गर्हा ४ भेदात् कृतादिभेदाच्च। अथवा द्रव्यतः सर्वधर्मास्तिकायादिद्रव्यविषयात्, क्षेत्रतः सर्वलोकालोकगोचरात्, कालतोऽतीतादे रात्र्यादिवर्त्तिनो वा, भावतः कषायनोकषायादिप्रभवात्, मृषाऽलीकं वदनं वादो मृषावादस्तस्माद्विरमणं विरतिरिति। तथा सर्वस्मात्कृतादिभेदात् अथवा द्रव्यतः सचेतनाचेतनद्रव्यविषयात्, क्षेत्रतो ग्रामनगरारण्यादिसंभवात्, कालतोऽतीतादे रात्र्यादिप्रभवाद्वा, भावतो रागद्वेषमोहसमुत्थात्, अदत्तं स्वामिनाऽवितीर्णं तस्यादानं ग्रहणमदत्तादानं तस्माद्विरमणमिति। तथा सर्वस्मात्कृतकारितानुमतिभेदात्, अथवा द्रव्यतो दिव्यमानुषतैरश्चभेदात्, रूपरूपसहगतभेदाद्वा,

क्षेत्रतस्त्रिलोकसंभवात्, कालतोऽतीतादे राज्यादिसमुत्थाद्वा, भावतो रागद्वेषप्रभवात्, मिथुनं स्त्रीपुंसद्वन्द्वं तस्य कर्म मैथुनं तस्माद्विरमणमिति । तथा सर्वस्मात्कृतादेः, अथवा द्रव्यतः सर्वद्रव्यविषयात्, क्षेत्रतो लोकसंभवात्, कालतोऽतीतादे राज्यादिभवाद्वा, भावतो रागद्वेषविषयान् परिगृह्यते आदीयते परिग्रहणं वा परिग्रहस्तस्माद्विरमणमिति । तथा सर्व-स्मात्कृतादिरूपात् दिवा गृहीतं दिवा भुक्तं १, दिवा गृहीतं रात्रौ भुक्तं २, रात्रौ गृहीतं दिवा भुक्तं ३, रात्रौ गृहीतं रात्रौ भुक्तं ४, इति चतुर्भङ्गरूपाच्चेत्यर्थः । अथवा द्रव्यतश्चतुर्विधाहारविषयात्, क्षेत्रतः समयक्षेत्रगोचरात्, कालतोऽतीतादे राज्यादिसंभवात्, भावतो रागद्वेषप्रभवात् रात्रिभोजनाद्रजनीजेमनाद्विरमणमिति । एवं सामान्येन व्रतषट्कमभिहितं । एतद्व्रतात्मषट्कं साधुनाऽवश्यं पालनीयं, अस्मिन्नर्थे सज्जीभवितव्यं ॥

अथ "**पंच प्पमाया**" इति तृतीयपदोपरि **दृष्टान्ता** उच्यन्ते, (तत्र) प्रथमं **मदिरापानदोषः** सूच्यते--

**बारवई** नाम पुरी इह त्थि सुरनिम्मिया कणयसाला । भरहद्धचक्कवट्टी तत्थ **हरी** रज्जसिरिकलिओ ॥१॥ तस्सा **बलजरकुमारा** दुवे वि खलु जिट्ठ भायरो जाया । एस पिया **वसुदेवो जरदेवीए जराकुमरो** ॥२॥ **रोहिणीए बलपुत्तो** ॥२९३॥
अद्धट्ठकुमारकोडि परियरिया । ते सव्वे इच्छियसुहमणुहवमाणा वसंति सुहं ॥३॥ अह **सिरिनेमी** तत्थागओ हुउं साहुसाहुणिसएहिं । देवेहिं कओसरणे हरी समेओ पणामत्थं ॥४॥ धम्मे कहिए पहुण कण्हो अह पुच्छई पहुं नमिओ । एयाए नयरीए पच्चक्खं सग्गभूयाए ॥५॥ जायवकुलस्स सामी कम्हाहिंतो भविस्सइ विणासो । केण निमित्तेणं वा भयवं तत्तो समाइसइ ॥६॥ इत्थत्थि परिव्वायगवेसो दीवायणो गुहावासी । सो मज्जापाणमत्तेहिं सव्वसंबाइकुमरेहिं ॥७॥

बाढं संताविय ताडिओ वि संतो सरोसमावहिही। अन्नाणकट्ठकारी बारवइखयंकरो होही ॥८॥ जायवकुलस्स अंतं सो नेव करिस्सई नियाणाओ। भाया जराकुमारो तुब्भाणं घायगो होही ॥९॥ एवं सुच्चा कन्हो सपरियणो अप्पणो घरं पत्तो। बहुसोगमुव्वहन्तो संसाराणिच्चयं मुणइ ॥१०॥ घोसावइ नयरीए भो भो निसुणेह नयरवासिजणा। सिग्घं मइराइसुरा समुज्झियव्वा गिरिसिलासु ॥११॥ सिरिनेमिणा पभणियं जहा महामज्जपाणउम्मत्ता। जायवरायकुमारा खलीकरिस्सन्ति खेल्लंता ॥१२॥ दीवायणं तओ सो कुविओ दारावइं विणासहिही। रायाएसेण तओ मज्जं कायंबगवणम्मि ॥१३॥ गुविलसिलाकुंडेसुं पक्खित्तं तं च मासछक्केणं। अइसुट्ठुरसं जायं पसन्नहिमसीयलं साउ ॥१४॥ इत्तो संबकुमारा सेवगपुरिसेण तं सुराकुंडं। दिट्ठं चिरकालेणं इट्ठं आसाइयं तत्तो। १५॥ दिट्ठा तेण मयगुणा तप्पाणुम्मत्तया परिभमंता। सीयलवणगहणेसुं रमंति सिच्छाइ हरिणीहिं ॥१६॥ संबकुमारो तेणं विन्नत्तो आगएण तत्थ लहुं। पाऊण महुरमज्जं विचिंतियं अ अप्पणो चित्ते ॥१७॥ हा न हु जुत्तं एगागिणो य मह किंचि सुक्खमणुभविउं। दंसेमि भाउयाणं कायंबरिभरियकुंडाइं ॥१८॥ तेणाणीय कुमारे सयमुत्तं भो पिएह सिच्छाए। छम्माससमुवलद्धं मज्जरसं सीयलं सुरहिं ॥१९॥ तव्वयणायत्तणओ अमयरसासित्तय व्व ते जाया। अपियंसु काविसायणमसण व्व बुहाउरा पुरिसा ॥२०॥ तत्तो नच्चन्ति इमे रमन्ति गायन्ति तह य कुद्दन्ति। आलिंगन्ति परोप्परमिमेहिं दीवायणो दिट्ठो ॥२१॥ जंपियमिमेहिं निट्ठुरगिराए एसो हु नेमिनाहेण। बारवईखयकारी आइट्ठो अज्ज सो दिट्ठो ॥२२ निक्कारणोऽम्ह वेरी एयं ताडेह किं न तज्जेह। इह भणिउं ते लग्गा पहणेउं लट्ठिमुट्ठीहिं ॥२३॥ ताए हओ जा पडिओ

भूवलए ताव ते सयं नट्ठा । जत्थेरिसा कुमारा तीए खयकारगो अहयं ॥२४॥ इइ रिसिवयणं निसुणिय ससज्झसा लहुयरं कुमारा ते । सव्वे वि तक्करा इव बारवइपुरं लहु पविट्ठा ॥२५॥ तं सुणिय वासुदेवो चिंतइ दुद्दंतया कुमाराणं । विद्धीयमउम्माओ अदीहदंसित्तमेएहिं ॥२६॥ अह गंतूण पसन्नो कत्तुं जुत्तो तवस्सिओ एसो । पसरंतो
॥२९५॥ रोसभरो दुव्वारो वणदवु व्व सिया ॥२७॥ तो बलभद्दसमेओ समेच्च कण्हो इमं मुणिं भणइ । तुम्हे महाणुभावा अवराहं खमह अम्हाणं ॥२८॥ बहुएहिं वि भणिएहिं मणयं पि न एस संतिमावन्नो । तो बलभद्देणुत्तं किं कज्जइ हवइ तं होउ ॥२९॥ जइ तेहिं मज्जपाणं न कयं होज्जा तओ कहं हुंतो । जाव नयरीए खओ तम्हा मज्जं विवज्जन्तु ॥३०॥

॥ इति मद्यपानोपरि दृष्टान्तः ॥

अथ विषयविषये सत्यकिदृष्टान्तः प्ररूप्यते—

॥ सत्यकिकथा ॥

खाइयसम्मत्तधरो परतित्थुच्छप्पणाविणासपरो । जं सच्चइ भमइ भवं विसयासेवा तहिं हेऊ ॥१॥ परिवायपेढालो ॥२९५॥
विज्जासिद्धो अईव सुपसिद्धो । विज्ज दाउं वंछइ स बंभयारिणि सुयम्मि निच्चं ॥२॥ चेडयनिवस्स पुत्ती सुज्जेट्ठा चरम-जिणसमीवम्मि । सा पव्विज्जिय दिक्खं विहरंती तेण अह दिट्ठा ॥३॥ तज्जोणीए विरियं खिवेइ धूमं वियट्ठिउं सहसा । संभूए गब्भे अह विन्नायं साहुणीहिं इमं ॥४॥ तो परमत्थे कहिए पच्छन्नं ठाविया सुसड्ढगिहे । तत्थ य सुयं पसूया

कमेण संवड्ढए बालो ।।५।। सह साहुणीहिं पत्तो स अन्नया वीरनाहनमणत्थं । पुच्छइ य कालसंदीवगो य मह मरणमीस
कत्तो ।।६।। अक्खइ पहू इमाओ सच्चइसिसुणो गमित्तु तप्पासे । भासइ रे तुममसि मज्झ घायगो इय हणइ पाए ।।७।।
संपत्ते तारुण्णे हरित्तु परिवायगेण सिक्खविओ । विज्जाउ रोहिणीए स पञ्चवारं हओ तीए ।।८।। छट्ठम्मि भवे छम्मासाऊ
सो रोहिणि स सिज्झति । नेच्छइ भवि सत्तमए तं साहेउं समाढत्तो ।।९।। चियगाइ सवं खिविउं तं पज्जालित्तु तो तदुवरि
च । पत्थरिय अल्लचम्मं वामंगुट्ठेण जलणबहिं ।।१०।। तम्मेवं कुणमाणे कालयसंदीवगो समेच्च तया । पक्खिवइ इंध-
णाइं सत्तदिणेहिं गएहिं तओ ।।११।। सयमेव देवयाऽह पसन्नयाऽहं करेहि मा विग्घं । सिद्धा एयस्स ध्रुवं कत्थंगे
संविसामि भण ।।१२।। तेण णिलाडे दंसियमेत्थाविट्ठा विलं अभू तत्थ । नेत्तं कयमीईए तुट्ठाए तो तिनेत्तक्खो ।।१३।।
धरिसिय अणेण समणी तत्तो तेणं हओ य पेढालो । तत्तो रुद्दभिहाणो पसिद्धओ भुवणमज्झम्मि ।।१४।। अह मारणि-
कत्ताणं मुणिउं सो कालदीवगो नट्ठो । उड्डाहो तमणुगओ विउव्विय तेण तिपुरमहो ।।१५।। तद्दहु तेण खणा पायाले
नट्ठओ वि सो हणिओ । अह विज्जचक्कवट्टी संजाओ सव्वई भुवणे ।।१६।। वंदित्तु तित्थनाहे तिसंझमेसो पकुव्वई नट्टं ।
रमइ तओ सक्केणं महेसरक्खो त्ति नाम कयं ।।१७।। धिज्जाइजाइरोसावेसाओ ताण कन्नकाओ सो । विद्धंसइ भूवाणं रम-
णीओ रमइ सिच्छाए ।।१८।। सीसजुयमस्स जायं नंदी नंदीसरो य सुपसिद्धं । पुप्फगविमाणमेसो आरुहिउं चरइ सव्वत्थ
।।१९।। अह उज्जेणिपुरीए स चंडपज्जोयरायरमणीओ । अंतेउरम्मि धंसइ सो सिवदेविं विणा सव्वा ।।२०।। तो पज्जोओ
चिंतइ दुट्ठो खयरो कहं खु हंतव्वो । अंतेउरीउ सव्वा एएण विडंबिया अहहा ।।२१।। तत्थेवासी वेसा उमा य नामेण

रूवगुणरम्मा । तीए उत्तं अहयं वसीकरिस्सामि तं सामि ॥२२॥ तो भूवइणाऽऽदिट्ठा सा तं दट्ठूण नभसि आयंतं ।
अइसुरहि अगरधूवं करेण तस्सम्मुहं कुणइ ॥२३॥ सो अन्नया नहाओ उत्तिण्णो तीए चंदसालाए । तक्करगयांबुयद्द-
यमासी वीकोसमह मुउलं ॥२४॥ दिन्नं संकुइयं से हत्थे तीए सरोरुहमिमो तो । आह कहं इय किज्जइ सा भणई
एरिसो तमसि ॥२५॥ वियसियपउमसरिच्छा अम्हारिसया रमेसि नो जम्हा । लज्जालुआ महेला अवराहो माणसि
वराई ॥२६॥ तो रंजिओ स तीए सद्धिं रत्तिं ठिओ तदावासे । सो अन्नया इमीए पुट्ठो विज्जाओ तुह पासे ॥२७॥
न हु हुंति कयावि इमो भणइ जया मेहुणं खु सेवेमि । जाणाविओ नरिंदो तेणुत्तं मारियव्वो सो ॥२८॥ तं चासि रक्ख-
णीया तप्पच्चयहेउ मुयरदेसम्मि । तीए पत्तं ठविउं तं छिन्नं सुहडखग्गेणं ॥२९॥ रन्ना भडाण भणियं तुम्हेहिं मिहु-
णगं पि हंतव्वं । इय वुत्तं पच्छन्ना सुहडा संठाविया तत्थ ॥३०॥ आसत्तो सह तीए तेहिं विणिवाइओ स खयरिंदो ।
वसणासत्ता सत्ता किं किं न लहन्ति खलु दुक्खं ॥३१॥ तस्सीसो नंदिसरो विज्जाहिं अहिट्ठिओ तओ गयणे ।
उप्पाडित्तु सिलं सो एवं वुत्तुं समाढत्तो ॥३२॥ तो राया भयभीओ कयअंजलिसंपुडो फुडं भणइ । मह खमहिक-
वराहं तो सीसो एवमुल्लवइ ॥३३॥ जइ जुम्ममेय रूवं पुरे पुरे ठविय चेइयगणेसुं । पूएह तो अवस्सं मुयामि ॥२१७॥
तुम्हाणं नन्नह भो ॥३४॥ तं पडिवन्नं रन्ना पुरे पुरे कारियाइं भवणाइं । सिवजलहरिरूवाइं साचइउप्पत्ति
एरिसिया ॥३५॥ विसयासत्ताण फलं मुणित्तु नियमाणसम्मि भव्वजणा । विसयविरत्ता होउं सुहेण चिट्ठन्तु
अइसुहिया ॥३६॥

॥ इति विषयोपरि सत्यकिकथानकम् ॥

अथ कषायोपरिसुभूमचक्रिप्रबंधः—

## ॥ सुभूमचक्रिकथा ॥

श्रीवाचनाचार्यवसन्तसोमध्वजप्रसादोऽस्तु ममानुलोमः । यतः सुभूमाष्टमचक्रिवृत्तं करोम्यनुप्रासविराजिवृत्तम् ॥१॥ आस्ते **वसन्ताद्यपुरं** पृथिव्यां समादधानं श्रियमत्र दिव्याम् । एकोऽस्ति **तत्राग्नि**कनामबालः कान्तारवर्तीव करी करालः ॥२॥ सार्थेन सार्धं व्रजति स्म डिम्भः स दूरदेशाय कदाऽप्यदम्भः । भ्रष्टस्ततः कर्मवशेन मूढः स्रोतोऽम्भस वृक्ष इवा प्ररूढः ॥३॥ जयाभिधानस्य स तापसस्य प्रापाश्रमं तीव्रतपोरसस्य । संवर्धितस्तेन तनूजवत्स स्वीयाश्रमे गोपतिनेव वत्सः ॥४॥ ततोऽस्य जज्ञे **जमदग्नि**नाम प्रतप्यते स्मोग्रतपांसि नाम । जातः प्रसिद्धः सकलेऽपि विश्वे निधेः समुल्लास इवात्र निःस्वे ॥५॥ इतश्च **वैश्वानर**नामधारी सम्यक्त्वशाली मुनिभक्तिकारी । धन्वन्तरिस्तापसभक्तिलीनः सुरश्च मिथ्यात्वपथाध्वनीनः ॥६॥ आत्मीयकात्मीयकशासनस्य द्वौ पक्षपातेन शुभाशुभस्य । मिथः समालोचयतः प्रधानां कुर्वः परीक्षां मुनितापसानाम् ॥७॥ वैश्वानरः प्राह सुसाधुनिष्ठः सर्वेषु योऽस्माकमहो निकृष्टः । सर्वप्रधानोऽथ च युष्मदीयः स्याद्यः स एवात्र परीक्षणीयः ॥८॥ अथास्तिकः **पद्मरथो** विनीतश्चम्पां प्रबुद्धो मिथिलापुरीतः । गुर्वन्तिके प्रव्रजनाय चम्पामेत्युत्तमां द्वादशदेवजन्याम् ॥९॥ स सिद्धपुत्रद्वयरूपवद्भ्यां पृष्ट्वेत्यमूभ्यां भणितः समुद्भ्याम् । तारुण्यमाभाति तवातितारं तद्भुङ्क्ष्व नानाविधभोगभारम् ॥१०॥ ये जर्जराङ्गा जरसा पुमांसस्त एव दीक्षाध्वनि तस्थिवांसः । अनौचि-

तीर्थं त्वयका स्वबुद्ध्या प्रारभ्यते किं लसता समृद्धया ॥११॥ श्राद्धोऽवदद्यो भुवि भोगलालसः शिवश्रियः साधनकारि बालिशः । व्यर्थं नयेद्यौवनमत्र काकिनीं क्रीणाति कोट्या स कुकीलिदायिनीम् ॥१२॥ यथा न भूमौ पतितः करेणुः सक्तो युधे स्यादिव जीर्णवेणुः । तथा जराजर्जरगात्रयष्टिर्न दीक्षया कर्मदलं पिनष्टि ॥१३॥ ऊचे सुरस्तेऽङ्गलताऽतिसारा दीक्षा पुनः कर्कशवज्रधारा । नद्युज्यते ते न चरित्रभारः स्यात्कुष्टकुन्मुद्गरजः प्रहारः ॥१४॥ श्राद्धोऽवदद्वा शकुनेः पतत्रं मृदोः शरीरस्य फलं चरित्रम् । शीर्षे न माला मृदुमल्लिकायाः किं बध्यते भोगिमतल्लिकायाः ॥१५॥ मृद्व्या नवायाश्च वपुर्लतायाः नान्यत्तपस्तः फलमुच्छ्रितायाः । आस्वादतोऽन्यश्च फलं वरस्य प्रपक्वमाकन्दफलोत्करस्य ॥१६॥ न प्राप्यते मोक्षसुखं प्रचण्डं शरीरसौख्येन जनैरखण्डम् । क्षोदं विनोर्व्या अपि रत्नखानेर्न रोहणाद्रौ फलमस्ति जाने ॥१७॥ प्राहामरो भद्र लसद्विवेकं पूर्वं समुत्पादय पुत्रमेकम् । पिण्डप्रदानेन विना मृतस्य गतिर्भवित्री न तवोत्तमस्य ॥१८॥ श्राद्धोऽप्यवोचद्यदि नाम जातैः स्यात्स्वर्गसंसर्ग इहाङ्गजातैः । स्वर्गस्तदा हस्तगतः शुनीनां स्याच्छूकरीणां चटकावलीनाम् ॥१९॥ निवेद्यते यच्च मद्गितण्डैर्गतिः पितॄणां सुतदत्तपिण्डैः । किं तर्हि नान्यत्र कृताम्बुसेकैरन्यद्रुवृद्धिः क्रियतेऽविवेकैः ॥२०॥ पिण्डोऽग्निमध्ये किल हूयते यः स एव भस्मत्वमुपैत्यमेयः । प्राप्नोति तृप्तिं द्विज एव पिण्डे द्विजन्मनो वा पतितं पिचण्डे ॥२१॥ पिण्डेन पुत्रप्रहितेन तृप्ताः कथं भवेयुः पितरोऽतिगुप्ताः । सम्बन्धतस्ते च कुतः कुगत्याश्रिता भवेयुः सहिताः सुगत्या ॥२२॥ ये स्युः पुनः संसृतिशर्मगृद्धाश्चिलीमभोगा हि विषैर्निरुद्धाः । शिक्षा त्वियं तेषु निरूपणीया न चेत्स्वपार्श्वे परिरक्षणीया ॥२३॥ इत्थं स मायामरवाक्ययुक्त्या श्रेष्ठी न भिन्नः शिखरीव शक्त्या । वात्याभि-

रक्षुब्धमिवाद्रिराजं तं पश्यतस्तौ स्थिरधर्मभाजम् ॥२४॥ ततः पुनस्तौ बहुकष्टधाम्नः समीपमाप्तौ जमदग्निनाम्नः । 
आतापनाकष्टकृतादरस्य स्फुरत्तनूत्सर्गधुरन्धरस्य ॥२५॥ सुपर्वमार्गाच्छलतः कुमारं विधाय नव्यं कपटाभ्यु-
पायम् । पक्षिद्वयीरूपमकार्यभाभ्यां तत्कूर्चकेशेषु समेत्य ताभ्याम् ॥२६॥ कदाचिदुक्ता स्ववधूः खगेन मनुष्यवाण्या
॥३००॥ प्रमदाश्रितेन । व्रजाम्यवश्यायगिरिं प्रियेऽहं कार्यात्समेष्यामि पुनः स्वगेहम् ॥२७॥ तदा तयाऽभाणि ततस्त्वमन्यस्त्री-
सक्त एष्यस्यथवा न वन्य । कः प्रत्ययो मद्धृदि तावकीनस्तामाह तावद्विहगोऽप्यधीनः ॥२८॥ भ्रूणर्षिगोस्त्रीद्विजप-
स्वहत्यापापैर्विलुप्ये यदि तूर्णगत्या । आयामि नार्धप्रहरान्तराले त्वदीयपार्श्वे प्रमदेन बाले ॥२९॥ योषाऽथ तं प्रोक्त-
वती प्रभो भृशं प्रत्येमि कुर्याः शपथं यदीदृशम् । ऋषेर्यदेतस्य गरीयसांहसा लुप्येऽहमज्ञानधरस्य रंहसा ॥३०॥ उक्तं
शकुन्तेन तदेत्यहं श्रिये क्रिये न हीत्थंकृशपथं पुनः प्रिये । श्रुत्वाऽमुनेति प्रतिघेन भूयसा पाण्योर्वृतं पक्षियुगं बलीयसा
॥३१॥ पृष्टं च पापं किमिहार्जितं मया प्रव्रज्यया रे चिरकालमेतया । यत्पश्चपापेभ्य इदं विशिष्यते निवेद्यमेतन्न पुन-
र्यथेष्यते ॥३२॥ उक्तं खगाभ्यामथ रुष्यसि त्वं मा भो महर्षे यदपास्य सत्त्वम् । पुत्रोज्झितः प्रव्रजितः कुमारस्ततः
कथं नासि सपापभारः ॥३३॥ उक्तं स्मृतौ यत्र सुतोज्झितस्य स्वर्गो गतिश्च प्रभवेन्नरस्य । गार्हस्थ्यधर्मं परिपाल्य पूर्वं
पश्चाज्जनः स्वर्गमुपैत्यपूर्वम् ॥३४॥ **लोकोक्तिरप्यस्ति "तिखुड्ड जाया न जेहि पुत्ता गिहवासि जाया । न रोपिया हत्थि-** 
**हि जेहि अंबा न सीचिया पीपल जेहि लंबा"** ॥३५॥ श्रुत्वेति सत्त्वाद्धृदयं चचाल क्षणान्महर्षेर्मरुतेव सालः । ताभ्यां
रतावप्रथि धर्मपूरः प्रोत्कण्ठिते हृद्यलपन्मयूरः ॥३६॥ स्त्रीयाचनोद्युक्तमनास्ततः परं स तापसोऽगान्मृगकोष्ठकं पुरम् ।

अभ्युत्थितो राड् जितशत्रुनामकस्तत्रावदत्तं विहितप्रणामकः ।।३७।। ऋषे त्वदीयागमने निदानं किमत्र सोऽथाह वचः
प्रधानम् । लावण्यसंपूरितकन्यकानां त्वमाकरोऽसि क्षितिपोल्बणानाम् ।।३८।। एकां कनीं देहि मम प्रवीणां राज्ञापि
शापात्प्रबलादृषीणाम् । प्रोक्तं भयार्त्तेन शतं कनीनां ममास्ति तत्पश्य कलावतीनाम् ।।३९।। त्वामीहते या तव साऽस्तु
नारी निशम्य सोऽपीति किलाविचारी । प्रत्येकतः प्रार्थयति स्म गत्वा ललाटपट्टेऽञ्जलिमाशु धृत्वा ।।४०।। नारी नृणां
मोहनवल्लिरिष्टा कृता विधात्रेक्षुलतेव मिष्टा । वयःस्थवद्यां प्रवयास्तपस्वी कामातुरः कामयते मनस्वी ।।४१।। ताभिस्तु
तं वीक्ष्य तदा पिशाचाकारं जराजीर्णतनुं स्ववाचा । प्रोक्तं स्फुरद्दूपरमान्विताभिर्विधाय निष्ठ्यूतविधिं समाभिः ।।४२।।
विरूपरूपेण जुगुप्सनीयः सर्वस्य दृष्ट्याऽप्यविलोकनीयः । स्त्रीलोलुपस्त्वं शिरसि स्थितेभ्यः किं लज्जसे नो पलितेभ्य एभ्यः
।।४३।। रुषाऽमुनाऽदायि तदैव शापः पूष्णेव शुक्रप्रभवेन तापः । कन्यासमूहः समकारि कुब्जः ख्यातः स देशोऽस्त्यपि
कन्यकुब्जः ।।४४।। अथो विलक्षास्यवता कनिष्ठा निर्गच्छता राजसुता च दृष्टा । इतस्ततो बाल्यवशाद्भ्रमन्ती द्वारेऽमुना
रेणुभरे रमन्ती ।।४५।। प्रोक्तं तदैतेन च मातुलिङ्गं तस्यै प्रदर्श्यैकमतीव चङ्गम् । किमिच्छसीदं सहसा स्वहस्तः पसारित-
स्तत्र तया प्रशस्तः ।।४६।। दत्त्वा फलं तां स निनाय जायां कट्यां समुत्पाट्य मुनिर्निजायाम् । पित्रा स्वपुत्र्यः प्रहिता
बुधत्वात्तस्मिन् बहिर्गच्छति शिक्षयित्वा ।।४७।। कुब्जा भणन्ति स्म तदग्रतस्ता यत्सालिकास्तेऽथ वयं समस्ताः । मुक्त्वे-
दृशीर्नस्तव नैव युक्तं गन्तुं मुने सोऽप्यशृणोत्तदुक्तम् ।।४८।। निर्गाय ताः सज्जतनूरवामः सोऽपि स्वकीयाश्रममाजगाम
तत्राश्रमे यौवनमाप बाला सा रेणुकाख्या शशिदीप्रभाला ।।४९।। विवाह्य तस्यै समये सवित्तां गोनां (गवां) स

केन दत्तम् । हर्षादिदुःखानवतीयमुक्ता भर्त्रा कदापीत्यनुरागयुक्ता ॥५०॥ ब्रूहि प्रिये ब्रह्मचरुं त्वदर्थं प्रसाधयाम्येकमहं समर्थम् । समस्तभूदेवशिरोमणीकः स्यात्ते यथैकस्तनयोऽग्रणीकः ॥५१॥ एवं कुरुष्वेति तयोक्तमस्य स्वसा परं मेऽस्ति गृहे यदस्य । **अनन्तवीर्यस्य** नरेश्वरस्य श्रीहस्तिनागाख्यपुरस्थितस्य ॥५२॥ क्षत्राङ्गजोत्पत्तिकृतेऽत्र तस्याः क्षात्रं चरुं साधय चापरस्याः । चरुद्वयं तेन कृतं तदुक्त्या विचिन्तितं रेणुकयेति युक्त्या ॥५३॥ जाताऽपि राज्ञः सदने सुताऽहं मृगीव वन्यामलभं विवाहम् । मा स्यात्सुतो मद्वदरण्यसक्त इत्येतया क्षत्रचरुः स भुक्तः ॥५४॥ स प्रेषितो विप्रचरुर्भगिन्यास्तया नसोगन्ध इवाम्बुजित्या । रामोऽङ्गजन्माऽजनि तापसीतः स **कार्त्तवीर्यश्च** महीड्जनीनः ॥५५॥ कान्तारचारी शिखरीव जामदग्न्योऽवरीवृध्यत एष **रामः** । तत्राययौ कोऽपि वने नभोगः सज्जीकृतो रेणुकया सरोगः ॥५६॥ कुठारविद्याऽथ तदङ्गजस्य प्रादायि रामस्य तु तेन तस्य । रामेण विद्या शरकक्षगेण प्रसाधिता सिद्धिमिता क्षणेन ॥५७॥ कर्तुं स्वसुः स्वं मिलनं कदाऽपि प्राप्ता पुरं सा ननु रेणुकाऽपि । अनन्तवीर्येण समं नृपेण त्रपोज्झिता तत्र रता क्रमेण ॥५८॥ वाताहताश्वत्थदलोपमा वा निरीक्ष्यते स्त्री चपलस्वभावा । ईदृश्यनाचारविधौ यदा स्याद्राजोद्यतस्तर्हि परे न हास्याः ॥५९॥ शच्यां तु सत्यामपि रूपवल्ल्यां पुरन्दरः सेवितवानहल्याम् । सति प्रदीप्ते हृदये स्मराग्नाविष्टाशुभे वेत्ति न रागभाग् ना ॥६०॥ एवं चिराय प्रतिचर्य चौर्यं तयोर्द्वयोः संदधतोः स्वशौर्यम् । जज्ञे सुतः साऽपि च जातलज्जा न स्वाश्रमं याति कुकर्मसज्जा ॥६१॥ तत्राथ गत्वा जमदग्निरेतां समानयामास सुतोपवेताम् । रामेण सा विश्रुतदुश्चरित्रा स्वपर्शुना तत्र हता सपुत्रा ॥६२॥ श्रुतं भगिन्याऽपि हता कृतक्रुधा रामेण माता किल रेणुकाभिधा । अनन्तवीर्यस्य

नरेशितुस्तया विज्ञापितं तच्चरितं तदा प्रिया ॥६३॥ गत्वा ततस्तेन तदाश्रमस्य व्यधायि भङ्गः प्रभुनाऽखिलस्य ।
धेनुर्गृहीत्वेति पुराय यावद्रामोऽप्यदो वृत्तमबुद्ध तावत् ॥६४॥ स धावितः कैटक एष भूपतेरनन्तवीर्यस्य सधेनुमन्तनेः ।
चिच्छेद शीर्षं फलवच्च पर्शुना कृशानुकीलाकुलनिर्यदंशुना ॥६५॥ पट्टेऽस्य राजाऽजनि कार्त्तवीर्यः सुतः स ताराप्रमुखा
जनीयः । वत्ते घनास्तस्य जगाम कालः कियानपि स्वेष्टसुखैर्विशालः ॥६६॥ अथामुना मज्जनकस्य हन्ता रामोऽयम-
स्तीति कृता कुचिन्ता । जघान गत्वा जमदग्निमेनं रामोऽप्यमुं मारितवांस्तदेनम् ॥६७॥ जग्राह राज्यं स्वयमस्य राम-
स्ताराऽथ देव्याश्रममाजगाम । आपन्नसत्त्वा खलु तापसानां भीत्या प्रणष्टवा धृतसाहसानाम् ॥६८॥ सा तापसैस्तत्र
दयासमुद्रैर्विज्ञाततत्त्वैः सरलैः सभद्रैः । संरक्षिता स्वाश्रममध्यलीना स्वगर्भपोषं तनुते कुलीना ॥६९॥ क्रमेण पुत्रं सुषु-
वेऽतिचङ्गं पपात चोर्व्यां सहसा तदङ्गम् । ददश्यते स्मैष रदैर्धरित्रीमतः सुभूम नमधात्सवित्री ॥७०॥ स तत्र कामो-
पम एधमानः संनिष्ठते तापसगोप्यमानः । अथैक्षत क्षत्रियमेष यत्र रामस्य पर्शुर्ज्वलति स्म तत्र ॥७१॥ अस्यान्यदा
प्रज्वलितः कुठारस्तदाश्रमासन्नगतस्य तारः । अयं मुनीन् पृच्छति तत्र काले कः क्षत्रियो भो भवतां विचाले ॥७२॥
तैरुक्तमस्मै वयमेव पूताः स्मः क्षत्रियोद्दामकुलप्रभू(सू)ताः । अक्षत्रियाङ्कार्यय सप्तवारं रामेण भूः प्राप्य सुराज्य-
भारम् ॥७३॥ स्थाले हृतक्षत्रियवक्त्रदाढा एकत्र संस्थापितवान् स गाढाः । इतोऽस्मिन् विद्याधरमेघनादः प्रोद्दाम-
विद्याबललब्धमादः ॥७४॥ नैमित्तिकेनोक्तममुष्य पद्मश्रियः सुताया स्तव भाग्यसद्म । चक्री सुभूमाभिध एव भावी बला-
भिरामो रमणः प्रभावी ॥७५॥ ततः प्रभृत्येष सुभूमसेवासमुद्यतोऽभूद्रजनौ दिने वा । विद्याभृता खण्डितविघ्नजाल-

॥३०३॥

स्तत्रैधताभ्यस्तकलः स बालः ॥७६॥ रामोऽप्यपृच्छत्स्वमृतेर्निमित्तं नैमित्तिकात्सोऽपि तदाऽवदत्ताम् । यो भोक्ष्यतेऽमूः
परमान्नभूता दंष्ट्रास्त्वदीयासनगः प्रभूताः ॥७७॥ ततो भयं भावि तवेति मत्वा तज्ज्ञानचिह्नं हृदये विधृत्य । सिंहासनं
स्थापितवान् स सत्रागारान्तरे स्थालतरेण सत्रा ॥७८॥ ये स्युर्मनुष्या अतिदीनदुःस्था रोगातुरा निष्पतयः पथस्थाः ।
सत्रालये तत्र च तेऽशनाय क्षणात्समायान्ति मुदं निधाय ॥७९॥ तेनोक्तमारक्षकमानवानां पीठे स्थितिं योऽत्र सृजे-
त्प्रधानाम् । स मारणीयः सहसा भवद्भिः खड्गप्रहारैर्बहुशौर्यवद्भिः ॥८०॥ अथो सुभूमेन कदाचिदम्बा पृष्टा सुशिक्षा-
विधिनिर्विलम्बा । एतद्वनस्थाप्युडुपप्रमाणः किमस्ति लोकोऽयमथाप्रमाणः ॥८१॥ तदा तयोक्तः सकलोऽप्युदन्तो वप्त्रा
समं रामकृतोग्रमन्तोः । श्रीहस्तिनापूर्वरतोऽत्र नंष्ट्वा समागताऽहं स्वमृतिं हि दृष्ट्वा ॥८२॥ प्रच्छन्नवृत्त्या स्थितया त्वमत्र
मया प्रसूतो गहनेषु पुत्रः । सुगुप्तवृत्त्यैव हि तिष्ठ तत्त्वं मा रामपर्शोर्लभसेऽतिथित्वम् ॥८३॥ श्रुत्वेत्युदन्तं हृदि दह्य-
मानस्तैस्तापसैरप्यतिवार्यमाणः । ततो विनिर्गत्य ययावहंयुः स हस्तिनापूःप्रवरे शुभंयुः ॥८४॥ आहारवाञ्छां हृदये च
धृत्वा सत्रालयान्तः स्थितवान् स गत्वा । न यावदाप्नोत्यशनं विषण्णस्तत्रासने तावदसौ निषण्णः ॥८५॥ मुक्त्वा तदा-
क्रन्दरवं प्रणेशे कुव्यन्तरी तस्य पदप्रवेशे । भोक्तुं प्रवृत्तः परमान्नरूपा दंष्ट्राः स ता मिष्टसितासरूपाः ॥८६॥ अत्रान्तरे
तीक्ष्णतरैः कृपाणैरयोमयैर्मुद्गरमिश्रबाणैः । तं मारयन्ति स्म दृढप्रहारैरारक्षकाः कुन्तकुठारवारैः ॥८७॥ विद्याभृता
तेन तदा समग्रा विद्याबलाभिर्दलितास्त उग्राः । उपेयिवांस्तत्र तदा स्वयं स ज्ञात्वेति रामः सरसीव हंसः ॥८८॥ रथा-
श्वहस्त्यादि विमुक्तदैन्यं सार्धं गृहीत्वा चतुरङ्गसैन्यम् । सेव्यः समुद्घाटितखड्गलक्षैः सन्नद्धबद्धैः सुभटैः सुदक्षैः ॥८९॥

योद्धुं प्रवृत्तः स्वयमेव रामः शराशरि भूविनिविष्टभामः । विद्याभृता तेन मर्म स दुष्टः काकोदरो वा नकुलेन पुष्टः ॥९०॥ रसोत्कटं पायसमेध भुक्त्वा तावत्सुभूमोऽपि भयं हि भुक्त्वा । समुत्थितस्तृप्तिमितश्च योधान् ददर्श युद्धेन कृताध्वरोधान् ॥९१॥ निभाल्य रामोऽपि पलायमानं स्वकीयसैन्यं शरणैकतानम् । पर्शुं समुत्पाटितवान् करालं ज्वाला-
२०५॥ जटालं स्वकरेण कालम् ॥९२॥ गभस्तिमालीव गुरुप्रतापस्तदोपशान्तिं सुतरामवाप । रामस्य पर्शुः स कुमारदृष्ट्या दुर्धृ-
ष्यदावाग्निरिवाब्दवृष्ट्या ॥९३॥

कुमारेणोक्तमन्योक्त्या—

अभ्युन्नतं गर्जितमर्जितं यद्विद्युल्लतोद्योतकृतोर्जितं यत् । दृष्टोऽधुना तेऽम्बुद हे तदन्तः पट् पश्च यत्सन्ति कणाः श्रवन्तः ॥९४॥ भुक्तिं विधायाथ स पायसस्य स्थालं यदोत्पाटयति स्म शस्यः । अकारि पार्श्वस्थितदेवताभिश्चक्रं तदा तद्गुणरञ्जिताभिः ॥९५॥ स निर्यदुद्दामकृशानुकीलं धारालमेतत्परिपूज्य नीलम् । चिक्षेप तस्याभिमुखं प्रयस्य स्वस-न्मुखं धावनतत्परस्य ॥९६॥ विशालतालीफलवत्तदा तद्भूमौ च रामस्य शिरः पपात । चक्रस्य घातादथ पुष्पवृष्टिर्मु-क्ताऽन्तरिक्षादमरैः सतुष्टैः ॥९७॥ मरुत्पथे दुन्दुभिदिव्यनादं प्रकाश्य संपाद्य पुनः प्रसादम् । उद्घोषयित्वाऽनिमि-षैर्यवर्तीत्यसौ जयत्वष्टमचक्रवर्ती ॥९८॥ षट्खण्डभूद्भारतनामधेयं प्रसाधितं ह्यन्यनृपैरजेयम् । प्राप्ताऽमुना चक्रिपद-व्यवार्या लक्ष्मीवता रूपवतीव भार्या ॥९९॥ द्वात्रिंशदुत्तमनरेन्द्रसहस्रशाली स ग्रामषण्णवतिकोटिपदातिमाली । लाव-ण्यभृच्चतुरविष्ठितपद्मिनारीरञ्जत्सहस्रपरिशोभितपार्श्वधारी ॥१००॥ रत्नैश्चतुर्दशमितैर्नवभिर्निधानैर्युक्तो निषेवितपदः प्रवरैः ॥३०५॥

प्रधानैः। द्वासप्ततिस्फुटपुरोरुसहस्रशास्ता जज्ञे स येन निखिला द्विषतोऽप्यपास्ताः ॥१०१॥ चञ्चद्बलश्चतुरशीतिगजा-श्वलक्षप्रोद्यद्रथप्रथितराज्यबलैरलक्षः। अंसस्थषोडशसहस्रसुयक्षपूज्यः क्ष्मामण्डलप्रथितनामविराज्यभूद्यः ॥१०२॥ त्रिः सप्तकृत्वः किल रत्नगर्भा संशोधयित्वा गतवेदगर्भा। विनिर्मिता रामकृताद्विरोधादेतेन ही चक्रभृताऽप्यबोधात् ॥१०३॥ इत्थं द्वयोरत्र सुभूमरामयोः सगोनयोरप्यधिकाभिमानयोः। कषायतो जातवती गरीयसी निःस्नेहता कर्मगतिर्बलीयसी ॥१०४॥



॥ इति श्रीसुभूमचक्रवर्त्तिप्रबन्धः ॥

अथ निद्राधिकारनिदर्शनम्—

## ॥ पुंडरीक कथा ॥

तेणं कालेणं तेणं समएणं इत्थेव मणुअजाइ महीए **विजयपुरं** नयरमासि। तत्थ कयाणंदो **सुणंदओ** नाम सुस्सावओ महड्ढिओ वसइ। तस्स महुरारावसारिया **धन्ना** नामं भारिया। तेसिं अइसयजससुरहिवासपुंडरीओ **पुंडरीउ** त्ति विस्सुओ सुओ आसि। तस्संगं अईव चंगं, मई अ सव्वसत्थेसु संपत्तपरिस्समा। अप्पेण वि कालेण तेण नियवसमाणीयाओ महिलाउ व्व सयलाओ कलाओ। अओ परं मज्झ अप्पमेव अज्झेयव्वमिइ चित्तम्मि संतुस्संतो अन्नया कस्स वि साहुस्स पासमागम्म सो पुच्छिउमाढत्तो–"अत्थि कत्थ वि पुणो सत्थे कलाणं महंतो वित्थरो"?। तओ तेणुल्लवियं–"दुवालसंगीए पुव्वेसु अईव वित्थारो, जस्स न केणावि पारो पाविज्जइ"। तओ तेणुत्तं–"पुव्वाणि अपुव्वाणि

जाणि सुव्वंति ताणि कियप्पमाणाणि" ? । तओ साहुणा भणियं–"अहो गुरूणं आपुच्छसु" । तत्तो तेण तेऽवि पुट्ठा । तेहिं साहिओ सव्वो पुव्ववित्थारो । तओ संपन्नं पुंडरीयस्स तदज्झयणे कोउहल्लमतुल्लं, भणिया य तेण गुरुणो–"कया-णुग्गहेहिं तुब्भेहिमम्हाणं पाढेयव्वं पुव्वगयं सुयं" । तओ साहियं गुरूहिं–महाणुभाव ! कयखीकयदिक्खाए बहुदक्खा तप्पढणारिहा, गिहत्था पुण सव्वहा अणरिहा" । तओ तेण वुत्तं–"भयवं दिक्खमवि देह, पच्छा पसन्नचित्तीहूअ
॥३०७॥ पाढेह" । तओ पिउमाऊणमणुन्नाए दिन्ना से निरवज्जा महाविभूईए पव्वज्जा । तओ तेण कयतवोणुट्ठाणेण थेवदिणेहिं चेव धम्मियसत्थाणि पसत्थाणि अहीयाणि । पढियं चासढत्तणेण चउद्दसपुव्वगयमवि सुयमणेण इक्कमणेण । अओ अत्था-णसहाहिट्ठिएण मोहमहाचरडेण बलुक्कडेणऽवि दीहं नीससियं । तओ पुट्ठं सभागएहिं मंतिसामंतेहिं–"किमेयं सामी ?" । तत्तो निट्ठुरकरतलेण नियभालयलमाहच्च वविमेएण सखेएण–"अहो हया अम्हे पगया निहणं, जओ अम्ह सत्तू सयागमो सव्वप्पणासं गहिओ अणेण संसारिजंतुणा, अणेण कहियाणि अम्ह मम्माणि, सव्वोऽवि जणो जाणिस्सइ, तओ समुक्ख-णिस्सति सबालवुड्ढाणमम्हाणं कुलद्दुमकंदाणि । सो कोऽवि एत्थ सभाए न दीसइ जो संसारिजीवं गले गहित्ता पच्छाहुत्तं वालइ" । तओ सखेयमप्पणो नाहं निभालिऊणालस्सवेगल्लंगभंगमुहमोडणजंभाइयसुइब्भंसाइनियपरियरसमन्निया वाम- ॥३०७॥
पासा उट्ठिया रुद्दा निद्दा । तओ तीए हत्थउडं जोडेऊणुत्तं–"देवऽज्जऽवि सदासीमित्तमज्झे तं पि वराए जीवे किमिया-णिमेयारिसो कोवक्कम समुक्करिसो ? कल्लेऽवि किं न दिट्ठो देवेण सो गले गहित्ता इक्कारसगुणट्ठाणसोवाणाओ पाडि-माणो असुच्छमुच्छानिमीलियच्छो संपयं सव्वेट्ठियमवि पासउ देव भवं" । तत्तो सहासमाभासियं मोहेण–"साहु एयं,

गच्छसु वच्छे, सिज्झंतु सिग्घमेव तुह मणोरहा"। तओ पिउणा दत्तसम्माणा पत्ता सा सपरियणा चउद्दसपुव्वधर-गुंडरीयरिसिपासं। अवधारियामिमीए पुव्वमेव तदंगे महालस्सपारवस्सं। तत्तो नामुस्स साहुस्स सुत्तत्थपरावत्तणं सुहावेइ। इगदुगदिणाइकमे थेरेहिं कहमवि पेरिओ संतो निसन्नो गुणणत्थं। तओ निद्दाए सेसो नियपरियरो पेसिओ तस्सगासे। तओ सो लेइ जंभाओ, मोडेइ नियपुट्ठं, उद्धीकुणइ बाहाओ, भंजइ करंगुलीओ, भूयाविट्ठो व्व विक्खिवइ विसंठुलाणि सव्वंगोवंगाणि, उंघाए घंघलीकओ कंठे घेत्तूण पाडिओ भूमीए, भामिज्जइ अग्गओ पिट्ठओ पासाओ सव्वओ। एवं सव्वेहिं पि मिलिएहिं रहेसो गलम्मि गहिओ जहा "अहो भणसु, गुणसु" इय जंपिएण वि थेराण णेगमवि अक्खरं मुहे उच्चरइ। तओ सो साहू सयमेव रत्तीए अईवरत्ताए पंसुलीए व्व पमीलाए बाढमुवगूहिओ संथारयं विणाऽवि जत्थ तत्थ लोट्टिउमाढत्तो छारम्मि रासहो व्व, सुक्ककट्ठो व्व निच्चेट्ठीहूओ, भूयग्गत्थो व्व सिढिली-भूयगत्तो, न किं पि मुणइ, आपच्चूसं सुहं सुयइ, आवस्सयखणेऽवि महाकट्ठमुट्ठाविज्जइ। एवमन्नया थेरेहिं मिलित्ता पासमागच्च उद्धीकओ सुत्तपरावत्तणत्थं गलियारबलीबद्दो व्व। तओ गुणणमारद्धमणेण मुणिणा। तओ नंदीमुहीए विहुरी-किच्च तहा पाडिओ भूमियडे जहा भग्गया गोड्डया, रगडियाइं कोप्पराइं, मत्थयमवि फोडियं, वेरिणीए व्व तीए। एवं जाव न किं वि वयइ मुद्दियमुहु व्व ताव भद्दवयगोमय व्व परिचत्तो थेरेहिं। तओ सो पडिक्कमणवेलाए वि पमीलियच्छिपुडो विडो व्व मक्कडो व्व बहुप्पयारे मुहवियारे करचरणविक्खेवे नवनवे कुणंतो अप्पाणं जणदंसणोवहसणिज्जं कुणइ। मुणियतत्ताणं पि अच्छरिज्जजणओ जाओ—"अहो किमेयारिसो एसो निद्दामुद्दाविदिन्नपसन्नचेइन्नस्स

लज्जाए परावत्तणपरस्स वि गलियं सच्छिद्दघडाउ व्व सव्वमवि सुयसलिलं, विम्हारिया सुहुमत्थवित्थारा"। तओ तस्स सिद्धंतज्झयणज्झायणपरिस्समो सव्वो मोरउल्ला संपन्नो। जहा जहेसो निद्दादरिद्दाउलीभूओ वणिउ व्व तहा निराकंखीहूओ पढणगुणणोवरि, कालकूडाउ वि अइकडुअं मन्नमाणो चउद्दसपुव्वविज्जापरावत्तणं निच्चं पडिओ सुयइ, जाव सव्वमवि सुयं विस्सरिय गयं। तओ गुरुणाऽभिहियं—"अहो वच्छ पुंडरीअ तहाविहुच्छाहवसओ तुमए अज्झयणत्थमेव दिक्खा पवन्ना आसि। तत्तो नरसुरापवग्गसुक्खसंपत्तिसंपायगमागममधीअं तं तहाविहकिलेसलेसेहिं समहिगम्म मुहा कहं
॥३०९॥ हारिज्जइ नरयतिरियदुक्खलक्खजणणीए निद्दाए पारवस्सेण ?"। तेणुल्लवियं तओ—"भयवं को निद्दमासेवमाणो अत्थि ? किं केणऽवि असहमाणेण साहियं तुम्हाणं ? मए कल्लेऽवि एक्कल्लएण गुणियं सुयं, सव्वेहिं सुणियं, तुम्हेहिं किम् न हु सुणियं ?"। तओ गुरुहिं नायं "एसो न सदुवएसोचिओ पच्चक्खमुसाभासिल्लो"। तो गुरुहिं उवेक्खिओ परिक्खिओ कूडकासावणो व्व वणिएण। तओ विसधारिउ व्व निट्ठुरप्पहारमुच्छिओ व्व महया सद्देणाहूओ वि मूओ व्व सद्दमप्पइच्छंतो दिवाऽवि नाणाविहे सुमिणे पिच्छंतो मत्तवालउ व्व मुहे असंबद्धवयणाइं पलवमाणो गुरुहिं पुणो पुणो वाहमवि पबोहित्तु एवमुल्लविओ—"अहो पुंडरीय तुमं वयंसि "नाहं मणयं पि सुएमि," एअं पुण किं घंघलो व्व दीससि ?"। ॥३०९॥
तत्तो तेणोइयं गुरुणं—"भयवं तुब्भाणं भंती समुप्पन्ना एसो सुत्तो त्ति, अहं पुण सुत्तत्थं परिभावंतो अच्छामि, मोण मल्लीणो सव्वे वि भंतिमावन्ना, नाहं पुण निद्दालू"। तओ सव्वेहिं पि नायं "अयं पच्चक्खवायरमुसाभासि त्ति" विरत्ता गुरुणो बाढं सव्वे साहुणोऽवि पेरिज्जंतो जहातहा पलवइ,

बहुमरणोपायओसमेव समुव्वहइ । तओ मोहरायबलेण दुग्गव्वाएयस्स हिययं रोहियं । तओ दूरीभूओ सदागमो, पणट्ठो सव्वोहो, दूरओ पलाणो हरिणो व्व परलोआओ चारित्तधम्मो, विरत्ता सव्वविरई सव्वहा, सम्मद्दंसणोऽवि नट्ठो । तओ गुरुत्थमणे चोरंधयारपूरो व्व पसरिओ मिच्छादंसणो । एवं सुगतिवायऽनदलोवाणपमुहेहिं मोहरायसेन्निएहिं सव्वेहिं वि मिलित्ता पमाते निद्दापुरस्सुरए खित्तो मरणधम्ममावन्नो पडिओ निगोयम्मि । तओ एगिंदिएसु भूरिकालं भमित्तु । जहा

तेण संसारिजीवेण निद्दादोस परवसेण चउद्दसपुव्वाणि वि अहिला मुहा हारियाणि तहा अन्ने वि हारिंति । तम्हा निद्दापमायप्पसरो वारेयव्वो सुसाहूणं । जओ उत्तं—

**"जइ चउदसपुव्वधरो वसइ निगोए अणंतयं कालं । निद्दापमायवसओ ता होहिसि कह तुमं जीव ॥१॥"**

**॥ इति निद्रोपरि पुण्डरीकव्याख्यानम् ॥**

अह चत्तारि विगहाओ वज्जेयव्वाओ । **विगहोवरि दिट्ठंतो** दंसिज्जइ—

इत्थेव भारहे वासे धणधन्नपुन्ना पुरी **कोसिया** । तत्थ जिणधम्मजणियभद्दो **सुभद्दो** नाम सावओ परिवसइ । तस्स **सुनंदा** नाम जाया । तीसे रोहिणीनामेण जाया दुहिया । पाणेहिंतोऽवि सा अब्भहिया । पडिवन्ना सुस्सावय-

धम्मं । पच्चा वंदइ देवे, गुरुणो य पज्जुवासइ, सुणइ विविहाओ धम्मकहाओ, गुणइ भणइ य साहुणीण पासे सुस्साव-उचियाइं विइयंवणाइं सुत्ताइं, तहा नवतत्ताइं पुच्छति । तओ सा तारुण्णे कायम्मि समुइन्ने परिणीया सा घरजामा-उयत्ताए रविदत्तेण वणिएण विमलाभिहाणेण । तओ सा जणणीजणओवइट्ठभत्ताणेण कुणइ सम्मं जिणधम्मं, तीए

सज्झायलक्खं साहियमहीयमिक्कग्गमणाए कम्मग्गंथपयरणाईयं, अंगीकयाणि पउणीकयसुकयाणि जणियपंचकरणजयाणि बारसवयाणि, पालेइ निरइयारगाणि, कुणइ सामाइयपोसहाइयमावस्सयमवस्समनालसत्ताए।

इत्तो मोहमहाचरडेण चिंताउरत्ताए दिट्ठाओ दसावि कट्ठाओ। तओ मंतिसामंतेहिं साहियं–"सामिय काऽवि संपयं चिंता, समाइसउ देवो, किं कज्जं किं कज्जं?"। तओ मोहेणुत्तं–"अम्ह पडिवक्खचारित्तधम्मरायपक्खे रोहिणी साविया
॥३११॥ अईव धम्मभाविया दीसइ। तओ किमियाणिं करणिज्जं? पाणीयपूराओ पुव्वमेव पालीबंधणं सोहणं"। तो तेहिं हसित्तु वुत्तं–"सामि ताव सव्वोऽवि जणो सप्पाणो जाव न तुम्ह माणुसदासपेसगोयरं नागच्छति" तत्तो मोहराइणा उत्तं–"पेसिजओ कोऽवि जो तं रोहिणिं परम्मुहं निवत्तेइ"। तओ जाव ते कमवि समाहूय वयंति तावुल्लसियसरीरा धीरा विकहाभिहा मोहदुहिया सयमेव समुट्ठिता एवं पन्नवइ–"सामि मह चेव दिज्जउ आएसो, मा किज्जओ विलंबो, पस्सामि ताव तीए सत्तं"। तओ सव्वेहिं पि सन्निया संपत्ता तस्सगासमेसा सरोसा रायकहा—देसकहा—भत्तकहा–इत्थिकहाहिं चउप्पयारं नियरूवं काउं तव्वयण मोइन्ना, परमजोइणीव अदंसणीभूय निलुक्का तस्सरीरे। सा पिउमाय- ॥३११
प्पसाएणं न किंपि घरकज्जं सज्जइ, सुहेणं चेव निव्वहंती भोयणच्छायणचितानिम्मुक्का चिट्ठइ। तओ जिणहरं गंतूण सा वायालमवलं पस्सइ, तदभावे अन्नाए सावियाए पासमागंतूण कन्ने पविसित्ता भासइ–"हले मए तुम्ह घरपवुत्ता एरिसी वत्ता कण्णे कया, मा सच्चाऽसच्चा वा?"। सा आह–"नेयं घडइ, असंगयं केणावि असाहणेण साहियमेयं"। तओ रोहिणी वुच्चइ–"सच्चा तुमं मामवि अवलवसि"। तओ सा पडिभणइ–"हे मुसाभासिणि एवं कहं कहसि अदिट्ठं?"।

एवं परोप्परं लग्गा पाविकपरिवाडी महाराडी। तीए सद्धिं रोहिणीए जिणगिहमागम्म विमुक्कचिइवंदणज्झवसाया मामए धत्तं बहूए कहइ न्हुसाचरियं सस्सूए पुरो पयासइ निल्लज्जा मज्जाया रोहिणी कहं तुम्हाणं घरे वीवाहमहूसवो केरिसा जेमणवारा पउणीकयखाइमसाइमतेमणप्पभिइ रसवइ पब्भारा संपन्ना। एवं पइदिणमेसा विकहाविवसा चेव चिट्ठइ। अन्नया तीए जहातहापलवंतीए पारद्धा विविहा रायकहा। कीएऽवि पुरो तीए असहंतीए समुट्ठियाए अन्नाए सद्धिं पारद्धा इत्थीपुरिसवत्ता। सावि सस्सूभएण जाव नववल्लवहूआ तुरियं पत्ता नियगेहं। तओ अवराए थेरीए सह करेइ देसकहं। सा परावायतरुप्परोहिणी रोहिणी अईव वत्तालुयाए मज्झण्हेऽवि नागच्छइ सगिहं। एवं पइदिणमेसा कुव्वाणा अन्न-दिणे केणावि सावएण जोडियकरेण भुस्सावणुत्ता—"अहो सुसाविए खणमत्तमित्थ जिणहरे समेच्च एकग्गचित्तयाए जइ चिइवंदणं किज्जइ, तो जुज्जइ तुम्हे वत्ताओ चेव कुणह"। तओ कवडिणी तमुत्तरिउं लग्गा—"सहोयर अम्हे किं कुणेमो? अन्नत्थ कत्थऽवि कोऽवि कस्सऽवि न मिलइ परघरे निक्कज्जं कोऽवि न जाइ, तओ पियमेलयट्ठाणमिणं सव्वोऽवि पइ-दिणमेइ सिच्छाए, तेण खणमेगं सुहदुक्खं पुच्छित्ता कज्जइ निव्वुई, तुमए इत्थत्थे नासमाहाणं कज्जमलज्जुत्ताए"। तओ साहुणीउस्सयं संपप्प साविआहिं सद्धिमारभइ विगहाओ, गिण्हइ साहुसाहुणीण दोसुक्करिसे असरिसे। तओ जइ साहुणीओ किंचि सिक्खवंति—"महाभागे पढियं सव्वमवि परिगलियं किमणेणेहिआमुस्सियवायमयनिबंधणेण केवलकम्मबंधहेउणा विगहापरापवायकरणेण? सज्झायमेव सग्गापवग्गसुहसाहणं साहेहि"। तओ पडिवयइ मुहं मोडइत्ता—'इच्छाकारेण भगवइ अज्जिए साहुसाहुणीण वि परावण्णवाओ दुप्परिहाओ। परापवाएणेव सव्वो जणववहारो। बद्धमुहं न कम्मवि

पस्सामो। अम्हे सुहेण वयामो परघरवत्तं। केवलमम्हेहिं माया न हु सक्किज्जइ काउं जहा अन्नेहिं किज्जइ माइपियराणं पि चरियं फुडमेव साहिज्जइ जुत्ताजुत्तमवि। जइ कोऽवि रूसइ कोऽवि तूसइ, तओ अम्हे किं करेमो?" तत्तो वराइया विगहापराइया संती जाया अगरिहा सदुवएसाणमेसा, तओ उवक्खिया भिक्खुणीहिं, पिसाइ व्व न कोऽवि आभासइ तं। अन्नया निस्संकीभूया भूयाहिट्ठिय व्व सा गुरुसन्निहाणमासज्ज वक्खाणक्खणे वत्थंचलेण मुहदुवारं पिहित्ता कस्सऽवि कण्णमूले ठिच्चा किंचि अक्खाइ, अवराए अवरं जहाजहा लवंती अरण्णमत्तमहिसि व्व पल्ललजलं सव्वं सभासीणजणं कलुसियचित्तं कुणइ, धणवइनंदिणि त्ति न कोऽवि तं पडिभासइ। कयावि गुरूहिं पि निवारिया संती लवइ "भयवं केणावि सद्धिं वत्तं न करेमि, परं जइ केणावि पुट्ठमत्थं न कहिज्जइ तओ न हु साहुवाओ लब्भइ"। तत्तो गुरूहिं पि निरग्गला मुक्का। तओ निरासंका वंका गाढयरमंगुवंगेहिं विगहाए गहिया। अह पराववायाऽभीरूए भीरूए तीए पुव्वाहीयं सुयं सव्वमवि विस्सरियमपरावत्तणदोसेण। न सरइ कयाइ वयाइं। नालोयइ तदइयाराइं। न पसज्जइ चिइवंदणम्मि कम्मवि वागत्थवित्थरे। तहऽन्नत्थ वि सत्थे रमइ खणमवि न हु चित्तं। अणायरेणेव कुणइ आवस्सयकिरियापब्भारं। अन्नया घरंगणोवविट्ठाए परासब्भसणिक्कनिट्ठाए पाविट्ठाए निक्किट्ठाए पासट्ठियजणमग्गस्सित्ता पारद्धा विरुद्धा रायहरकहा—"एयस्स महीवइणो निग्गुणोन्निया अग्गमहिसी महादुसीला सम्ममहमेयं जाणामि, सोहग्गेणेगेण नरेण मे वुत्तं," इमं गुत्तं अदिट्ठमस्सुयपुव्वमेयं पयासंती सा, तीरट्ठियाए कम्मि कज्जे तत्थागयाए रायचेडीयाए थिरीभूय सव्वं निसामियं, घरे गंतूण निवेइयं महिसीए। एस वइयरो तीए वि रन्नो साहिओ। तेणाणाविया रोहिणी,

॥३१३॥

सुभद्दसत्थाहिवेण सयमाणीया सत्थे होऊण सा रायग्गओ । एगंतं काऊण पुट्ठा सुट्ठु रन्ना-"भद्दे साहसु मह सव्वमेयं जमा-
इन्नियं तुमए मह घरणिसरूवं" । तीए उत्तं-"महाराय मए न हु किंपि निसुयं कस्सा वि घरस्सरूवं, नाहं किंचि जाणामि ।"
मूलाओऽवि सव्वमवलवमाणिमेयमवलोइत्ता रन्ना समाहूया दुयमेव दासी । तीए सव्वमवि फुडं कहियं तेहिं तेहिं अहिन्नाणेहिं-
"तुमए तम्मि दिणे लविथममुगपुरओ" । तओ निरुत्तरीभूया हिरिभरावणामियाणणा विमणा ठिया रोहिणीया तदा ।
तओ राइणा रोसावेसविवसमइणा सव्वमवि दासीनिसुयतकहियसरूवं सत्थवाहस्साभिहियं । तत्तो सिट्ठिणा वि हिट्ठीक-
यास्सा निरासा भासिया नंदिणी-"वच्छे किमेयमणेरिसमणप्पकुलोचियमुल्लवियं ?" । तत्तो सा मोणमालंबिय ट्ठिया विसा-
यावन्ना अकयपुन्ना । तत्तो सत्थाहिवेण भूवई विन्नत्तो-"महाराय किमहं करेमि ? एईए मज्झ निकलंके कुले मालिन्न-
माणीयं । अहवा भूवासव मह चेवेसा दोसा, जं जीहामुक्कलत्तणमिमीए विन्नायमवि जणाणणाओ पुव्वमेव न पडिसिद्धं,
नो सम्मं सयं सिक्खविया । संपयं जं देवपायाणं रुचइ तं कीरओ" । तओ राया भणइ-"अहो सत्थाह तुममम्ह पुरे
सयलनेगमस्सेणिबहुमन्नणीओ सच्चवाई य । तुह दक्खिन्नेण मए जीवंती मुक्का । नो चेव चउहट्टए एसा तक्करु व्व खंडखंडं
किच्चा कायबलित्ताए पक्खित्ता आसि । केवलं तहा कायव्वं जहा मद्देससीमं लंघित्ता अन्नत्थ जत्थकत्थऽवि गच्छइ" ।

तओ रायाएसेण विसज्जिया या अलच्छि व्व नियघराओ नयराओऽवि निक्कालिज्जंती रायजणेहिं निदिज्जंती एए एए दुज्जणे-
हिं धिक्करिज्जंती मिच्छाभिनिविट्ठेहिं-"अहो सावियाओ एरिसयाओ चेव चेइवंदणनिउणाओ निग्गुणाओ निग्घिणाओ
एरिसयाओ अस्सुयादिट्ठपुट्ठचेट्ठियभासिणीओ धिरत्थु एयासिं नाणं वंदणपडिक्कमणपोसहपच्चक्खाणं । एयासिं एस चेव

धम्मो जमन्नो निंदिज्जइ दिज्जइ जहातहा परस्स कलंको निस्संकत्ताए'' इच्चाइ जणाववायं नियकन्नेहिं सुणंती विगो-
विज्जंती जणेहिं निग्गया पुराओ सरीराउ वाहि व्व । जणयस्स विहववित्थारं तारिसं संभारंती जणणीए नेहलवयणुब्भावे
झायंती बंधुजणगोरवमवि परिभावंती साहुसाहुणीण विप्पओगं झूरंती मुहुं मुहुं अतुच्छमुच्छं लहंती गहिलु व्व जहातहा
पलवंती जूहभट्ठ कुरंगि व्व एगागिणी अडंती पइगामं पइआरामं छुहापिवासा भिक्खं भमंती सुतिक्खकंटयाविद्धमउआ
॥३१४॥ पायतलविणिग्गयलोहियलोहियप्पवाहाऽलत्तयरसेण धरणीवीढं सिंचंती अपच्चक्खाणावरणतिव्वकसाओदयवसेण देसवि-
रइगुणब्भट्ठाऽणाराहियसम्मत्ता मरित्ता सा रोहिणिया अपरिग्गहियवंतरदेवीसु उववन्ना विराहियधम्मत्ताए । तओ
पुणो भूरिभवोयहिं भमित्ता कहं वि पारं लहिस्सइ । एयं रोहिणिदिट्ठंतं सुट्ठु समाइण्णिय पउणीकयविग्गहा विगहा
सव्वहा विबुहेहिं परिहरियव्वा ॥

॥ इति रोहिणीचरितम् ॥

अथ गाथायाश्चतुर्थं पदं "**पंचंतराया विनिवारियव्वा**" इति व्याख्यायते–पञ्चेति पञ्चसङ्ख्याका दानलाभभोगोप-
भोगवीर्यान्तरायलक्षणा अन्तराया वि विशेषेण निवार्याः प्रतिषेद्धव्याः तेषां प्रसरो न देय इत्यर्थः । अत्रार्थे धनसार- ॥३१५॥
**कथानकमाख्यायते**—

**॥ धनसारकथा ॥**

मथुरा पृथुरास्तेऽत्र पुरी स्वर्नगरीनिभा । यत्राप्सरोविराजीनि सुनन्दनवनान्यहो ॥१॥ धनसंभारसाराख्यः श्रेष्ठी

श्रेष्ठगुणाकरः । धनसारोऽभवत्तत्र खड्गवद्धमुष्टिकः ॥२॥ तस्यासन् क्षितिनिक्षिप्ता द्वाविंशतिस्वर्णकोटयः । तावन्मात्राः पुरान्तश्च वाणिज्ये चान्यदेशगाः ॥३॥ तस्य षट्षष्टिसङ्ख्याकाः समग्रा रिक्थकोटयः । सन्ति नायं परं किञ्चिद्भिन्नं व्ययति दुर्मतिः ॥४॥ न दग्धरोट्टिकाखण्डमप्यर्पयति कस्यचित् । दृष्टेऽप्यर्थिन्यसौ द्वारे रुषा ज्वलति वह्निवत् ॥५॥ ज्वरश्चटति देहेऽस्य लक्ष्यमाणस्वभिर्मुखैः । व्ययीकुर्वाणं वीक्ष्यान्यमपि स्वं धर्मकर्मणि ॥६॥ मिलिते मार्गणे मार्गे नाशोपायं विमार्गयन् । स भीरुरिव लक्ष्येत कम्पमानवपुष्टरः ॥७॥ याचकैर्याच्यमानः सन्नहहा स मितम्पचः । हन्तुं तानिच्छति प्रायः कारुण्यादपवर्जितः ॥८॥ पातितः सङ्कटे क्वापि दातृभिर्निकटे ह्यसौ । दन्तसंकटमाधाय तिष्ठेच्छ्रेष्ठ-काष्ठवत् ॥९॥ किं पुनं वेश्मनस्तस्मिन्निर्गते दुर्गतेश्वरे । चेटेभ्यो दीयते भुक्तिः स्वैरं भुञ्जन्ति चापरे ॥१०॥ सति वित्ते न दत्ते यो न भुङ्क्ते दुर्मतिर्नरः । जन्मन्यत्रागते तेन किं कृतं सुकृतोज्झनात् ॥११॥ कदर्यत्वेन तन्नाम काममाविर्-भूत्तथा । यथा निरन्नो नो कश्चित्प्रातरादातुमिच्छति ॥१२॥ तेनान्यदा स्वहस्तेन यो निक्षिप्तो निधिः पुरा । अङ्गारतामसौ भेजे केवलं दृक्पथीकृतः ॥१३॥ अन्यान्यपि निधानानि यान्यासन्निहितान्यहो । वृश्चिकोरगपूर्णानि तान्यपश्यदिष्ट स स्फुटम् ॥१४॥ ततः स यावच्चिन्तार्तस्तस्थौ दैवहतः कुधीः । तावत्केनाप्यमुष्योक्तमब्रुडन् वहनानि ते ॥१५॥ तावदस-त्वरमागत्य तस्याख्यायि स्थलाध्वनि । स्वद्वस्तुसार्थाः सर्वेऽपि लुण्टाकैर्लुण्टिता अहो ॥१६॥ जलस्थलस्थस्तस्यार्थसार्थः कोऽपि न तत्करे । चटितस्त्रुटितं लभ्यमपि स्वं तस्य दुर्मतेः ॥१७॥ किंकर्तव्यविमूढात्मा यावदास्ते स शून्यधीः । वज्राहत इव व्यग्रः सर्वाशाः प्रविलोकयन् ॥१८॥ तावदस्य समुत्पेदे चिन्ता तान्तात्मनस्तराम् । यावद्गेहे किमप्यास्ते

वित्तं देहे तथोद्यमः ॥१९॥ अवगाह्य सरिन्नाथमनाथजनताश्रयम् । अर्जयामि धनं तावत्तर्जयामि दुरापदम् ॥२०॥ इह स्थितस्य न श्रेयः कृपणाख्याभृतो हि मे । लोकहास्यं भृशं भावि पूर्वमप्यतिदोषिणः ॥२१॥एत निश्चित्य चित्तेऽसौ दशलक्षार्पणात् क्षणात् । संगृह्य पण्यसंभारमपारं सलिलाध्वना ॥२२॥ पोतनापूर्य तूर्योरुनादैः सममथाचलत् ।
३१७॥ वृथा मनोरथान् कुर्वन्नुरून् दुरितदूषितः ॥२३॥ घनघटा विकटा निकटागता वियति तत्क्षणमेव विधेर्वशात् । दुरितराजिरिवात्मन उज्ज्वलाऽध्वनि गतस्य हि तस्य दुरात्मनः ॥२४॥ तदनु च प्रससार दुराशुगस्तडिदतीवचकार खरस्वरम् । द्वयमपीह जगर्ज महेर्ष्ययेव जलधिर्जलदश्च धराम्बरे ॥२५॥ अकलयच्चटुलत्वमनारतं प्रवहणः किल पिप्पलपत्रवत् । अहह किं भवितेति चकम्पिरे हृदि तदाम्भसि पोतवणिग्जनाः ॥२६॥ हे रक्ष रक्ष देवेति जल्पति प्रचुरे जने । शतखण्डमभूद्यानमभाग्यात्तस्य दुर्मतेः ॥२७॥ भाण्डोत्करः समग्रोऽपि ममज्जाम्भसि सत्वरः । अभव्य इव दुष्कर्मभारभारितमानसः ॥२८॥ लब्ध्वा फलकखण्डं तत्तार तरसाम्भसः । श्रेष्ठी श्रेष्ठगुणैर्जन्तुरिव वार्द्धिभवान्तरात् ॥२९॥ शून्यारण्यमथैत्याशु चिन्तयामासिवानदः । क्लेशैर्मयार्जितं वित्तं हहा तदपि मे गतम् ॥३०॥ पात्रक्षेत्रेषु तन्नोप्तं नो भुक्तं तन्मयाऽऽत्मना । परार्थे नोपयुक्तं यत्तन्मे दुःखायते भृशम् ॥३१॥ भोगस्त्यागस्तथा प्रशस्तिस्तोऽ- ॥३१७॥
मूर्गतयः स्मृताः । मद्धनस्य पुनर्नाश एव जज्ञे विधेर्वशात् ॥३२॥ एतावताऽपि नो दैवतुष्टिः स्फुटमजायत । कुटुम्बविरहो जज्ञे यत्पुनः सोऽतिदुःसहः ॥३३॥ एतच्चिन्तार्तचित्तेन तेन तान्तेन निर्भरम् । सहकारतरुच्छायासीनोऽदर्शि मुनीश्वरः ॥३४॥ कृपासुधारसस्येव निर्झरः सुविसृत्वरः । दुःखदावज्वरोत्तप्तजन्तुसन्तापवारकः ॥३५॥ केवलोद्बोधशुद्धा-

शुध्वस्तसंशयदुस्तमाः । शशीव सौम्यमूर्त्तिर्यश्चित्रं जाड्योज्झितः परम् ॥३६॥ हेमाम्भोजनिषण्णं तं प्रेक्ष्यागत्य ननाम च ।
पपौ तृषितवच्छ्रेष्ठी धर्मगीर्मधुरामृतम् ॥३७॥ दुर्लभं नृभवं भव्या लब्ध्वा बुद्ध्वा जिनागमम् । सम्यग्धर्मं समाराध्य
भजध्वं सिद्धिजं सुखम् ॥३८॥ ततः समयमासाद्य सद्योऽवद्योज्झितान्तरः । पप्रच्छ प्राञ्जलिः श्रेष्ठी भगवन्नहमीदृशः
॥३९॥ दृढमुष्टिः कथं जज्ञे तज्ज्ञेच्छाभाग् भृशं जने । कष्टं कष्टार्जितं वित्तं कथं मे सव्यथस्थितेः ॥४०॥ जजल्पोज्ज्वल-
दन्तद्युसुधाधवलिताधरः । साधुस्तं धातकीखण्डभारते सोदरद्वयम् ॥४१॥ आसीन्महेभ्यसदने सदनेकसुखाञ्चिते ।
पितर्युपरते ज्येष्ठः स्वामी गेहस्य जातवान् ॥४२॥ प्रकृत्योदारचित्तोऽभूद्वृद्धः स्तब्धोऽपरः पुनः । दानं ददति दीनेभ्य-
स्तस्मिन्नथ सहोदरे ॥४३॥ चुकोप लघुरत्यन्तमन्तरन्यस्तदीक्षणात् । वारयत्यपि नो दानाद्विरराम गुरुः परम् ॥४४॥
भिन्नीभूय ततस्तस्थौ लघुर्लघुतरोऽग्रणोः । ववृधे त्यागिनोऽप्यस्य गेहे श्रीः सुकृतोदयात् ॥४५॥ अदातुरपि तस्या-
गाल्लक्ष्मी रुष्टेव मानिनी । अगण्यापुण्ययोगेन गेहाद्देहात् पुनः सुखम् ॥४६॥ व्रतमादाय वृद्धोऽथ जगाम त्रिदिवं
शिवम् । चारित्रं दिनमप्येकमाचीर्णं न हि निष्फलम् ॥४७॥ लघुर्भ्राता पुनस्तस्य निन्द्यमानोऽखिलैर्जनैः । पर्यन्ते
तापसीं दीक्षामादाय च विपद्य सः ॥४८॥ असुरेषु समुत्पेदे ततस्त्वमजनिष्ट भोः । सौधर्मतः पुनश्च्युत्वा ज्येष्ठो ज्येष्ठो
गुणोत्करैः ॥४९॥ तामलिप्त्यामभूदिभ्यसुतस्तदनु सद्गुरोः । पार्श्वे व्रतं समादाय पालयन्नतुलौजसा ॥५०॥ ततोऽहं
केवली जज्ञे समग्रगुणशेवधिः । स समाजग्मिवानत्र साम्प्रतं विहरन् भुवि ॥५१॥ दानप्रद्वेषकरणादन्तरायाच्च सर्वथा ।
कार्पण्यदोषस्ते जज्ञे विज्ञेतरजनेप्सितः ॥५२॥ ददानं वारयेद्यस्तु स्वयं न हि ददाति च । दत्तं च शोचते वित्तं स दरि-

द्रत्वमश्नुते ॥५३॥ गृहीता यत्त्वया संपत् पैशून्याद्राजदण्डनात् । ततस्तदर्थः सर्वोऽपि नष्टः पातङ्गरङ्गवत् ॥५४॥ ततः स्वकर्मणः श्रुत्वा फलं संविग्नमानसः । वन्दित्वा ज्ञानिनं प्रोचे ह्यद्यप्रभृति हे प्रभो ॥५५॥ यदर्जयिष्ये द्रविणं तच्चतुर्थांशमात्मनः । गेहेऽहं रक्षयिष्यामि सर्वमन्यच्छुभार्जने ॥५६॥ विनाऽनाभोगदोषेण नान्यदोषभरस्तथा । यावज्जीवं मयाऽऽभाव्यः स्वमुखेन सुखैषिणा ॥५७॥ सम्यक्त्वेन समं तेन विरतिर्देशतस्ततः । प्रपन्ना गुणसम्पन्ना केवलज्ञानिसाक्षिकम् ॥५८॥ पाश्चात्यभवमन्तुर्यः स सर्वः क्षामितो यतेः । लगित्वा पदयोर्द्वन्द्व निर्द्वन्द्वानन्दवासिना ॥५९॥ भगवान् बिजहारोर्व्यामथ श्रेष्ठी ततश्चलत् । स्वनिवासपुरं प्राप पापनिर्मुक्तमानसः ॥६०॥ वाणिज्यं सृजता तेन यद्धनं धनमर्जितम् । तच्चतुर्भागमादाय शेषं धर्मे व्ययीकृतम् ॥६१॥ जिनार्चाभिरतस्यास्य सर्वपौषधधारिणः । शून्यागारादिषु श्राद्धप्रतिमाकारिणस्तदा ॥६२॥ कस्मिन्नपि गते काले शून्यधाम्न्यस्य तस्थुषः । चुकोप व्यन्तरस्तत्र स्थायी मायी भृशं निशि ॥६३॥ करालैः कालवेतालैर्भूतप्रेतैर्भयङ्करैः । भापयित्वाऽसितकोऽसंसं ददंश विषमाहिना ॥६४॥ अतुदद्दृढमत्यर्थं कालकूटोर्मिसङ्गमैः । तथापि धर्मान्नाचालीत्स्वःशैल इव निश्चलः ॥६५॥ ततस्तुष्टः सुरः प्रातस्तं तुष्टाव स्वभक्तितः । त्वं धन्यः कृतपुण्योऽसि सनैपुण्योऽसि निर्भरम् ॥६६॥ वरं वृणु प्रसन्नोऽस्मि स्मित्वेत्युक्ते दिवौकसा । सोऽस्थान्मौनव्रतालम्बी ततो भूयः सुरोऽवदत् ॥६७॥ यद्यपि त्वं निरीहोऽसि तथापि शृणु मद्गिरा । व्रज त्वं मथुरापुर्यामनार्याचारवारक ॥६८॥ यावन्मात्रं तवासीत्स्वं तावन्मात्रं तथैव हि । भावि प्रभूतपुण्यौघैः पुनस्तत्र भवद्गृहे ॥६९॥ क्षमयित्वेत्युदित्वाऽगादमरः स्थानमात्मनः । प्रतिमां पारयित्वाऽथ श्रेष्ठी चित्ते व्यचिन्तयत् ॥७०॥ अर्थेनानर्थमूलेन किं तेनाप्यथवाऽस्तु तत् । येनाहं निजकार्पण्यदोषमुन्मूलयाम्यहो ॥७१॥ एतद्विमृश्य मथुरापुर्यामातः

॥३१९॥

स सत्वरम् । तदवस्थानि दृष्टानि निधानानि निजौकसि ॥७२॥ यदासीद्गतमन्यत्र देशेषु स्वं तदप्ययत् । प्रोचे जनेन किं पुण्यप्रागल्भ्यस्य हि दुर्घटम् ॥७३॥ यदभूद्भक्षितं लोकैस्तदप्याश्रमयत्नतः । कोट्यः षट्षष्टिसङ्ख्याका मिलितास्तस्य वेश्मनि ॥७४॥ संचितं सुकृतं येन निश्चलत्वेन चेतसः । संपद्यन्ते सपद्येव तस्यामुत्रैव संपदः ॥७५॥ तेनोत्तुङ्गं

जिनागारं सारं प्रतिमयार्हताम् । सद्भक्त्या कारयामासे न्यायार्जितधनोच्चयैः ॥७६॥ दीनानाथपङ्ग्वन्धबधिरेषु दयार्द्रधीः । स दानमददात्कालान्मरुद्वृष्ट इवोचित ॥७७॥ नैभेदैव जनश्लाघामसाधाद्विरक्तधीः । अगण्यैर्दानपुण्यादिकृत्यैर्जन्म पवित्रयन् ॥७८॥ पर्यन्तेऽनशनं लात्वा ध्यात्वा पञ्चनमस्कृतिम् । चतुःपल्यस्थितिर्जज्ञेऽरुणाभे प्रथमे दिवि ॥७९॥ सुरस्ततो विदेहे स समुत्पद्योत्तमे कुले । गृहीतदीक्षो मोक्षश्रीभोक्ता भावी भवोज्झनात् ॥८०॥ इत्थं विदित्वा धनसारवृत्तं चित्तं निवेश्योत्तमदानधर्मे । दानान्तरायः प्रतिषेध्य एव तद्वद्यथा स्युः सकलाः समृद्धयः ॥८१॥

॥ इति दानान्तरायोपरि धनसारकथा ॥

अथ लाभान्तरायोपरि कथा—

भ्राजते भारतेऽत्रैव मागधाह्वयनीवृति । धान्यपूर इति ग्रामोऽभिरामोऽन्वर्थनामभाक् ॥१॥ राजाधिकारी धिक्कारी प्रजानामुग्रदण्डतः । तत्र पारासर इति द्विजन्माऽजनि विश्रुतः ॥२॥ सोऽन्यदाऽऽज्ञावशाद्राज्ञश्चारीः पारीणकः श्रुतेः । ग्राम्येभ्यो वापयामास तुरङ्गचरणोचिताः ॥३॥ क्षुधातृड्बाधितास्तेऽपि कर्षुकाः पारवश्यतः । प्रातःकालाद्भवेद्यावन्मध्यंदिनमनारतम् ॥४॥ क्षेत्राणि खेटयन्त्युच्चैःस्वरेण स्वधुरीणकान् । हक्कयन्तस्ततः कष्टादनिष्टाच्छटिकाङ्क्षिणः ॥५॥ 

यदा भक्तमुपादायायाताः स्युर्हालिकाङ्गनाः । बलीवर्दा व्याकुलाश्च घासाम्भःपानलालसाः ॥६॥ ततः समेत्य पापात्मा पारासरः खराकृतिः । तर्जयंस्तर्जनेनास्यद्रोषणः कर्षकानिति ॥७॥ भो भो मदीयक्षेत्रैकरेखां दत्त पृथक् पृथक् । सर्वेऽपि तेऽथ तद्वाक्यात्तथाऽकार्षुः कृषिप्रियाः ॥८॥ ततस्तद्भक्तपानादिप्रतिषेधनिबन्धनम् । आन्तरायिकदुष्कर्माबन्धि दुर्धर्षमंहसा ॥९॥ हलभृद्वृषभोत्कृष्टकष्टमाज्ञाय दुर्नयः । स्वकार्यं कारयामास लालसः क्रूरकर्मणि ॥१०॥ ततः स्वायुः प्रपूर्यैष चित्वा दुष्कर्मसञ्चयम् । मृत्वा भ्रान्त्वा भवं भूरि श्वभ्रतिर्यक्कुयोनिषु ॥११॥ अत्रैव हि सुराष्ट्रासु द्वारकायाः पुरः प्रभोः । श्रीकृष्णस्यात्मजत्वेनोत्पेदे पुण्यानुभावतः ॥१२॥ ढंढणेत्याख्यया लब्धप्रसिद्धिरभवत्स च । ववृद्धे वपुषा ज्ञानविज्ञानस्यापि सम्पदा ॥१३॥ क्रमेण तरुणीदृष्टिभ्रमराकृष्टिपङ्कजम् । यौवनं प्राप निष्पापमना मानाश्रितध्वनि ॥१४॥ उपायंस्त ततः कन्या विज्ञा विज्ञानकर्मसु । ततस्ताभिः सुरस्त्रीभिरिव वैमानिकः सुरः ॥१५॥ भोगानभुङ्क्त निशङ्कं धर्माराधनबद्धधीः । कुमारः स्फारसौन्दर्यसारः कियदनेहसम् ॥१६॥ अत्रान्तरे परेणोद्यत् (ऽरिष्टनेमिः) प्रभासारेण भासुरः । सूर्यवद्रैवतोद्यानपूर्वाद्रावुदयं गतः ॥१७॥ तदागमसमुद्भूतोदारहर्षाङ्कुरोत्करः । श्रीहरिः सपरीवारः प्रभुं नन्तुमुपागमत् ॥१८॥ नत्वा स्वामिनमुद्दामतपःसंयमिभिर्वृतम् । निषसादोचितस्थाने विष्णुर्जिष्णुर्महाद्विषाम् ॥१९॥ भगवान् धर्ममाचष्टे स्पष्टेन वचसाञ्जसा । मधुरेक्षुरसेनेव प्राणितृष्णापहारिणा ॥२०॥ ततोऽवगततत्त्वार्थाः सत्त्वसार्था अनेकशः । साधुश्राद्धविशुद्धाध्वाध्वन्यभावं प्रपेदिरे ॥२१॥ श्रीढंढणकुमारोऽपि जिनगीःपानपुष्टधीः । निर्विण्णः कामभोगेभ्यः स्वीचकारोत्तमं व्रतम् ॥२२॥ सूत्रार्थोभयविद्याभाग्जज्ञे विज्ञेषु वर्णितः । स्तोकेनापि हि कालेन चारित्राचा-

॥३२१॥

रचञ्चुधीः ॥२३॥ विजह्रे विभुना सार्धं ग्रामाकरपुरादिषु । अगाधा विविधाबाधाः सहमानः स सर्वदा ॥२४॥ अन्यदा
द्वारकापुर्यामियाय प्रभुणा सह । निरीहः सिंहतुल्योरुस्थामा कामाभिमानहा ॥२५॥ उदियायान्यदा तस्यान्तरायो-
द्दामकर्म तत् । येनावाप्नोति नो क्वापि भैक्ष्यं भ्राम्यन् पुरान्तरे ॥२६॥ येनैष साधुना याति समया समयार्थभाक् ।
तल्लब्धिमपि निघ्नघ्नो लभते स्वयमप्यहो ॥२७॥ गोविन्दतनुजन्माऽपि श्रीनेमेरपि शैक्ष्यकः । स्वयं गुणनिधिः पुर्यां
श्रीमत्यामपि निर्भरम् ॥२८॥ मध्याह्नसमये भ्राम्यन्नपि प्रतिगृहं सदा । न भिक्षालेशमप्याप हेतुरत्रान्तरायिकम् ॥२९॥
अमुष्याख्यायि वार्त्तेषा समग्रा भिक्षुभिः प्रभोः । सोऽप्याह तदनु प्राक्तत्कृतदुष्कर्मचेष्टितम् ॥३०॥ ततो ज्ञातस्व-
वृत्तान्तेनैतेनाग्राहि साधुना । उदग्रोऽभिग्रहः प्रत्यक्षीभूय भगवत्पुरः ॥३१॥ नातः परं परोपात्तभैक्ष्यपिण्डोपजीविना ।
अवश्यं मयका भाव्यं विभाव्य प्राक्तनाशुभम् ॥३२॥ इत्थं लाभान्तरायोत्थपृथुकर्मानुभावजम् । कष्टं विषहतः कालः
कियानप्यस्य जग्मिवान् ॥३३॥ अन्यदा वासुदेवेनाप्रच्छि स्वच्छेन चेतसा । स्वामिन्नाख्याहि कः साधुर्दुष्करोरुक्रिया-
परः ॥३४॥ प्रभुः प्रोवाच सर्वेऽपि यमिनः संयमोद्यताः । **ढंढणर्षिः** परं सर्वेभ्यो विशेषाधिकः स्मृतः ॥३५॥ यः
स्वोपलब्धभिक्षान्नान्नान्यदश्नाति कर्हिचित् । इतश्चोत्थाय कृष्णोऽपि यावदागान्निजां पुरीम् ॥३६॥ तावत्तत्रातिथीभूतः
प्रभूतसुकृतोद्यतः । चरन् गोचरचर्यार्थं ढंढणः श्रमणोत्तमः ॥३७॥ नीचैर्दृष्टि सिद्धिसौधबद्धमुष्टिमदुष्टकम् । तं ववन्दे
महाभक्त्याऽवतीर्यानेकपाद्धरिः ॥३८॥ तमद्राक्षीद्वन्द्यमानममानबहुमानतः । श्रेष्ठी कश्चित्ततश्चित्ते चिन्तयामासिवानि-
दम् ॥३९॥ निर्ग्रन्थोऽयं कृतार्थो यत्पदपद्ममधुव्रतम् । स्वं शिरः कुरुते कृष्णः क्षितिपश्रेणिसंकुलः ॥४०॥ यद्येति

मद्गृहं तर्हि दानमस्मै ददाम्यहम् । एवं विमृशतस्तस्यैवाययौ धाम ढंढणः ॥४१॥ तावदेष प्रहृष्टात्मा सिंहकेसरमोदकैः। मोदकैर्मनसस्तूर्णं प्रतिलंभितवान् भृशम् ॥४२॥ ततः श्रीनेमिमासाद्य सद्य एव व्यजिज्ञपत् । तदन्तरायदुष्कर्म किं मम क्षयमासदत् ॥४३॥ स्वाम्यादिदेश नाद्यापि तवैषा लब्धिरद्भुता। त्वमद्य वासुदेवेनाध्वनि वन्दित आदरात् ॥४४॥ तद्वीक्ष्यादत्त ते दानं बहुमानपुरःसरम् । वणिग्गुणिजनश्रेष्ठ इति ज्ञात्वा स तत्त्ववित् ॥४५॥ परलब्धिरियं

॥३२३॥ भोक्तुं मम नौचित्यमञ्चति । विमृशन् ढंढणः प्रौढवैराङ्गिकशिरोमणिः ॥४६॥ मोदकानां परिष्ठापनिकार्थमगमत् पुरि । निर्जीवस्थण्डिलस्थाने तानचूरयदञ्जसा ॥४७॥ स्वकीयकरयुग्मेन हृदीति परिचिन्तयन् । अहो दुष्कर्मणां दत्ताशर्मणां चेष्टितं कटु ॥४८॥ एवं भावयतः संसारासारस्थितिभावनाम् । उल्लास स्फुरद्बोधदीपकः केवलाह्वयः ॥४९॥ देवैर्जयजयारावश्चक्रे वक्रेतराशयैः । देवदुन्दुभयः क्षिप्रं ताडयामासिरेऽम्बरे ॥५०॥ बहुकालं विहृत्योर्वीमुर्वीभृदिव निश्चलः । प्रबोध्य भव्यसत्त्वालीमालीनः सिद्धिसद्मनि ॥५१॥ यथा भगवता तेन सोढः प्रौढपराक्रमात् । तथा लाभान्तरायोऽयं सोढव्योऽन्यैर्मुनीश्वरैः ॥५२॥ ॥३२३॥

॥ इति ढंढणकुमारकथानकम् ॥

अथ **भोगान्तराये कथा–**

इहेव भरहे धन्नपुरनामग्गामे नाणाविहपसुमहिसीगोउलाभिरामे **सुदत्तनामा** कुडुंबिओ परिवसइ । तस्स घरे बहुकम्मकरो एगो कम्मकरो आसि । सो भोयणवेलाए जायाए जया भोयणत्थमुवविसइ जारिसे तारिसे भोयणे परिवेसिए

जेमिउं लग्गइ, तया तदुवरि समेच सुदत्तो पुक्करेइ–"अरे मुंच थालं, लहुं समुत्तिट्ठ, तुह भोयणं सुहाइ मह कज्जं विणस्सइ"। एवं सो तहा पुक्करिउं लग्गो जहा सो वराओ अद्धभुत्तो चेव जमकिंकराउ व्व बीहंतो तक्कालमेवुट्ठिओ। खेत्तखलाइ कज्जं काउमाढत्तो। जया कयाऽवि परिस्संतो सो वीसमइ मणयं पि, तया तहा तज्जइ जहा वुहातण्हापरिगओ वि रुलंतो अत्थइ। कज्जं कुणंतस्स जइ वि महई वेला जायइ तहाऽवि से दयालेसोऽवि न समुप्पज्जइ। एवं घरस्सऽन्नजणस्सऽवि अईव असुहावहो जाओ। कालक्कमेण कालं किच्चा रोरघरे संपत्तो पुत्तत्तेण। जम्मक्खणे जणणिजणया पंचत्तमुवगया। तओ कट्ठेण महया वुड्ढिं पत्तो अहकहऽवि भिक्खावित्तीए पाणे धारेइ। मग्गंतो कहिंऽपि तावइयं न पावेइ, जावइएणं छुहा छिज्जइ। जत्थऽन्ने भिक्खायरा लहंति तत्थ सो पत्तो संतो गलहत्थमेव लहइ, अईव दुक्खिओ जाओ। तओ पाणच्चयं काउमिच्छंतो कंतारवणगहणे साहुणो कस्सऽवि सो मिलिओ आभासिओ–"कहं तुमं दुक्खिओ दीससि ?"। तेणुत्तं–"किमहं करेमि ? रोरघरे संपत्तो पुत्तत्ते भिक्खाए भमंतो किमवि न लहामि"। तओ नाणिणा मुणिणा तब्भवो कहिओ–"सुदत्तभवे तुमए भोगंतराइयं कम्मं बद्धं, तं तुह सयग्गमुइन्नं"। तेणावि वेरग्गावन्नेण दिक्खा कक्खीकया। एरिसो अभिग्गहो य गहिओ–"जस्स साहुस्स जं अन्नपाणाइयं पलोइज्जइ, तं सयं समाणीय पयच्छामि, विणयं वेयावच्चं च करेमि, वाहिग्घत्थस्स साहुणो भेसज्जमाणित्तु देमि"। एवं चिरकालं समणधम्ममणुचरित्ता महाधणवइणो घरे संपत्तो पुत्तत्तं। तत्थ विउला भोगसामग्गी लद्धा ॥ एवं भोगान्तरायकर्मापि बध्नाति जीवः ॥

**अथोपभोगान्तरायोपरि दृष्टान्तोऽस्ति–**

कम्मि वि नगरे एगो सेट्ठी अत्थि अईव धणड्ढो। पाए परावबायभासणरंगिल्लो अदिट्ठमस्सुयमिव जहा तहा भासइ। धणड्ढयागुणेण सव्वो जणो तं बहु मन्नइ, मुहरित्ताए न गणइ मणयं पि जणावबायं। अह जया विवाहकज्जे महाजणसमवाओ मेलिज्जइ, जया य सो पुच्छिज्जइ–"अमुगस्स वरस्स एयं कन्नं देमो," तया भणइ–"एसो तक्करो जुयारिओ अकिंचिकरओ, एयस्स कोऽवि सकन्नं समप्पेइ ?"। पियरो जाणंति अम्हंगयस्स पाणिग्गहणं भावि तया सो तहा जंपइ असब्भूयदोसं जहा मणं भज्जइ। जया वरस्स माइपियरो पुच्छंति–"केरिसी कन्नगा एयस्स विवाहिज्जइ" ?। तया आहूओ अणाहूओ वि समागम्म भासइ—"एसा कन्नगा अईव निल्लक्खणा हिरिसिरिमइधिइवज्जिया, कोऽवि नियघरे समाणेइ ?"। एवं भासंतो तम्मणोभंगं करेइ। एवं लीलाए वि जहातहा पलवेइ। इट्ठगोट्ठिं कुणंतो भणइ भत्तुणो–"तुज्झ पणइणी अन्नेण सह पणयपराइणा, तुमं कहं तीए उवरिं अईव रागरत्तो" एवं सो विरचइ तत्तो। अह तब्भज्जाए एवं पस्वइ–"तुह भत्ता अन्नकंतासत्ताभिप्पाओ, तुमं कहमिमम्मि अणुरायवसंवया"। तहा तहा सो वयइ जहा संजोगाओ विओगो भवइ उभएसिं पि। अन्नेसिमुवभोगंतरायमज्जिऊण अन्नं पि बहुयं दुक्कयं संचिणेऊण कालं काऊण दरिद्दकुले संजाओ पुत्तत्तेण, पत्तो तारुण्णयं। अन्नया माईपियरो जत्थ जत्थ तप्पाणिग्गहकए कन्नं मग्गंति तत्थ तत्थऽन्ने जणा भंजंति। कन्नं दाउमणा वि न पयच्छंति। तओ सो विमणो दुम्मणो जहा जहा सरिसवयाणं पाणिग्गहणूसवं पिच्छइ तहा तहा मणम्मि खिज्जइ। तओ सो उग्घरो संतो देसंतरं भमइ। वेलाए नऽन्नपाणमवि किंचि पावेइ। तत्तो दुहिओ संतो भिक्खिओ

कस्स वि समणस्स। तेण सुहं पिच्छिओ, तओ भणइ–"कत्तो मज्झ सुमिणेऽवि सुक्खं, जस्स न घरं न घरिणी न परियणो, एगागी परिब्भमामि"। तत्तो साहुणा वुत्तं–"तुहेव भोगंतरायकम्मोदओ समेओ, तेणऽज्जऽवि न सुहसामग्गिं पावेसि"। तओ तेण नाणबलेण से पुव्वो भवो साहिओ। तओ पडिबुद्धेण पडिवन्नं वयं। भासासमिई सुट्ठु आराहिया। तओ छट्ठट्ठमाइ भूरितवं काऊण संपत्तो पंचत्तं। जाओ इब्भकुले। संपन्ना सव्वाऽवि से परिभोगसामग्गी। तओ धम्माराहिऊण सुहिओ संजाओ॥ एवमुपभोगान्तरायो न कार्यः॥

अथ वीर्यान्तरायोपरि अनेकोदाहरणानि स्वयमभ्यूह्यानि। यः कश्चिदत्यन्तदृप्तबलीवर्दवरभखरमहिषगजतुरगादीन् दृढबन्धनैर्बध्नाति तर्जनैस्तर्जयति आराभिर्विदारयति चतुर्षु चरणेषु दृढरज्जुभिर्बध्नाति। अथ च यः पुमान् ललना वा विविधैः कार्मणभेषजमन्त्रयन्त्रैरन्यं जनं निर्वीर्यं निःसत्त्वं कुरुते, स आगामिनि भवे वीर्यान्तरायोदयाद्धातुक्षयप्रमेहववल्गुलीरोगादिभिरत्यन्तं बाध्यते, सर्वा व्याधयस्तं विधुरीकुर्युः शरीरे इत्यर्थः। एवं पञ्चान्तराया बोधव्याः॥

अथ साधर्मिकवात्सल्योपरि काव्यमुच्यते—

**साहम्मियाणं बहुमाणदाणं, भत्तीइ अप्पिज्ज तहऽन्नपाणं।**
**वज्जिज्ज रिद्धीइ तहा नियाणं, एयं चरित्तं सुकयस्स ठाणं॥४१॥**

व्याख्या–समाने धर्मे वर्तन्ते चरन्तीति वा साधर्मिकाः। ते च द्विधा–साधवः श्राद्धाश्च। तत्र साधवः साधूनां

श्राद्धाः श्राद्धानां सधर्माणः । तेषां सधर्मणां बहुमानदानं पूजासत्कारकरणं । तथा भक्त्या अर्पयेत् अन्नं भोज्यं पानं शर्करादि । तत्कुतः ? यतः केवलबहुमानेन नार्थसिद्धिः तदर्थं भक्तपानदानमुक्तं । सार्धमिकवात्सल्यमेतदेव तात्त्विकं यत्प्रस्तावमासाद्य साधुः श्राद्धो वा मधुरान्नपानप्रदानादिना स्वसधर्माणमागतं ज्ञात्वा नत्वा च साज्यप्राज्य-भोज्यदानवसनसमर्पणादिना सद्भक्त्या सत्करोति । विशेषतोऽभिनवसाधुबालवृद्धग्लानपथश्रान्तायातसाधुपारणोत्तरपा-
॥३२७॥ रणप्रस्तावप्रदत्तदानमतीव पुण्यप्राग्भारप्रादुर्भावकं स्यात् । यदुक्तं–"**पहसंतगिलाणेसु य आगमगाहीसु तह य कय-लोयं । उत्तरपारणगम्मी दिन्नं सुबहुप्फलं होइ ॥१॥ जइ वयरसामिपमुहा साहम्मीवच्छलत्तमकरिंसु । सुस्समणा वि य होउं ता सेसा किमिह सीयंति ॥२॥ ताणं च ऊसवाइसु सरणं दिट्ठाण पुव्वमालवणं । तह वत्थपाणभोयणसक्कारा सव्वसत्तीए ॥३॥ परिभूयाणं ताणं नरिंदमाईहिं बंदिगहियाणं । मोयावणं कुणंति य धन्ना धणजीविएणावि ॥४॥ सुहिसयणमाइयाणं उवयरणं भवपबंधवुड्ढिकरं जिणधम्मपवन्नाणं तं चिय भवभंगमुवणेइ ॥५॥ आसंसारविरहिओ संसारियभावविगमओ चेव । वच्छल्लममोल्लं कित्तियं च साहम्मिलोगम्मि ॥६॥**" तथा "**वज्जिज्जेति** वर्जयेत् ऋद्धेः तथा निदानं, एतावता दानं देयं परं निर्निदानं । तानि चामूनि नव निदानानि–"**निव १ धणि २ नारी ३ नर ४ सुर** ॥३२७॥
**५ अप्पप्पवियार ६ अप्पवियारत्तं ७ । अडुत्त ८ दरिद्दत्तं ९ चइज्जह नव नियाणाइं ॥१॥**" तदुक्तं चरित्रं सुकृतस्य स्थानं सुकृतार्जनहेतुरिति काव्यार्थः ॥

इय जो सभूमिगाए समुचियमायरइ सव्वसत्तीए । सो पावइ सुहरासिं **विसाहदत्तो** धणो य जहा ॥१॥

## अथ दृष्टान्तः—॥ विशाखदत्तकथा ॥

परिपक्कसुबिंबीए वणम्मि सुमणोहरंबलुंबीए । उग्गयलयतुंबीए **कोसंबीए** वरपुरीए ॥१॥ पप्फुल्लुप्पलनित्तो सुरु-वगत्तो सुहीकयसमित्तो सिट्ठी **विसाहदत्तो** वसइ तहिं धम्मउवउत्तो ॥२॥ सो **धम्मघोससूरीण देवसूरीण** पवरवि-ज्ञाए । पासे सुगुणावासे पवज्जए बारसवयाइं ॥३॥ सो अन्नया कयावि हु पच्छिमरत्तीए जग्गिरो संतो । पंच-परमिट्ठिसमरणपज्जते समरए चित्ते ॥४॥ रयणाणि जस्स गेहे कक्केयणहंसगब्भमाईणि । हुंति धणी स गरिट्ठो निद्दिट्ठो किमिह इयरेहिं ॥५॥ दक्खलक्खरित्थकलिओ चलिओ रयणज्जणत्थमेस तओ । वयरागरदेसं पइ चोरेहिं लुंटियं दव्वं ॥६॥ इक्किल्लओ भमंतो मिलिओ कावालियस्स कस्स वि सो । तेणवि हु लक्खणलक्खिउ त्ति मुणिउं सकज्जस्स ॥७॥ सिद्धिकए तस्सुत्तं कहं सचिंतोऽसि भो महाभाग । नियवइयरो असेसो परिकहिओ तेण तस्स तओ ॥८॥ जइ तुह अतुच्छविभवज्जणम्मि इच्छा तओ समागच्छ । सरलप्पा सो चलिओ तस्सत्थे निब्भयत्तेण ॥९॥ तेणाणीओ गिरिमेहलाइ आहरणकालियाभवणे । तो जोइणा स वुत्तो जोहारसु भो इमं देविं ॥१०॥ तुह धणलाहो होही गरुओ एयप्पभा-वओ भयवं । जिणमुज्झिय न हु अन्न नमामि देवं दयाहीणं ॥११॥ जोहारिय जिणदेवं सेवं को कुणइ अवरअम-राणं । काऊण अमयपाणं को णु जणो कंजियं पियइ ॥१२॥ तं पइ जंपइ जोई रे रे नर धिट्ठ दुट्ठ पाविट्ठ । तुह मत्थएण पूयं देवीए नणु करिस्समहं ॥१३॥ इय जंपित्तु बिकोसी काउं खग्गं करेइ जा घायं । ता तक्कोणे सुत्तो विप्पासिद्धो य सुक्कओ ॥१४॥ धणनामो सुस्सावय वच्छल्लमईए भणइ जोईसं । अइ पाव रे विमुंचसु सावयमेयं

सदायारं ॥१५॥ इइ वुत्तुं विज्ञाए स थंभिउव्व थिरदेहो। तो जोई भयभीओ निवडिय चलणेसु मिल्हइ तं ॥१६॥
तो करुणाइ धणेण विमुक्को जोई सठाणमल्लीणो। विज्ञासिद्धो साहम्मिवच्छलत्तेण गाढयरं ॥१७॥ रयणपरिक्खं इय
सिक्खवेइ जणउ व्व जणियनेहभरो। भयणा सव्वत्थ गुणावहा विसेसेण समधम्मे ॥१८॥ छक्कोणमइविसुद्धं तिक्खसुधारं
॥३२९॥ सुवन्नलहुपासं। इंदधणुसुकंतिल्लं वयरं विग्धं हरइ सव्वं ॥१९॥ जं वीसतंदुलाणं भारिल्लं सव्वदोसनासयरं। तं दुगुणि-
यरूवगलक्खमुल्लमुत्त मणिविऊहिं ॥२०॥ इच्चाइ सिक्खवित्ता रयणपरिक्खं तमाह तुट्ठमणो। साहम्मिय लच्छीउ पुन्नप्प-
ब्भारलब्भाओ ॥२१॥ न घणारंभभरेहिं संपज्जंतीह संपया सयणे। पावज्जियाओ जाओ ताओ परलोयदुहहेऊ ॥२२॥
सव्वेसु वि कएसुं सुगरिट्ठयं नणु सधम्मवच्छल्लं। तित्थंकरेहिं कहियं महियं पुण सगुणलोएहिं ॥२३॥ सो अत्थो तं च
सामत्थं तं विन्नाणमणुत्तमं। साहम्मियाणकज्जम्मि जं विच्चंति सुसावया ॥२४॥ सुस्सावयाण वच्छल्लं जे कुणंति महा-
सया। पुन्नाणुबंधियं पुण्णं ते लहंतऽक्खयं पयं ॥२५॥ तत्तो तुमए साहम्मियाण वच्छल्लयं विहेयव्वं। सुकयत्थिणा सयाऽवि
हु जममुल्लगुणं विणिद्दिट्ठं ॥२६॥ वयणामयरसमाकंठमेस पाऊण तम्मुहसराओ। पइदिणमेगेगमहं भोइय साहम्मियं
गेहे ॥२७॥ तो पच्छा भुंजिस्सं अभिग्गहो एस सावएण कओ। नियगेहं पइ चलिओ तस्साएसं गहेऊण ॥२८॥ ॥३२९॥
वज्जागरतीरठियं धणपुरमेसो समागओ सिट्ठी। जोहारित्तु जिणिंदं रसवइपायं विहेऊए ॥२९॥ असणं काउमणो जा
किं पिहु साहम्मियं पलोएइ। तावासन्नदुमोहे पडोवरिं नत्थजिणबिंबो ॥३०॥ कयपंचंगपणामो जिणथुइ भणिरो नरो
तहिं दिट्ठो। कयवंदणेण पुट्ठो ठाणाओ आगओ कम्हा ॥३१॥ कत्थ य वच्चसि सावय तेणुत्तं भरहखित्ततित्थाणि। जो

सप्ततिका.

भत्तिबहुमाणपुव्वं भोइत्ता तदणुमोइणाइ यणं । पुन्नं समज्जियं नणु

नदेश- हारंतो एत्थागओ म्हि तो तेण आहूओ ॥३२॥ भत्तिबहुमाणपुव्वं भोइत्ता तदणुमोइणाइ यणं । पुन्नं समज्जियं नणु तदधिट्ठायगदेवेण ताव तप्पुन्नतुट्ठेण ॥३४॥

अइपउरं पत्तदाणाओ ॥३३॥ तत्तो कमेण पत्तो सिट्ठी वयरागरम्मि खेमेण । तदधिट्ठायगदेवेण ताव तप्पुन्नतुट्ठेण ॥३४॥

रयणोए सुमिणम्मि य समेच्च रयणाइं कोडिमोल्लाइं । दिन्नाइं से मणिच्छियसमग्गसंपत्तिहेऊणं ॥३५॥ तत्तो पहम्मि

इक्केक्कमेस साहम्मियं पभोयंतो । संपत्तो नियगेहं देहम्मि रवि व्व दिप्पंतो ॥३६॥ सयलो वि सयणवग्गो मिलिओ कलि-

।३०॥ ओ पमोयपूरेण । फलियद्दुमम्मि विहगा अहिगायरभाइणो हुंति ॥३७॥ ढोइयमिमेण भूमीवइणो समुहल्लमुल्लवररयणं ।

रन्नाऽवि पउरवग्गे संठविओ सोऽवि सिट्ठिपए ॥३८॥ धम्माहिगयपहुत्तो जो पुण धम्मे परम्मुहो होइ । सो कह मुग्ग-

इभाई सामिद्दोहीसु पढमिल्लो ॥३९॥ इय चित्तम्मि विचिंतिय धम्मं सम्मं करेइ सो सिट्ठी । साहम्मियमेगेगं अणुवा-

सरमेस भोयंतो ॥४०॥ एगुत्तरवुड्ढीए पइवच्छरमेस सावयजणस्स । भत्तीइ भोयणासणदाणरओ गोरवं कुणइ ॥४१॥

हत्थंतरम्मि सोहम्मसामिणा वण्णणा कया तस्स । जारिसओ भरहम्मी साहम्मीवच्छलो धणियं ॥४२॥ सिट्ठी विसाहदत्तो

तत्तो अन्नो न कोऽवि फुडमित्थ । तव्वयणमसहमाणो विबुहो इक्को तओ चलिओ ॥४३॥ अभिनवसावयरूवं काउं ॥३२०॥

तच्चित्तचालणिक्कमणो । भोयणकए निविट्ठो सिट्ठिघरे भुक्खिओ निसिओ ॥४४॥ सव्वमसणं पि पाणं खाइममह साइमं

मुनिट्ठविय । पत्तो न छुहनिवित्ति रहापिसाउ व्व पच्चक्खो ॥४५॥ इत्थंतरम्मि बहुसो इक्खुरसस्सागया घडा तत्थ ।

सिट्ठिउपायणहेउं समप्पिया तेऽवि तस्सेव ॥४६॥ आसाइआ खणेण वि तेऽवि इमेण पभूयछुहिएण । तोऽवि न रुट्ठो

सिट्ठी मणयम्मि न वेमणस्समिओ ॥४७॥ वन्नोऽन्ह जस्सत्थो साहम्मिजणोवओगयं पत्तो । मन्नइ अप्पाणमिमो इय

चिंततो नियं चित्ते ॥४८॥ ता पच्चक्खीहोउं देवो तग्गुणपसंसणं कुणइ । सव्वाहिवाहिहरणिं मसिमणिमयसंतिजिणपडिमं ॥४९॥ दाऊं गओ सठाणं सिट्ठी वि सधम्मलोयवच्छल्लं । कुणमाणो धम्मरओ जीवियपज्जंतमावन्नो ॥५०॥ बारसकप्पे देवो जाओ निच्चं मुदिव्वजुइ काओ । चक्किपयं पावित्ता चविस्स तत्तो मुविच्छिन्नं ॥५१॥ पावित्तु अहक्खायं चरणं पालित्तु केवलं पप्प । सिज्झिस्सइ स विदेहे वासे संपुन्नसव्वासे ॥५२॥ अज्झप्पे सुगुरूणं धणो वि धम्मं लहेत्तु चारित्तं । देवो य भविय तत्तो गच्छिस्सइ अक्खयं मोक्खं ॥५३॥ विसाहदत्तस्स निराम... ...मं, चरित्तमेयं सुगुणोहरम्मं । साहम्मिवच्छल्लरया सयाऽवि, भवंतु भव्वा तणुसंपयाऽवि ॥५४॥ ॥ श्रीसाधर्मिकवात्सल्योपरि विशाखदत्तकथानकम् ॥

अथ द्वादशव्रतपालनाधिकारे श्राद्धस्य प्रथमाणुव्रतकाव्यमाह—

**अहिंसणं सव्वजियाण धम्मो, तेंसि विणासो परमो अहम्मो ।**

**मुणित्तु एवं बहुपाणिघाओ विवज्जियव्वो कयपच्चवाओ ॥४२॥**

**व्याख्या**—न हिंसनमहिंसनं, केषामित्याशङ्कानिरासार्थं सर्वे च ते जीवाश्च सर्वजीवास्तेषां सर्वजीवानामिति पदं । अयमर्थः—यत्सर्वजीवानां पञ्चेन्द्रियरूपाणां हिंसा निवार्यते । तेषां सर्वजीवानां विनाशः प्राणव्यपरोपणं । अयमेवाधर्मः परमः प्रकृष्टः कथितः । एवं मुणित्तु विज्ञाय बहुप्राणिघातः वर्जयितव्यः, परं किंभूतः सः ? कृताः प्रत्यपाया अनेके विघ्ना येन स तथारूपः । अत्रार्थे श्राद्धस्य जीवदयाविशेषस्वरूपमाह—यदुक्तमागमे—"**जीवा सुहुमा थूला संकप्पारंभओ य ते दुविहा । सवराहनिरवराहा साविक्खा चेव निरविक्खा** ॥१॥" अनया गाथया साधुश्राद्धयोर्मेरुसर्षपान्तरं

॥३३१॥

दयागुणत्वात् ज्ञेयं। अधुना यदा श्राद्धोऽनिर्वहन् क्षेत्रादिकं करोति तदा स्थूलस्यापि जीवस्य वधः स्यात् पृथिव्यादीनां द्वीन्द्रियादीनां च स्यात्, साधूनां द्वयोरपि हिंसानियमः, एतावता २० विंशोपकाः साधोर्भवन्ति, श्राद्धस्य तु स्थूलानां नियमो न तु सूक्ष्माणां नियम इति दश विंशोपकाः। अर्धं प्राप्तं ततः कथं क आकारः संकल्प्य ज्ञात्वा स्थूलजीवहिंसानियमः, पुनरारम्भे सत्यजानतो न नियमः, ततः पुनरप्यर्धं गतं, दशानां मध्ये पञ्च जाताः। अथ केनापि पुरुषेण निजगृहेऽन्यायः कृतस्तदा तस्य पञ्चेन्द्रियादिस्थूलत्वं जानन्नपि च्छलाद्धन्ति तत आकारं मुत्कलं करोति, कथं ? निरपराधजीवमारणनियमः, परं सापराधस्य न, पुनरप्यर्धं गतं, पञ्चानामप्यर्धं जातं, सार्धौ द्वौ विंशोपकौ। अथ वृषभान् खेटयति यदा तदा निरपराधपञ्चेन्द्रियानपि जानन् सन् कषादिभिस्ताडयति, तदाऽऽकारो मुत्कलः कर्त्तव्यः, कथं ? यदा घातं ददामि तदा निर्दयत्वेन न ददामि पुनः सदयत्वं मुत्कलं, पुनरप्यर्द्धं गतं सार्धद्वयं विंशोपकार्धं सपादविंशोपको जातः। एतावता स्थितं इत्थं प्राणिवधो निषेध्यः। श्रीआवश्यकेऽप्युक्तं—"थूलगपाणाइवायं समणोवासओ पच्चक्खाइ। से पाणाइवाए दुविहे पन्नत्ते, तं जहा–संकप्पओ आरंभओ य। तत्थ समणोवासओ संकप्पओ जावज्जीवं पाणाइवायं पच्चक्खाइ' नो आरंभओ। तत्थ पंच अइयारा जाणियव्वा न समायरियव्वा वहे बंधे छविच्छेए अइभारे भत्तपाणवुच्छेए त्ति" ॥ अथ दृष्टान्तः—:

॥ प्राणातिपातव्रते क्षेमादित्य कथा ॥

पाटलीपुत्रपूर्नाथो भूभर्ताऽभूज्जितारिकः। चतुर्धीधनधनदो धीसखस्तेन सूत्रितः ॥१॥ क्षेमादित्यः श्राद्धधर्मी भूप-

सन्मानदानभूः । इत्येष द्वेष्य एवासीत्सर्वेषामधिकारिणाम् ॥२॥ तं विमृश्य मिथः सर्वैरेतस्यैवानुयायिनः । सत्कृत्य वस्त्रालङ्कृत्या भूपतेर्घातकाः कृताः ॥३॥ शस्त्रहस्ता निग्रहीतास्ते निशागुप्तवृत्तयः । हन्यमानैरिमैः प्रोक्तं क्षिप्ताः क्षेमेण वै वयम् ॥४॥ राज्ञा निजगृहे रोषादेष द्वेषविमुक्तधीः । जजल्प राजन्नो जन्तून् हन्म्यहं किं पुनर्नृपम् ॥५॥ तथापि भूप आदिशत्तं वध्यं स्तेनवत्क्रुधा । प्रोचेऽन्यैर्मन्त्रिभिर्देव भवद्गृहवनान्तरे ॥६॥ वापिका वर्त्ततेऽगाधा बाधाकृद्यादसां व्रजैः । प्रफुल्लपद्मसंकीर्णा पूर्णा निर्मलवारिणा ॥७॥ न समर्थस्तदीयाब्जानयने कोऽपि पूरुषः । क्षेमः प्रक्षिप्यतां तत्र जलजन्तुबलिर्भवेत् ॥८॥ इत्युक्ते सहसोत्थाय स्मृत्वा देवगुरुन् हृदि । आख्यत्समन्तुश्चेन्नाहं तदा सान्निध्यकृत्सुरः ॥९॥ इत्युक्त्वैष पपातान्तरनुभावात्स देवतात् । उपर्याजगमिवान्मीनारूढः प्रौढाब्जहस्तकः ॥१०॥ क्षमयामास तं भूपः सत्वक्रे कुशलागतम् । द्वेषिणोऽधोमुखीभूता वार्ता साऽज्ञायि भूभुजा ॥११॥ वरं वृणिष्वेति भूकान्ते वक्तर्येषोऽप्यभाषत । प्रव्रज्यावसरं स्वामिन्नापरं मम रोचते ॥१२॥ इत्युक्त्वा संयमी भूत्वा सम्यगाराध्य शुद्धधीः । क्षेमः सिद्धिसुखान्याप प्राणिप्राणैकरक्षकः ॥१३॥ ॥ इति प्राणातिपातव्रतदृष्टान्तः ॥

अथ द्वितीयाणुव्रतमाह—

**कोहेण लोहेण तहा भयेणं, हासेण रागेण य मच्छरेणं ।**
**भासं मुसं नेव उदाहरिज्जा, जा पच्चयं लोयगयं हरिज्जा ॥४३॥**

व्याख्या- क्रोधेन द्वेषेण, लोभेन द्रव्यार्जनेच्छया, भयेन राजदण्डादिना, हास्येन नर्मणा, रागेण स्वकीयसगीनतया

॥२२२॥

मैत्रीभावेन वा, मत्सरेण परस्परविरोधात्मकेन, भाषां मृषारूपां नैव उदाहरेत् भाषेत या मृषा वाक् प्रोक्ता सती लोकगतं जनव्रातं स्वकीयं प्रत्ययं विश्वासं हरेन्निराशयेदिति गाथार्थः। मृषाभाषकः कस्यापि विश्वासास्पदं न स्यादिति भावार्थः। यत उक्तं—"थूलगमुसावायं समणोवासओ पच्चक्खाइ। से मुसावाए पंचविहे पन्नत्ते, तं जहा—कन्नालिए गवालिए भोमालिए नासावहारे कूडसक्खिज्जे। थूलमुसावायस्स समणोवासएण इमे पंच अइयारा जाणियव्वा न



समायरियव्वा, तं जहा—सहसा अब्भक्खाणे रहस्स अब्भक्खाणे सदारमंतभेए मोसुवएसे कूडलेहकरणे"॥

अथ तदुपरि कथा—

श्राद्धः कुंकुणवास्तव्यः कश्चित्केनाप्यजल्प्यत। मारणीयो हयो नश्यँस्तेनाहन्यत तद्गिरा॥१॥ ममार दैवयोगात्स धूर्तः कौंकुणकस्ततः। तुरगेशा समानिन्ये नृपाग्रे धीसखैस्ततः॥२॥ पृष्टोऽत्रार्थेऽस्ति कश्चिद्वोः साक्षी तत्सुतमेव सः। प्राह सत्यमिदं स्वामिन् सचक्रेऽसौ ततोऽधिकम्॥३॥ अश्वेड् निर्घाटयांचक्रे राज्ञा रञ्जितचेतसा। अतः सत्यैव गीर्वाच्या सुकृतश्रेणिवर्धिनी॥४॥ ॥ इति मृषावादोपरि कथा॥



अथ तृतीयाणुव्रतमाह—

असाहुलोएण य जं पवन्नं, बुहो न गिण्हिज्ज धणं अदिन्नं।
अंगीकए जम्मि इहेव दुक्खं, लहइ लहुं नेव कयाइ सुक्खं॥४४॥

व्याख्या—असाधुलोकेन यत्प्रपन्नं नीचलोकेन यत् स्वीकृतं बुधः पण्डितः पुमान् न गृह्णीयात् तद्धनं अदत्तं धनि-

केनावितीर्णं । यस्मिन् स्वीकृते सति इहैवात्र जन्मनि दुःखं ताडनबन्धनादिकं लभते लघु शीघ्रं तस्करवत्, नैव एवोऽवधारणे कदाचित्सुखं शरीरसमाधानादिकमिति काव्यार्थः ॥ "**थूलगमदिन्नादाणं समणोवासगो पच्चक्खाइ । से अदिन्नादाणे दुविहे पन्नत्ते । तं जहा–सचित्तादिन्नादाणे अचित्तादिन्नादाणे । अदिन्नादाणस्स समणोवासएणं इमे पंच अइयारा** जाणियव्वा, **न समायरियव्वा, तं जहा–तेनाहडे तक्करप्पओगे विरुद्धरज्जाइक्कमणे कूडतुलकूडमाणे तप्पडिरूवे य ववहारे** ॥ अदत्तत्यागे को गुणः कश्चापगुण इत्यत्रार्थे द्वयोरप्येक**मुदाहरणम्**—

एकः क्वाप्यभवच्छ्राद्धः श्रद्धावान् धर्मकर्मणि । गोष्ठीप्रियः स च प्रायस्तत्र कोऽप्युत्सवोऽभवत् ॥१॥ गृहे निर्जनतां याते मुषितं गोष्ठिकृज्जनैः । तद्वेश्म तं विना श्राद्धमेकान्तं वीक्ष्य सर्वथा ॥२॥ वृद्धैका तत्र वर्तिष्णुर्धीमती ज्ञातुमत्वयमून् । भोः पुत्रा भवतां वित्तं जातमित्यूचुषी सती । तदज्ञाता वहिःपिच्छ्युताःलाञ्छयदंह्रिषु ॥३॥ प्रातश्चे नृपस्याग्रे ते ज्ञेयाः कथमित्यसौ । प्रोक्तवान् वृद्धयाऽऽख्यायि कृतमस्त्येषु लाञ्छनम् ॥४॥ समवायेऽथ ते दृष्ट्वा गोष्ठी सर्वा धृताङ्कतः । तेष्वाह श्रावकां नाहं हरे किञ्चिन्न कस्यचित् ॥५॥ अमुचत्तं नृपो यस्मादेष नो चिह्नितः पदे । सन्मानयिरथाऽन्ये सर्वे दण्डिताः क्रूरकर्मणि ॥६॥ ॥ इति तृतीयाणुव्रतकथा ॥ ॥३३५॥

अथ चतुर्थव्रतमुच्यते––

**समायरं वा अवरस्स जायं मन्निज्ज छिंदिज्ज जणाववायं ।**
**जे अन्नकंतासु नरा पसत्ता ते अत्ति दुक्खाइ इहेव पत्ता** ॥४५॥

**व्याख्या**--आत्मीयजननीमिवापरस्यात्मव्यतिरिक्तस्य जायां भार्यां मन्येत पराङ्गनां स्वमातरमिव मन्वीत । छिन्द्यादेवं कुर्वन् जनापवादं जनावर्णवादं एवं कुर्वतः पुंसः सर्वथा जनापवादो न स्यात् । व्यतिरेकमाह—ये परललनास्वन्यकान्तासु नराः प्रसक्ताः प्रसङ्गभाजः स्युः ते झटिति दुःखान्यत्रैव जन्मनि प्राप्ता लङ्केशवदिति काव्यार्थः ॥ "**समणोवासगो थूलगं मेहुणं पच्चक्खाइ । से परदारगमणे दुविहे पन्नत्ते,** तं जहा—**उरालियपरदारगमणे वेउव्वियपरदारगमणे य** । सदारसंतोसस्स इमे पंच अइयारा **जाणियव्वा, न समायरियव्वा,** तं **जहा—इत्तरपरिग्गहियागमणे अपरिग्गहियागमणे अणंगकीडाकरणे परवीवाहकरणे कामभोगतिव्वाभिलासे त्ति**" । **अत्रोदाहरणम्—**

अत्रास्ति स्वस्तिमद्ब्रह्माववत्रवच्छुचिताञ्चितम् । पुरं श्रीनिलयं नाम धामाक्षामार्थसम्पदाम् ॥१॥ तत्रारिकुलकीलाललालसासिभुजङ्गमः । **यथार्थनामा** कामाभस्तत्राधीशोऽरिमर्दनः ॥२॥ कमले श्रीरिवोदारा तद्गृहे कमलेक्षणा । **कमलश्रीरिति प्रीतिपात्रं प्रेयस्यभूच्छुभा** ॥३॥ तयोरजन्यनूनश्रीः सूनुः सूनृतवाक्पटुः । शूरवीरशिरोरत्नं **वीरनामा** कुमारकः ॥४॥ **सोऽन्यदाऽऽखेटकं कर्तुमटाट्यन् विकटाटवीम्** । **नैकं शशकमेणं वा प्रेक्षिष्टाक्लिष्टधीरपि** ॥५॥ ततो विस्मितचेताः सन् **बम्भ्रमीति यतस्ततः** । कुतश्चिन्तार्त्तचित्तानामेकत्रावस्थितिर्धृतिः ॥६॥ तस्मादेकत्र **निवासदेशे** पेशलभूरुहे । सारङ्गव्याघ्रशशकप्रभृतीन् श्वापदव्रजान् ॥७॥ निरातङ्कान्निराशङ्कानेकत्र मिलितान् भृशम् । अपश्यन्नतिविश्वस्तान् स्निग्धवत्प्रीतिवत्सलान् ॥८॥ तत्कालमेव जीमूतोद्दामगर्जिततर्जनम् । वर्जनं पापपूगस्य साधोर्ध्वानं शृणोत्यसौ ॥९॥ इतोऽस्य परिवारेण क्षिप्तान्यस्त्राणि तान् प्रति । परं श्वापदजन्तूनां न लग्नान्यङ्गके मनाक् ॥१०॥ वैरायन्ते न तिर्यञ्चः

परस्परमनेकशः । न ते यत्प्रहताः शस्त्रैर्निशितैरागतैर्जवात् ॥११॥ तत्सर्वं स्फूर्जितं साधोः प्रभावस्य महीयसः । विवेद मेदिनीकान्ततनयो विनयोज्ज्वलः ॥१२॥ ततः समुल्लसद्भक्तिपूरपूरितहृत्सकः । समेत्य साधुमानम्य विधिनाऽग्र उपाविशत् ॥१३॥ तत्परीवारवर्गोऽपि प्रणनाम गुरोः पदम् । गुरुर्धर्माशिषा सर्वानभिनन्द्य विदांवरः ॥१४॥ जैनधर्मम- थाचख्यौ श्रमणः मुक्तोद्यमो । दुर्लभः प्राप्यते नैव नृभवो भवकोटिभिः ॥१५॥ तत्रापि सत्तमा जतिर्दुष्प्रापं तत्र सत्कुलम् । कुलेऽप्यद्भुतरूपत्वं रूपेऽप्यारोग्यमुत्तमम् ॥१६॥ तत्रापि धर्मसामग्री सामग्र्यामपि सत्क्रिया । क्रियायामपि कौशल्यं कौशल्ये सुविचारता ॥१७॥ तत्रापि हि दयावत्त्वं सर्वसत्त्वेषु सर्वदा । पालनीयं सदाचारविचारचतुरात्मना ॥१८॥ परप्राणापहारेण ये मन्यन्ते स्वशूरताम् । धिक् जन्म यौवनं तेषां जीवितव्यमपीह धिक् ॥१९॥ भूयांस्येनांसि सन्तीह परं प्राणातिपातजम् । पातकेषूच्यते मुख्यं मोक्षाशात्रासकारणम् ॥२०॥ सर्वेऽपि प्राणिनः स्वीयप्राणत्राणपरायणाः । त्याज्यमाना इमे प्राणैः प्राणिनः स्युः सुदुःखिताः ॥२१॥ सुखिनां दुःखिनां वाऽपि जीविताशा समैव हि । कथमेके विहन्यन्ते रक्ष्यन्ते च तथा परे ॥२२॥ जीवहत्याविधातारः फलमश्नुवते कटु । तेषां दुर्गतिपातः स्यादसातशतसंकटः ॥२३॥ इत्यर्हद्धर्मनिश्छद्मोपदेशामृतपानतः । निर्वीतस्फीततृष्णार्तिर्लेभे सम्यक्त्वमुज्ज्वलम ॥२४॥ न हि संकल्पतः स्थूलजीवघातमतः परम् । करिष्ये स्थूलमनृतं न ब्रुवे पञ्चधा मुधा ॥२५॥ परस्त्रीसेवनं मांसभक्षणाद्यं सपातकम् । वर्जितं तत्परीवारजनेन गुरुसाक्षिकम् ॥२६॥ प्रणिपत्य गुरुं भेजुः कुमाराद्या नरास्त्वरं । स्वं स्थानं सुस्थिता धर्मे धर्मेणार्त्ता- त्मनः यथा ॥२७॥ अथान्यदाऽवनीनेत्रा पुत्राः पृष्टाः सुधीमता । कीदृशी शेमुषी कस्येति परीक्षां विधित्सता ॥२८॥

पाञ्चालदेशे मयका योऽस्ति संस्थापितः पुरा । अस्वामिध्रुक् सुदक्षात्मा नियोगी वञ्चनोज्झितः ॥२९॥ दशलक्षीं स दीना-
रसत्कामेकत्र वत्सरे । उत्पतिष्णुं समाख्याति तावदन्योऽब्रवीदद: ॥३०॥ लक्षाः पञ्चदशामुष्य दास्ये देशस्य तेऽत्र भोः ।
युष्माभिः पूर्वमेवोक्तमर्जयाम्यधिकं पुनः ॥३१॥ ततः किमत्र कर्तव्यं वीरं मुक्त्वेत्यवक् प्रभुः । तत आख्यान्ति
सर्वेऽपि योऽर्जयेद्भूरि भूर्यहो ॥३२॥ स तत्र स्थाप्यते देशे किमन्यैरर्जनोज्झितैः । ततः क्षितिपतिः प्रोचे नोच्यते वीर
किं त्वया ॥३३॥ स प्रणम्रशिराः प्राख्यत् तातपादैर्न्यगादि यत् । पूर्वोऽधिकारी निर्मायः शाठ्यमुक्तमतिर्भृशम् ॥३४॥
स एवास्माकमत्रेष्टः किमन्यैः क्लिष्टचेष्टितैः । मा प्रजाः पीडयत्वेष न्यायेनार्जयताद्धनम् ॥३५॥ बहु द्रव्यं विनाऽन्यायेन
कथं वृद्धिमश्नुते । अन्यायश्च महत्पा(हापा)पद्रुममूलमुदीरितम् ॥३६॥ पूर्व एव नियोग्यस्तु स्वस्निग्धः प्रजाजने । नादत्ते
ह्यधिकं द्रव्यमनयं दूरतस्त्यजन् ॥३७॥ योऽर्जयिष्यति निष्कस्य लक्षान् पञ्चदश ध्रुवम् । ऋतेऽनीतिं कथमसौ धनमु-
त्पादयिष्यति ॥३८॥ भवन्नियोगितामेत्य यः समुल्लङ्घयेन्नयम् । अयं दाता ह्यधर्मस्य तवाथाप्ययशस्ततः ॥३९॥ तत-
श्चिन्तयति क्ष्मापः पापनिर्मुक्तधीरयम् । ज्यायान् लघुरपि प्रायः प्रकृष्टैः सद्गुणव्रजैः ॥४०॥ राज्यधूर्धरणे धुर्यवर्यभावं
भजेदसौ । ततः समानजातिभ्यो रत्नवद्यत्नमर्हति ॥४१॥ निश्छद्मातुच्छवात्सल्यपिच्छलस्वच्छमानसे । मय्यस्मिन् वैरभाजः
स्युरन्ये धन्ये गुणोत्करैः ॥४२॥ तस्माद्देषोऽन्यदेशेऽपि निर्गुणीकृत्य निर्भरम् । प्रेष्यते तत्र सौख्येन स्थाता निःशङ्क-
निर्भयः ॥४३॥ पश्चादपि हि राज्यस्याधारः स्तम्भो गृहस्य वा । भव्यमुद्रोरुभद्रौघः सम्यग्भावी सुनिश्चितम् ॥४४॥
एवं विमृश्य भूमीशस्तं कुमारमुदाहरत् । वत्स सर्वेऽप्यमी पुत्रा दुश्चरित्राश्च दुर्धियः ॥४५॥ त्वमेवैकः सुधीस्तेभ्यः

प्रजल्पन् वैपरीत्यत: । नान्यार्जितश्रियो भोक्तृभावस्त्वत्र युज्यते ॥४६॥ विहाय रंहसा देशमेनमन्यत्र याहि भो: ।
नात्रस्थस्य भवद्बुद्धेर्वैभवं व्यज्यते खलु ॥४७॥ तत: पृथ्वीपते: पादान्नमस्कृत्य स निर्ययौ । मंत्रिसागरमन्थ्यात्मजन्मना
विमलेन युक् ॥४८॥ प्रच्छन्नादिष्टभूप्रष्ठसुभटै: पान्थतां गतै: । अनुद्रुताध्वा प्रययौ स कोशलपुरं पुरम् ॥४९॥ पुर:
परिसरोद्देशसरस्ती रे नरेशसु: । विशश्राम श्रमी यावत्तावत् कलकलोऽभवत् ॥५०॥ अवार्यतुर्यनिर्घोप: पुरे प्रादुर्बभूव
॥३३१॥ च नगरागन्तुक: कोऽपि तेनापृच्छ्यत तावता ॥५१॥ पुरे कोऽप्युत्सवोऽद्यास्ते येन वाद्यध्वनिर्महान् । श्रुत्योरानन्द-
मातन्वन्नाकर्ण्यते अहो वद ॥५२॥ स प्राह श्रूयतामत्र **रणरङ्ग**महीशितु: । पुत्री **कुसुमती नाम** साऽऽस्ते प्राणप्रियङ्करी
॥५३॥ परं पुरुषविद्वेषदोषमादधती सती । वरं वरयते नैव किञ्चिदौचित्यवेदिनी ॥५४॥ ततस्तज्जनकेन स्वगोत्रदेव्य-
तिपूजया । आराध्य पृष्टा तुष्टाऽऽह भवत: पट्टकुञ्जर: ॥५५॥ यत्कण्ठे क्षिपति क्षिप्रं मालामम्लानपुष्पिकाम् । स कुमा-
र्या: पतिर्भावी तस्मिन्नेवाह्नि निश्चितम् ॥५६॥ तत: करी कृतार्च: सन्मुमुचे तत्कटोपरि । कुमार्यारोपयाञ्चक्रे वक्रेतर-
मनस्विनी ॥५७॥ नदद्भिर्भूरिभिर्वाद्यैर्गजेनारामिकाद्दुत: । शुण्डाग्रे स्थापिता माला निर्मला मोदमालिनी ॥५८॥ मही-
क्षिन्माण्डलीकालीमन्त्रिसामन्तसेवित: । साम्प्रतं स पुरीमध्ये भ्राम्यन्नास्ते निरङ्कुश: ॥५९॥ इत्युक्त्वा विरते तस्मिन्ना- ॥३३१॥
कस्मिक इवाम्बुद: । तावत्क्षणेन संप्राप दृक्पथं वैमलं करी ॥६०॥ गलन्मदजलासिक्तसकलक्षोणिमण्डल: । तमागच्छ-
न्तमालोक्य गर्जन्तं निर्भरं रयात् ॥६१॥ विमलोऽबोधयद्वीरकुमारं प्रबलायितम् । प्रपेदे तावदेतस्य पार्श्वं पट्टेभराट्
प्रभो: ॥६२॥ कराग्रोरिक्षप्तमाला सा कण्ठे तेनास्य चिक्षिपे । **पुण्यभाजां हि राज्यश्रीर्दासीवानुपदं व्रजेत्** ॥६३॥

[illegible] नन्दनम् । जगर्ज गजसारोऽपि प्रभुस्तुष्टो निजे हृदि ॥६४॥ मारोदारोरुरूपश्रीः कुमार्याः पतिरेष वै । भावीति साऽपि प्रैक्षिष्ट हृष्टा भाविस्ववल्लभम् ॥६५॥ गजानां दशकं स्वर्णलक्षं चाश्वसहस्रकम् । विश्राण्य राजपुत्राय प्रभुर्धूलिचटापनैः ॥६६॥ छायालग्नेऽथ संप्राप्ते कुमार्याः पाणिपल्लवम् । कुमारकरपद्मेन ग्राहयामास पार्थिवः ॥६७॥ करमोचनवेलायामिलाभुक् तनुजन्मने । प्रददौ ग्रामसाहस्रीमश्वीनिनीशिनीं नृपः ॥६८॥ सौधे नृपतिना दत्ते लसत्तेजा दिनेशवत् । विललास सुखं भोगान् कान्तया सह भूपभूः ॥६९॥ पिता स्वप्रहितप्रच्छन्नानुगामिगणाननात् । पौत्रं राज्याप्तिवृत्तान्तमवेत्य मुमुदेतराम् ॥७०॥ प्राज्याद्यैर्भूरिभिर्भोज्यैरभोजि क्ष्मापनन्दनः । विवाहानन्तरं राज्ञा तेनाभक्ष्यं न भक्षितम् ॥७१॥ किमेतदिति पृष्टोऽसौ स्पष्टमाचष्ट पार्थिवम् । सावधानतया मद्गीः श्रूयते तर्हि कथ्यते ॥७२॥ मांसपाको निषेध्योऽयं रसवत्यां महीपते प्राक् ततः कथयिष्येऽहं तेनाप्यथ तथा कृते ॥७३॥ कुमारः प्रोचिवान् राजन् दोषो मांसाशने महान् । पञ्चाक्षप्राणिहत्यातः पलं स्यान्नान्यथा पुनः ॥७४॥ सत्त्वहिंसा तु हेतुः स्यान्नरकस्येति दर्श्यते । सर्वेषु धर्मशास्त्रेषु समयज्ञैरनेकशः ॥७५॥ इत्याख्यायि क्षमापाल गुरुणा मे क्षमाभृता । कृता तस्योपदेशाली मुक्तामालेव वक्षसि ॥७६॥ गृहिधर्मो मयाऽग्राहि विरतिः पलभक्षणात् । श्रुत्वेति सादरस्तस्मिन्नजायत नरेश्वरः ॥७७॥ विश्वस्तधीस्तद्वचसि प्रपेदे पलवर्जनम् । स देवगुरुतत्त्वाढ्यं स्वीचक्रे धर्ममार्हतम् ॥७८॥ अथान्यदा प्रतीहाराज्ञया गेहान्तरागता । काचित्समेत्य स्त्री एवं कुमारं प्रत्यवीवदत् ॥७९॥ अहो सुन्दर सुन्दर्यश्चतस्रः सन्ति सुन्दराः । रूपश्रीनिर्जितोद्दामरमारम्भारतिप्रभाः ॥८०॥ श्रेष्ठिमन्त्रिक्षमापालप्रतीहारप्रियाः प्रियाः । तास्त्वाम-

॥३४१॥

देश्य पञ्चेषुप्रहारैर्जर्जराः कृताः ॥८१॥ मन्मथव्यथया बाढमुद्वेजितवपुर्लताः । यथा स्युः सज्जसर्वाङ्गस्तथा कार्याः स्वसङ्गमात् ॥८२॥ ततः किमपि निश्चित्य तत्रोपायं स राजसू. । अभाषत प्रतीहारी प्रथमे प्रहरे निशः ॥८३॥ द्वितीये श्रेष्ठिकान्तैतु तृतीये मन्त्रिवल्लभा । चतुर्थे नृपभार्या तु प्राप्नोतु स्वसमीहितम् ॥८४॥ एतद्गीरमृतास्वादमेदुरा साथ दूतिका । ततः समेत्य तासां सा ज्ञापयामास तद्वचः ॥८५॥ ततः प्रोचे द्वितीयेऽह्नि राजानं राजनन्दनः । अदृष्टवद्यदा दृष्टं कुरुषे तत्किमप्यहम् ॥८६॥ दर्शयामि भवद्योग्यमब्रवीद्भूपतिस्ततः । त्वमस्मत्पुत्रतुल्योऽसि व्यवहारेण सत्तमः ॥८७॥ धर्मदानाद्गुरुश्चासि परमोपकृतिक्षमः । दर्शनीयं निवेद्यं यत्तत्तूर्णं प्रगुणीकुरु ॥८८॥ अथाभाणीत्कुमारस्तं सन्ध्यायामद्य मद्गृहे । प्रच्छन्नीभूय संस्थेयं समेत्यैव प्रपन्नवान् ॥८९॥ तथा कृते महीन्द्रेण कुमारेण स्वसन्निधौ । गुप्तं पर्यङ्कमाधाय तत्र संस्थापितः स च ॥९०॥ अथ केनापि दम्भेन निर्गत्य निजसद्मनः । समाजगाम तद्धाम कुमारस्तामवोचत ॥९१॥ अत्राप्यशर्मदाः पुंसां परत्र नरकावहाः । विषया विषसंकाशास्तीव्रापत्तिविधायिनः ॥९२॥ भोगा रोगावहाः कस्य देहिनः स्युर्न सेविताः । भवे परत्र दौर्भाग्यवियोगव्याप्तिहेतवः ॥९३॥ नाम्भोभिर्लवणाम्भोधिः समिद्भिर्न धनञ्जयः । यथा तृप्तिमिहाप्नोति जीवोऽपि न तथा सुखैः ॥९४॥ त्रैदशैर्भोगसंयोगैर्जन्तुर्यदि न तुष्यति । तुच्छैर्नृजन्मजैरेतैस्तत्कथं तृप्तिमाप्नुयात् ॥९५॥ बहिर्वृत्त्या महामुग्धाः प्राणिनां विषयाः स्मृताः । विपाककटुकाः किंतु किंपाकफलवच्च ते ॥९६॥ हेयास्तस्मादमी भोगा नोपादेयाः सुधीमताम् । इन्द्रियाणि मनश्चापि नियम्य खलु निश्चलम् ॥९७॥ ज्ञानदर्शनचारित्राण्येष मार्गोऽस्ति निर्वृतेः । तद्भेदः सकलस्तेन प्रत्यपादि तदग्रतः ॥९८॥ प्रतीहार्यपि सद्बोधं श्रेष्ठिन्याधात्तवत्यथो । द्वितीये

यामिनीयामे जघन्यां स्थापिताऽग्निम ॥९९॥ द्वितीयां बोधयामास वैराग्याभङ्गवाग्भरैः। मलिनीक्रियते किंतु निर्मलं कुलमावयोः ॥१००॥ यदि क्रियन्तेऽत्र भोः स्वैरनाचाराः परःशता। तदङ्गमङ्गभङ्गेन सततं केन वार्यते ॥१०१॥ कृतानि यान्यसत्कर्माण्युन्मत्तैर्यौवने जनैः। खाट्कुर्वन्तीह तान्यन्ते शल्यवद्वार्धकेऽधिकम् ॥१०२॥ साबूबुधदिति श्रुत्वा मन्त्रिपत्न्यावयौ ततः। चक्षुरुद्घटितं तस्या विवेकाख्यं तदुक्तिभिः ॥१०३॥ साऽप्यस्थापि स्वीयपृष्ठे जवाज्जवनिकान्तरे। तुर्ययामे स्मारम्या समागाद्भूपवल्लभा ॥१०४। सोन्मुक्तशयनीयेन प्रणता राजसूनुना। ततोऽवग् जीविताधीश किमनीदृशमादृतम् ॥१०५॥ समयोऽयं न हि स्वामिन्नभ्युत्थानप्रणामयोः। सौवाङ्गसङ्गपीयूषैर्वपुस्तापमपाकुरु ॥१०६॥ भेकीवाम्भो विना यद्वज्ज्योत्स्ना चन्द्रमसं विना। हंसी मानसनिर्मुक्ता त्वां विना ह्यस्मि दुःखिनी ॥१०७॥ निर्भीकमिति निर्ह्रीकं जल्पन्तीं तामनारतम्। स नाभिमुखमप्यस्याः पश्यत्यप्रीतवन्मनाक् ॥१०८॥ नैषा पञ्चेषुदर्पोद्यज्ज्वरावेशवशंवदा। उपदेशपयःपानमर्हत्यस्मादुपेक्षिता ॥१०९॥ ततः सा स्वमवज्ञातमवेत्येत्यब्रवीद्गिरम्। त्वत्सदक्षा महादक्षा न प्रतिज्ञातलोपिनः ॥११०॥ यथा यवासकस्यार्थे मेघः स्याद्वह्निवृष्टिभाक्। सदाक्षिण्योऽप्यभूस्तद्वत्त्वं मदर्थेऽतिनिष्ठुरः ॥१११॥ कुमारः प्रोक्तवानेतां नितान्त तान्तमानसाम्। दूतीवचः प्रपद्य त्वमाहूताऽसि मयैव हि ॥११२॥ दुःशील्यकर्दमालिप्तां तप्तां मनसिजोष्मणा। अहं निर्वापयिष्यामि त्वामहो धर्मवारिणा ॥११३॥ मामहो सुन्दरात्मीयवपुःसङ्गमरङ्गतः। एकशः कुरु संतुष्टां हृदयेच्छानिवर्तनात् ॥११४॥ तयेत्युक्ते कुमारस्तां स्माह विस्मेरलोचनः। भूत्वा भूवल्लभस्यास्य वल्लभा प्राणवल्लभा ॥११५॥ कथमन्याङ्गसाङ्गत्यमीहसे वहसे रतिम्। न हि पङ्काकुलं हंसी

पयः सेवेत कर्हिचित् ।।११६।। यदहो रतिजं सौख्यं चौरवत्सेव्यते खलु । तदशर्मैव जानीहि परिणामे सुदुःखदम्
।।११७।। इत्युक्तेऽप्यमुचत्सा नो असदाग्रहमात्मनः । दूत्यग्रे यत्पुरा प्रोक्तं तत्कुर्विति बभाण सा ।।११८।। शशंस
राजसूरेनामीप्सितं ते कदाऽप्यहो । जन्मन्यस्मिन्न भाव्येव किं बहूक्तेन फल्गुना ।।११९।। कामये कामिनीमन्यां नाहं
सुप्तोऽपि निद्रया । यद्यायाति स्वयं रम्भा रतिर्वाऽपि हि पार्वती ।।१२०।। इत्येतदीयसत्त्वस्य सत्त्वं परिचिन्त्य सा
।।३४३।। वैराग्याभङ्गुरङ्गेणापूरयत्स्वीयमानसम् ।।१२१।। पत्नीत्वेनागता साहमभूवं च भगिन्यहो । यन्निर्लज्जतयाऽवाचि तत्क्ष-
मस्व कृपां कुरु ।।१२२।। त्वं कनिष्ठोऽसि मे भ्राता पाता पातकपङ्कतः । गुणैर्गरिष्ठः सुतरामन्तरापत्तिवारकः ।।१२३।।
विहिताऽऽशातना यत्ते तस्मात्पातकतः कथम् । मोक्षो मे भविता हन्त व्यापत्तापाम्बुदोपमः ।।१२४।। सपत्नी प्रेयसी
जाता त्वत्पितुर्दुहितास्म्यहम्। आगते मूलनक्षत्रे प्रैष्यहं पितुरन्तिके । धात्रीजनेन सहिता तेन प्रवरभूपतेः ।।१२५।।
मातुलेनाथ बंगालदेशभूमिशितुर्वरा । त्वदीयश्वशुरस्याहमदाय्यथ धनैर्दिनैः ।।१२६।। स्वकुलोडुनभोदेशसुधांश्वौपम्य-
माश्रयन्, जन्म प्रपेदिवांस्त्वं भोः शुभोद्यद्भाग्यभाजनम् ।।१२७।। सीमन्तिन्यः समस्तास्ते तुल्या मातृदुहितृभिः अहं
पुनरनाचारवतीनामग्रयायिनी ।।१२८।। केनाप्यथ प्रयोगेण प्राणांस्त्यक्ष्यामि निश्चितम् । न श्रेयः पापिनां प्रायः प्राण-
धारणमीरितम् ।१२९।। अज्ञानमरणेनालमनेन तत्र सुन्दरि । स्वधाम याहि दोषायाः शेषमुल्लङ्घ्य क्षणात् ।।१३०।। ।।३४३।।
सर्वपापक्षयोपायं पश्चाद्दर्शयिताऽस्मि ते । अश्लथः शपथोऽत्रार्थे सम्प्रति प्रतिपाद्यते ।।१३१।। कुमारानुज्ञया राज्ञी
प्रपेदे स्थानमात्मनः । यथा जाङ्गलिकादेशवशेन किल भोगिनी ।।१३२।। तिस्रोऽन्या अपि जग्मुस्ताः स्वीकृत्य नियमं

द्दम् । अन्यकान्तोपभोगार्थं सम्यक्त्वाद्वाप्सबुद्धयः ॥१३३॥ अथाचख्यौ क्षमानाथः कुमारं प्रति सादरम् । अनुज्ञां देहि यद्यामो वयमात्मीयमन्दिरम् ॥१३४॥ इत्युक्ते साकमेतेन कुमारोऽप्यचलल्लघु । प्रणम्य जग्मिवान् धाम क्षमाभुःसौधमात्मनः ॥१३५॥ जाते प्रत्यूषसमये दिनेशेऽभ्युदयोन्मुखे । प्रातःकृत्यानि निर्मायाजूहवन्नृपनन्दनम् ॥१३६॥ यावत्तं प्रति वक्त्युर्वीपालस्तत्कालमुज्ज्वलम् । दिश्यपश्यत्स पूर्वस्यां तेजःपुञ्जं समुल्बणम् ॥१३७॥ ततो राज्ञा प्रतीहारं प्रत्यवाचि प्रियं वचः । ज्ञातव्यतिकरः सोऽपि क्षणात् प्रोवाच पार्थिवम् ॥१३८॥ केवलज्ञानवान् कोऽपि मुनीन्द्रः समुपेयिवान् । तद्वन्दनार्थमायान्ति देवास्तद्दीप्तयो ह्यमूः ॥१३९॥ तावद्भूमिपतिस्तेन समया सद्विवेकधी । सवद्र्ध्या सद्गुरोः पादप्रणामार्थमुपागमत् ॥१४०॥ वन्दित्वा विधिना साधूनुपाविशदथाग्रतः । कुमारोऽपि नमस्कृत्य तथैव स्थितिमाप्यदत् ॥१४१॥ गुरुं विज्ञापयामास संयोज्य करपङ्कजम् । महाननुग्रहः स्वामिन् विदधे मयि साम्प्रतम् ॥१४२॥ यदात्मीयमदाय्येतद्दर्शनं शुभदर्शनम् । स्पर्शनं पुण्यराशीनां कार्श्यकारि भवैनसाम् ॥१४३॥ अथोर्वीवासवः प्राह दीक्षादानेन मे द्रुतम् । स्वामिन्ननुगृहाण त्वं तत्त्वं धर्मस्य संदिश ॥१४४॥ गुरुरूचे भवाम्भोधिमध्यप्रपतदङ्गिनाम् । दीक्षामार्गस्तरीकल्पः प्रोत्तरेयुर्यतोऽङ्गिनः ॥१४५॥ इत्युक्ते प्रीतचेतस्कः प्रोत्थितायां च पर्षदि । अवग्रहाद्वहिर्गत्वा साधूनामवनीशिता ॥१४६॥ मुकुटाद्यानलङ्कारान् स्वाङ्गादिव सुरद्रुतः समुत्तार्यर्पयत्पुष्पाणीव क्षितिभृदुत्तमः ॥१४७॥ स्वीयं परिजनं चाह कुमारः स्फारविक्रमः । भूपोऽयं भवतां भावीत्युक्त्वा तं प्राणमत्स्वयम् ॥१४८॥ ज्ञानिनः पार्श्वमागत्य नृपभार्याऽग्रहीद्व्रतम् । प्रायः पत्यनुगामिन्यः स्त्रियो दुश्चरिता अपि ॥१४९॥ अन्या अपि हि धन्यास्तत्पत्न्यः काश्चन संयमम् । जगृहुस्तद्गुरो-

स्तीरे दूरेणोज्झितकल्मषाः ॥१५०॥ मुनिनाथोऽपि राजर्षिपर्युपासितपङ्कजः । दिनानि कतिचित्तत्र स्थित्वाऽन्यत्र प्रतस्थिवान् ॥१५१॥ कुमारभूपतिर्नीत्या प्रजाः सर्वाः प्रपालयन् । जैनं प्रभावयामास धर्मं शर्मार्पकं सताम् ॥१५२॥ गणयन्नात्मना तुल्यं मन्त्रिपुत्रं गुणोज्ज्वलम् । मैत्रीमहाद्रुमस्यैष जग्राह फलमुल्बणम् ॥१५३॥ रिपुमर्दनभूमीन्द्रोऽन्यदा लेखादजूहवत् । पुत्रं श्रीनिलये स्वीये पुरे विमल(श्रीवीर)नामकम् ॥१५४॥ तेनापि विमले राज्यभारः स्फारो निवेशितः । स्वयं विज्ञाततत्त्वेन विधिना व्रतमाददे ॥१५५॥ गृहिधर्मं समाराध्य क्रमाद्वीरकुमारराट् । राजर्षे रणधवलस्य पार्श्वे दीक्षामुपाददे ॥१५६॥ नानादेशसरःश्रेण्यां भव्यपङ्केरुहावलीः । प्रबोध्य ज्ञानदीधित्या निर्वाणं प्राप पूषवत् ॥१५७॥ एवं पुष्पायुधस्फूर्जद्बोधप्रधनबद्धधीः । श्रीमान् वीरकुमाराख्यः प्रेयः श्रेयः समासदत् ॥१५८॥ अत्रान्यत्रापि हि भवे परस्त्रीविरतः पुमान् । यशःश्रेयःपदं यायादपायात्परिमुच्यते ॥१५९॥ तारुण्यभावेऽपि विरक्तबुद्ध्या, व्रतं धृतं श्रीविमलेन तुर्यम् । यथा तथा भव्यनराः प्रकामं, ब्रह्मव्रतं भोः प्रतिपालयध्वम् ॥१६०॥ ॥ इति तुर्यव्रते श्रीवीरकुमारकथा ॥

अथ परिग्रहनिग्रहोपदेशमाह—

**जे पावकारीणि परिग्गहाणि, मेलंति अच्चंतदुहावहाणि ।**
**तेसिं कहं हुंति जए सुहाणि, सया भविस्संति महादुहाणि ॥४६॥**

**व्याख्या**–ये मनुष्याः पापकारिणः दुष्कृतजनकान्, परिग्रहान्, प्राकृतत्वान्नपुंसकनिर्देशः, मीलयन्ति संगृह्णन्ति, परं किंभूतांस्तान् ? अत्यन्तमाधिक्येन दुःखमावहन्ति ये तान् तथाभूतान्, तेषां कथं भवन्ति जगति सौख्यानि ? अपि तु

॥३४५॥

न कथञ्चित्, परिग्रहभाजां किं तु सदा नित्यं महादुःखान्येव स्युः इति। यदुक्तं "संसारमूलमारम्भास्तेषां हेतुः परिग्रः। तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहम् ॥१॥" इति काव्यतात्पर्यम् ॥ अथ परिग्रहोपरि दृष्टा नव भेदाः, यथा—"धण १ धन्न २ खित्त ३ वत्थु ४ रुप्प ५ सुवन्ने ६ य कुविय ७ परिमाणे। दुपए ८ चउप्पयंमी ९ पडिक्कमे देसिअं सव्वं ॥१॥" इति । "पंचमाणुव्वयस्स इमे पंच अइयारा जाणियव्वा, न समायरियव्वा, तं जहा–धणधन्नाणं पमाणाइक्कमे १, खित्तवत्थूणं २, रुप्पसुवन्नाणं ३, कुप्पसारत्थपिच्छाइयरस ४, दुपयचउप्पयाणं परिमाणाइक्कमे ५" ॥ अथ परिग्रहे दृष्टान्तः सूच्यते—

अचलपुरेऽभूत्तिलकः श्रेष्ठी तिलकः समृद्धजनराशेः । नानाधान्यान्यसकौ संजग्राहाखिलपुरेषु ॥१॥ गोधूमचणकचीनकमुद्गमुकुष्ठानसीतिलादीनि । साढिकया शस्यानि प्रददं सार्धं च जग्राह ॥२॥ अन्यैरन्न जगृहे गृहे बहिर्वा धनैश्च धान्यानि । जीवाजीवैरपि स प्रभूतशस्यानि मोलितवान् ॥३॥ दुष्कालेऽपि कराले धान्योपात्तैर्धनैर्धनैर्लोकात् । स हि धान्यमूढकालीमबन्धयत् पुनरपि सुकाले ॥४॥ एवं वर्धितलोभः प्रभूतलाभात्सुभिक्षदुर्भिक्षे । न हि कीटकोटिहिंसामजीगणत्स्वल्पिकामपि सः ॥५॥ अतिधान्यभरारोपात् खरकरभादीनपीडयद्बाढम् । तद्वद्बहुधा नवधापरिग्रहाग्रहपरः समभूत् ॥६॥ कोऽप्यन्यदा तदग्रे वदन्निमित्तज्ञ ऐषमः समये । भावि महादुर्भिक्षं श्रेष्ठी तद्वाक्यमाकर्ण्य ॥७॥ सर्वद्रव्यबलेनागृह्णाद्धान्यानि सर्वभेदानि । वृद्धयाऽप्याकृष्य धनं प्रगुणकणैर्भरितवान् कोशान् ॥८॥ तदभावे स्वगृहानप्यबीभरल्लोभलोलुपमनस्कः । कौशिक इवान्धकारं दुर्भिक्षागमनमैच्छत्सः ॥९॥ तावत्प्रावृट्समयात्प्रागेवावर्षदम्बुभृ-

॥३४७॥ स्पूरः । धाराशरप्रपातैर्हृदयं प्रविदारयन्नस्य ॥१०॥ अहह मम मुद्गमाषप्रमुखान्नानि प्रणश्य यास्यन्ति । कथमेष घनो वृष्टः पापिष्ठः कष्टकृन्मनसः ॥११॥ किं कुर्वे कस्यैतद्वच्मीत्यादि स्वचेतसि ध्यायन् । प्रापाकस्मान्निधनं पापात्मा हृदयसंस्फोटात् ॥१२॥ नरकप्रथमावन्यामज्ञानोपहतधीरसावगमत् । एवमसंतुष्टहृदामस्ति सुखं नैव कुत्रापि ॥१३॥ ये निःपरिग्रहाः स्युः संतोषसुधारसेन संसिक्ताः । ते स्युर्मौक्तिनितम्बिन्युरःस्थलालङ्कृतौ हारः ॥१४॥ इति परिग्रहोपरि दृष्टान्तः ॥

एवं दिग्व्रतभोगोपभोगानर्थदण्डसाम्यदेशावकाशकपौषधातिथिसंविभागव्रतानि सातिचाराणि सदृष्टान्तान्यभ्यूह्यानि स्वयमुदारधीभिरित्यर्थः ॥

अथ पञ्चविषयाणामुपरि पृथक् पृथक् पञ्च काव्यानि सदृष्टान्तानि प्रपञ्चयन्नाह । तेष्वाद्यं काव्यमाह—

**सद्दं सुणित्ता महुरं अणिट्ठं, करिज्ज चित्तं न हु तुट्ठरुट्ठं ।**
**रसम्मि गीयस्स सया सरंगो, अकालमच्चुं लहई कुरंगो ॥४७॥**

**व्याख्या**—शब्दं रवं श्रुत्वा निशम्य मधुरं मिष्टं तथा अनिष्टं कर्णकटुकं कुर्वीत चित्तं मनः सुमनाः, नेति निषेधे, हुरित्यवधारणे, तुष्टं च रुष्टं च तुष्टरुष्टं, एतावता शब्दं मधुरमथ कटुकं वा श्रुत्वा तुष्टमथवा रुष्टं मनो न कुर्यादिति तत्त्वं, साम्यावस्थया स्थेयं रागद्वेषौ भवनिबन्धनौ तौ वर्जयेदिति । पदद्वयेन दृष्टान्तमाह—गीतस्य रसे सदा सरङ्गः सहर्षः कुरङ्गो मृगः स वराकः स्फुटमकालेऽसमये एव मृत्युं पञ्चत्वं लभते, यदि तस्य मृगस्य तादृग्विधः शब्दसमा- ॥३४७॥

कर्णनरसो न स्यात्तर्ह्यकालमृत्युं कथमेष आसादयेत् ? परं श्रोत्रेन्द्रियं दुर्निवारप्रसरं स्यादिति भावार्थः ॥ अथ श्रोत्रे-
न्द्रियदोषोपरि **दृष्टान्तमाह–**

अत्रैव **वसन्तपुरे** परैः परैरस्खलनातिविनिवेशे । यत्र वसन्ति वसन्ताः सन्तः **प्रसरन्महामोदाः** ॥१॥ तत्रास्ते **ननिरस्ते-**
हलोकशोकप्रमोदसन्दोहः । रविरिव विकसद्धामा नश्यच्छ्यामास्यतास्वामः ॥२॥ धनद इव यः **समृद्ध्या धनदो** धन-
दोऽर्थिनामिहात्यर्थम् । भार्या तस्य **सुभद्रा** स्वकीयपत्युः स्फुरद्भद्रा ॥३॥ वाणिज्यार्थं देशान्तरं प्रतस्थेऽन्यदा **स धन-**
दाख्यः । लात्वाऽगण्यं पण्यप्राग्भारं भूरिलाभकृते ॥४॥ अथ तत्रैव कुतोऽप्यागाद्रागानुकृतकिन्नरप्रकरः । यः **पुष्पशाल-**
नाम्ना प्रसिद्धिभाग्गायनप्रवरः ॥५॥ तद्गीतगानपानप्रवणाः प्रगुणा बभूवुरिह लोकाः । यन्मधुरध्वनिपुरतः पिकोऽपि को
रागभृच्चक्षुः ॥६॥ गुड इव माधुर्यरसात् प्रजाभिरिव मक्षिकाभिराकीर्णः । स कदाचिद्गीतज्ञो गायन् गीतानि राज-
पथे ॥७॥ **ददृशेऽथ** सुभद्रायाश्चेटीभिश्चटुलवाक्यपेटीभिः । तन्मधुरध्वनिलुब्धाः कुरङ्ग्य इव तस्थुरेकाग्राः ॥८॥
वेलाव्यतिक्रमे सति महति गतास्ताः स्वसौक ईश्वर्या । निर्भर्त्सितास्ततस्ताः परुषाक्षरया गिरा बाढम् ॥९॥ ऊचे
ताभिः स्वामिनि मैवं कुरु रोषपोषमस्मासु । स्थितमेतावत्कालं श्रोत्रपुटापेयगेयरसिकतया ॥१०॥ यद्येवं तद्गेयं तदा
मदीयश्रुतिद्वयातिथिताम् । नेतव्यं युष्माभिर्यथा तथा तस्य सान्निध्यात् ॥११॥ प्रतिपेदेऽदस्ताभिस्ततोऽन्यदा देवतामहा-
चैत्ये । यात्रोत्सवे प्रवृत्ते मिलिते नारीनरप्रकरे ॥१२॥ प्रारब्धे मधुरध्वनिगाने पानेऽमृतस्य कर्णपुटे । तस्मिन्नेव **सुभद्रा**
संप्राप्ता तं विलोकयितुम् ॥१३॥ तावद्गीतसमाप्तौ स **पुष्पशाल** सुखेन सुष्वाप । सद्यो विसृष्टलोकः प्रपद्य चैत्यस्य पृष्ठ-

तम् ॥१४॥ आसीन्निर्वर्णित इव तस्या यस्यातिकुत्सितं रूपम् । तज्जीवितमपि धिगिदं वादिन्या थूत्कृतं प्रति तम्
॥१५॥ गीतिरपि निन्दनीया दन्तुरवदनस्य कृष्णवपुषश्च । रूपवियुक्तेन हि किं क्रियते गुणगौरवेणास्य ॥१६॥ इति
निन्दन्ती सुदती जगाम धाम स्वकीयमाश्वेषा । सौभद्रीयं विलासितमस्मै केनापि किल कथितम् ॥१७॥ दृष्टोऽथ
पुष्पशालः कथं निकृष्टा तथाऽपि पापिष्ठा । मामिति निन्दति निर्हेतुका हि मद्वैरिणी जज्ञे ॥१८॥ न हि मर्मज्ञं बन्दि-
॥३४९॥ नमथो कविं शस्त्रपाणिनं चापि । वैद्यं च सूपकारं प्रकोपयेज्ज्ञानवान् स्वगुरुम् ॥१९॥ कस्मादपि तदुपायादपायमस्याः
करोमि बुद्ध्याऽपि । देशान्तरसंप्रस्थितमेवेत्य तस्या विवोढारम् ॥२०॥ तत्सद्यासन्नमसावसौमनस्यादुपेत्य सामर्षः ।
स यथा हि सार्थवाहश्चचाल विषयान्तरं निलयात् ॥२१॥ धनमर्जितं प्रभूतं यथाऽऽप पृथ्वीपतेश्च सन्मानम् । प्रस्थाय
ततः कुशलेनात्मीयोद्दामधामायात् ॥२२॥ इत्यादि सकलमेतच्चरितं मतिकल्पितस्वगीतगतम् । निर्माय रजनिसमये जगौ
महामञ्जुलध्वनिना ॥२३॥ कलगीतमनेन तथा गीतं स्फीतं यथा सुभद्रायाः । विरहानलः प्रकामं सर्वाङ्गे दीप्ततां
प्रापत् ॥२४॥ मोटयति निजं देहं चित्ते चापल्यमाकलय्याशु । रागोरगविषलहरीव्यामा प्राप्ताऽतिविषमदशाम्
॥२५॥ सौधोपरिस्थमप्यात्मानं भूवर्तिनं हि सा मेने । कः कलयति वैकल्यं न कलावानपि हि कामार्त्तः ॥२६॥
गेये रसप्रकर्षायाते ज्ञाते स्वकान्तवृत्तान्ते । साऽऽकाशे निजपादं दत्त्वा भूमौ पपात रयात् ॥२७॥ तस्मात्प्रहारमूर्छा- ॥३४९॥
वशान्मनोजन्मरागभरविवशा । मरणं शरणीचक्रे वक्रे दैवे कुतः सौख्यम् ॥२८॥ कृत्वेति वैरनिर्यातनं घनं पुष्प-
शालको मुमुदे । अन्यत्र जगाम पुरे निर्वाहं गीतिभी रचयन् ॥२९॥ इत्थं श्रोत्रेन्द्रियवशगता सा सुभद्राऽस्तभद्रा,
संप्राप्ताऽस्तं धनपरिजनप्राणनाथप्रमुक्ता । दुःखिन्यासीदिह परभवेऽप्युग्रकष्टैकपात्रं, भाविन्येवं श्रवणजरसः प्राणिनां

निग्रहार्हः ॥३०॥ इति श्रोत्रेन्द्रियानिग्रहे सुभद्राकथा ॥

**पासित्तु रूवं रमणीण रम्मं, मणम्मि कुज्जा न कयाऽवि पिम्मं ।**
**पईवमज्झे पडई पयंगो, रूवाणुरत्तो हवई अणंगो ॥४८॥**

**व्याख्या**–दृष्ट्वा रमणीनां रूपं रम्यं मनसि कुर्यात् न कदाऽपि प्रेम रागसम्बन्धं । दृष्टान्तं स्पष्टयति–प्रदीपमध्ये पतति पतङ्गः, स च रूपानुरक्तः सन् दृष्टिदोषेण भवत्यनङ्गः पतङ्गः स्वकीयकायं वह्नौ जुहोति यथा तथैव कामुकश्चक्षुर्विषयाक्रान्तः प्राणानपि तृणीकुरुते ॥ अत्रार्थे **ज्ञातमुच्यते**–

आस्तेऽत्र **काञ्चनपुरं** यत्काञ्चनभूषणान्वितजनौघम् । काञ्चित् शोभां धत्ते, तामसमां यातिनिर्वचना ॥१॥ सन्नालीकमलं प्रफुल्लकमलं सद्राजहंसाश्रितम्, सच्चक्रप्रियकारकं समकरं प्रोद्यल्लताविद्रुमम् । श्वेतोद्यच्छविदृश्यमानकलशं तृष्णारजनैः संकुलं यद्धत्ते सरसस्तुलामनुकलं चित्रं जलासङ्गि नो ॥२॥ तत्र **श्रीनिलयाख्यः** श्रेष्ठी द्वेधाऽपि तद्गृहे कान्ता । वरिवर्त्ति **यशोभद्रा** निद्रानिर्मुक्तपद्माक्षी ॥३॥ समजनि तयोः सविनयस्तनयः कुनयप्रवृत्तिरिक्तमनाः । सल्लक्षणलक्षिततनुरतनुरिवोद्दामरूपश्रीः ॥४॥ लक्षणविद्भिः प्रोचे स्त्रीलोलः प्रायशः शिशुर्भविता । सोऽपि हि पश्यति वनिता या यास्तासु प्रसारितदृग् ॥५॥ लोकैर्लोलाक्षोऽय तस्मादाख्यायि दुर्धरा जनगीः । यो यादृकिल कुरुते कर्म तया प्राप्नुयान्नाम ॥६॥ सङ्क्रान्तस्तारुण्यं दृष्ट्वा यौवनवतीः सुरूपवतीः । स्त्रीर्भावित्वाऽऽलिङ्गति विगोपयत्यपि विडम्बयति ॥७॥ पितृदत्तामिति शिक्षामेव विषानुकृतिधारिणीं मनुते । कुरुते लोलाक्षत्वं सत्यं सत्यं त्यजन् दूरे ॥८॥

दुष्टाचरितैरेतैरेष जनौघेन ताड्यते पशुवत् । उद्बध्यतेऽनिलनिविडैर्निगडैर्विनियम्यते बहुशः ॥९॥ पितृदाक्षिण्यान्मुमुचे
तथापि दुर्लक्षणं क्षणं नोज्झत् । न हि शिक्षितोऽपि बाढं कपिर्वपुश्चपलतां त्यजति ॥१०॥ नटविटगोष्ठ्यां तिष्ठन्नश्रौ-
षीन्मगधदेशजा नारीः । रूपरमाभिर्वर्याः सोऽभूत्तासां दिदृक्षावान् ॥११॥ वाणिज्यस्य च्छलतः प्रभूतमादाय
॥३५१॥ पैतृकं द्रविणम् । सोऽचालीत् प्रति मगधं लात्वा तत्राऽऽपणं तस्थौ ॥१२॥ व्यवसाये वसति मतिर्न हि वस्तुग्रहणधीः
परिस्फुरति । ध्यायति मनसि सुरूपामेकां सीमन्तिनीमेव ॥१३॥ दृष्ट्वाऽन्यदा समदनामुद्दामवयोऽभिरामरुचिराङ्गाम् ।
पस्पर्श करेण बलाद्धाङ्गाक्षस्त्वेन लोलाक्षः ॥१४॥ दृष्टो दुष्टोऽयमिति क्षितिपतिपुरुषैः क्षणेन बद्धोऽसौ । जगृहे सकलं
द्रव्यं क्रव्यमिव त्वरितमेव खगैः ॥१५॥ पुरतोऽस्य नीयमानः क्षितीशितुस्तस्य जनकमित्रेण । द्रुमनामश्रेष्ठिवरेणासा-
वुपलक्षयाञ्चक्रे ॥१६॥ पुष्कलधनं च दत्त्वा व्यमोचि तन्निग्रहान्क्षणात्तेन । धर्मेणेव हि जन्तुर्दुर्वारापारपापभरात् ॥१७॥
आनिन्ये निजसद्मनि कियन्तमपि कालमेव तत्राऽस्थात् । लोलाक्षतया लुब्धस्तत्पत्न्यां धनवतीनाम्न्याम् ॥१८॥
वस्त्रग्रन्थिनिबद्धः कथञ्चिदङ्गारकोऽपि किं तिष्ठेत् । दुग्धेनापि हि धौतः किं काकः श्वेततां धत्ते ॥१९॥ यस्य किल
यः स्वभावः स हि तं प्राणात्ययेऽपि न त्यजति । हितमहितमपि न वेत्ति च पिहितः पापैः पुराचरितैः ॥२०॥ तद्व्य-
तिकरमवगत्य श्रेष्ठी वैराग्यमाप निष्पापः । सर्वमपास्य गृहस्वं स्वकीयमस्वीयमिव तरसा ॥२१॥ कक्षीचक्रे दीक्षाम- ॥३५१॥
क्षामस्थामवान् क्रियातपसोः । तद्गृहगृहिणीभोक्ता लोलाक्षः समजनि प्रायः ॥२२॥ सुरसुन्दरीति राज्ञी दृष्टा हर्म्यामनेन
रूपवती । तस्यामनुरक्तमना मनाग् न लेभे रतिं क्वापि ॥२३॥ श्यामे श्यामासमये प्रसृते भुवि विस्तृते तमःपूरे ।

राज्ञीसद्म प्रविशन् विवशः स दुराशयः स्वैरम् ॥२४॥ विद्यासाधकपुंसा केनापि ततोऽन्तराल एव धृतः । अगण्ये-ऽरण्येऽसावनायि न हि रागिणां सौख्यम् ॥२५॥ देवीबलिदानकृते तदीयदेहामिषं स चिच्छेद । नारकतुल्यं दुःखं समन्वभूत्तत्र लोलाक्षः ॥२६॥ विद्यासाधकपुरुषं परुषं प्रत्याह मम समाध्यर्थम् । भो दर्शयैकवारं भार्यां भूमीपतेर्नवीनाम् ॥२७॥ पश्चादपहर जीवितमपि हृष्टे दृष्टिसौख्यदे रूपे । इत्यादिवपुर्मानसदुःखार्त्तः कालमनयदसौ ॥२८॥ तावत्कश्चित्काञ्चनपुराधिवासी पितुस्तदीयस्य । शैशवमित्रं भुवनोत्तमसार्थेशः समायातः ॥२९॥ कृत्वा वाणिज्यमयं विनिवृत्तस्तत्प्रदेशभूभागे । विश्राम्यन् दैववशाल्लोलाक्षमवेक्ष्य विस्मितवान् ॥३०॥ समभून्निर्भय एष स्वकीयवृत्तान्तमाख्यदेतस्य । तेनापि वपुःसारा स्फाराऽस्य हि कारयामासे ॥३१॥ सज्जीकृत्य व्यमुचत्सुहृदः खलु कस्य नो हिताय स्युः । भूयोऽपि भूपपत्नीरागादागान्नृपावासम् ॥३२॥ ववले विलक्षवदनस्तद्दर्शनमलभमान एवायम् । निजधाम काममोहितमतिर्न्यगादीति धनवत्या ॥३३॥ एतावन्ति दिनानि क्व स्थितमेषोऽपि कूटमाचष्ट । वस्तुव्यवसायवशाद्वैयग्र्यं भेजिवानस्मि ॥३४॥ निःपुण्य इव निधानं रतिसुन्दर्याः स दर्शनं लेभे । संप्राप्य राजभुवनं कथमपि भाग्याभ्युदयवशात् ॥३५॥ उन्मत्त इवैतां प्रति धावन् धाष्ट्र्येन सुष्ठु दुष्टमनाः । विधृतो राजन्यभटैर्बद्ध्वा च विडम्बयाञ्चक्रे ॥३६॥ रोषारुणेक्षणेन क्षणेन भूमिभुजा समादिष्टम् । उल्लम्बयत बहिर्वटशाखायां स्तेनदेश्यमिमम् ॥३७॥ तैरपि तथैव चक्रे मृत इति मत्वाऽथ तैः परित्यक्तः । त्रुटितोरुकण्ठपाशः पुण्यवशात्प्राप चैतन्यम् ॥३८॥ प्रपलाय्य जवादगमद्धनवत्याः सद्म पद्ममिव मधुकृत् । सज्जीचक्रे स तया तद्रागासक्तचित्ततया ॥३९॥ केवलिनमन्यदाऽऽगतमवेत्य भूपोऽभिवन्दितु-


॥३५२॥

मथागात्। पौरैः सहसा सा किल लोलाक्षोऽप्येष तत्याज ॥४०॥ चटुलाक्षत्वात् पश्यन् प्रफुल्लदृष्ट्या मुखं नृपतिपत्न्याः। क्षणमध्यान्नुपवदसौ राजा निःसारयाञ्चक्रे ॥४१॥ निर्गच्छन्नथ काञ्चित्कमनीयां कामिनीं स्पृशन् सधवाम्। पत्या शक्त्या प्रहतः पञ्चत्वं प्राप्य पापमनाः ॥४२॥ रौद्रध्यानान्नरके तृतीयके नारकः प्रकृष्टायुः। समजनि ततोऽप्यनन्तं भवं भ्रमिष्यत्यकृतपुण्यः ॥४३॥ केवलिना तद्वृत्ते स्पर्शनविषये निवेदिते राज्ञः। वैराग्यादग्राहि क्षितिपेन जिनोदिता दीक्षा ॥४४॥ कृतकर्मक्षय एष प्राप्तोज्ज्वलकेवलः शिवमवाप। इत्थं चक्षुर्दोषः कस्य न दुःखस्य पोषाय ॥४५॥ ॥ इति चक्षुर्दोषविषये लोलाक्षकथा ॥

अथ रसनेन्द्रियव्याप्तिस्त्याज्येत्यत्रार्थे काव्यमाह—

**जलम्मि मीणो रसणारसेणं, विमोहिओ नो गहिओ भएणं।**

**पावाउ पावेइ स तालुवेहं, रसाणुराओ इय दुक्खगेहं ॥४९॥**

**व्याख्या**–जले सलिले मीनो मकरो रसनारसेन जिह्वारसेन विमोहितो रञ्जितमनस्कः, नो गृहीतो भयेन, एतावता निर्भयः पापात् पातकतो रसज्ञादोषोद्भवात् आप्नोति स तालुनो वेधस्तालुवेधस्तं रसस्य रसे वाऽनुरागः स्नेहः कृतः सन् इत्यमुना प्रकारेण दुःखगृहमसातहेतुः स्यात्। एतावता रसनेन्द्रियं रसलोलुभं न विधातव्यमिति काव्यार्थः ॥ 

**अत्रार्थेऽप्युदाहरणमुद्भाव्यते–**

अतिपृथुला मिथिलाख्या नगरी शिथिलाऽस्ति या न दौस्थ्येन। तस्यां बभूव राजा विमलयशाश्चन्द्रविमलयशाः

॥१॥ तत्परिसरप्रदेशोद्याने ध्याने निविष्टशिष्टमनाः। समवसृतः केवलभृद्गणभृद्गणपरिकरेण सह ॥२॥ तत्पदकमल-प्रणतिप्रह्वमना भूधनाग्रिमः प्रययौ। नत्वा स्थित्वा पुरतस्तद्गदितं धर्ममश्रौषीत् ॥३॥ **अक्षाणां रसनं हि दुर्जयमथो दुष्कर्मणामष्टके, दुष्टं मोहनमोहनीयमुदितं ब्रह्मव्रतेषु व्रतम्। गुप्तिष्वाविमगुप्तिरेव विषमा जेतुं जगद्देहिनां, चत्वारोऽपि हि दुर्जया निगदिता एते जिनस्वामिना** ॥४॥ ऊचे च महीमघवा भगवन् शेषेन्द्रियेभ्य एतेभ्यः। कस्माद्दुर्जयमुक्तं युक्तं विनिवेदयाम इदम् ॥५॥ क्षुत्परिपीडितजन्तोर्न मधुरगेयानि नापि रूपाणि। न मनोमोहनमोहनमपि चेतस्तोषपोषकृते ॥६॥ न हि चन्दनप्रलेपनमङ्गे तुङ्गे स्थितिं न चावासे। किञ्चित्सुखायते खलु न हि क्षुधार्त्तस्य सद्वस्तु ॥७॥ मूले यथाम्बुसिक्तस्तरुः फलत्यतुलपुष्पसम्भारः। मूले शुष्यति शुष्यत्फलप्रसूनः स एव स्यात् ॥८॥ यतः—**जहा दवग्गी पउरिंधणे वणे, समारुओ नोवसमं उवेइ। एविंदियग्गी विपगामभोइणो, न बंभयारिस्स हियाय कस्सई** ॥९॥ एवमिहेन्द्रियतरुरपि रसने सरसाऽशनैस्तरां बहु प्रीते। बहुभिर्विकारकुसुमैः पुष्पति पापैः फलत्यपि च ॥१०॥ तस्मादजय्यमिदमेव हि देहे देहिनां रसननाम। अस्मिन् विजिते शेषाण्यप्यक्षाणीह विजितानि ॥११॥ अत्रोदाहरणं शृणु सद्यः कृत्वाऽवधानमवनीश। **भूवलयनाम्नि** नगरे भूपतिरजनिष्ट **श्रीशर्मा** ॥१२॥ द्वे पत्न्यौ तस्य स्तः **शुभसुन्दर्यशुभसुन्दरीनाम्न्यौ**। नामोचितपरिणामे जज्ञाते द्वौ सुतावनयोः ॥१३॥ प्रथमाङ्गजोऽस्ति विबुधः सुधीश्च शरदः कृतज्ञतोपेतः। अन्यस्याश्चाङ्गरुहो जज्ञे द्वेधाऽपि मतिविकलः ॥१४॥ स च समभूद्रसलोलः खाद्याखाद्यादिभक्षणोत्कः। पेयापेयं गणयति न हि बहिरटति प्रलुब्धश्च ॥१५॥ अत्यन्तं रसगाद्‌र्ध्याद्विषमामयभाजनं वपुरमुष्य।

वीक्ष्याजुहाव वैद्यानेतज्जनकः क्षमाधीशः ॥१६॥ इत्याचख्युर्भिषजः करोति यद्येष लङ्घनानि तदा। रोगोद्वेगः सक-
लस्तूर्णं प्रलयं प्रयात्येव ॥१७॥ रसलोलुपतादोषादाकल्पोऽनल्प एष संपन्नः। रसलोल इति ख्यातिर्लोककृता सत्यतां
नीता ॥१८॥ इत्युक्तेऽपि हि वैद्यैर्न विदधते लङ्घनानि चैष पुनः। ववृधे महोपतापस्तूर्णांभर इव निदाघर्तौ ॥१९॥
॥३५५॥ भ्रातुर्वचसाऽन्येद्युर्निरन्न एवैष लङ्घनायास्थात्। तं प्रेक्ष्य खण्डखाद्यकमोदककूरादि भुञ्जानम् ॥२०॥ चिन्तयति त्रिगिध-
गेनं स्वकीयजठरप्रपूरणव्यग्रम्। यो दुष्टनिकृष्टात्मा भोक्तारं नापरं सहते ॥२१॥ जानाति स्वयमेव हि भुङ्क्ते मधु-
रान्नमोदकाद्यपि च। परमेष सपत्नीजो भ्राता हियकारणं न हि मे ॥२२॥ निश्चित्यैवं चेतसि दुष्टमभाषिष्ट झटिति
रसलोलः। रे मामनार्य भोज्यान्निवार्य मिष्टान्नमत्सीह ॥२३॥ क्रोधविरोधेनान्धीभूतः प्रेतावतारमिव लब्ध्वा।
इत्युक्त्वा स दधावे शस्त्रकरस्तस्य हननार्थम् ॥२४॥ तरसैष तत्प्रहारादपसृत्य सुखेन संस्थितो जीवन्। विबुधो विबुधो
धर्मे वैराग्यात्संयममधत्त ॥२५॥ चरणाचरणात् क्षीणाखिलदुष्कर्मा शमामृताधारः। सोऽहमवाप्तोज्ज्वलतरकेवलबोध-
॥६ समेतोऽस्मि ॥२६॥ **विमलयशःक्षितिपतिना** पृच्छा स्वच्छाशयाद्विधो विदधे। भगवन् विकलोरुधिया विकलेन किमतः ॥३५५॥
परं प्रापि ॥२७॥ गुरुराह धवलदन्तद्युत्या श्वेता दिशस्तदा कुर्वन्। राजन्नयं स्वयं भूभर्त्ता धर्त्ताऽधृतेरभवत् ॥२८॥
स्निग्धमधुरान्नभोक्ता रसलाम्पट्यादसौ निकृष्टात्मा। वनदव इव न विमोक्ता कस्याप्यश्नाति मांसमपि ॥२९॥ विहिते
पलस्य पाकेऽन्यदा मुदा तस्य सूपकारेण। मार्जार्याऽवार्यतया सकलं जंगलं व्यधायि गले ॥३०॥ भीतेनैतेनाथो क्वापि
३८ परासोः शिशोः पललमलायि। संस्कृत्य भुक्तिसमये परिवेषितमवनिनाथस्य ॥३१॥ तद्भक्षणात् क्षणात् स क्रूराध्यवसा-

यवासितः समभूत् । प्रतिदिनमेकैकं शिशुमशनस्थानीयमसृजदहो ॥३२॥ एतदकार्याचरणादुपद्रुतस्तेन पूर्जनः सकलः । मन्त्रिण आलोच्य मिथः क्षितिपं बद्ध्वा वनान्तरं निन्युः ॥३३॥ असमञ्जघुरस्तु गोऽथ क्षितीशभावे नियोजयाञ्चक्रे । मांसाशनतृष्णाभागन्यो रक्षोवदाचरति ॥३४॥ भुङ्क्ते मनुष्यपललं न कलङ्कं गणयति स्वकीयकुले । स कदाचिद्भि-ल्लार्भकलुब्धः खलु बंभ्रमीति वने ॥३५॥ केनापि किरातेन क्रुद्धेनाकर्णकृष्टबाणेन । विद्धो मर्मणि मरणं शरणं चक्रेऽ-तिगुरुकर्मा ॥३६॥ मृत्वा सप्तमनरकावन्यामज्ञानकारकः सुतराम् । गत्वा भवं भ्रमिष्यति दुरन्तमात्यन्तिकमन-न्तम् ॥३७॥ इत्याकर्ण्य सकर्णः केवलिमुखकमलनिर्गतां वाणीम् । विमलयशाः प्रव्रज्य प्राप्तज्ञानो जगाम शिवम् ॥३०॥ इति रसनेन्द्रियानिग्रहे रसलोलकथानकम् ॥

अथ तुर्यविषयसेवनप्रतिषेधकाव्यमाह—

**गईदकुंभत्थलगंधलुद्धो, इंदिंदिरो घाणरसेण गिद्धो ।**

**हहा मुहा मच्चुमुहं उवेई, को गंधगिद्धिं हियए वहेई ॥५०॥**

**व्याख्या**—गजेन्द्रस्य कुम्भस्थलं तस्य गन्धस्तत्र लुब्धः इन्दिन्दिरो भ्रमरो घ्राणरसेन नासिकया गन्धाघ्राणरसेन गृद्धः सन् हहा इति खेदे मुधा वृथैव मृत्युमुखं मरणमुखमुपैति प्राप्नोति, एतच्छ्रुत्वा कः सकर्णः पुमान् गन्धगार्द्ध्यं सुरभिगन्धगार्द्ध्यं सद्गन्धलोलुपत्वं हृदये वहेदिति काव्यार्थः ॥ अथैतदाघ्राणे यो दोषस्तमुद्दिश्य **निदर्शनमाह—**

अत्रैव **वसन्तपुरे नरसिंहाख्यः** क्षितीश्वरः समभूत् । तस्य ज्येष्ठगुणाढ्यस्तनयो ज्येष्ठोऽस्ति **नरवर्मा** ॥१॥ परिमल-

प्राप्य मनोज्ञं स चैकवारं हि जिघ्रति प्रसभम् । न हि वारितोऽपि तिष्ठति स मातृपित्रादिभिरपीतः ॥२॥ नान्येषां विषयाणां व्याप्तिस्तस्यास्ति तादृशी ह्यधिका । यादृग्भूनासायाः सौरभलोभाधिकत्वमहो ॥३॥ तस्यान्यदा सपत्नी माता निजतनयराज्यतृष्णार्त्ता । मञ्जूषायामुज्ज्वलविषगुटिकामक्षिपत् कुधिया ॥५॥ तस्यान्यदा निदाघे नदीजले दीव्यतः प्रमोदार्थम् । उपरितनेऽम्भःपूरे दूरे गत्वा व्यमुञ्चदसौ ॥४॥ तत्रायया तरन्ती यत्रास्ते राजनन्दनः स तरन् । नूतनवस्त्रनिबद्धा कुतुकात्तेनाथ सा जगृहे ॥६॥ दृष्ट्वा हृष्टेन हृदा तामुन्मुच्यैष गन्धमादत्ते । तस्याघ्राणवशेन क्षणेन मुक्तस्ततः प्राणैः ॥७॥ तुष्टा हृदये दुष्टा पापिष्ठा सा सपत्निका जननी । निजनन्दनराजपदप्राप्त्या व्याप्ता सुखश्रेण्या ॥८॥ स यथा गन्धाघ्राणप्रबलघ्राणः परासुरत्रासीत् । तद्वदिहान्योऽपि जनो मुत्कलनासेन्द्रियोऽत्यसुखभाक् स्यात् ॥९॥ एवमवेत्य जना भो घ्राणेन्द्रियनिग्रहं कुरुत येन । स्यादत्र परत्रापि हि सर्वत्र च शर्मसंभारः ॥१०॥ ॥ इति घ्राण-दोषे नरवर्मकथा ॥

अथ स्पर्शनेन्द्रियव्याप्तिदोषमाह—

**फासिंदियं जो न हु निग्गहेई, सो बंधणं मुद्धमई लहेई ।**
**दप्पुद्धरंगो जह सो करिंदो, खिवेइ अप्पं वसणम्मि मंदो ॥५१॥**

**व्याख्या**–स्पर्शनोपलक्षितमिन्द्रियं स्पर्शनेन्द्रियं निजं वपुः यः पुमान्न निगृह्णीयात् हुरित्यवधारणे स बन्धनं मुग्धमतिर्लभेत । **दृष्टान्तमाह**–दर्पोद्धुरमङ्गं यस्य स तादृक् सन् यथा करीन्द्रो हस्ती क्षिपति आत्मानं व्यसने महासङ्कटे

॥३५७॥

मन्दो विज्ञानविकलः स्पर्शनेन्द्रियस्य यो निग्रहं न कुर्वीत स स्तम्बेरमवत् आत्मानं दुर्गरोधस्वबन्धनादिदुःखे पातयतीति काव्यार्थः । अथैतदर्थसमर्थकं दृष्टान्तमाह—

अस्तीह [1]स्वःतीहापरनरनारीसहस्ररमणीय[2]म् । नृमणीयन्ते यत्रानेके सहिता विवेकेन ॥१॥ तत्र श्रीजितशत्रुः शत्रुप्रबलाभिमानवनवह्निः । गङ्गाधीशः प्राज्यं राज्यं कुरुते सुखेन ॥२॥ सत्कुसुममालिकावत्सुकुमाला शशधरार्धदलभाला । सुकुमारिकेति राज्ञी तस्यासीद्रूपसंपन्ना ॥३॥ रमयेव रमारमणः स्मर इव रत्या शचीवरः शच्या । सार्धं स्वकीयपत्न्या विललास सुखान्यसङ्ख्यानि ॥४॥ सर्वातिशायिनीच्छा तस्याः सुकुमारदेहसंस्पर्शे । तद्भर्तुरभूद्बाढं गाढं प्रेमानुबन्धेन ॥५॥ क्षणमपि तया विनाऽसौ स्थातुं शक्नोति न बहिरन्तर्वा । किं क्वापि जलविहीनो मीनो मुदमावहेच्चित्ते ॥६॥ अत्यन्ततदासक्त्या मुक्ता चिन्ता ह्यनेन राज्यस्य । कस्य न विषयव्यासक्तिर्मतिवैकल्याय जायेत ॥७॥ सचिवैरेकत्र कृतालोचैरौचित्यवस्तुनिष्णातैः । सवधूकः पृथिवीशः पार्श्वैर्बद्ध्वा व्यमोचि वने ॥८॥ तन्नन्दनाय सकला राज्यसमृद्धिः प्रमोदतः प्रददे । निजसन्ततिमिव मोहात् प्रतिपालयति प्रजां सोऽपि ॥९॥ अटतोर्विकटाटव्यामनयोरनयोदयेन दुःखितयोः । क्वापि न सुखसामग्री मिलति स्वस्थानविच्युतयोः ॥१०॥ पथि गच्छन्ती व्यथया व्याप्ता तृषिता बभूव नृपपत्नी । गन्तुं शशाक पुरतः पतिर्न तामेकिकां मुक्त्वा ॥११॥ एकत्र क्वापि वने स निर्जने स्वं कलत्रमवमुच्य । बभ्राम जलं पश्यन्न पुनर्लभते यथा धनं दुःस्थः ॥१२॥ तृष्णातुरा वराकी मैषा मोषा म्रियेत जलहीना ।

---

१ कल्याणेच्छातत्परनरनारीणां सहस्रैः रमणीयम्. २ रमणीयं नाम नगरम्.

तत्प्रेमापूर्णमनास्तावत्क्षुरिकाप्रहारवशात् ।।१३।। निष्कास्य बाहुशोणितमेतच्चिक्षेप पत्रपुटिकायाम् । क्षेपेण मूलिकायाः
स्वच्छं कृत्वा स्म पाययति ।।१४।। अशनायिता ततोऽभूद्देवी भोज्याद्यलाभवैगुण्यात् । तच्चिन्तातुरचेता नाम्नं प्रवि-
लोकयन् प्राप ।।१५।। तदभावेऽथ निजोर्वोरामिषमाच्छिद्य सद्य एवासौ । संरोहिण्यौषध्या व्रणसञ्जीभावमासूत्र्य ।।१६।।
पक्वा दवाग्निना तच्छशामिषं ह्येतदित्युदित्वैनाम् । भोजयति स्म महीशस्तद्वशवर्त्ती हहा मोहः ।।१७।। स्थाने स्थाने
।।३५९।। भ्राम्यन्नेवं गङ्गापगानटस्थायि । किञ्चिन्नगरं गेहे सह देव्या सपदि गत्वैव ।।१८।। विक्रीयाभरणानि स्वर्णमयानि स्वकी-
यगेहिन्याः । वाणिज्यं कुरुतेऽसावभ्यस्यन् सन् वणिग्वृत्तिम् ।।१९।। प्राहान्यदाऽस्य देवी स्वामिन् पूर्वं सखीजनान्तः-
स्था । गीतविनोदकथाभिर्गतमपि नो कालमविदमहम् ।।२०।। साम्प्रतमेकाकिन्याः प्रयात्यनेहा अतीवकष्टेन । तत्क-
मपि मानुषं मे प्रयच्छ सद्यः सखायमहो ।।२१।। आकर्ण्यतद्वचनं गीतकलावानवेक्ष्य पङ्गुनरः । सद्यान्यरक्षि निजके
पत्नीमनसः प्रमोदकृते ।।२२।। न पुनरिदं विज्ञातं न निरालम्बा वनेषु वल्ल्योऽपि । आश्रियासन्नस्थं निम्बमथाम्रं च
तिष्ठन्ति ।।२३।। एवं वामाः कामानुरूपमथवा विरूपमत्यन्तम् । आसन्नमेव पुरुषं स्मरादिताः खलु निषेवन्ते ।।२४।।
पङ्गोः सङ्गममात्रादनात्रगीतादिमोहिता राज्ञी । तेनैव समं भोगान् बुभुजे रागो हि दुर्जयः ।।२५।। विकलयति कला- ।।३५९।।
कुशलं, हसति शुचिं पंडितं विडम्बयति । अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ।।२६।। अत्रान्तरे विनो-
दाञ्जगाम गङ्गाविलोकनार्थमसौ । संप्रेर्य सलिलमध्येऽक्षिपत्तथा स्वं नरकगर्त्ते ।।२७।। पुण्यात् क्वापि विलग्नस्तटे स्फुटे-
नात्मनीनभाग्येन । श्रान्तः सुष्वाप तरोश्छायायामेष निश्चिन्तः ।।२८।। अपसरति नैव वृक्षच्छाया माया यथाऽङ्गना-

 

कायात् । तस्याश्रयप्रभावादचिन्त्यशक्तीह यत्पुण्यम् ॥२९॥ तत्पुरपतिरस्तगतः सुतहीनस्तदनु मन्त्रिभिर्दिव्यैः । अधिवासितैः स राज्ञः पदवीमारोपयाञ्चक्रे ॥३०॥ सुकुमालिकाऽथ तेनामा कामाननुभवन्त्यपास्तधना । चोल्लकमध्ये क्षिप्त्वा भिक्षार्थं भ्रमति दीनास्या ॥३१॥ पङ्गुर्मधुरध्वनिनाऽन्यानपि मोहयन् प्रतिग्रामम् । गीतानि गायति स्म प्रमोदिनः स्युर्यतो लोकाः ॥३२॥ जितशत्रुनृपतिनगरे दैववशादागता गतानन्दा । दृष्टा कष्टापन्ना वातायनवर्तिना राज्ञा ॥३३॥ आकार्याकार्यपरा पृष्टा स्पष्टाक्षरेण मृदुवचसा । भूस्थायिन्याऽथ तया न्यगादि नीचैःकृताननया ॥३४॥ पितृदेवभूमिदेवैः प्रसह्य पतिरेष एव मे प्रददे । शीलं प्रपालयन्ती पतिव्रताऽहं भ्रमन्त्यस्मि ॥३५॥ आचख्यौ क्षोणिपतिर्बाह्वो रुधिरं प्रपीतमुर्वोश्च । पलमशितमात्मभर्ता गङ्गापूरे प्रवाहयाञ्चक्रे ॥३६॥ साधु पतिव्रतके त्वं किं ब्रूमोऽतः परं भवच्चरितम् । मद्दृष्टेरपसर लघु प्रोच्येति चकार निर्विषयाम् ॥३७॥ एवं स्पर्शनमिन्द्रियं ह्यनिगृहीतं स्यात्पदं व्यापदां यद्वत्तस्य नरेश्वरस्य तदनु प्राणप्रियाया भृशम् । मत्वेतत्किल तात्त्विकं सुवचनं भव्या भवाङ्गीरुकाः, कुर्वीध्वं वशवर्ति नृत्यति यथा कीर्तिर्भुवः प्राङ्गणे ॥३८॥ ॥ इति स्पर्शनेन्द्रियनिग्रहे सुकुमालिकाज्ञातम् ॥

अथैतद्विपाकमेवाह—

**इक्को वि इक्को विसओ उदिन्नो, दुक्खं असंखं दलई पवन्नो ।**
**जे सव्वहा पंचसु तेसु लुद्धा, मुद्धाण तेसिं सुगई निसिद्धा ॥५२॥**

व्याख्या—एकोऽप्येको विषयः शब्दादिरुदीर्ण उदयं प्राप्तः सन् दुःखमसातमसङ्ख्यं सङ्ख्यातीतं ददाति प्रपन्नः

 ॥३६०॥

स्वात्मनि निश्रां गतः सन्। अथ च ये सर्वथा सर्वप्रकारेण पञ्चसु तेषु शब्दादिविषयेषु लुब्धा लाम्पट्यभाजः स्युः, मुग्धानां तेषां सुगतिर्निषिद्धा प्रतिषिद्धैव सर्वशास्त्रेष्विति काव्यार्थः ॥५२॥

अथ तेषामेव दुर्जयत्वमाह--

**अईव दुट्ठा विसया विसाओ, पच्छा भवे जेहि महाविसाओ।** ॥३६१॥

**जेहिं पया हुंति परव्वसाओ, न सेवणिज्जा खलु ते रसाओ ॥५३॥**

**व्याख्या**–अतीवाधिक्येन दुष्टा दुःखकारिणः विषया विषादपि पूर्वं सेव्यमाना: अतीव सुखदाः पश्चात्सेवनानन्तरं भवेत् यैर्महान् विषादश्चित्तविप्लवः । अथ च यैर्विषयासेवनैः प्रजा लोका भवन्ति परवशाः पारवश्यभाजः अतो हेतोर्न सेवनीयाः, खल्विति निश्चयेन ते रसतो मनोरङ्गेनेति काव्यार्थः ॥५३॥

अथ ये सार्वज्ञानामेतद्वचो मन्यन्ते त एव धन्या वर्ण्यन्ते--

**तित्थंकराणं निउणा पमाणं, कुणंति जे उज्झिय चित्तमाणं।** ॥३६१॥

**सव्वं पि तेसिं किरियाविहाणं, संजायई दुक्खसहस्सताणं ॥५४॥**

**व्याख्या**–तीर्थङ्कराणामाज्ञा निर्देशस्तीर्थकराज्ञा तां विषयासेवात्यागरूपां निपुणाः प्राज्ञाः प्रपद्य प्रमाणं कुर्वन्ति तथैव प्रपद्यन्ते ये, किं कृत्वा ? त्यक्त्वा चेतोऽहङ्कृतिं, तेषां किं फलं स्यादित्याह–सर्वमपि तेषां क्रियाविधानं कष्टानुष्ठानादि संजायते दुःखसहस्रत्राणं दुःखसहस्ररक्षकं तत्कृतं क्रियाकलापादि दुःखेभ्यो रक्षकं स्यात् सर्वं तत्कृतं सफलं

स्यादिति काव्यार्थः ॥ अथ ये संसाराद्भीरुकास्तेषां संसारः सुतर एव, एतदुपरि काव्यमाह—

**अच्चंतपावोदयसंभवाओ, जे भीरुणो भव्वगणा भवाओ ।**
**तेसिं सुहाणं सुलहो उवाओ, नो संभविज्जा भवसंनिवाओ ॥५५॥**

**व्याख्या**—अत्यन्तं सर्वाधिक्येन यः पापोदयस्तस्य संभवो जन्म यस्मादिति तथा तस्मात् इत्थंभूताद्भवाद्ये भीरवो भव्यगणाः पापोदयकारणात्संसारात्सदा भीरव एव भवन्ति तेषां भव्यानां सुखानां सुलभ एवोपायः, नो भवेत्संपद्येत भवे संनिपतनं भवसंनिपातः संसारगर्तान्तर्न पतत्येव प्रायः पुमान् पापभीरुरिति ॥ अत्रार्थे **विमलश्राद्धोदाहरणमुत्कीर्त्यते—**

अत्रैव भारते वर्षे सोत्कर्षे सौख्यसंपदा । आस्ते **कुशस्थलपुरं** कुशस्थलजलोज्ज्वलम् ॥१॥ नित्यं कुवलयानन्दी मन्दीकृतदुर्हृद्बलः । आसीत् **कुवलयचन्द्रः** श्रेष्ठी श्रेष्ठगुणोच्चयः ॥२॥ दिवानिशमखण्डश्री राजते यद्यशःशशी । द्विषत्प्रतापसूर्येण यत्प्रकाशो न हीयते ॥३॥ सदानन्दश्रियोपेताऽऽनन्दश्रीरिति तत्प्रिया । दूरोज्झितसमस्ताश्रीः श्रीरिवाच्युतसद्मनि ॥४॥ **विमलः सहदेवश्च** जज्ञाते तत्सुतद्वयम् । प्रथमः पापभीभीर्विपर्यस्तो द्वितीयकः ॥५॥ अगातां तावथोद्याने कदाचित्क्रीडितुं मुदा । अपश्यतां मुनिं तत्र साक्षात् पुण्यमिवोदितम् ॥६॥ नेमतुस्तमुपागत्य सत्यभक्तिसमन्वितौ । धर्मलाभाशिषा साधुरभ्यनन्ददिमौ मुदा ॥७॥ उपविष्टौ पुरस्तुष्टौ वीक्ष्य नेत्रमुखं मुखम् । मुनिर्दिदेश सद्धर्ममशर्मभरभेदकम् ॥८॥ देवः सेव्यः सदैवार्हन् श्रयणीयो गुरुः शुभः । धर्मः सर्वविदोद्दिष्ट एतद्रत्नत्रयं स्मृतम् ॥९॥ गृहस्थोचितमादाय धर्मं सम्यक् सहोदरौ । तौ तु द्वादशधा शुद्धं स्वं धाम समुपागतौ ॥१०॥ आर-

राध विशुद्धात्मा ज्येष्ठः शश्वन्मुनेर्वचः । द्वितीयः शिथिलत्वेन न धर्मे दृढतामधात् ॥११॥ अन्यदाऽऽदाय वस्तूनि
विक्रयार्थमिमौ पुरात् । चेलतुः सह सार्थेन पूर्वदेशं प्रति स्फुटम् ॥१२॥ अर्धवर्त्मनि केनापि पान्थेनाथ समीयुषा ।
विमलो विमलप्रज्ञः पृष्टः पंथानमञ्जसा ॥१३॥ मत्पुरस्तात्समाख्याहि सरलं वर्त्म सर्वथा । समिज्जलतरुच्छायासङ्कुलं
चलनोचितम् ॥१४॥ सोऽनर्थदण्डभीरुः सन्नाहं वेद्मीत्यब्रीवदत् । भूयोऽप्यवग्यः समाचख्यौ कुत्र ग्रामे पुरेऽथवा ॥१५॥
॥२६३॥ त्वया गन्तव्यमाकर्ण्यैतदाचष्ट विशिष्टधीः । विक्रयो यत्र वस्तूनां तत्रास्माभिः प्रयास्यते ॥१६॥ पुनः पान्थस्तमूचेऽथ
स्वं पुरं समुदीरय । कुत्रास्ते ते निवासो भो राजधान्यां वसाम्यहम् ॥१७॥ न ह्यस्माकं पुरं किञ्चिदास्ते वासोचितं
चिरम् । ततः स विमलं प्राह समया ते (त्वां) समेम्यहम् ॥१८॥ तेनोक्तं स्वेच्छयाऽऽगच्छ के वयं भो भवत्पुरः ।
पुरासन्नमथागत्य विमलः स्वार्थभुक्तये ॥१९॥ यावत्प्रज्वालयामास ज्वलनं संज्वलद्यशाः । तावत् पथिक आहयत्तं
मे समर्पय पावकम् ॥२०॥ तावत्तेनोक्तमत्रैव भुङ्क्ष्व किं भोः पृथग्क्रिया । वह्नेः समर्पणं सूत्रप्रतिषिद्धं हि तद्यथा ॥२१॥
**"महुमज्जमंसभेसज्जथूलसत्थग्गिजंतमंताई । न कयाऽवि हु दायव्वं सड्ढेहिं पावभीरूहिं"** ॥२२॥ अन्यत्राप्युक्तं—
**"न ग्राह्याणि न देयानि पञ्च द्रव्याणि पण्डितैः । अग्निर्विषं तथा शस्त्रं मद्यं मांसं च पञ्चमम्"** ॥२३॥ ततः स ॥२६३॥
रुष्टो दुष्टात्मन् रे रे धृष्ट निकृष्ट रे । अधर्मिष्ठ पुरस्त्वं मे ज्ञातृत्वं ज्ञापयस्यहो ॥२४॥ इत्येष तं तिरस्कुर्वन्निष्ठुरैर्वच-
नोत्तरैः । वपुषा वृद्धिमायासीत्तमस्तोमासिततत्विषा ॥२५॥ भयंकरेण व्योमाग्रलग्नशीर्षेण तत्क्षणात् । देहि रे दहनं
धृष्ट बाढं क्षुत्पीडितोऽस्म्यहम् ॥२६॥ न दास्यसि यदाऽह्रीक तदा ते नास्ति जीवितम् । यमसद्मनि पान्थत्वं भजि-

ध्यसि विसंशयम् ॥२७॥ इत्युक्ते सति सोऽवोचत् प्राणाः सत्वरगत्वराः । कस्तत्कृते स्वनियमव्रतखण्डनमाचरेत् ॥२८॥ चञ्चलैर्निश्चलस्याप्तिः समलैर्यदि निर्मलः । प्राणैर्धर्मः समर्ज्येत किं न प्राप्तं तदाङ्गिभिः ॥२९॥ यद्रोचते भवच्चित्ते तदाचर रयान्मयि । नाहं निःस्वार्थमत्यर्थमेतत्पापं सृजाम्यहो ॥३०॥ ततः संहृत्य तद्रूपमुपश्लोकयति स्म तम् । विमलात्माऽसि विमल श्लाघ्योऽसि त्वं महीतले ॥३१॥ त्वं सपुण्यः सकारुण्यस्त्वं च पुण्यास्पदं परम् । भवतः पापभीरुत्वं शक्रोऽपि स्तौति यत्स्वयम् ॥३२॥ प्रतिपन्नस्वनियमप्रतिपालनतत्पर । अहो वृणु वरं तूर्णं यथा संपादयेऽखिलम् ॥३३॥ विमलेन ततोऽभाणि दर्शनं ददता निजम् । किं न दत्तमहो मह्यमसह्यभुजविक्रम ॥३४॥ अर्हद्धर्मे मयाऽवाप्ते दुर्लभे भवकोटिभिः । समस्तमपि भो लब्धमतः परमिह त्वया ॥३५॥ निवेश्यं स्वमनो धर्मे निर्जरोत्तम धर्मिणि । साहाय्यं सर्वदा कार्यं वार्यं विघ्नकदम्बकम् ॥३६॥ तस्मिन्नतिनिरीहेऽसौ विषभृद्विषनाशकम् । मणिं चेलाञ्चले बद्ध्वा सुरः स्वधाम जग्मिवान् ॥३७॥ सहदेवादयः सार्थात्तेनाहूयन्त तेऽक्षमा । पान्थव्यतिकरः सर्वस्तत्पुरस्तान्निवेदितः ॥३८॥ तैरप्येष स्तुतः प्रीत्या ततो भ्रातृद्वयं स्वयम् । भुक्त्वाऽर्हद्गुरुसन्नामस्मृतिपूर्वमगात् पुरम् ॥३९॥ यावत्पुरं प्रविष्टौ तौ हृष्टौ तुष्टौ स्वमानसे । विसस्थुलो वणिग्वर्गः स्वापणश्रेणिमात्मनः ॥४०॥ पिदधानस्त्वरा दृष्टस्ताभ्यां भीरुकमानसः । नश्यन्नितस्ततश्चापि कान्तारे मृगयूथवत् ॥४१॥ पिधीयन्ते प्रतोलीनां द्वाराणि सुदृढार्गलम् । बंभ्रमीति चमूचक्रं सर्वतः समरोन्मुखम् ॥४२॥ विहस्तं नगरं प्रेक्ष्य पृष्टः कोऽपि नरस्ततः । ताभ्यां भद्र किमीदृक्षं व्याकुलं सकलं पुरम् ॥४३॥ कर्णाभ्यर्णमुपागत्य सोऽभणत् पुरुषोत्तमः । पुरुषोत्तमवद्राजाऽत्रास्ते गोपालशेखरः ॥४४॥

एक एव हि तस्याङ्गजन्मा सन्मानभूरभूत् । अरिमल्लाह्वयोऽन्वर्थनामा कामाभरूपभाक् ॥४५॥ सुखशय्याप्रसुप्तः सन् सोऽद्यैव मलिनाऽहिना । दष्टो दुष्टात्मना रात्रौ दुर्जनेनेव सज्जनः ॥४६॥ तावत्प्रणयिनी तस्य पूच्चक्रे करुणस्वरम् । मिमिले स्वजनः सर्वः प्रणनाश भुजङ्गमः ॥४७॥ न दृष्टः किल केनापि सर्वत्राप्येष वीक्षितः । तत्रागादवनीपालः परासुमवलोक्य तम् ॥४८॥ हा यच्छ वत्स मे वाक्यमित्येष विललाप च । मूर्छया न्यपतद्भूमौ शोकशङ्कासमाकुलः ॥४९॥ प्रकम्पनेन शीतेन स व्यथापि सचेतनः । तद्विषोत्तारणस्यार्थे क्रियन्ते विविधाः क्रियाः ॥५०॥ न विशेषो मनाकश्चित्तस्याजनि तनूरुहः । ततोऽमात्यानुवाचेशः सुतस्याभद्रमेव चेत् ॥५१॥ तदाऽवश्यं मया प्राणास्तृणीकार्या हविर्भुजि । तदवेत्य परीवारः समग्रोऽपि रुदत्यसौ ॥५२॥ विखिन्ना मन्त्रिसामन्ता हा कथं भाव्यदः पुरम् । निराधारं महीभर्त्रा विना कृतमतः परम् ॥५३॥ नृपाज्ञयाऽथ नगरे वादितः पटहः पटुः । राज्यार्धं दीयते तस्मै कुमारं योऽत्र जीवयेत् ॥५४॥ एवमुद्घोषणापूर्वमहंपूर्विकया जनः । कुतूहली मिलन्नस्ति कुर्वन् कोलाहलं किल ॥५५॥ एतन्निशम्य वृत्तान्तं विमलं प्रत्यभाषत । भ्रातः कुरूपकारं भोः समयो वर्त्ततेऽधुना ॥५६॥ मणिना जलमास्पृश्य क्षिप्रमाच्छोटय स्वकम् । यथोत्तिष्ठति दष्टोऽसौ सुप्तवत्प्राप्तचेतनः ॥५७॥ कः कुर्याद्राज्यलुब्धः सन् पापाधिकरणं परम् । विमले वादिनीत्येष भूयो भ्रातरमूचिवान् ॥५८॥ जीवयित्वा कुमारं भो दारिद्र्यं दूरतः कुरु । कदाचिज्जीवितो ह्येष धर्माराधकतां भजेत् ॥५९॥ एवं द्विधाऽपि ते लाभः संपद्येतास्तसंशयम् । इत्यूचुषि स यावत्तं विमलो वक्ति किञ्चन ॥६०॥ पोतप्रान्तात्स सहसा साहसी मणिमात्तवान् । पस्पर्श पटहं गत्वा तत्त्वाध्वनो बहिर्गतः ॥६१॥ संप्राप्तः

॥३६५॥

कुमरोपान्तमावृतः पौरपूरुषैः । वारिणा मणिमिश्रेण छंटितः सन् कुमारकः ॥६२॥ उत्तस्थौ क्षणमात्रेण फल्गुः स्यात् किमु देवगीः । पप्रच्छ पृथिवीपालमुल्लसल्लोचनाम्बुजः ॥६३॥ पुमान् समीपगः कोऽसौ किमश्वान्तःपुरं च किम् । सर्वमेकत्र मिलितं भूपस्तस्मै न्यवेदयत् ॥६४॥ अनेन जीवितोऽसि त्वं विषभृद्विषघूर्णितः । किमस्य प्रोच्यते वत्स परार्ध्यव्यसनं घनम् ॥६५॥ हृष्टात्मनाऽवनीशेन सहदेवोऽथ मानितः । निमन्त्रितश्च राज्यार्धदानेन सदयाशयः ॥६६॥ तेनोक्तं स मम भ्राता ज्येष्ठोऽस्ति विमलाशयः । यत्प्रभावान्मया स्वामिन् जीवितस्तव नन्दनः ॥६७॥ साम्प्रतं सपरीवारः श्रीपथान्तः स वर्त्तते । इहानीय प्रदातव्यं राज्यार्धं मानपूर्वकम् ॥६८॥ ततस्तत्र चचालोर्वीपाल आरुह्य हस्तिनम् । सहसा सहदेवेन कृतप्रत्युपकारधीः ॥६९॥ उत्तीर्णस्तूर्णमेवास्य दर्शने राजकुञ्जरात् । विनयोऽथ नयश्चापि सतामेवाङ्गसङ्गतः ॥७०॥ सन्मुखायातमालिङ्ग्य विमलं विमलं हृदि । अवादीन्मेदिनीभर्ता दन्तद्युद्योतिताधरः ॥७१॥ अहो महात्मन् भवता भवताऽतिदयालुना । सुतभिक्षा ममादायि मायानिर्मुक्तमेधसा ॥७२॥ त्वं कृती सुकृती विश्वे त्वन्मणेर्महिमाऽधिकः । यत्सूनोश्चिरजीवित्वं त्वत्प्रसादाद्विजृम्भितम् ॥७३॥ प्रसद्यायाहि मद्गेहमस्पृहोऽसीह यद्यपि । त्वत्समाना जना विश्वे विरलाः सरलाशयाः ॥७४॥ यथा यथाऽवनीनेता जजल्पेति मुहुर्मुहुः । तथा तथा नम्रशिरा जिह्राय विमलो हृदि ॥७५॥ धिग्धिग्विकृतिर्गुर्वी सोदर्येणामुना हहा । शल्यवत्साऽतिदुःसोढा हृदि दुःखायते भृशम् ॥७६॥ इति ध्यात्वा समाचख्यौ क्षितिवासव संशृणु । सहदेवकृतं सर्वमिदं तदुचितं कुरु ॥७७॥ ततो हस्तिनमारोप्य समानिन्ये निजौकसि । सबान्धवः स भूपेन हर्षोत्कर्षमुपेयुषा ॥७८॥ अहो गृहाण राज्यार्धमित्युक्ते भूभुजा स्वयम् ।

विमलः प्रोचिवान् राजन्नलं मे भूरिलिश्रिया ॥७९॥ खरकर्मसमारम्भः श्राद्धैर्दूरेण वर्जितः । यतः परिग्रहाधिक्यं
तेन राज्येन मे सृतम् ॥८०॥ सहदेवं भृणोल्लासं प्राज्यराज्यरमाश्रये । ददावभ्यर्थ्य राज्यार्धमस्मै भूवल्लभस्ततः ॥८१॥
शुभ्रं सद्म समर्प्याथ सरोवरकमलाकुलम् । स्थापितो विमलः श्रेष्ठिपदेऽनिच्छन्नपि स्फुटम् ॥८२॥ परिच्छदः समानीत-
॥३६७॥ स्ताभ्यामात्मीयवर्गोऽखिलः । आरराध विशुद्धात्मा विमलो धर्ममार्हतम् ॥८३॥ अतुच्छराज्यमूर्च्छालः सहदेवोऽभवद्भृ-
शम् । खरं करभरं चक्रेऽथादण्ड्यानप्यदण्डयत् ॥८४॥ पापोपदेशानददान्निर्दयः सुतरां हृदि । निःशङ्करिपुरग्रामान्
कर्षदानान्युपार्जयत् ॥८५॥ व्रतं विराधयामास निर्भयः पापकर्मणः । अन्यदा विमलेनासावनुशिष्टः प्रियाक्षरैः ॥८६॥
करिकर्णतडिद्दण्डचलपत्रच्छदास्थिरे । राज्यलक्ष्मीभरे भ्रातः किमेवं लालसोऽस्यहो ॥८७॥ अनन्ताशः श्रियो भुक्ता
देवमानवजन्मसु । तृष्णां निवर्तय क्षिप्रं मा हारय मुधा भवम् ॥८८॥ कथं विरतिमासाद्य प्रमादमनुतिष्ठसि । इत्यादि
विमलोक्तानि शृण्वन् सोऽमर्षतामधात् ॥८९॥ प्रतिपेदे न तद्वाक्यं श्यामीकृत्यास्यमाश्वसी । विज्ञाय तदभिप्रायं
विमलो मौनमादधे ॥९०॥ योग्यः सदुपदेशानां नैष विद्वेषभाक् पुमान् । मधुरा इक्षुदण्डाः स्युः करभस्य न तुष्टये
॥९१॥ ततः संत्यक्तसम्यक्त्ववासनोऽनर्थदण्डकृत् । सहदेवः स पापात्मा केनचित् पूर्ववैरिणा ॥९२॥ सुखनिद्राप्रसुप्तः ॥३६७॥
सन् हतः शस्त्रप्रहारतः । कदाचिच्छलमासाद्य प्राप प्रथमदुर्गतिम् ॥९३॥ ततो गुरुभवाम्भोधिदुःखकल्लोलमालया ।
व्याहतः सन् घनं कालं स प्रयाताऽक्षयं पदम् ॥९४॥ भवद्भूरिभवारम्भदम्भनिर्मुक्तमानसः । विमलो विमलस्वान्त-
सङ्क्रान्तार्हतसन्मतः ॥९५॥ भीरुर्भवोरुपापेभ्यो न्यायवृत्तिमुपाश्रयन् । गृहस्थधर्ममाराध्य संप्राप त्रिदशालयम् ॥९६॥

क्षेत्रे महाविदेहाख्ये सुकुलोत्पत्तिमाप्य सः । आत्तव्रतः शिवं याता सातानन्त्यमनोहरम् ॥९७॥ पातकभीरुत्वमिति प्रज्ञाय न्यायमार्गनिपुणस्य । विमलस्य भव्यलोकाः सुशङ्कमाना भवत भवतः ॥९८॥ इति विमलदृष्टान्तः ॥

अथ संसारास्थिरत्वमाह—

**धणं च धन्नं रयणं सुवन्नं, तारुण्णरूवाइ जमित्थ अन्नं ।**
**विज्जु व्व सव्वं चवलं खु एयं, धरेह भव्वा हियए विवेयं ॥५६॥**
**पुत्ता कलत्ताणि य बंधुमित्ता, कुडुंबिणो चेव इहेगचित्ता ।**
**आउक्खए पावकसा समेए, न रक्खणत्थं पभवंति एए ॥५७॥**

**व्याख्या**—धनं च पुनर्धान्यं रत्नं सुवर्णं, अत्र जातावेकवचनं, तारुण्यरूपादि यदत्रान्यदप्यस्ति, विद्युद्वत्सर्वं चपलं खु निश्चितं मत्वा धरत भो भव्या हृदये विवेकं हेयोपादेयमिति काव्यार्थः ॥ पुत्राः कलत्राणि च बन्धवो भ्रातरो मित्राणि सुहृदः कुटुम्बिनश्चापि इहैकचित्ताः सन्तः आयुषः पर्यन्ते पापवशात्समेते प्राप्ते न रक्षार्थं प्रभवन्त्येते सम-र्थीभवन्तीति काव्यार्थः ॥ एतदर्थे **श्रीमहानिर्ग्रन्थस्वरूपमुच्यते**—

भक्त्या नमस्कृत्य समग्रसिद्धान्, साधूंश्च चारित्रगुणोपविद्धान् । निवेद्यते धर्मपथानुशिष्टिः, कर्मारिवारोऽक्षतिविघ्नविष्टिः ॥१॥ गुणाढ्यमुक्तामणिनीरनाथः, श्रीश्रेणिकोऽभून्मगधाधिनाथः । स मण्डकुक्ष्याह्वयभव्यचैत्यं, निरीक्षितुं प्राप बहिः ससैन्यम् ॥२॥ प्रभूतवृक्षव्रजवल्लिसख्यन्तर्यायिसत्पुष्पफलैरवन्ध्यम् । तत्काननं नन्दनवद्विभाति, प्रीतिनं

यद्दर्शनतोऽपि माति ॥३॥ श्रीश्रेणिकस्तत्र मुनीन्द्रमेकं, प्रैक्षिष्ट शान्तं सरसीव भेकम् । वृक्षस्य मूले मृदुलं निषण्णं,
दृष्ट्वाऽथ तं भूमिभुजेति [1]चित्रम् ॥४॥ रम्याऽस्त्यहो अस्य वपुर्विभूषा, रम्यं वयो रूपतमा मयूखाः । निःसङ्गता क्षान्ति-
रहो विमुक्तिः, सद्रूपमार्यस्य भवाद्विरक्तः ॥५॥ तद्रूपसंप्रेक्षणजातचित्रः, सविस्मयोऽभूत् क्षितिपः स तत्र । प्रदक्षिणी-
कृत्य यतिं त्रिवेलं, ननाम [2]तत्पङ्कजमुद्धृतेलम् ॥६॥ न दूरवर्ती न नृपस्तथाऽऽसन्नासन्नवर्ती धृतधर्मवासः । कृताञ्जलिः
 सद्विनयः पुरःस्थः, पप्रच्छ हर्षेण गुणैरदुःस्थः ॥७॥ यद्यौवने प्रव्रजितः किल त्वं, भो भोगकालेऽस्ति तदुत्तमत्वम् ।
इत्येवमुक्ते स्वमुखेन भम्भासारेण सोऽप्याह [3]सदर्चिरम्भाः ॥८॥ भूमीपते भो अहमस्म्यनाथः, प्रवर्तते नो मम कोऽपि
नाथः । यत्केनचिन्मे न कृताऽनुकम्पा, त्यक्ता मरालेन यथाऽत्र [4]पम्पा ॥९॥ एवं ब्रुवाणस्य मुनीश्वरस्य, श्रीश्रेणिकः
प्राह पुनः प्रहस्य । सद्रूपवर्णादिमहर्द्धिभाजः, कथं न नाथोऽस्ति तवाधिराज ॥१०॥ नाथस्तव त्राणमहं भवामि, त्वं
भुङ्क्ष्व भोगादि मनोऽनुगामि । आस्ते तवाढ्यं परिवारवत्त्वं, दुष्प्रापमस्तीह पुनर्नरत्वम् ॥११॥ ऊचे मुनिस्त्वं प्रथमं
त्वनाथः, प्रवर्तसे भो मगधाधिनाथ । कथं स्वयं सन् सुतरामनाथः, संपद्यसे त्वं परकीयनाथः ॥१२॥ श्रुत्वेति साधोः
समभून्नृपालः, सविस्मयो वा कुतुकेन बालः । जीमूतवारीव नवः पुलाकयञ्चितो मुकुदाप्यश्रुतपूर्ववाक्यम् ॥१३॥ ॥३६९॥
नृपोऽवदन्मे करिणः सदश्वाः, पुराणि चान्तःपुरमस्ति विश्वा । ऐश्वर्यमाज्ञा बहुधा च भोगा, बलोत्कटा भूरितराः
पुरोगाः ॥१४॥ ईदृश्यवाप्ते कमलाप्रकर्षे, प्रशान्तहृत्कामितवस्तुतर्षे । भवाम्यनाथोऽत्र कथं मृषाऽदस्त्वं भाषसे हे

१ विचारितम्, २ उद्धृत इला पृथ्वी जगच्चीवा इति यावत् येन तत्. ३ सदर्चिरेव जलं यस्मिन्सः, ४ सरोविशेषः

श्रमणार्च्यपाद ॥१५॥ अनाथशब्दस्य न हि त्वयार्थः, प्रबुध्यते शौर्यजितोरुपार्थ । एवं जगादर्षिरनु क्षितीशं, स्तुत्युत्सुकः शैव इव प्रतीशम् ॥१६॥ शृणूच्यमानं मनसा त्वमव्याक्षिप्तेन वक्ष्मीदमहं स्वगव्या । यथा त्वनाथो भवतीति वृत्तं, मत्तो यथैतच्च नृप प्रवृत्तम् ॥१७। कौशाम्ब्यसन्त्यादनितोरुदैण्याश्रिनेयपुर्या सदृशी वरेण्या । आस्ते पुरी तत्र पिता ममाखिद्दुद्दामसंपत्समुदायभासी ॥१८॥ दृग्वेदना मे परमा वयस्याद्विमेऽभवत्कर्मजपारवश्यात् । दुःखाय वाऽरण्यगतो वराहः, सर्वेषु चाङ्गेषु बभूव दाहः ॥१९॥ दत्तऽङ्गरन्ध्रे रिपुणा निखातं, शस्त्रं यथा पीडनकार्यसारम् । व्यथा तथाऽङ्गेऽजनि भूयसी मे, पञ्चास्यभीर्वा गहनेऽतिभीमे ॥२०॥ कटिप्रदेशे सकलोत्तमाङ्गे, पीडाऽभवन्मेऽपि परत्र चाङ्गे । सहस्रनेत्राशनिघाततुल्या, कुप्रीतिपानीयकदम्बकुल्या ॥२१॥ व्याधिप्रतीकारकरा मनुष्या, आकारिता मान्त्रिकवैद्यमुख्याः । कुलक्रमायातमिहार्हणीयं, शास्त्रं वदन्तो वदने स्वकीयम् ॥२२॥ तैर्मे कथञ्चिन्न तदा यतस्मावद्भिः कृता काऽपि मनाक् चिकित्सा । ते मोचयन्ति स्म न मामसातादनाथतैषा मम भूप जाता ॥२३॥ समाधिहेतोर्मम सर्वसारं, वैद्येषु दत्ते स्म पिताऽनिवारम् । ते मोचयन्ति स्म न मामसातादनाथतैषा मम भूप जाता ॥२४॥ माता ममासीत्सुतशोकसंतापिता सती वर्द्धितचित्तचिन्ता । सा मोचयामास न मामसातादनाथतैषा मम भूप जाता ॥२५॥ पतिव्रता भूप मदीययोषा, शोकेन विच्छायमुखीव दोषा । भूपीठमिन्दुस्तमने चकोरश्रीवाश्रुभिः सिक्तवती ममोरः ॥२६॥ विलेपनस्नानशुभान्नपानप्रोद्दाममाल्यादिकवस्तु सा न । ज्ञातं मयाऽज्ञातमथाऽत्र भुक्ते, बाला स्वकार्ये न मनाक् प्रयुङ्क्ते ॥२७॥ ज्येष्ठाः कनिष्ठाः सहजाः समीनाः, स्निग्धाः स्वसारो मदुपान्तलीनाः । ते मोचयन्ति स्म न मामसातादनाथ-

तथा मम भूप जाता ॥२८॥ तदाहमूचेऽत्र भवे महीष्ठं, पुनः पुनः सोढुमलं न कष्टम् । दीक्षां ग्रहीष्यामि तदाऽ-
खिलायाः, सद्यद्विमुक्तो यदि वेदनायाः ॥२९॥ नीचोक्तवाक्यप्रसरं सहिष्ये, दान्तेन्द्रियः क्षान्तिगुणं वहिष्ये । अहं
निरारम्भतया चरिष्ये, भूस्पृग्जनुः प्राप्तफलं करिष्ये ॥३०॥ चित्तेऽवधार्यैवमहं प्रसुप्तस्तथैव यावन्निशि कष्टलुप्तः ।
॥३७१॥ पीडा मदङ्गस्य तदैव भम्भासारानशच्छीतहतेव रम्भा ॥३१॥ प्रातः समापृच्छ्य ततः स्वगोत्रान्, संलग्नमत्प्रव्रज-
नोक्तितोषान् । जातोऽस्म्यहं भाववशान्मुमुक्षुः, श्रेयोऽङ्गनासङ्गसुखं बुभुक्षुः ॥३२॥ ततः परं स्वस्य पुनः परस्य क्षणाद-
भूवं जगदाश्रितस्य । नाथस्त्वहं भूतकदम्बकस्य, त्रसस्य च स्थावरजङ्गमस्य ॥३३॥ आत्मैव मे वैतरणी हृदिन्यात्मा
शाल्मलिर्मूलमिवास्तिवन्याः । आत्मा ममास्त्युत्तमकामधेनुः, स नन्दनं च प्रमदागमे तु ॥३४॥ आत्मैव मेऽसौ सुख-
दुःखकर्त्ता, ममास्ति चात्मा सुखदुःखहर्त्ता । आत्मैव मेऽसौ प्रविभात्यमित्रः, प्रोद्दामसमात्मैव च मित्रमत्र ॥३५॥ अना-
थताऽन्याऽपि च वर्त्तते या, साऽपि स्वचित्ते स्थवका निधेया । निर्ग्रन्थधर्मं समवाप्य केऽपि, श्लथीभवन्ति व्रतसङ्ग-
मेऽपि ॥३६॥ प्रव्रज्य यो नैव महाव्रतानि, स्पृशत्यमेधाः सुखदायकानि । गृद्धो रसे चानिगृहीतजीवश्छिनत्त्यान्न रागं स ॥३७१॥
गिरिं करीव ॥३७॥ नाऽऽयुक्तता भक्तगवेषणायां, स्याद्यस्य नेर्यासमितौ शुभायाम् । आदाननिक्षेपविधिव्रजादौ, मोक्षं
स नाप्नोति भवे ह्यनादौ ॥३८॥ आस्वाद्य शीतारसरूक्षखाद्यं, क्लेशं चिरं प्राप्य च लोचनाद्यम् । भ्रष्टो व्रताद्यै-
स्तपसा च कामी, मुनिः स न स्याद्भवपारगामी ॥३९॥ कूटेव कार्षापणराजिरारात्त्याज्या च मुष्टिः शुषिरा ह्यसारा ।
यथार्थवैडूर्यसमप्रकाशस्त्याज्यो भवेत् काचमणिर्हताशः ॥४०॥ धर्मध्वजं पाणितलेऽपि धृत्वा, पार्श्वस्थवेषं जनुषीह

कृत्वा । असंयतः स्वस्य च संयतत्वं वदन्नुपैत्युत्कटनारकत्वम् ॥४१॥ नरं यथा हन्ति विषं निपीतं, शस्त्रं यथा भेत्ति च दुर्गृहीतम् । धर्मस्त्वसौ सन् विषयोपपन्नः, क्षणोति वेताल इवाप्रसन्नः ॥४२॥ यो लक्षणं स्वप्नमथो निमित्तं, कुतूहलं मन्त्रमघप्रवृत्तम् । प्रकाशयन् जीवितमातनोति, प्रान्ते न किञ्चिच्छरणं चिनोति ॥४३॥ विराधनावाननधिकं कुशीलः, स द्रव्यसाधुः स तमोऽग्निकीलः । अतत्त्वभुद्दुर्गतिदुःखभारं, लातीव तक्षा निशितं कुठारम् ॥४४॥ औद्देशिकं क्रीतमनेषणीयं, यो न त्यजेत् किञ्चिदमेवनीयम् । स सर्वभक्षीव हिरण्यरेता, इतश्च्युतो दुर्गतिमेत्यनेता ॥४५॥ तत्कण्ठहृत्तस्य करोति नारिः, स्वदुष्टताऽरातिर्यदार्त्तिकारी । स्वयं यतो ज्ञास्यति मुक्तकृत्यो, गतो हरेर्वा मुखमेष मृत्योः ॥४६॥ स्यात्तस्य चारित्ररुचिर्निरर्था, प्रान्ते न धीर्यस्य वृषे समर्था । नायं परोऽप्यस्ति च तस्य लोकः, किंतूभयभ्रष्टतयास्ति शोकः ॥४७॥ एवं यथाच्छन्दमहाकुशीला, विराध्य जैनं मतमात्तहीलाः । भोगादिगृद्धाः परितापजुष्टाः, स्युर्दुःखिनोऽनीशतयेव मुष्टाः ॥४८॥ शिक्षां मयोक्तां तु निशम्य हीमां, भो बुद्धिमन् ज्ञानगुणैरसीमाम् । कुशीलमार्गं सममेव हित्वा, निर्ग्रन्थमार्गे चर कर्म भित्त्वा ॥४९॥ ज्ञानोपयुक्तः सुचरित्रराजी, गुणाश्रितो जात्य इवात्र वाजी । निराश्रवः पुण्यपथादरेण, व्रजेन्मुनिर्मोक्षपथं क्रमेण ॥५०॥ दान्तः कुकर्मारिहरो मनस्वी, दृढव्रतोऽदभ्रयशास्तपस्वी । निर्ग्रन्थयोग्याध्ययनमेतदाख्यद्व्यासेन राज्ञे मुनिरच्छिन्नताख्यः ॥५१॥ राजा ततो धर्मकृतावबुद्धः, कृताञ्जलिः प्राह कलाभिरिद्धः । सत्यं त्वनाथत्वमिहोपदिष्टं, त्वया यथाभूतमिदं वरिष्ठम् ॥५२॥ तवास्ति मानुष्यमिदं सुलब्धं, सद्रूपवर्णादि च ते सुदृब्धम् । सबान्धवस्त्वं त्वमृषे सनाथः, स्थितोऽसि जैनेऽध्वनि यत्सदाथः ॥५३॥ नाथत्वमुक्ते त्वमहो महर्षे, नाथोऽसि भूतप्रकरेऽत्र

वर्षे । प्राप्यानुशिष्टिं क्षमयाभ्यवन्तं, जीवान् समायोज्य करौ भवन्तम् ॥५४॥ पृष्टेवति ते यो मयकाऽत्र विघ्नः, कृतः शुभध्यानविधौ गुणघ्नः । निमन्त्रितो भोगसुखाय चापि, क्षन्तव्यमेतत्सकलं त्वयाऽपि ॥५५॥ स्तुत्वेति भक्त्या स नरेन्द्रसिंहस्तं साधुसिंहं दलयन् स्वमंहः । श्रीश्रेणिकः सस्वजनश्च साश्रुःपुरोऽभवद्धर्मरतः प्रशान्तः ॥५६॥ प्रोद्भूतरोमाञ्चतयाऽभिनन्द्य, प्रदक्षिणीकृत्य मुदाऽभिवन्द्य । स्वां राजधानीं नृपतिः प्रयातः, पुण्यप्रभावोद्गतसुप्रभातः ॥५७॥ त्रिगुप्तिगुप्तः स मुनिस्त्रिदण्डप्रमुक्त उन्मूलितपापखण्डः । चरन् वयोवद्भुवि विप्रमुक्तः, प्रान्तेऽभवत्सद्गतिभाग्विरक्तः ॥५८॥ ॥ इति महानिर्ग्रन्थसम्बन्धः ॥

अथ निकृष्टकर्मणामुपरि उपदेशमाह–

**जेसिं मणे पावमई निविट्ठा, निव्वाहवित्ती पुण संकिलिट्ठा ।**

**कयाऽवि ते हुंति न हिट्ठतुट्ठा, सव्वत्थ पावंति दुहाइ दुट्ठा ॥५८॥**

**व्याख्या**–येषां जीवानां मनसि पापमतिर्निविष्टा प्रविष्टाऽस्ति निर्वाहस्य वृत्तिः निर्वाहवृत्तिः वर्त्तनं वृत्तिः उपजीविका संक्लिष्टाऽस्ति क्लेशकर्मभिर्भाटकभारवहनाद्यैर्जायमानाऽस्ति, कदाचित्ते सत्त्वाः न हर्षतोषभाजः स्युः, किं तु सर्वत्रापि प्राप्नुवन्ति दुःखान्येव दुष्टाः । इति काव्यार्थः ॥ अथैतदुपरि **दृष्टान्तः** सूच्यते–

सुरगिरिसमधीरह जलहिगभीरह सिरिवीरहपय अणुसरिय । वेरग्गहकारण दुरियनिवारण भणिसु मियापुत्तह चरिय ॥१॥ **मिगनाम** अत्थ इह भरहि गाम जिहिं सोहइ घणवणमणभिराम । तिहिं **विजयनाम** भूवइ पसिद्ध हयगयरह- 

भडगयघडसमिद्ध ॥२॥ तसु घरणि रमणि च्छइ **मिगादेवि** रइरंभहराविय रूविहेवि । लज्जामज्झायसुसीलदेह जिणि सोहइ सोहण रायगेह ॥३॥ तिहिं अन्नदिवसि सिरिवीरसामि जसु सुकयवल्लि पल्लवइ नामि । अह समवसरिय सुरनमियपाय सोवन्नवन्न करसत्तकाय ॥४॥ आगमण सुणवि अह विजयराय पत्ताउ पहुवंदण पणयपाय । उवविट्ठओ तुट्ठओ सामिभत्ति वक्खाण सुणइ सो एकचित्ति ॥५॥ जच्चंध्र कोइ इत्थंतरम्मि संपत्त समवसरणम्मि रम्मि । महुवाल जेम मच्छिय अतुच्छ भणहणह पासि जसु तणु अदच्छ ॥६॥ जइ जुन्न सडियचीवरइ खंड वेयण विसहंतओ अइपयंड । जाणे करि पावह तणउ दंड पाविउ इह लोयहिं सो अखंड ॥७॥ करचरणनह अंगुलि सडिय जास कद्दमि जिम गड्डिय वुड्डनास । अइघरहरसद्द महारउद्द रूविहिं वीहावइं लोयखुद्द ॥८॥ नरडुक्कर ढुक्कर कहइं तासु करि कक्कर खंडगहेवि जासु । अह दिट्ठओ दिट्ठिहिं सयललोइ सिरिवीरपासि आवंत सोइ ॥९॥ **घत्त**—एरिस तं पिच्छिय गोयमि पुच्छिय वीरनाहमह आइसहु । इणि केरिस किद्धउ पावविरुद्धउ जेणि सहइ एरिसउ दुह ॥१०॥ भासअह सामिय अक्खइ महुरवाणि तं किं पि करइ जिय रुद्दझाणि । घणघोरकम्म करुणाविमुक्क निस्संकपणउ बहुपावढुक्क ॥११॥ जिणि एरिस दुक्खह पंजरम्मि निवडंत सयावि अ जज्जरम्मि । तो पुच्छइ गोयम पुणवि वीर मह कहउ नाह गंभीरधीर ॥१२॥ एयारिस अंधनराउ कोवि अवरोऽवि अत्थि दुक्खिओ जणोऽत्ति । जं पिक्खि विरच्चइं कामिणोऽवि संसारविसयसुक्खाउ तेऽवि ॥१३॥ पहु वागरेइ इत्थेव गामि नरनाहु अत्थि जो विजयनामि । तसु रमणि मिगानंदण अईव दुक्खियजण चूडामणि सदीव ॥१४॥ नहु नयणवयणकरचरण तासु नहु दीसइ नासा कन्न जासु । नहु सीसभमुह अह हुट्टुम्मि

॥३७

अइसइ कुरूवबीभच्छवन्नि ॥१५॥ पगईए बहिर अंधस्सरूव कियकम्मि नपुंसग दुक्खरूव । आगारमित्त पंचिंदियाण
तसु अत्थि देहु दुक्खिकठाण ॥१६॥ अडनाडि तस्स गब्भंतरेऽवि अब्भितरबाहिणि तह अडेवि । बाहिरपवहाउ तहेव
अट्ठ अडनाडि पूइए वहंति सुट्ठु ॥१७॥ सोणिय वहंति अडनाडियाओ तह अन्नधमणिनासंतराओ । दुन्निय दुन्निय
नाडीउ वहंति सोणिय तह पूइओ अइदुरंत ॥१८॥ अग्गिउ तसु वायु सयावि अंगि गब्भेऽवि हु पात्तभरप्पसंगि ।
||३७५|| पकुणइ सो लोमाहारमेव अइदुरभिगंध दुद्धर तहेव ॥१९॥ एरिस असुक्खभर अणुहवेइ नारय जिम काल अइक्क-
मेइ । पहुवयण सुणेवि इय गोयमेण पणमिय विन्नत्तउ कोउगेण ॥२०॥ घत्त–अणुमइ तुम्ह पामिय पिक्खउं सामिय
मियापुत्त नियलोयणिहिं । आइट्ठउ वीरिहिं चरमसरीरिहिं चल्लिय सो हरिसियमणिहिं ॥२१॥ भास–मियगामह
मज्झिहिं नवंनओ सिरिगोयम निवभवणिहिं पत्तओ । मुत्तिमंत किरि एह सुरद्दुम अह चिंतामणि अतुलपरक्कम ॥२२॥
देवि मियावइ पिच्छिय नयणिहिं आगच्छह जंपइ पुण वयणिहिं । आसण मिल्हिवि तक्खणि उट्ठिय अमियमेहवुट्ठिहिं
किरि पुट्ठिय ॥२३॥ सामिय अम्ह अणुग्गह किद्धओ नियपयकमलधरिहिं जं दिद्धओ । अम्ह मणोरह सयलु वि सि-
द्धउ अज्ज अमियरसघुंटिहिं पिद्धउ ॥२४॥ कज्ज किंपि मह आइस दिज्जउ असणपाण रुच्चइ तं लिज्जउ । गोयम- ||३७५||
सामी तो पभणेइ मियादेवि तं कन्नि सुणेइ ॥२५॥ इच्छा अम्ह तुम्ह सुयपिक्खणि तक्खणि तं निसुणेवि वियक्खणि ।
लहुयपुत्तचउरो सिंगारिय आणवि गोयम अग्गइ धारिय ॥२६॥ सुहगुरुचरणिहिं रंगि नमावइ धम्मलाभ अप्पिय
बुल्लावइ । एणि कज्जि नहु अम्हि इहागय पढम जाय जो अत्थि तुहंगय ॥२७॥ जासु रूव सिलपुत्तह तुल्लउ सव्वह

मिज्झहिं छइ ज्जु पहिल्लउ । धम्मसीलि तद्दंसणकारउ मिगा भणइ तो पहु अवधारउ ॥२८॥ भयवं तं नहु कोऽवि वियाणइ सामि कहं पुण तं वक्खाणइ । तो गोयमगणहरु तं भासइ उज्जलदंतकंति उल्लासइ ॥२९॥ तिहुयणगुरुसिरि वीरि पयासिय तस्सरूवि महमण उल्लासिय । जइ एवं ता सामि विलंबह खण इक इत्थ वि धरिय अणुग्गह ॥३०॥ इय मियदेविनिवरण आढत्तिय गोयम गुरु संठिय बहुमन्निय । भोयणसमय तस्स उजा पत्तउ तो तज्जणणि वेस निवत्तओ ॥३१॥ सगडीय आहारिहिं तो पूरिय भोयण विहि सव्वुवि किरि चूरिय । संकलबंधवि सा आगरिसिय गिहदुवार जा आविय हरसिय ॥३२॥ नियमुहवंधवि सत्तवडंचलि तो मियदेवि भणइ करि अंजलि । तुम्ह वि मुहपत्तीय मुह ढंकहु आगच्छंतविसिमासंकहु ॥३३॥ तो भीमहर बारुग्घाडइ तक्खणि दुरहिगंध मुह साडइ । सप्पमडय गोमडय सरिच्छउ जो पसरंत होइ नहु पिच्छउ ॥३४॥ अन्नगंध उद्धरस लहेविण सलयलेइ अवसर जाणे विण । दीसइ अंग-आहारिहिं पीणउ नयण वयणनासा परिहीणउ ॥३५॥ पक्खित्तपत्तमज्झम्मि सोय तदुवरिहिं भुज्ज पक्खिविय तोय । सो लुलइ चलइ आहारसन्न लुद्धउ रसगिद्धओ अकयपुन्न ॥३६॥ घत्तसो तत्थ लुलंतउ कम्मिरुलंतउ लोमाहार करेइ लहु । पुणरवि नीहारिय रोगिहि भारिय पूइत्तणि देहाउ बहु ॥३७॥ भास–एरिस पेक्खेविण तस्सरूव गोयम गण-नायग विसरूव । वेरग्ग अभंगुर धरइ चित्ति चितइय अचितिय कम्मसत्ति ॥३८॥ मियदेवि अणुन्ना लहिवि हेव सिरिगोयम चलीयउ अह तहेव । संपत्तउ पहुपयजुय नमेइ करकमल जोडि इय विन्नवेइ ॥३९॥ तुम्हाण आण पहु सिरि धरित्तु हउं विजयरायभवणम्मि पत्त । जह कहिय तुम्हि तह चेव दिट्ठु मइं लोट्ठरूव नंदण अणिट्ठ ॥४०॥

आइसह नाह मह तच्चरित्त एयारिस सो हुअ किंनिमित्त । कम्माणि तेण कह अज्जियाइं अइतिक्खाणि य जिणि सज्जि-
याइं ॥४१॥ इय पुच्छिय सत्थमणेण तेण पहु वज्जरेइ महुरस्सरेण । इत्थेव अत्थि पुर सयदुवार तिहि राय आसि धण-
वइ उदार ॥४२॥ तस्सेह **विजयवद्धण**ऽभिहाण वरखेडय धन्नधणोहट्ठाण । जसु केडइ पंचसयाइं गाम नाणाविहुय-
॥३७७॥ गत्रणमणभिराम ॥४३॥ **इक्काईतहि** रट्ठउड आसि जसु दुम्मइ चित्तिहि वसइ वासि । **जो** पाडइ सज्जणलोयपासि
बहुकूड करेवि निग्घणमहासि ॥४४॥ चिंताहिगार गामाण तस्स अप्पिय निवेण निग्घणमणस्स । गामीण लोय दुस्सह
करेण सो पीडइ अइकूरत्तणेण ॥४५॥ नहु तिक्खदुक्ख लोयह गणेइ बिन्नत्ती कन्निहिं नहु सुणेइ । निसुणंतु वि असु-
णंतो व्व होइ अइदुद्धररोस समुव्वहेइ ॥४६॥ आरंभइ दंभमहापवंच गिण्हइ नियहत्थिहिं छन्न लंच । लोयह संतावइ
वार वार नहु दुत्थिय सत्थह कुणइ सार ॥४७॥ तज्जइ तह ताडइ निट्ठुरेहिं दढलेट्ठुमुट्ठिकसमुग्गरेहिं । किंविगुत्तिहिं
बंधइ संकलेहिं उब्बंधइ रुंधइ अग्गलेहिं ॥४८॥ न कयावि दयापरया इमस्स लोयाणमुवरि कयनिग्गहस्स । अइलु-
द्धथद्धनिद्धंधसस्स नहु धम्म वसइ खलु चित्ति तस्स ॥४९॥ नहु लज्जइ सज्जइ पावकम्म अज्जइ अकज्ज पयडेइ मम्म ।
इच्चाई माई गमइ काल एयारिस चिर कुविउव्व काल ॥५०॥ उप्पन्न अकयपुन्नस्स तस्स भवि तम्मि रोग सोलस ॥३७७॥
अवस्स । जरखाससास तह कुच्छिसूल अइदुस्सह दुक्खइ कन्नमूल ॥५१॥ तह अरिस भगंदर दिट्ठिपुट्ठि सूलुब्भव तणु
परिसडियकुट्ठि । तणुदाह जलोदर सोसपोस इच्चाइ सुदुस्सह कम्मदोस ॥५२॥ अणुहवइ हवइ अइहीणदीण आम-
यवसि नडीयउ दुक्खरीण । तो दंसिय अगयंकारयाण तप्परियरि बहुगुणकारयाण ॥५३॥ तेहि वि परिचत्तउ सो

अधन्न जिम हंसिहिं छिन्नरनीरसुन्न । तो अट्टरुद्द झाणिहिं मरिसु पढमम्मि नरइ इकाइ पत्त ॥४५॥ तिहिं सहिय दुक्ख उद्धरिय सो य **मियविजयरायअंगय** सोय । संपत्त नपुंसयदेहगेह दुक्खाण अमंगल पढमरेह ॥५५॥ **सिरिवी-रनाहि** जह **गोयमस्स** मियपुत्तचरिय पभणिय असस्स । तह जंबू अग्गइ सुहमसामि अक्खाय विवागसुयंगठामि ॥५६॥ तह मइ निद्दसिय लेसमित्त जं इत्थ जाय मइ पय अमुत्त । मिच्छदुकड तं सव्वे खमंतु सिद्धंतमग्गि मुणि अभिरमंतु ॥५७॥ चत्तइय मियसुय संधीय गुणअणुसंधिय गाहाबंधिहिं मइं कहिय । नियमणि परिभावइं ते सुह पावइं मणवेय-ग्गिहि गहगहिय ॥५८॥ इति **मृगापुत्रसन्धिः** ॥

अथ जिनगुणोत्कीर्तनेन बोधिस्तद्विपरीत्येनाबोधिः, एतदर्थोद्भावकं काव्यमाह—

**वन्नं वयंता जिणचेइयाणं, संघस्स धम्मायरियाइयाणं ।**

**कुणंति भव्वा सुलहं सुबोहिं, अवन्नवाएण पुणो अबोहिं ॥५९॥**

**व्याख्या**—वर्णं वर्णवादं कीर्तिरूपं वदन्तः प्रजल्पन्तो भव्या मानवाः **कुर्वन्ति** सुलभां सुबोधिं सम्यग्दर्शनरूपां प्रेत्य धर्मप्राप्तिर्बोधिः, परं केषां **वर्णवाद**मित्याशङ्कापनोदायाह—जिनानां **चैत्यानि** चेतःप्रसादजनकानि प्रतिमारूपाणि संघस्य चातुर्वर्णस्य श्रमणश्रमणीश्राद्धश्राद्धीलक्षणस्य तथा धर्माचार्यादीनां प्रशंसापराः सुलभबोधयः स्युः, तथैतेषामवर्णवादपराः सत्त्वाः परत्र दुर्लभबोधितामर्जयन्तीति काव्यार्थः ॥ उक्तं च **श्रीस्थानाङ्गे**—"**पंचहिं ठाणेहिं जीवा सुलभबोहियत्ताए कम्मं पकरंति, तं जहा—अरहंताणं वण्णं वयमाणे, अरहंतपन्नत्तस्स धम्मस्स वण्णं वयमाणे, आयरियउवज्झायाणं वण्णं**

**वयमाणे, चाउवण्णस्स संघस्स वण्णं वयमाणे, विविक्कतवबंभचेराणं देवाणं वण्णं वयमाणे**" इति । तथा–"**पंचहिं ठाणेहिं जीवा दुल्लभबोहियत्ताए कम्मं पकरेंति, तं जहा–अरहंताणं अवण्णं वयमाणे, अरहंतपन्नत्तस्स धम्मस्स अवन्नं वयमाणे, आयरियउवज्झायाणं अवण्णं वयमाणे, विविक्कतवबंभचेराणं देवाणं अवण्णं वयमाणे त्ति**" ।।

अथात्र श्री अर्हदादिगुणवर्णवादोपरि **श्रीसुबुद्धिसचिवोदाहरणमाख्यायते**—

काश्यामाश्यामितद्वेषिराजवंश्यास्यपङ्कजः । आसीद्दासीकृताराातिर्विजयी **जयभूपतिः** ।।१।। तस्य द्वेधाऽपि **सद्बुद्धि-** मन्त्री गन्त्रीव भारवाट् । राज्यभारस्य सर्वस्य यो विश्वस्यास्ति वत्सलः ।।२।। सर्वज्ञाज्ञाविधिज्ञात्मा योऽभूत्सद्गुरुभक्ति-भाक् । श्रीमज्जिनमताम्भोजे लीना यन्मतिषट्पदी ।।३।। गुणवर्णनमेवार्हद्गुरूणां गुणधारिणाम् । यः कुर्वन्नतिनैर्मल्यं सम्यक्त्वे कुरुते निजे ।।४।। तस्यांऽशोर्दिभुजो देवपूजाव्यापारसादरः । शिवनामगताशर्मा **सोमशर्मा** पुरोहितः ।।५।। रविचन्द्रप्रकाशेऽपि यदीयस्वान्तवेश्मनि । मिथ्यात्वध्वान्तसन्दोहः प्रससार सुदुस्तरः ।।६।। अथान्यदा सभासीने राज्ञि मन्त्रिसमन्विते । पुरोहितोऽवदद्भूपं किञ्चिज्ज्ञातं त्वया प्रभो ।।७।। भूभुजाऽवादि किं तद्भोस्ततः सोऽप्यूचिवानि-दम् । स्वामिन्नहो वणिग्देवा नीरं शीर्षे पुराऽवहन् ।।८।। ततः कौतुकिना राज्ञा पृष्टमेतत् कथं भवेत् । शीर्षेऽमीषां यतोऽद्यापि दृश्यते होडिनी स्फुटम् ।।९।। श्रुत्वेत्यमात्यवक्त्राब्जमपश्यन्मेदिनीशिता । यूयमेतद्विजानीथ वावदीति कि-मेष भोः ।।१०।। शठः प्रतिशठाचारान्निर्लोठ्यः खलु निष्ठुरः । दवः प्रतिदवेनैव प्रतिषेध्यः स्फुरद्धिया ।।११।। हास्य-मस्थानिकं ह्येतन्न सोढुं शक्यमात्मनि । विमृश्यैतदथाचष्ट मन्त्री शृणुत तात्त्विकम् ।।१२।। पुरोधाः सत्यगीः किंतु

।।३७९।।

मूलवार्ता न वेत्त्यसौ । त्वमेवाख्याहि तत्तत्त्वमित्युक्ते भूभुजाऽवदत् ॥१३॥ प्रभो पुरा यदा दैत्याः समुत्पन्ना जनार्दनाः । तदा तदातङ्कवशाद्वेसु सर्वे सुरास्त्वरा ॥१४॥ त्रयस्त्रिंशत्कोटिमिता दैत्यभीत्या प्रकम्पिताः । स्वचतुर्दश रत्नानि वार्धेरन्तरगोपयन् ॥१५॥ लक्ष्मीकौस्तुभदेवद्रुचन्द्रमुख्यानि भीतितः । ततो दैत्यक्षये जाते कार्तिकेयभुजौजसा ॥१६॥ लेखैरशेषैरारब्धे मथनेऽगाधवारिधेः । मेरुर्मन्थानकीभूतः शेषनागश्च नेत्रकम् ॥१७॥ जज्ञे स्वाधिकस्थाने सबलात्मा हिमाचलः । सर्वे विलोडितुं लग्ना हर्षमग्ना दिवौकसः ॥१८॥ महारम्भमथो ज्ञात्वा सुरेन्द्रः प्रोचिवान् सुरान् । अनिष्टारिष्टसन्दोहः कश्चिदुत्पत्स्यतेऽत्र भोः ॥१९॥ उत्पातजातनिर्घातसमर्थमवनीतटे । श्रीनेमीशमिहानीयोपवेशयत भोः सुराः ॥२०॥ देवाभ्यर्थनया स्वामी कारुण्येन समाययौ । दाक्षिण्यनिधयः प्रायः परार्थेषु महाधियः ॥२१॥ नैकाकी शोभते स्वामी महादेवस्तदन्तिके । स्थापयामास मघवा जज्ञिरे निर्भयाः सुराः ॥२२॥ रत्नानि जगृहुर्देवाः स्वानि स्वानि यथाक्रमम् । चित्ते मुमुदिरे बाढं गोपितार्थस्य लाभतः ॥२३॥ न किञ्चिदागतं शंभोर्भागे श्रीनेमिसेविनः । पुनर्विलोडयामासुर्वारिधिं विबुधव्रजाः ॥२४॥ तद्दास्यामो महेशार्थमथ यन्निर्गमिष्यति । इति संतोष्य तं वाचा मेथुः पाथोधिमञ्जसा ॥२५॥ तावत् पातालकुम्भेभ्यः कालकूटः समुत्थितः । स्फुटत्येवातिभरितं चर्चितं बहुपाण्डुरम् ॥२६॥ विषोग्रलहरीभिस्ते संजज्ञुर्लुप्तचेतनाः । सहसैव सुपर्वाणः प्रपेतुर्व्याकुला भुवि ॥२७॥ समुत्पेदेऽप्सरःसार्थे हाहाकारः सुनिर्भरम् । मूलक्षितिरियं जज्ञे लाभेऽस्माकमसंशयम् ॥२८॥ जगदङ्गिकृपापात्रं तावत् प्रभुरधावत । पीयूषानयनस्यार्थं कुम्भमादाय मस्तके ॥२९॥ तावच्छम्भुरभाषिष्ट मयि सत्यपि सेवके । स्वयं किं गम्यते देहि घटं येन तदानये ॥३०॥

अत्युत्तालतयाऽचालीदीशः कुम्भशिरास्ततः । समानिन्ये सुधां स्वामी तत्पानाद्विपद्गणम् ।।३१।। जीवयामासिवान् वेगात् सुस्थं जज्ञे जगत्त्रयम् । इंडोहिनी स्थिता शीर्षे ततः परमिहार्हतः ।।३२।। गलन्ती गर्गरी शम्भोरुपर्यद्यापि वीक्ष्यते । आस्ते सुरसरित्पूर्वं तृष्णा तदपि भूयसी ।।३३।। इत्युक्ते मन्त्रिणा भूपः प्रहस्योचे पुरोधसम् । कीदृगुत्तरमेतेन ददे निर्मलमेधसा ।।३४।। विलक्षास्यस्ततः सोऽस्थादस्थानकृतनर्मणा । कर्मणाऽवर्णवादस्य लिप्तः पापैकतानधीः ।।३५।। वर्णवादेन साधूनामर्हतां चापि धीसखः । सौख्यस्यैकनिधिर्जज्ञेऽमुत्र चापि परत्र सः ।।३६।।

**अथ वर्णवादोपरि दृष्टान्तः—**

**पाडलिपुत्तम्मि** पुरे निवसइ **कोसियग** वाणिओ आसि । आजम्म दरिद्दोसो दोसो बहुओय मिच्छस्स ।।१।। तत्थेव वासवक्खो इब्भो सुस्सावओ वसइ दक्खो । बालवयंसो सो कोसियस्स साहूसु भत्तिरओ ।।५।। कोसियगो पुण धिज्जाइभत्तउ तत्थ सोमडो नाम । अत्थि दिओ जाइमउम्मत्तमणो समणरोसिल्लो ।।३।। तप्पाडिवेसिओ कोसिओ य ते दोवि एगगोट्ठिला । कारिल्लीए वल्ली किं पुण निबद्दुमे चडिया ।।४।। अह अन्नया नयाउ भट्टो डुट्ठो कहिंपि उवविट्ठो । कोसियपुरओ विप्पो साहूणमवण्णमुल्लवइ ।।५।। निसुणइ नहु पडिसेहइ तुसिणीओ चिट्ठईय कोसियगो । अंधारयम्मि गुलियापडस्स नणु दुगुणिया सोहा ।।६।। इत्थंतरम्मि तत्थेव आगओ वासवो सुवासिल्लो । आभासिओ य सो सोमडेण सुहिओ तुमं भद्द ।।७।। तो वासवेण भणियं अच्छह किं भो कुणंतया तुम्हे । किं हरिसिया व दीसह अतक्किएणऽज्ज लाभेण ।।८।। तो तेणुत्तं नो किं पि तारिसं वासवेण संलत्तं । न तहाभूयं भूयाण साहुनिंदाइ अवरं भो ।।९।। परितोसहेतुभूयं तुम्हा 

रिसाण एत्थ जए । तो कोसिओ पयंपइ अहो मए किमिह अवरद्धं ।।१०।। उल्लवइ वासवो अह निवारिउं तरसि जइ न वाडवयं । तो उट्ठित्ता अन्नत्थ जासि न कहं तुमं मित्त ।।११।। एयाओ विप्पाओ सुसाहुनिंदा अणप्पदप्पाओ । तुममसि पाविट्ठयरो जो सुणसि सयं सकन्नेहिं ।।१२।। रे जड्ड डोड्ड तुममेत्थ केरिसो दसिसु साहुवग्गं जो । जाओसि सहसजीहो व्व सप्पयं चिट्ठ उवविट्ठो ।।१३।। तं सोच्चवज्झिच्च भो अवन्नवाओ तओ समुच्छलिओ । तो अक्खइ सिट्ठिवरो तं सोयं केरिसं कहसु ।।१४।। धिज्जाइणा पलवियं पुराणवक्कं सुणेसु अवियक्कं । दुव्वयणतज्जणेणं किं तज्जसि गलितुरंगु व्व ।।१५।। तद्यथा—"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश । उभयोः सप्त विज्ञेया मृदः शुद्धौ मनीषिभिः ।।१६।। एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् । त्रिगुणं वानप्रस्थानां यतीनां च चतुर्गुणम् ।।१७।।" तो वासवेण ववियं हंत हओ तुमंसि एयवक्केण । तुब्भाणदंसणे चिय एवं उवदंसियं जम्हा ।।१८।। सर्वगतो मधुसूदनः । यथा चोक्तम्—

"अहं च पृथिवी पार्थ वाय्वग्निर्जलमप्यहम् । वनस्पतिगतश्चाहं सर्वभूतगतोऽप्यहम् ।।१९।। यो मां सर्वगतं ज्ञात्वा हनिष्यति कदाचन । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।२०।।"

ततो भवता पृथ्वी वासुदेवः, जलं च वासुदेवः, शौचं च ताभ्यामेव क्रियते, ततो देवेनाधोद्वारधावनमसंगतमेव । जं भणसि मुद्धा साहुणो तत्थ—

"तिलमात्रप्रमाणां तु भूमिं कर्षति यो द्विजः । इह जन्मनि शूद्रत्वं मृतश्च नरकं व्रजेत् ।।२१।।"

ता जुत्तं हलं दाविता सयं पडिच्छगा के तुब्भे ता अरे डोड्ड किं मुहा जीहाए दब्भं लुगसि, अवसर दिट्ठिप-

हाओ, एस पुण कोसिओ अम्ह बालवयंसो—

गुरुणो निदिज्जंते सुणिऊणं हरिसमावहइ दुगुणं । नक्खत्ताण वि उन्हाण तेण निसिद्धो न मणयम्मि ॥२२॥ तो कोसिओ पभासइ किमहं ढंकेमि लोयवयणाइं । सिच्छाइ वाइणो जणगणा य को मज्झ अवराहो ॥२३॥ इय जाव हक्किया वासवेण साणाव ते पलाणा तो । वयणं अजंपमाणा माणावगमा विलक्खमुहा ॥२४॥ पुणरवि धिज्जम्मा सो तहेव
॥२८३॥ साहूण निंदमायरइ । कोसियगो पुण तप्पुट्ठिपूरओ अग्गीइ वाउ व्व ॥२५॥ विज्जाहरजुयलमहो समुवेयं अंबरम्मि चर-
माणं । जिणसाहुभत्तिरंगिल्लमाणसं धम्मसद्धाए ॥२६॥ विज्जाहरीइ वुत्तं पिक्खसु कहमेस निंदई मुणिणो । ता सिक्ख-
वेहि लहुमेव देवसाहूण पडिवक्खं ॥२७॥ विज्जाइसएण तओ सोलस उप्पाइया महारोगा । धिज्जाइणो सरीरे दोन्नि
तहा कोसियस्सावि ॥२८॥ सासो जरो य तेहिं रोगायंकेहिं पीडियंगातो । जीवित्ता चिरकालं मरिउं पढमं गया नरयं
॥२९॥ भमिही अणंतकालं सोमडओ गरुयदुक्खविहुरंगो । वयणामयदोसिल्लो साहूणमवण्णवाएण ॥३०॥ इयरो वि
भमिय सुचिरं भवन्नवं लहिय दुक्खसंभारं । दुल्लहबोही होही कहं वि किच्छेण कम्मवसा ॥३१॥ इय जो मुणीण निंदइ
कुणइ तहऽन्नो सुणेहि किज्जंति । ते दोन्नि वि संसारे सुदुक्खिया हुंति अवत्तं ॥३२॥ केवलमिह जो निसुणइ वारइ ॥२८३॥
नहु संतियाइ सत्तीए । सो कोसिय किर दुल्लहबोहि जायइ न संदेहो ॥३३॥ ॥ इति **साधुजनावर्णवादफल-
सूचकं ज्ञातम्** ॥

अथ ये धर्मतत्त्वार्थं नावबुध्यन्ते दुर्धियस्ते दुःखिनः सन्तो भवं पर्यटन्तीत्याह—

**अन्नाणया दोसवसाणुभावा, मुणंति तत्तं न हु किं वि पावा ।**
**भवंति ते दुक्खदरिद्ददीणा, परम्मि लोए सुहविप्पहीणा ॥६०॥**

**व्याख्या**–अज्ञानताया दोषस्तस्य वशस्तस्य अनुभावात्तन्माहात्म्यात् मुणंति जानन्ति तत्त्वं परमार्थं न हु इति वाक्यालङ्कारे किमपि पापाः पापकर्तारः, तेषां किं स्यादित्याशङ्क्याह–**भवन्ति** तेऽज्ञानवशंवदा अत एव अधर्मिणः दुःखदारिद्र्याभ्यां दीना अत्र भवे परत्र जन्मनि च सुखैर्विप्रहीणाः स्युः एतत्सर्वमज्ञानताजृम्भितमिति काव्यार्थः ॥

अत्र वधूचतुष्कज्ञातमाख्यायते—

अत्रैव हि **राजगृहे** गजवाजिविराजिरम्यराजगृहे । श्रीमगधदेशपेशलमहीमहीयोऽङ्गनाभरणे ॥१॥ तत्रासीद्दासीकृत-धनवल्लोकः सदापि गतशोकः । **श्रेष्ठी धनो** घनोपमदानः सन्मानभूर्नृपतेः ॥२॥ तज्जायाऽजनि **भद्रा** निर्मितभद्रा कुटु-म्बवर्गस्य । अखिला अबलाः स्वकलाविलासरूपाद्यया विजिताः ॥३॥ चत्वार इव पुमर्था घ्नस्तान्यास्तथाऽजितम-हार्थाः । अजनिषत चतुःसङ्ख्याः सङ्ख्यावद्वर्णितास्तदङ्गरुहाः ॥४॥ **धनपाल**स्तत्राद्यस्ततो द्वितीयो बभूव **धनदेवः । धन-द**स्तृतीयकोऽजनि **धनरक्षित**नामकस्तुर्यः ॥५॥ भार्या आर्याचरिता आसन्नेषामथो मिथोऽद्वेषाः । वेषालङ्कृतकाया निर्मायाः प्रविलसच्छायाः ॥६॥ **श्रीराद्या लक्ष्म्याख्या परा तृतीया धना च धन्याख्या** । एताः कुटुम्बभारोद्धरणैकधुरं-धराः प्रबभुः ॥७॥ अथ कतिचिद्दिवसान्ते स्वान्ते श्रेष्ठी विमर्शमित्यकरोत् । तनुजा ननु जात्यैव हि वर्तिष्यन्ते सुखे-नैव ॥८॥ काचिद्वधूः सुधूर्वहभावं यदि सप्रभावमावहति । कौटुम्बभारविषये तदा भवेयुस्तरां सुखिनः ॥९॥ सा

बुद्धया बोद्धव्या भव्याऽभव्याऽथवा नवोपायात्। मम गृह्णतोऽपि यस्माद्व्रतं हृदि स्फुरति नैश्चिन्त्यम् ॥१०॥ तस्माद्यु-
क्तमपूर्वा परीक्षणं स्वजनसाक्षिकममूषाम् । इत्थं विमृश्य मनसि श्रेष्ठी श्रेष्ठीकृतात्मपदः ॥११॥ उद्दण्डमण्डपाडम्बरमु-
द्धरमारचय्य निजगेहे । स्वज्ञातिजातिजनतामभितामामन्त्र्य भुक्तिकृते ॥१२॥ तदनन्तरमेष पुनर्नूतनताम्बूलपुष्पफल-
दानैः । सन्मान्य पौरवर्गं तत्प्रत्यक्षं स्नुषाः सर्वाः ॥१३॥ आहूय तत्कराब्जे समर्पयामास पञ्च शालिकणान् । वस्त्रग्रन्थि-
निबद्धान् पृथक् पृथक् व्यक्तमाख्यच्च ॥१४॥ याचे यदाहमेतांस्तदा प्रदेया अवश्यमस्मभ्यम् । ताः प्रतिपद्य तथेति
स्वस्थानमगुः सुगौरविताः ॥१५॥ एतत् किमिति वितर्कं कुर्वाणो जनगणोऽगमद्गेहम् । को वेत्ति कस्य चेतस्तत्त्वमसतत्त्वं
विदग्धोऽपि ॥१६॥ प्रचुराः पुराकरादिषु शालिकणा रक्षणं क्षिपेदेषाम् । श्वशुरस्यैतैरर्थं तदाहमुपढौकयिष्यामि ॥१७॥
इत्यालोच्य प्रथमा प्रोज्झाञ्चक्रे निरादरत्वेन । न हि गौरवं गुरूणां वचने खलु मन्दबुद्धीनाम् ॥१८॥ निस्तुषतामापा-
द्याक्षता द्रुतं भक्षिता द्वितीयकया । श्रेयस्कराः कराब्जप्रत्ता एते स्वयं गुरुणा ॥१९॥ उज्ज्वलचेले बद्ध्वा तृतीयवध्वा
महाप्रयत्नेन । भूषणकरण्डमध्ये प्रगोपितास्तात्तदत्ततया ॥२०॥ स्फुरद्गुरुतरचातुर्या तुर्या धुर्या समस्तकार्येषु । आकार्य बन्धु
वर्गं पञ्च कणानुल्बणान् प्रददौ ॥२१॥ एते प्रवर्द्धनीयाः पृथक्तया संविधाय केदारम् । कार्यमिदं विस्मार्यं न हि
सोदर्यैः सुवासिन्याः ॥२२॥ इत्युक्तास्तेऽथ निजं ग्राममगुः प्रावृषि प्रवृष्टेऽब्दे । लघुकेदारे प्रसरज्जलयोगात् प्रोप्तवन्त-
स्तान् ॥२३॥ उत्खाय ततोऽप्यारोपितवन्तस्ते पृथक्तया क्षेत्रे । प्रथमे वर्षे प्रस्थः शालिकणानामभूत् पूर्णः ॥२४॥
वर्षे ततो द्वितीये शालीनामाढकः समजनिष्ट । खारी तृतीयवर्षे कुम्भः प्रबभूव तुर्येऽथ ॥२५॥ कुम्भसहस्राण्यभवन्

॥३८५॥

पञ्चमवर्षे घनप्रकर्षेण । इयती वृद्धिर्बुद्धिप्रागल्भ्याद्धन्यया विदधे ॥२६॥ कतिचिद्दिनपर्यन्ते श्रेष्ठी स्वज्ञातिजातिमा-
मील्य । विश्राण्य भोजनाद्यं वधूचतुष्कं समाकार्य ॥२७॥ प्रार्थितवान् शालिकणान् श्रीरश्रीरिव यतस्ततो लात्वा
तानार्पयत्करोब्जे श्वशुरस्याध्यक्षमन्येषाम् ॥२८॥ श्रेष्ठ्याचष्टेमां प्रति तानुपलक्ष्यातिलब्धलक्ष्यत्वात् । मद्दत्ताः खलु नैते
तत्त्वं वद साऽभ्यधात् स्वामिन् ॥२९॥ ते तूज्झितास्तदैव हि लक्ष्मीराख्यन्मयाऽऽशिताः क्षणतः । लात्वाऽऽभरणक-
रण्डाद्धना जनानन्दिनी प्रददौ ॥३०॥ धन्यंमन्या धन्या विज्ञा विज्ञाय समयमार्हतम् । पञ्चापि सप्रपञ्चाः स्वामिस्ते जज्ञिरे
रुचिराः ॥३१॥ भूगृहकोष्ठागारान्तर्निक्षिप्ता मदीयजनकगृहे । सन्ति ततस्त्वरितममी शकटोष्ट्रखरैर्वृषैर्महिषैः ॥३२॥
आनाय्य गृहं पूरय चूरय दुर्भिक्षपातभीभारम् । तच्चक्रे स तथैव हि तद्गुणसंवीक्षणप्रीतः ॥३३॥ प्रणिगद्याभिप्रायं
पप्रच्छ श्रेष्ठिराट् स्वजनवर्गम् । किं साम्प्रतमत्रोचितमाह स्म स यूयमेव जानीथ ॥३४॥ आख्यदथ ख्यातयशाः प्रथ-
मोज्झनधर्मिणीयकोज्झतिका । रक्षाछगणोत्सर्जनपरायणा वसतु मद्गेहे ॥३५॥ शाकान्नपाककणसंशोधनदलनादिभुक्ति-
सामग्री । कार्या हि भोगवत्या रसनापरिभोगसुखवत्या ॥३६॥ श्रीशालिशालिकणपञ्चकरक्षणसंस्फुरद्विचक्षणता । मणि-
रत्नाद्यमशेषं रक्षतु खलु रक्षिताख्यवधूः ॥३७॥ आज्ञाकृत्तुर्यायाः शालिकणप्रगुणवृद्धिवर्यायाः । सर्वोऽपि गृहजनः
स्तात्द्रोहिण्याः सुगुणरोहिण्याः ॥३८॥ कौटुम्बभारमारोप्य श्रेष्ठी स्वस्नुषाचतुष्केऽसौ । स्वयमाराध धर्मं जैनमशमपिह-
मजस्रम् ॥३९॥ अस्त्वेवमित्युदीर्य प्रययौ स्वं धाम तत्सगीनजनः । मेधाविशिरोरत्नं धन्यं धन्यं हि मन्वानः ॥४०॥
अत्रान्याऽप्युपनयगीः स्पष्टा षष्ठाङ्गमध्यभागेऽस्ति । जम्बूपुरः सुधर्मस्वामिकृता विस्तरेणैवम् ॥४१॥ धन्यस्तथा गुरुरथो

ज्ञातिजनौपम्यभाक् श्रमणसङ्घः । वध्वस्तथा च भव्या व्रतानि खलु शालिपञ्चकणाः ॥४२॥ यथोज्झिताऽपास्य कणान् क्षणात्सा, दुःखिन्यभूत्कर्मकरीव दास्यात् । तथैव दुष्कर्मवशेन जन्तुः, पञ्चव्रतीप्रोज्झनजातमन्तुः ॥४३॥ अज्ञानतादोषनिरस्ततत्त्वप्रबोधसंजातसमस्तदुःखः । बंभ्रम्यते दुर्गतिजालमध्ये, सर्वज्ञनिर्देशविहीनचेताः ॥४४॥ ॥ इति **वधूचतुष्ककथा** ॥

पुण्योदयं विना धर्ममार्गो दुर्लभ इत्येतदुपरि काव्यमाह–

**पुण्णोदएणं नणु कोइ जीवो, भिसं समुज्जोइयनाणदीवो ।**
**मोहंधयारप्पसरं दलित्ता, पिच्छेइ निव्वाणपहं पइत्ता ॥६१॥**

**व्याख्या**–पुण्यं धर्मस्तस्योदयः पुण्योदयस्तेन कृत्वा पुनः कोऽपि जीवः पञ्चेन्द्रियलब्धिभाक् भव्यप्राणी स कीदृग् भृशमत्यर्थं समुद्द्योतितः सम्यक् प्रोज्ज्वालितो ज्ञानरूपः प्रबोधरूपो दीपो येन स तथा, मुह् वैचित्त्ये मोहयति मतिभ्रममापादयतीति मोहः सप्ततिकोटिसागरप्रमितस्थितिः, सर्वेषां कर्मणां मध्ये मोहस्यैव प्राधान्यख्यापनार्थं तदभिधानं स एवान्धकारस्तमोभरस्तस्य प्रसरस्तं दलयित्वा प्रेक्षते अवलोकयति निर्वाणपथं मोक्षमार्गं प्रयत्नादिति काव्यार्थः ॥

**तत्थंतराया बहवे पसिद्धा, कोहाइणो वेरिगणा विरुद्धा (समिद्धा) ।**
**हरंति ते धम्मधणं छलेणं, को निज्जिणेई नणु ते बलेणं ॥६२॥**

**व्याख्या**–तत्रापि यदि कदाचित्सम्यग्ज्ञानोद्द्योतबलेन मोहमहातमःसमवायमपाकृत्य कोऽपि प्राणी सिद्धध्वानमी-

 



वर्तते तथापि मार्गान्तराले वैरिणः प्रभूता विघ्नव्यूहविधायिनः तदेव व्याकुर्वन्नाह—तत्र मोक्षमार्गप्रस्थायिनां भव्यानामन्तराया बहवः प्रचुराः प्रसिद्धाः सन्ति। के ते इत्याह—क्रोधादयो वैरिगणाः क्रोध आदिर्येषां ते क्रोधमानमायालोभादयः प्रत्येकं ते चतुर्भेदाः संज्वलनप्रत्याख्यानाद्यास्ते जीवस्यान्तर्वासिनः शत्रुरूपा एव सन्ति, परं किंभूताः ? समृद्धा बलिष्ठाः ते हरन्ति धर्म एव धनं धर्मधनं छलेनापि बलेनापि पुण्यरूपं श्रेयस्करमपहरन्ति अनेकेऽपि सिद्धिपथप्रवृत्ताः सन्तस्तैश्छलिताः पश्चाद्वालिताश्च श्रीभुवनभानुवत्तथा कश्चित्तानन्तरङ्गविपक्षान्निर्जयति भव्यो मनोबलमाहात्म्यात्सादृगसदृशस्वचेतःप्रागल्भ्यादिति काव्यार्थः ॥

पावाइँ पावा परिसेवमाणा, धम्मं जिणुद्दिट्ठमयाणमाणा ।
अन्नाणकट्ठेहिँ कयाभिमाणा, खिवंति अप्पं नरए अयाणा ॥६३॥

व्याख्या—पापानि महारम्भसंभूतसत्त्वप्रणिपातजातानि पातकानि पापाः पापसेविनः प्राणिनः सेवमाना भजमानाः, किंभूताः सन्तः ? दुर्गतिगर्त्तप्रपातुकजन्तूनुत्तमस्थाने धारयत इति धर्मस्तं धर्म जिनोद्दिष्टं भगवत्प्रणीतं न जानन्तः अजानमाना अजानाना अज्ञानकष्टैः पञ्चाग्न्यनुसेवनभूमिशयनानुशीलननीरसाशनपरिजनसमुज्झननगरनिवासवर्जनशीतकालशीतलाम्भःस्नानमज्जनशीलातपवाताद्यधिसहननारण्यमौनसमुद्वहनाद्यतनुक्लेशैः कृत्वा वयं महातपस्याकारिण इति कृताभिमानाः प्रभूताहङ्काराभिभूताः सन्तः क्षिपन्ति आत्मानं नरके श्वभ्रवतो अज्ञानाद्दुर्बोधावरुद्धात्मान इत्यर्थः ॥

अत्रार्थे **श्रीपञ्चमाङ्ग**प्ररूपितं **पूरणाख्यान**माख्यायते, तद्यथा—

इत्थेव जंबूदीवे भारहवासे गुणोहआवासे । विज्झगिरिपायमूले विउलसिलापट्टभरथूले ।।१।। मणहरजणवेसंमी
विभेलनामम्मि सन्निवेसम्मि । सिट्ठी पूरणनामो कंचणधणकोडिअभिरामो ।।२।। तस्सन्नया कयाई जाए पुव्वावरत्तका-
लम्मि । सुहसिज्जाइठियस्स य चित्ते चिंता समुप्पन्ना ।।३।। अत्थि पभूओ धणधन्नसचओ मंदिरम्मि पुन्नवसा । तो
।३८९।। मित्तनाइवग्गं आमंतित्ता सुबहुमाणं ।।४।। तप्पच्चक्खं नियजिट्ठमंगयं संगयं गुणगणेहिं । ठविउं कुटुंबभारं सयमेव चउ-
प्पुडं पत्तं ।।५।। दारुमयं नियहत्थे करित्तु परिहरियसयणसंबंधं । गिण्हिस्समहमवस्सं पारिव्वज्जस्स पव्वज्जं ।।६।। तत्तो
तहेव काउं तं सव्वं एस गिण्हए दिक्खं । छट्ठं छट्ठेण तवोकम्मेण अईव उग्गेणं ।।७।। पारणदिवसे हिंडइ भिक्खं नय-
रम्मि अंतपंतघरे । चउपुडयं पडिगहगं गहिय करे पूरणतवस्सी ।।८।। जं पडइ पढमपुडए दीणाणाहाण तं समप्पेइ ।
जं दोच्चे तं सुणयाईणं दाणं किवालुत्ता ।।९।। सा मच्छकच्छभाणं ततिए पुडए पडेइ जा भिक्खा । जं पडइ तुरियपुडए
आहारइ अप्पणा तं सो ।।१०।। तं पि इगवीसवारा पक्खालित्ता जलेण अइविरसं । असणमसंतो संतो गमेइ कालं
सुदीहयरं ।।११।। अह पज्जंतं नाऊण आउणो अप्पणो स पूरणओ । उत्तरपुरच्छिमाए दिसाए भत्तं परिच्चयइ ।।१२।।
अह आसि अणिंदा चमरचंचनामेण रायहाणी तो । पडिपुन्नदुवालसवच्छराइं पालित्तु पव्वज्जं ।।१३।। मासं संलिहिय ।।३८९।।
तणुं मरित्तु अणसणविहीइ अन्नाणो । चमरचंचाइ इंदो उववन्नो चमरनामो त्ति ।।१४।। तयणंतरमेवेसो ओहिन्नाणं
पउजई निययं । आभोएइ सुहम्मासभासमासीणमइगरुयं ।।१५।। सीहासणोवरिट्ठियमणेगसुरसेणिसेवणिज्जकमं । सक्कं
चउरासियसहस्सतुल्लअमरिंदपरिवरियं ।।१६।। नियसीसोवरि कयपयमेयमिमो पासिऊण नणु रुट्ठो । भो भो असुरा

वज्जह एयं वारेह धिट्ठयरं ॥१७॥ तो तेहिं समुल्लवियं सामी एसा ठिई तिहुयणस्स । विणिवारेउं सक्का न सक्कतिय-सासुरेहिं पि ॥१८॥ को लोयणाइं अंजइ सुतिक्खभल्लेण केसरकलावं । को केसरिणो छिवई करेण चिरजीवियाकंखी ॥१९॥ इइ वुत्तोऽवि न चिट्ठइ जा ता सयमेव एस रोसिल्लो । उट्ठिय पहरणसालं पविसित्तु खणेण चमरिंदो ॥२०॥ फलिहरयणं पगिन्हिय तत्तो एसो विणिग्गओ तुरियं । उड्ढं उप्पइओ नहयलम्मि अइदीहरोसतणू ॥२१॥ तत्तो सजीविएसी वीरं विन्नाय संसुमारपुरे । अट्ठमभत्तियमिगराइपडिममावन्नमइसत्तं ॥२२॥ वंदित्तु एवमक्खइ निस्साए तुम्ह देवरायमहं । जिप्पेमि होसु सरणं तओ गओ चमरअसुरिंदो ॥२३॥ करकयसबलग्गलओ निरग्गलो मयगल्लो व्व दप्पिल्लो । उप्पइओ अंबरपहमसंखदीवोयहिसमूहं ॥२४॥ सिग्घमवक्कममाणो पत्तो सोहम्मकप्पमाइल्लं सोहम्मवडंसयमह विमाणमागम्मिगपएण ॥२५॥ पउमवरवेइयं अक्कमित्तु बीएण तह सुहम्मसभं । आरुहिय महासद्देण एवमुग्घोसिउं लग्गो ॥२६॥ अहह कहं नणु भो सुरिंद मह मत्थ उवरिं धरंतो । तुह पाए न हु मणयं मणम्मि संकं समुव्वहसि ॥२७॥ अज्ज न होसि फुडं तुममेरिसदुव्वयणमस्सुयं पुव्वि । सक्को निसुणिय रुट्ठो धिट्ठत्तणमहहमेयस्स ॥२८॥ इय चिंतिय अक्कोसइ तं तारिसमसरिसं पलवमाणं । रे अप्पत्थियपत्थय गओसि नणु अज्ज निल्लज्ज ॥२९॥ इइ भासिरो सुनिज्झयमग्गि व्व उदग्गजालमालिल्लं । चमरस्स हणणहेउं करेण कुलिसं मुयइ सक्को ॥३०॥ आगच्छतं वज्जं पिच्छिय भयभीयमाणसो चमरो । पच्छामुहो पलाणो अहोसिरो उड्ढपाउं य ॥३१॥ संभग्गमउडविडवो भीओ निग्गसियकंठवरहारो । नस्संतो सेयजलं वरसंतो कक्खभालेसुं ॥३२॥ भयवं जत्थत्थि पहू तत्थागंतूण सरणमल्लीणो । दोण्हं पायाण महंतरम्मि

कुंथु व्व स पविट्ठो ॥३३॥ चिंतइ सोहम्मिंदो सामत्थं कत्थ एरिसमिमस्स । जिणजिणनायगचेइयनिस्साए हियस्स चमरस्स ॥३४॥ न हु सप्पं पइ पसरइ नउलो नउलिं विणा इहिं जडियं । मुंजो न मेहुवायं विणा वहइ नणु संसारत्तं ॥३५॥ सव्वोऽवि एस महिमा हिमंसुतुल्लस्स वीरनाहस्स । जं मज्झुवरि समेओ उड्ढं सोहम्मकप्पम्मि ॥३६॥ तो ओहिणा जिणेसरमाभोइय अप्पयं स निंदेइ । अहह अकज्जमणज्जायारायरणं धुवं लग्गं ॥३७॥ साहम्मियसम्माणट्ठाणे तन्निग्गहो मए विहिओ । अरिहंतासायणया जाया मे मंदपुण्णस्स ॥३८॥ एवं चिंतित्तु मणे सक्को वज्जाणुमग्गमागम्म । लहु संहरिउं वज्जं चउरंगुलपहुमसंपत्तं ॥३९॥ निग्गच्छसु भो चमरा मुक्कोसि जिणेसवीरसरणेण । भयमत्थि ममाहिंतो न हु नणु तुह तुल्लधम्मस्स ॥४०॥ इय वुत्ते सक्केणं तत्तो निक्खलिय तस्स मिलिओ सो । दोवि सठाणं पत्ता वंदिय सिरिवीरजिणपाए ॥४१॥ चमरिंदत्तं पत्तं विफलं जायं खु हीणसत्तिस्स । अन्नाणकट्ठवसओ भमिही संसारमवि घोरं ॥४२॥ जइ पुण कट्ठेण विणाऽवि हुज्ज धम्मो जिणस्स तेण कओ । तो तक्कयकिरियाए साफल्लं नन्नहा किंचि ॥४३॥ एवं पूरणचरियं मुणित्तु अन्नाणकट्ठणुट्ठाणं । दूरेण वज्जियव्वं सन्नीहोयव्वमरिहपहे ॥४४॥ ॥ इति **पूरणाख्यानम्** ॥

अथाष्टमदव्युदासोपरि काव्यद्वयमाह—

**न जाइगव्वं हिययम्मि कुज्जा, कुलाभिमाणं पुण नो वहिज्जा ।**
**रूवं नवं इस्सरियं अउव्वं, लद्धुं सुबुद्धी न धरिज्ज गव्वं ॥६४॥**
**अहं खु लोए बलवं तवस्सी, सुयाहिओ वा अहयं जसंसी ।**

॥३९१॥

लाभेऽवि संते मुइओ न हुज्जा, तहप्पणो उक्करिसं न कुज्जा ॥६५॥

**व्याख्या**–नेति निषेधे जातिगर्वं मातृपक्षगर्वं हृदये कुर्वीत, कुलाभिमानं पितृपक्षाहङ्कारं पुनर्नो वहेत्, रूपं च नवं ऐश्वर्यं प्रभुत्वं अपूर्वं चकारोऽनुक्तोऽपि ज्ञेयोऽत्र लब्ध्वा संप्राप्य सुबुद्धिः सुधीः पुमान् नैव धरेत् गर्वं, एतस्मिन् गर्वे कृते परत्र भवे नीचैर्जातिर्नीचैःकुलकुरूपादिकं प्राप्नुयात् नरस्तस्माद्गर्वो हेयः नोपादेयः सतामिति काव्यार्थः। अथेतनमदानाह–अहं खु निश्चये लोके जगन्मध्ये बलवान् न मत्परः कश्चित्, अथवाऽहं तपस्वी तपोलब्धिमान् श्रुताधिको विद्वानहं वाऽथवाऽहकं यशस्वी कीर्त्तिमान्, अथ च सत्यपि राज्यसमृद्ध्यादिलाभे मुदितो हृष्टो न भवेत्, तथात्मनः स्वस्य उत्कर्षोऽपि न कार्यं इति काव्यार्थः॥

तत्र जातिमदोपरि विप्रकथानकमाह–

अत्रैव हस्तिनापुर्यामयातिङ्कोदयच्छिदि। **ब्रह्मदेवाह्वयो** विप्रः सोमदत्तात्मजोऽभवत् ॥१॥ शैशवादप्यसौ कुर्वन्नखर्वं जातिजं मदम्। वायतेऽनार्य आचार इत्यवार्यत गोत्रजैः ॥२॥ तथापि वाडवीयां स जातिमन्योत्तमां वदन्। अन्यदीयाङ्गसंस्पर्शमप्यपूतं हि मन्यते ॥३॥ प्रतिवेलं सचेलं स स्नानमस्नातभोजनः। समाचरँस्तृणप्रायं गणयत्यखिलं जनम् ॥४॥ अन्यदैतत्पितुर्मृत्या तत्पाविव्यातिरोषिणा। जनकस्यास्पदे चक्रे पुरोधा अन्य एव हि ॥५॥ ब्रह्मदेवोऽथ निर्द्रव्यीभूय भूपापमानभाक्। व्यापाररहितैः पौरैर्निःशङ्कमुपहस्यते ॥६॥ ततः स चिन्तयामास विश्वाविश्वासवासितः। तत्र कुत्रापि यातास्मि यत्र नाशुद्ध ईक्ष्यते ॥७॥ न भ्राम्यति क्वचिन्मार्गे छुप्तिव्याभिसुशङ्कितः।

निर्जगाम ततोऽटव्यामटत्येकाकिकाश्रितः ॥८॥ अविदन्मार्गमन्येद्युर्डुम्बपल्यामुपेयिवान् । भ्रान्तस्तत्रैव तानेव पश्यति
स्मयदूषितः ॥९॥ विरला विरला भो भो केनदानस्म्यहं द्विजः । एवमप्युच्चरन्तं तं स्पृष्टवानन्त्यजो जवात् ॥१०॥
शशाप क्रुद्धधीरेतं निन्दन् कटुकया गिरा । सुष्ठु रुष्टः स दुष्टात्मा जघानोल्लास्य शस्त्रिकाम् ॥११॥ मृत्वोत्पेदेऽथ तस्या-
ङ्गजत्वेनैव दुराशयः । दमनेत्याख्यया जज्ञे काणः कुब्जश्च खञ्जकः ॥१२॥ उद्वेजकस्तरां मातृपित्रोरपि स वामनः । प्रव-
॥३९३॥ र्धमानः पापर्द्धिप्रभृतिक्रूरकर्मकृत् ॥१३॥ भूयांस्येनांसि निर्माय मायावान्मृत्युमासदत् । प्रथमश्वभ्रसंवासी समजन्येव नारकः
॥१४॥ ततो मत्स्यभवं प्राप्य पुनर्नैरयिकोऽभवत् । भ्रान्त्वा भूरिभवान् प्रायः श्वभ्रेषु पुनरप्यगात् ॥१५॥ हीनजातिषु
सर्वासु समुत्पद्य सुदुर्मनाः । महादुःखान्यसह्यानि सेहे देहेऽतिपातकैः ॥१६॥ कृत्वा बालतपः कष्टमभूज्ज्योतिष्क-
निर्जरः । ततोऽत्र भरते पद्मखेटाख्ये प्रकटे पुरे ॥१७॥ कुन्ददन्ताख्यपण्यस्त्रीसूनुर्मदन इत्यभूत् । सुरूपः सकलः
सौम्यः सुभगः शास्त्रवित्तथा ॥१८॥ परोपकारकृद्गम्भीरस्तथापि जनोऽवदत् । किमेष गणिकापुत्रः कीर्त्यते ह्यतिरूप-
भाक् ॥१९॥ दुग्धान्तः पतितो मद्यबिन्दुर्भवति दूषकः । यादृशं रूपमेतस्य गुणवत्ता च यादृशी ॥२०॥ तादृग्विधा
यदा जातिस्तदा स्वर्णं हि रत्नयुक् । गुणैरस्थानसंस्थैः किं क्रियते गतगौरवैः ॥२१॥ चम्पकस्रगमेध्यस्था मेध्याऽपि न ॥३९३॥
शिरश्चटेत् । इत्याद्याकर्णयन्कर्णपुटाभ्यां कालकूटवत् ॥२२॥ विषण्णश्चिन्तयामास धिग्मे जन्माधमाधमम् । तावत्केवलिनं
मत्वाऽऽसन्नोपवनगं मुदा ॥२३॥ गत्वा नत्वा पपौ तस्य देशनामृतमद्भुतम् । दुर्लभं नृभवं लब्ध्वा सुकृतं येन
जन्तुना ॥२४॥ न कृतं किं कृतं तेन धराभारानुकारिणा । अवकेशिमुमेनेव निरर्थेनावतारिणा ॥२५॥ तद्देशना-

सुधास्वादादानन्दाभ्युदयाधिकः। नत्वा ज्ञानिनमप्राक्षीत्स निजाधमजन्मताम् ॥२६॥ धिग्जन्मजन्मारभ्याख्याद्यथावृत्तमन्वभूत्। गणिकात्मजपर्यन्तं केवलज्ञानवान् मुनिः ॥२७॥ उद्भूताभङ्गवैराग्यभावनाभावितात्मना। ययाचे भगवत्पार्श्वे प्रव्रज्यां मोक्षसाधिनीम् ॥२८॥ दीक्षणानर्हदुर्जातिरपि पापपराङ्मुखः। एष आराधको भावीत्यव्रतेत्यारोपितो व्रतम् ॥२९॥ सम्यगाराध्य चारित्रं बहुकालमकल्मषः। पादपोपगमं भेजेऽनशनं स्वायुषः क्षये ॥३०॥ स्वर्गे स्वर्गित्वमाप्तोऽसौ तुर्ये माहेन्द्रनामनि। विदेहे नृभवं प्राप्य सिद्धिसौधमवाप्स्यति ॥३१॥ जाइमएणिकेण वि पत्तो डुंबत्तणं दियवरो वि। सव्वमएहिं कहं पुण होहिंति न सव्वगुणहीणा ॥३२॥ ॥ इति जातिमदे विप्रकथानकम् ॥

अथ कुलमदे **श्रीवीरदृष्टान्तः**

**श्रीआदिनाथः** प्रथमो जिनेन्द्रस्तस्थावयोध्याबहिरानतेन्द्रः। जगाम चक्री **भरतः** प्रकामं, तमुद्यतो नन्तुमिलाललामम् ॥१॥ जीवो मरुद्दैत्यनृणां स नत्वा, प्राक्षीत्सभायां तु विना जिन त्वां। कोऽप्यस्ति किं भावुकतीर्थनेताऽवसर्पिणीभूरपरः प्रचेताः ॥२॥ ऊचे प्रभुस्ते तनयोऽस्ति पारिव्राज्यं दधानोऽयमहो त्रिसारि। भावी **मरीचिर्भरते त्रिपृष्ठः**, पूर्वो हरिर्वैरिदवाम्बुवृष्टिः ॥३॥ विदेहमूकाभिधपुर्यचक्री, कृतस्वदृष्टिः **प्रियमित्रचक्री**। भावी ततः प्राप्तभवाब्धितीरः, सोऽयं **चतुर्विंशजिनोऽपि वीरः** ॥४॥ श्रुत्वेति चक्री भरतोऽपि जात्वाख्याति स्म तस्यान्तिक एष यात्वा। चक्र्यर्धचक्रित्वमिदं न मन्देहितां परिव्राजकतां च वन्दे ॥५॥ किं तूदितं त्वं भवितेति वेन्त्रा, प्रीतं वचोऽन्त्यो भगवान् स्वपित्रा। आर्हन्त्यमेतत्त्रिजगत्सु वन्द्यं, वन्दे ततस्त्वामधुनाऽप्यनिन्द्यम् ॥६॥ प्रदक्षिणीकृत्य तदा त्रिवारं, तकं नमस्कृत्य

सभक्तिभारम् । सद्रूपशोभाजितनव्यकामश्चक्र्यादिमः स्वं स जगाम धाम ॥७॥ एतद्वचःसंश्रवणान्मरीचिः, समुच्छलन् वा मस्ताऽब्धिवीचिः । चित्तोर्मिलं मंक्षु स वावहीति, त्रिबाहुमास्फाल्य स वावदीति ॥८॥ भाव्यस्म्यहं भाग्यवशादिहैव, प्रान्त्यो जिनश्चक्र्यपि वासुदेवः । कुलं ममैवोत्तममद्य सारं, स प्राप तन्नीचकुलावतारम् ॥९॥ ॥इति कुलमदे श्रीवीरदृष्टान्तः ॥

॥३९५॥ अथ रूपमदो यथा **सनत्कुमारचक्रिणा** चक्रे तथाऽन्यैर्न कार्यः, सनत्कुमारदृष्टान्तस्तु पूर्वं दर्शितोऽस्ति, ततोऽधुना नाविर्भाव्यते । अथ बलमदोपरि **वसुभूतिदृष्टान्तः** सूच्यते–

नयरम्मि य रायगिहे संजाओ **विस्सनंदि** नाम निवो । पत्ती तस्स पियंगू **विसाहनंदी** सुओ जाओ ॥१॥ धारिणिनामेण पिया जुवराओ **विसाहभूइ** अणुजस्स । तस्सासि **विस्सभूई** मरीइजीवो वरंगरुहो ॥२॥ अह विस्सभूइ तरुणो पुप्फकरंडगवणम्मि सकलत्तो । विलसइ सुरकुमरो इव नाणासुहसंपइसमग्गो ॥३॥ अह सो विसाहनंदी दासीवयणा मुणित्तु भोगसुहं । तप्पत्तीलोहवसा कवडं चित्ते चरित्तु फुडं ॥४॥ बहु उद्दविओ देसो भो भो चरडेण पुरिससीहेण । तज्जयहेउं जामो पयाणभेरिं दवावेइ ॥५॥ तं सुणिय विस्सभूई सरलो वारित्तु तं सयं चलिओ । ॥३९५॥
ताव पविट्ठो सहसा विसाहनंदी तदवरोधे ॥६॥ जित्ता स पुरिससीहं वलिओ जा जाइ पुप्फवणमज्झे । ता रक्खगेहिं वुत्तं विसाहनंदी इहिं अत्थि ॥७॥ तो विस्सभूइ चिंतइ मायाइ अहं वणाउ किद्ध बहिं । अह किं करेमि एयस्स मज्झ कंतासु लुद्धस्स ॥८॥ इय कुद्धेण कविट्ठं मुट्ठीए आहणित्तु भूमीए । पाडिय फलाण रासिं एवं तस्से-

वगा भणिया ॥९॥ भो भो तुम्ह सिराइं इत्थं पाडेमि भूमिवलयम्मि । जइ मह न हुज्ज भत्ती पत्तिज्जविसाहनंदिम्मि ॥१०॥ तो वेरग्गोवगओ भोगेहिं इमेहिं मज्झ पज्जत्तं । इइ भणिउं पव्वज्जं गिण्हइ संभूइमुणिपासे ॥११॥ जह विस्सभूइणा नियभुयदंडबलस्स निम्मिओ माणो । न तहा कायव्वो खलु साहसमंतेहिं पुरिसेहिं ॥१२॥ इति **बलमदद्दष्टान्तः** ॥

अथ श्रुतमदोपरि **दृष्टान्तः** कथ्यते—**सायरचंदेण जहा** नवरसवक्खाणकरणलद्धीए । गव्वियमणेण **कालिगसूरिपुरो** इइ समुल्लवियं ॥१॥ भो वुड्ढ मए केरिसमज्ज कयं भणसु निउण वक्खाणं । किमवि तुमं पि य निसुणसु तो वुत्तं कहसु मह धम्मं ॥२॥ वाएण निज्जिओ तो कालिगसूरीहिं सागरिंदुमुणी । तो लग्गो पाएसुं खामेई दुव्विणीयत्तं ॥३॥ जह विज्जाए गव्वो सागरचंदेण निम्मिओ तह नो । कायव्वो सुयगव्वो सुट्ठु वि विज्जाबलधराविं ॥४॥

॥ इति **श्रुतमददृष्टान्तः** ॥

अथ तपोमदो यथा **द्रौपदीजीवेन–सुकुमालिकाभवे** श्रमणीत्वं प्राप्य कृतस्तथाऽन्यैर्न विधातव्यः, (दृष्टान्तः) सविस्तरः स्वयमभ्यूह्यः । लाभमदो यथाऽऽ**षाढभूतिना** कृतस्तथा परैर्न कार्यः । ऐश्वर्यमदो यथा **रावणेन** सीतापहारविधौ कृतस्तथाऽन्यैर्नाधेयः । अन्येऽपि दृष्टान्ता अत्राधिकारे स्वयमवतार्याः ॥ (अयमत्र सङ्ग्रहः) श्रीवीरः कुलमानतो बलभराद्दुर्योधनो जातितो, मेतार्यः शकडालसूः श्रुतमदादैश्वर्यतो रावणः । रूपात्तुर्यकचक्रभृद्द्रुपदजा देवी तपोगर्विता, लब्ध्याषाढमुनिर्विडम्बित इमे त्याज्यास्ततोऽष्टौ मदाः ॥१॥

**वालग्गमित्तोऽवि न सो पएसो, जत्थोयइण्णो भुवणम्मि एसो ।**
**जीवो समावज्जियपावलेसो, न पाविओ कत्थ य सुक्खलेसो ॥६६॥**

**व्याख्या**–वालाग्रमात्रोऽपि न हि स प्रदेशोऽस्ति यत्रावतीर्णो नैष जीवश्चतुर्दशरज्ज्वात्मके जीवलोके, किंभूतो जीवः? सं सम्यगावर्जिता पापलेश्याः षड्विधा येन स तथाभूतः, परं कुत्रापि न प्राप्तः सुखलेशः जीवस्य तत्स्थानं नास्ति यत्र नोत्पन्नः । यदुक्तम्–

"न सा जाइ न सा जोणी, न तं ठाणं न तं कुलं । न जाया न मुआ जत्थ, सव्वे जीवा अणंतसो ॥१॥ लोए असंखजोयणमाणे पइजोयणंगुला संखा । पइ तं असंख अंसा पइअंसमसंखया गोला ॥१॥ गोला असंखनिगोओ सोऽणंतजिओ जियं पइ पएसो । अस्संख पइपएसं कम्माणं वग्गणाऽणंता ॥२॥ पइवग्गणं अणंता अणू य पइअणु अणंतपज्जाया । एयं लोगसरूवं भाविज्ज तह त्ति जिणवुत्तं ॥३॥ तथा लेश्यास्वरूपमिदम्–

**मूलं १ साह २ पसाहा ३ गुच्छ ४ फले ५ भूमिपडिय ६ भक्खणया । सव्वं १ माणस २ पुरिसे ३ साउह ४ जुज्झंत ५ धणहरणं ६ ॥१॥** इति लेश्यादृष्टान्ता ज्ञेयाः इति काव्यार्थः ॥ अथ मानुष्यभवदुर्लभत्वमाह–



**सुदुल्लहं पाविय माणुसत्तं, कुलं पवित्तं तह अज्जखित्तं ।**
**तत्तं सुणित्ता सुगुरूहि वुत्तं, तुज्झं पमायायरणं न जुत्तं ॥६७॥**

**व्याख्या**–सुदुर्लभं प्राप्य मानुषत्वं नरजन्म, ततोऽपि दुर्लभं कुलं पवित्रं उत्तमकुलजन्म, ततोऽप्यार्यक्षेत्रमासाद्य

तत्त्वं श्रुत्वा समाकर्ण्य सुगुरुभिर्गुरुजनैरुक्तं आचार्योपाध्यायसर्वसाधुभिर्निगदितं धर्मस्वरूपं रे जीव तव प्रमादाचरणं कर्तुं नैव युक्तं यद्वस्तु दुर्लभं लभ्यते तद्यत्नेन धार्यते तदैव शोभनं, नात्रार्थे प्रमादः कार्यः इति काव्यार्थः ॥

अत्रार्थे दश दृष्टान्तानाह सानुप्रासकाव्यबन्धेन—

अस्तीह काम्पील्यपुरस्य नाथः, श्रीब्रह्मनामा कृतवैरिमाथः । तस्यास्ति भार्या चुलनी तनूजः, श्रीब्रह्मदत्तोऽजनि लब्धपूजः ॥१॥ विवर्तमानेऽथ कुमारतायां, पुत्रे पिता प्राप मृतिं निशायाम् । चुलन्यथो दीर्घनृपे सरागा, संजातवत्युन्मदचित्तनागा ॥२॥ नष्टः कुमारो वरधन्वतुल्यस्निग्धोपयुक्तः पटुशक्तिकल्पः । क्ष्मामण्डले पर्यटनं विधत्ते, रूपेण नेत्रेषु मुदं प्रदत्ते ॥३॥ नानाविधापत्सहितास्त्ववस्थास्त्वयं स्वयं धीरमनाः समस्थात् । अस्यैकदैकाकितया ह्यटव्यां, यातोऽमिलत्कार्पटिकः पदव्याम् ॥४॥ स जातवानापदि यत्सहायः, श्रीब्रह्मदत्तस्य कियत्सुखाय । तत्सर्वथा मे परमोपकारप्रायोग्य एवेत्यविदत् कुमारः ॥५॥ यतः--दधात्वसौ द्वौ पुरुषौ धरित्री, द्वाभ्यामथाभ्यां च धृता धरित्री । स्याद्यस्य बुद्धिः परमोपकारे, न हन्ति यश्चोपकृतं विकारे ॥६॥ ऊचेऽथ तं राज्यधुरानिविष्टं, मा ब्रह्मदत्तं हि निशम्य रिष्टम् । मदीयपार्श्वे त्वयका समागन्तव्यं समाधाय मनः सरागम् ॥७॥ श्रीब्रह्मदत्तः कियताऽपि कालेनाभूदयं भूप इलान्तराले । वर्षाण्यभूत् द्वादश तस्य राज्याभिषेकभङ्गी रचिता नृराज्या ॥८॥ श्रुत्वेति विप्रज्ञातिरतीव लोभी, समाययौ सोऽधिकदौःस्थ्यशोभी । नालापमात्रं लभते नृपाग्रे, स्थानं पयःपूर इवाचलाग्रे ॥९॥ तदाऽमुनाऽसौ विहितोऽस्त्युपायः, कूपानहीं माल्यतरं विधाय । ध्वजावहैः साकमसौ चचाल, प्रेक्ष्येति पप्रच्छ नरान्नृपालः ॥१०॥ कस्य ध्वज-

स्तैर्गदितं न विद्मः, आकारितः ७ ग्लपितास्पत्र्यः । आगतोऽवतीर्य द्विपतोऽवगूढः, सस्नेहमीशेन तदातिमूढः ॥११॥ जातः सखा मेऽत्र सुखासुखावस्थितादसौ यत्सरलस्वभावः । पुनः प्रवृत्तिं कुशलस्य पृष्टः, कृषीवलेनेव घनोऽत्र वृष्टः ॥१२॥ उक्तश्च राज्ञाऽर्थय वाञ्छितानि, श्रुत्वेति हृष्टः शुभभाषितानि । भार्यामपृच्छद्गृहमेत्य वर्णज्येष्ठः स इत्थं सहसा-धमर्णः ॥१३॥ ममोपरिष्टात् क्षितिपस्तुतोष, प्रियेऽर्थ्यते किं समयार्थकोषः । तया विचिन्त्येत्यसकौ महर्द्धिश्रितो न मामर्चयिताऽमितर्द्धिः ॥१४॥ उक्तोऽखिलेऽस्मिन् भरतान्तराले, त्वं भोज्यमभ्यर्थय रे विशाले । दीनारयुग्मं त्वथ दक्षिणायां श्रुत्वेति सोऽगान्नृपतेः सभायाम् ॥१५॥ तत्रार्थयामास नृपादथेति, तथा कुरु त्वं मम भोज्यमेति । पूर्वं यथा ते सदने ततस्तु, त्वत्पट्टराज्ञ्यादिगृहे तदस्तु ॥१६॥ द्वात्रिंशदुर्वीशसहस्रसद्मस्वथ प्रतीभ्यं प्रतिमन्त्रिसद्म । प्रत्य-न्त्यलोकं प्रतिसन्निवेशं, प्रतिप्रधानं प्रतिसर्वदेशम् ॥१७॥ तेषु प्रपूर्णेष्वथ युष्मदोकस्यहं बुभुक्षुः क्षितिपास्म्यशोकः । विहस्य राजाह विडम्बनायाः, कोऽसावुपायो रचितोऽधमायाः ॥१८॥ किं तुच्छया याचनयाऽनया ते कुर्वर्थनां देशग-जाश्वजाते । द्विपाधिरूढः प्रगुणातपत्रच्छायास्थितः संचर नित्यमत्र ॥१९॥ स प्राह मेऽनेन परिग्रहेण, प्रभो कृतं दर्शि-तनिग्रहेण । मन्मानसे स्यादियतैव तोषः, शीतोऽपि हृष्यै न हि प्रदोषः ॥२०॥ यतः—यो यावतोऽर्थस्य हि भाजनं स्यात्तावद्धनं तस्य करस्थितं स्यात् । द्रोणेऽम्बुनो नीरधरेण वृष्टे, तिष्ठत्यहो नाम्बुलवोऽद्रिपृष्ठे ॥२१॥ ध्यात्वेति वाक्यं प्रतिपन्नमस्य, क्ष्मापेन चानेन मुदोपविश्य । भुक्तं नृपस्य प्रथमेऽह्न्यगारे, ततः क्रमात्तत्प्रकृतेरगारे ॥२२॥ भोज्यं स दीनारयुगं जनेभ्यः, स तत्र लाति स्म पुरे धनेभ्यः । बह्व्योऽत्र पुंसां कुलकोट्य आसँस्तदन्तमप्याप न सप्रयासम्

॥३९९॥

॥२३॥ देवप्रभावाद्भरतस्य पारं, लब्ध्वा नृपाहारमुपैति सारम् । कदाप्यसौ चेन्न पुनर्नरत्वं, संप्राप्यते भ्रष्टमिदं हि तत्त्वम् ॥२४॥ इति **भोजनोपरि कथा** ॥१॥

भूवर्णिनीकर्णसुवर्णकुण्डलं, विख्यातमास्ते ननु गोल्लमण्डलम् । ग्रामस्तदन्तश्चणको विभाति, श्राद्धोऽस्ति तस्मिँश्चणको द्विजातिः ॥१॥ तस्यैकदा केऽपि गृहेऽनगाराः, स्वैरं स्थिताः सूक्ष्ममहाविहाराः । कदाऽप्यभूदस्य सुतः सदाढः, स पातितः साधुपदोः श्रिताढः ॥२॥ प्रोचे मुनीन्द्रैर्भवितैष सम्राट्, प्रावृट्क्षणे वाऽभ्युदितोऽत्र नभ्राट् । ध्यात्वेति मा दुर्गतिमेष गन्ता, घृष्टास्तदानीं जनकेन दन्ताः ॥३॥ उक्तं गुरूणामथ तैर्न्यवेदि, भाव्येष विम्बान्तरितस्तदेति । जग्राह बाल्यापगमेऽथ विद्याश्चतुर्दशाप्येष सगद्यपद्याः ॥४॥ स बालकालेऽपि समाददीत, श्रद्धासुधर्मं कलयोपवीतः । लावण्यशोभावहमाप यौवनं, यथा प्रसूनोपचयं मधौ वनम् ॥५॥ चतुष्टयं वेदगतं षडङ्गी, मीमांसनं कर्कशतर्कभङ्गी । श्रीधर्मशास्त्रं च पुराणविद्या, चतुर्दशैताः प्रभवन्ति विद्याः ॥६॥ ज्योतिस्तथा व्याकरणं च कल्पश्छन्दश्च शिक्षा समयोऽप्यनल्पः । निरुक्तयोऽङ्गानि षडप्यमूनि, प्रोक्तानि शास्त्रेषु बुधैः पटूनि ॥७॥ पित्राऽस्य पाणिग्रहणं व्यधायि, द्विजन्मपुत्री किल पर्यणायि । भ्रातुर्विवाहावसरे स्वमातुः, सा प्राप्तवत्यावसथेऽन्यदा तु ॥८॥ लक्ष्मीवतां सद्मसु तद्भगिन्यः, संजातवत्यः किल सन्ति जन्यः । नानाविधालङ्कृतिदीप्तिमत्यस्तत्राययुस्ता अपि रूपवत्यः ॥९॥ समं समस्तः स्वजनोऽपि ताभिर्जंजप्यतेऽप्यादरतोऽखिलाभिः । एकाकिनी साऽप्यवगण्यमानाऽनलङ्कृता तिष्ठति दूयमाना ॥१०॥ पुंसः प्रसङ्गोऽतितरं जिघांसोः शून्यप्रदेशस्य च भूरिपांशोः । कृता न गोष्ठी परमत्र निर्धनैः, संपद्यतेऽभीष्टविधायिनी जनैः ॥११॥ स्वपत्न्यपि क्षीण-

धनं पुमांसं, त्यजेत्पराभूतिमुपेयिवांसम् । विधोरपूर्णस्य किमत्र चोद्यं, वपुः समस्तं स्पृशतीव योषा ।।१२।। एवं वचो-
ऽनुस्मरता समेन, स्फुटापमानं स्वजनव्रजेन । सा प्रापिता दौःस्थ्यमवेत्य पत्युर्यज्जीवतोऽप्यस्ति नरस्य मृत्युः ।।१३।।
शेषास्तु तत्सूनुसुताम्बरश्रिया, शृङ्गारिताः प्राप्तमहत्त्वसंश्रयाः । तिष्ठन्त्यशेषा गृहदेवतासमाः, सुखेन लब्धाधिकदीप्ति-
।८०१।। सङ्गमाः ।।१४।। यदेकमातृत्वपितृत्ववत्यहं, पराभवं प्राप्नवतीत्थमन्वहम् । नैकं धनं तत्त्रविमुच्य वल्लभः, कोऽप्यस्ति
कस्यापि महीतटे शुभः ।।१५।। दानोज्झितः स प्रिय एव दृश्यते, यः संपदा स्वीयगृहे विशिष्यते । सुवर्णशैलं परितो
ह्यटाट्यते, शूरः परं तेन न किञ्चिदाप्यते ।।१६।। दास्यं धनस्यैव च चर्करीति, पुमान् पुमांसं न तु नंनमीति । धनं धनं
यो भुवि वावहीति, लोकोऽनु तं वर्त्मनि बंभ्रमीति ।।१७।। ध्यात्वेति साऽगात्स्वगृहेऽथ त्राणाव्ययेनापि पृष्टा स्वयम-
ब्रुवाणा । पुनः पुना रोदिति निःसमाग्रहे, कृतेऽवदद्धूर्तपुरः शुभावहे ।।१८।। तर्केण च व्याकरणे न किं स्याज्ज्योतिः-
पुराणैः प्रगुणैश्च किं स्यात् । तेषां कवित्वैरपि यन्त्रमन्त्रैर्यैरर्जिता नो कमला स्वतन्त्रैः ।।१९।। संपद्यते नाम नृणामसह्यः,
पराभवः स्त्रीविषयः प्रसह्य । धनेच्छुरेक्ष्यार्त्तिमतीं स्वजायां, बंभ्रम्यते स्मैष ततः क्षमायाम् ।।२०।। नन्दस्तदा पाटलि- ।।८०१।।
पुत्रगः क्षणाद्दाति द्विजेभ्योऽभिनवाः स्वदक्षिणाः । स जग्मिवाँस्तत्र पुरातनानां, नन्दक्षितीशां च तदाऽखिलानाम् ।।२१।।
संस्थापितानि क्रमतो हि सन्ति, प्रौढानि पीठानि रुचा लसन्ति । कुहूतिथौ कार्त्तिकमासजायां, नन्दाभिधानस्य विभोः
सभायाम् ।।२२।। अस्त्यासनं यत्प्रथमं निवेशितं, तत्रोपलग्नं स तदा यथेप्सितम् । लब्ध्वा समासीन उवाच कोऽपि,
वचस्तदा सिद्धसुतोऽविगोपि ।।२३।। तत्रैत्य नन्देन समं तवान्वयच्छायां समाक्रम्य समां बलालयः । यच्छ्रोत्रियोऽस्त्येष

इहोपविष्टस्ततश्च दास्या जगदे स धृष्टः ॥२४॥ तिष्ठान्यपीठे भगवन्निगद्यायमेवमेवास्त्विति हृत्कुविद्याः । प्रकाशयन्नासनके द्वितीये, स्वकुण्डिकां स्थापितवांस्तृतीये ॥२५॥ दण्डं चतुर्थेऽपि च जाप्यमालां, स्वयज्ञसूत्रस्य लतामबालाम् । तदग्र्य इत्याक्रमणेन धृष्टः, कृत्वेति पादौ स निगृह्य घृष्टः ॥२६॥ उत्क्षेप एव प्रथमो मदीययोः, पदोः प्रवासाभिसृतौ नवीनयोः । कृत्वेत्यथाऽयं जनतासमक्षं, समुच्चचारेति वचो भविष्यम् ॥२७॥ पुत्रैर्मित्रैर्वृद्धशाखाविशेषं, कोशैर्भृत्यैर्बद्धमूलं सुरेषम् । उत्पाट्यैनं नन्दमत्र क्षिपामि, स्थूलं वृक्षं वायुवन्मोदयामि ॥२८॥ राड्बीजसंभूतमथैष एकं, सत्केकिनं प्रावृषि वा सकेकम् । प्रेक्षिष्ट निर्गत्य पुरादपत्यं, स्मरन् स्वबिम्बान्तरिताधिपत्यम् ॥२९॥ श्रीनन्दभूपस्य मयूरपोषकग्रामे परिव्राजकवेषलोपकः । चाणाक्य एषोऽथ जगाम सर्वतः, परिभ्रमन् भूवलयं स्वगर्वतः ॥३०॥ ग्रामेऽथ तत्राधिपपुत्रिकायाः, शशाङ्कपानाय समुत्सुकायाः । न दोहदं पूरयितुं किलालं, कश्चिन्महिष्या इव सत्पलालम् ॥३१॥ अपूर्यमाणे निजदोहदे सा, संजातविच्छायमुखप्रदेशा । अजन्यथो जीवितकावशेषा, म्लानाङ्गिकेव प्रथमेन्दुलेखा ॥३२॥ परिभ्रमन् भैक्ष्यकृते परिव्राट्, पृष्टो जगादेति महामतिभ्राट् । दत्ताङ्गजं मह्यममुं विधास्ये, मनोरथं चन्द्ररसं च पास्ये ॥३३॥ इत्थं प्रपन्नेऽहनि पूर्णिमास्या, निर्मापितोऽनेन कृते किलास्याः । विस्तीर्ण एकः पटमण्डपोऽरं, मध्ये सरन्ध्रं परिबध्य दोरम् ॥३४॥ नीत्वार्ध्वरात्रेऽथ मिलद्धविष्यं, स्थालं प्रपूर्णं पयसात्यलक्ष्यम् । सुप्तोत्थितां तत्क्षणतोऽविशेषां, तामाचचक्ष्यौ पुरतः परेषाम् ॥३५॥ ईक्षस्व हे पुत्रि पिबेममिन्दुं, स्वातौ शुभा शुक्तिरिवाम्बुबिन्दुम् । तयाऽऽत्ते रन्ध्रमथो कुतश्चिच्छनैः पिधत्ते स्म करेण कश्चित् ॥३६॥ अथापनीते सति दोहदेऽस्याः, क्रमेण जज्ञेऽङ्गरुहः सुकेश्याः।

सुतोऽपि नाम्नेत्यथ चन्द्रगुप्तश्चन्द्रस्य पानादजनिष्ट दम्भः ॥३७॥ राज्यानुसार्यप्रचरित्रलम्भः, सोऽहर्निशं वृद्धिमवाप
डिम्भः । चाणक्यविप्रोऽप्यधिकार्थकामः, क्षोणीतटं पर्यटतीव धामं ॥३८॥ प्रक्षिप्ट धातून् क्षितिभृद्दरीषु, स्मृत्वेति
सेवा किल सुन्दरीषु । संतोष आलस्यमदातुरत्वे, व्याघातदानाय नृणां महत्त्वे ॥३९॥ स चन्द्रगुप्तोऽन्यदिने कुमारः
||४०३|| क्रीडन् शिशुभ्यो ददस्त्युदारः । ग्रामादि विप्रेण तदीक्ष्य तेन, प्रोक्तं किमप्यर्पय मे जवेन ॥४०॥ बालोऽप्यभाणीद्गत-
भीरिमा गा, गृहाण रिक्तः स्वगृहाय मा गाः । आख्यद्द्विजः कोऽपि निहन्ति मा मा, भूर्वीरभोग्येत्यवदत्सुधामा ॥४१॥
ज्ञातं द्विजेनास्य वचोविलासः, कीदृक् शिशुत्वेऽपि शुभाधिवासः । श्रुत्वा परिव्राट् तनयं समायः, स तं स्वकीये हृदि
निश्चिकाय ॥४२॥ पार्श्वे शिशोरेत्य तदाह वत्स, त्वं भोः समागच्छ गुणैरतुच्छ । त्वां भूमिपालं रचयामि कुत्रेत्युभौ
प्रणष्टावुदिते ममत्वे ॥४३॥ अमीमिलत्सम्यगबद्धमूलः, कियाँस्तयोस्तत्र जनोऽनुकूलः । रुद्धं बलात्पाटलिपुत्रमाभ्यां,
तौ त्रासितौ नन्दबलैर्भुजाभ्याम् ॥४४॥ नन्दाश्ववाराननुधावमानान्, संवीक्ष्य विप्रेण जवात्समानान् । क्व चन्द्रगुप्तस्य
दलं लताया, दलं नलिन्याः सरसि स्थितायाः ॥४५॥ यथा न केनाप्यधिगम्यतेऽयं, निर्णेजकोऽभूत्स्वयमप्रमेयम् ।
वस्त्राणि च क्षालयितुं शिलायामन्यस्य लग्नो रजकस्य दायात् ॥४६॥ तं बालकं सैन्यमुपेयिवांसं, प्रदर्श्य निर्णाशित- ||४०३||
वान् समांसम् । एकेन सोऽथोरतुरङ्गगेन, पृष्टो जवान्नन्दविभोर्भटेन ॥४७॥ क्वास्तीति चन्द्रः शकुनं विचार्य,
प्रोचे स कासारजलेऽस्ति धार्यः । नष्टस्तु चाणाक्य इतस्तदादाच्चाणाक्यहस्ते स्वहयं समादात् ॥४८॥ पार्श्वे स्व-
खड्गं प्रविमुच्य योद्धा, स्वे मोचके प्रोज्झ्य पदोरबोद्धा । जलेऽविशद्यावदमारि चाणक्येनासिना तावदयात्पुराणान्

।।४९।। आरोपितस्तत्र हयेऽथ चन्द्रः, स्वयं च सद्यश्चलितः सनन्दः । नष्टावुभावप्ययने कियत्यप्यथो गते चन्द्रमवक् स सत्यः ।।५०।। यदा मया त्वं शुभलक्ष्य [illegible] तवान्तःकरणं मयि रक्तः । कीदृग्बभूवेति स आह चिन्तितं, मया यदार्यो हित एव संततम् ।।५१।। योग्योऽयमित्येव तदाधिगत्य, क्रमात्प्रयाति स्म स तं प्रणुत्य । ऊचे दिने स्वं तमसा गुहायां, संरक्ष्य भेजे महिमां निशायाम् ।।५२।। ज्ञात्वा क्षुधापीडितचन्द्रगुप्तं, संस्थापयित्वा बहिरेव गुप्तम् । नन्दस्य ना पश्यतु कोऽपि मेति, ग्रामे क्वचिद्यातुमना बिभेति ।।५३।। दृष्टो द्विजस्तत्क्षणमेव भुक्तः, कश्चिद्बहिर्निर्गत ईशभक्तः । विदार्य तस्योदरतः करम्भं, निष्कासयामास कृतार्तिलम्भम् ।।५४।। दध्नः करम्भेण तु कल्पवर्तं, चन्द्रस्य सोऽकारयदिष्टगर्तम् । ग्रामेऽन्यतः क्वापि गतावुभावप्येवं जहास द्विज ईड्यभावः ।।५५।। को ब्रह्महत्यां यदलंभविष्णुर्मद्विधातुं जगतीह जिष्णुः । किं चक्रमभ्येति न निष्कलङ्के, कृष्णत्वमात्मीयकुलेऽपि शङ्के ।।५६।। भिक्षाकृतेऽटन्निशि मार्गतान्तश्चाणाक्य आगात्स्थविरीगृहान्तः । स्थाले विशाले परिवेशितायां, तत्रार्भकाणामथ लेपिकायाम् ।।५७।। एकेन बालेन तदन्तराले, क्षिप्तः करः प्रोष्णतया कराले । दृष्ट्वा तमूचे स्थविरा रुदन्तं, चाणाक्यवन्मूर्खमवैम्यसन्तम् ।।५८।। पृष्टा सती साह तदा च तेन, साध्यानि पार्श्वाणि पुरैव येन । आसाद्य चाणाक्य उपायमिष्टं, ययौ हिमाद्रिं स ततोऽप्यदृष्टम् ।।५९।। तत्रास्ति यो पार्वतिको नृनाथस्तेनास्य मैत्री प्रबभूव चाथ । इत्याह तं सोऽवसरेऽथ नन्दं, प्रोन्मूलयिष्याम इमं सकन्दम् ।।६०।। राज्यं च भागद्वयतो विभज्यादास्याम एतस्य वयं धृतज्याः । कृत्वेत्यथो तेऽप्यनुनन्दनिर्गं चेलुर्महात्मान इवापवर्गम् ।।६१।। आभ्यन्तरग्रामपुरेषु शिष्टिं, स्वां स्थापयामासुरवाप्य

लुण्टिम् । चितं प्रपक्वप्रकटेष्टकाभिः, सालं दधानं परितः स्फुटाभिः ॥६२॥ एकत्र चैकं न पुरं पतत्याचीर्णे बलेऽप्युग्र-
चमूवितत्या । स्वयं परिव्राट् स ततः प्रविश्य, प्रैक्षिष्ट सर्वत्र गृहादितस्य ॥६३॥ माहात्म्यमेक्ष्येन्द्रकुमारिकाणां, सोऽमंस्त
निर्भङ्गमिदं नराणाम् । निर्नाशयामास समीपतस्तास्ततोऽतिमायाविदुरः समस्ताः ॥६४॥ पश्चात् पुरं तत्त्वरितं गृहीतं,
 रुद्धं ततो नन्दपुरं धनीतम् । बहिःस्थितान्तःस्थमहाभटानां, राटिः सदासीन्मिथ उत्कटानाम् ॥६५॥ तैलं क्वचित्
क्षिप्यत एव तप्तं, नृणां क्वचित्संग्रहणाय क्लृप्तम् । ही वावहीति स्म च यन्त्रवृन्दं, पार्श्वाहतं क्वापि कपाटतुन्दम् ॥६६॥
विकस्वरं ह्यस्त्यथ जायमानं, हृदस्ति लोकस्य च दूयमानम् । पेतुः सृजन्त्यो जनतानिमन्त्रणं, यद्वा यमस्येव च शक्तयः
क्षणम् ॥६७॥ प्रोत्तुङ्गभूभृच्छिखरोपमानि, पेतुः क्वचित्सालशिरांसि तानि । इवाहतानि क्षणिकानि पातैः, समं नराणां
हृदयैस्तदा तैः ॥६८॥ आकर्णमाकृष्टधनुर्नियुक्ता, नाराचराज्योऽप्यपतन् विविक्ताः । प्राणापहारं विदधत्य एतयोः,
सत्सैनिकानामुभयोश्च सैन्ययोः ॥६९॥ पदे पदे दृश्यत एव खण्डी, साले पतन्ती त्रिदशीव चण्डी । पट्टस्फुरन्मुद्गर-
भिन्दिपालैः, प्रावर्ततांजिस्त्वसिभिः करालैः ॥७०॥ इत्थं प्रयातेषु कतिष्वहस्सु, प्रास्तेषु नन्दध्वजिनीसहस्सु । दिशो
दिशं गामिषु सेवकेषु, भ्रष्टे सरोवारिणि वा बकेषु ॥७१॥ चिन्तामवाप्तेष्वधिकां नरेषु, क्षीणेषु धान्येषु धनोत्करेषु । 
नन्दः पुनर्मार्गयति स्म धर्मद्वारं तदैभिर्भणितं स्वमर्म ॥७२॥ एकेन शक्नोषि रथेन लातुं, यद्वाहि तत् त्वं सुखतः
प्रयातुम् । नन्दोऽपि लात्वा निरयाय रायं, कनीं च भार्याद्वितयीं विमायम् ॥७३॥ यान्ती कनी साऽथ पुनः पुनस्तं,
श्रीचन्द्रगुप्तं सुररूपशस्तम् । रागप्रयोगेण निरीक्षते स्म, स्वकं कृतार्थं हृदि मन्यते स्म ॥७४॥ अवक् तदा नन्दनृ-

पोऽपि याहि, प्रापापि सा चन्द्ररथं तदा हि । नवारकास्तत्क्षणमेव भग्नास्तस्यामितायां रथनाभिलग्नाः ॥७५॥ चन्द्रो-
ऽभवद्भग्नमनोऽनुरागस्तदा त्रिदण्डयाह हर्षस्तदागः । मा वारयैनां हि नृणां युगानि, स्याद्राज्यमेतन्नव तेऽप्यहानि ॥७६॥
प्रपद्य चैतन्नगरान्तरागतै, राज्यं द्विधा भक्तमिदं तदा च तैः । तत्रास्त्यथो या विषकन्यका सा, दत्तेशितुः शालभुवः
सुवासाः ॥७७॥ प्रज्वाल्य वह्निं च विरच्यमाने, तयोर्विवाहे धृतगीतमाने । हस्तेन हस्ते मिलिते विषेण, प्रपीडितः प्राह
नृपः सुषेणः ॥७८॥ मित्राधुना भो म्रियतेऽथ निघ्नश्चन्द्रश्चिकित्साविधयेऽजनिष्ट । तावत्त्रिदण्डी भृकुटिं दधा-
रोपर्यस्य राज्यस्थितिलोपकारो: ॥७९॥ अस्तीति नीतिर्व्यवसायवन्तं, सामर्थ्यतुल्यं धनसाम्यवन्तम् । यश्चार्धराज्याप-
हरं न भृत्यं, हन्यात्स तैर्हन्यत एव सत्यम् ॥८०॥ तूष्णीं दधौ चन्द्र इतो ममार, द्राक् पर्वतीयः क्षितिपोऽविचारः ।
चन्द्रोऽपि राज्यद्वितयं बभार, स्वल्पलक्ष्म्या कमनानुकारः ॥८१॥ पदातिहस्त्यश्वरथानुगम्यं, राज्यं द्विजेनापि यदा-
प्यनम्यम् । मित्रस्य माहात्म्यमिदं तनुघ्नं, छद्मापि तस्मिन् धिगहो कृतघ्नम् ॥८२॥ स्तेयेन जीवन्त्यथ नन्दमानवा,
नव्या जनोपप्लवनाय दानवाः । बहिः परिव्राडथ पश्यति स्वतस्तन्मूलनिर्नाशकमर्त्यमग्रतः ॥८३॥ असौ बहिःस्थं
नलदाममीक्षांश्चक्रे कुविन्दं कलयन् परीक्षाम् । मार्कोटकेन स्वसुते स दष्टे, क्रुद्धस्तदीयेऽथ बिले बलिष्ठे ॥८४॥ निखन्य
लोहेन पुरा हुताशं, पश्चात्तृणैर्ज्वालयति स्म साशम् । तन्मूलनिर्मूलनताभिरूपं, द्विजस्तमालोक्य रुषैकरूपम् ॥८५॥
स निश्चिनोति स्म न निग्रहप्रदश्चौरव्रजस्यान्य इतो वशंवदः । आकार्य सन्मानमवापितो घनां, नृपात् पुरारक्षकतां च
शोभनाम् ॥८६॥ विश्वास्य तेनापि कृतोपचारा, विषान्नभुक्त्या हृतलोकसाराः । व्यापादिता नन्दनराः परस्वं, कृतं पुरं

चौर्यनिषेधतः स्वम् ॥८७॥ आदिश्यते कार्पटिकस्य दैश्यं, ग्रामेऽमुना यत्र पुराऽपि भैक्ष्यम् । आज्ञां बिभित्सुः स
निजक्षमेशस्तल्लोकमित्थं द्विज आदिदेश ॥८८॥ वंशद्रुमाणां सहकारवृक्षैर्वृतिर्विधेया परितो मनुष्यैः । व्यचिन्ति तत्रैव-
महो न युज्यते, किं तु प्रमादः कथकस्य लक्ष्यते ॥८९॥ नेदृग् नृपादेश इहेति मत्वा, वंशद्रुमानेव ततश्च भित्त्वा ।
वृतिः कृताऽऽम्रेषु यथोचितत्वादात्मीयबुद्ध्यैव शुभं विदित्वा ॥९०॥ आज्ञानिषेधं प्रविकाश्य तेषु, द्वारेषु रोधं रचयन्
॥४०७॥ समेषु । ग्रामं दुरात्मा स सवृद्धबालं, प्रज्वालयामास तदा विशालम् ॥९१॥ आः क्रूरकर्मास्य कटु द्विजस्य, ग्रामस्य
गोविप्रवशाकुलस्य । दाहः स्वदेहे कुणधातुरक्ताम्बरस्थितिर्धिक्कुविचारमुक्ताम् ॥९२॥ स्वकोशवृद्ध्यर्थममा जनेन,
द्युतोद्यतेनाथ समानसेन । द्विजोऽभ्युपायं सहसाऽवधार्य, प्रधानलोकान्नगरे प्रतार्य ॥९३॥ निमन्त्र्य भोज्यं शुचि
भोजयित्वा, पश्चात्सुरां पाययति स्म विद्वान् । उत्थाय मत्तेष्वथ तेषु सत्सु, स्वयं स चक्रे नटनं स्वमिच्छुः ॥९४॥
प्रवृत्त उच्चैर्भुज एष गातुं, तच्चित्तभावं प्रकटं विधातुम् । मेधाचतुष्काङ्कितहृत्तथा च, स्वास्ये स्फुरद्गीतिमिमामुवाच ॥
॥९५॥ द्वे वाससी स्तो मम धातुरक्ते, दण्डत्रयी काञ्चनकुण्डयुक्ते । वदथो नृपो भो विकसत्कपोला, वार्द्धकशस्तेन ॥४०९॥
ममात्र होला ॥९६॥ एतद्वचो नागरिकोऽसहिष्णुः, कोऽप्यब्रवीद्द्रव्यभरोन्मदिष्णुः । तथैव गानं नटनं प्रकुर्वन्मुखे
ततोऽप्यभ्यधिकं हि चर्वन् ॥९७॥ शास्त्रे यदुक्तं व्यसनं श्रितस्य, क्रुद्धस्य मत्तस्य तथातुरस्य । रक्तस्य रागे मृतिमाग-
तस्य, स्याच्चित्तभावः प्रकटो नरस्य ॥९८॥ मत्तेभपोतस्य हि योजनायुतं, मुच्चे क्षितावुत्पतितस्य निश्चितम् । पदे पदे
लक्षमहो सलोला, वार्द्धकशस्तेन ममापि होला ॥९९॥ आहान्य उप्तस्य, तिलाढकस्य प्राप्तस्य निष्पत्तिमतीव तस्य ।

लक्षं दध्रे चानुतिलं सलोला, वाद्यैकशस्तेन ममापि होला ॥१००॥ अन्योऽवदत् प्रावृषि पूरितायाः, मया विधेया त्वरितापगायाः । एकाह्निकाज्यक्षणपाल्यलोला, वाद्यैकशस्तेन ममापि होला ॥१०१॥ अन्यस्तदा प्राह नवोक्तिलेशैरेकाह्निकानेककिशोरकेशैः । आच्छादयाम्यभ्रमहं सलोला, वाद्यैकशस्तेन ममापि होला ॥१०२॥ मुक्तांशुकस्यास्त्यनृणस्य कामिनी, सुगन्धदेहस्य ममानुगामिनी । प्रवासिनो नायुतिनः सलोला, वाद्यैकशस्तेन ममापि होला ॥१०३॥ रत्नद्वयं प्राह परः प्रणुन्नः, शालिस्तु मे रोहति भिन्नभिन्नः । गर्दभ्यपूर्वा जनकेलिदोला, वाद्यैकशस्तेन ममापि होला ॥१०४॥ ज्ञात्वेति तेभ्यश्चणकाङ्कजातः, स्तोकं धनं याचितवान् दयातः । दिनैकजातांस्तुरगानुपाददे, दिनैकजातं नवनीतमाददे ॥१०५॥ तैः शालिभिः पूरितवान् यथोचितं, कोशान् सृजद्भिः स्वकचित्तरोचितम् । पुनः पुनश्छेदनतः प्ररूढैः, प्रच्छन्नमिभ्यैश्चिरकालमूढैः ॥१०६॥ अस्मादुपायात् परतो द्विजातिना, स्वपाशकैर्यन्त्रमयैः समाधिना । हृतं विचक्रे धनिभिः प्रभूत्वात्स्थालं हि दीनारभरेण भृत्वा ॥१०७॥ आहेति मां यो जयतीह रे यदा, स्थालं स्वदीनारभृतं ददे तदा । पुनर्यदाऽहं भवतो जयामि, तदैकदीनारमिहाददामि ॥१०८॥ ईदृक्प्रयोगेण जनादुरीकृतं, घनं धनं स्तोकदिनैः समीहितम् । केऽप्याहुरित्थं किल देवदत्तास्ते पाशकास्तेन जिताः सवित्ताः ॥१०९॥ न तीर्यते केनचिदेष जेतुं, यथा द्विजोऽप्यत्र तथोपनेतुम् । शक्यते मर्त्यभवः प्रयातः, सुदुर्लभः पुण्यबलेन जातः ॥११०॥ इत्थं स चन्द्रक्षितिपो भदन्तश्चाणाक्यनाम्ना कृतराज्यचिन्तः । कालं सुखेनागमयत् कियन्तं, तृणव्रजं वायुरिवोच्छलन्तम् ॥१११॥ गुरूत्तमा निर्मितवृद्धवासाः, संभूतिमुख्या विजयाः प्रकाशाः । तत्र स्थिताः सन्त्यथ तैर्विनेयास्तीरेषु वार्धेः प्रहिता अमेयाः ॥११२॥

नवीनसंस्थापितसूरिकर्णे, निवेद्यमाने निशि मन्त्रवर्णे । पार्श्वाद्गुरोः शिष्ययुगेन शुश्रुवे, किञ्चित्तु दुर्भिक्षकृतेऽप्युपद्रवे
।।११३।। स्थानं यथोक्तं गुरुणा कियन्तः, शिष्या ययुः शिष्ययुगं तदन्तः । क्षणेन पश्चाद्दवले भविष्णुमाचार्यजं नो
विरहं सहिष्णु ।।११४।। स्वयं गुरुर्भ्राम्यति भैक्ष्यहेतवे, श्रद्धालुगेहेऽनलसः क्रियोद्भवे । लब्धं घनं राति मुदा स्वशि-
ष्ययोर्भुङ्क्तेऽवशिष्टं विरसं पुरस्तयोः ।।११५।। असारतुच्छाशनतः कृशो गुरुर्जज्ञे विडालस्य भयादिवोन्दुरुः । समीक्ष्य
४०१।। शिष्यद्वितयं विचिन्तयामासेति नो चारु कृतं यतो मया ।।११६।। क्लेशः समागत्य गुरोर्विनिर्मितः, स्वभुक्त्युपायः
क्रियते पुरोऽमुतः । व्यलोकयथादर्शनकृत्तदञ्जनं, तेनेष्टकाले सुधियेव स्वञ्जनः ।।११७।। शिष्यावनापृच्छ्य गुरुं सदञ्जनौ
श्रीचन्द्रगुप्तावसथे ततोऽतनौ । भोज्यक्षणे जग्मतुरेव सत्वरं, विलोकयामास न कोऽपि तौ परम् ।।११८।। लग्नौ च
भोक्तुं सह पार्थिवेन, सौहित्यमाप्तौ नृपभोजनेन । तावेवमेव प्रतिवासमस्तः, क्षमाभृत्कृशीयानभवद्विपक्षः ।।११९।।
चाणाक्यपृष्टो वदति स्म चार्यः, केनापि मे गृह्यत एव आर्य । न्यादः परं नैव मयावगम्यते, स स्वोदरे नीरस एव
भुज्यते ।।१२०।। वितर्कयामास ततो द्विजाती, रौद्रोऽस्ति दुष्काल इहेष्टघाती । स्थालस्थितः कोऽपि तदस्य भुंक्ते,
प्रच्छन्नतामञ्जनतः प्रयुङ्क्ते ।।१२१।। आहारशालाङ्गणके प्रकीर्णं, सूक्ष्मेष्टिकाचूर्णमथो अजीर्णम् । चाणाक्यदृष्टौ पतितौ ।।४०१।
च दुधियोर्जातौ पदौ तत्र तदोभयोस्तयोः ।।१२२।। यावन्नरः कोऽपि न पेतिवान् दृशि, द्वारे निरोधो रचितोऽरर-
स्पृशि । धूमस्तदाऽकारि च बाष्पवाहकस्तेनाजनिष्टाक्षिण भरत्प्रवाहकः ।।१२३।। तत्कालमुत्तीर्णदृगञ्जनौ तौ, दृष्टौ मणी
वाऽच्छजलेन धौतौ । स्वोपाश्रये व्रीतहृदाऽथ संप्रेषितावमात्येन ततोऽप्रकम्पे ।।१२४।। अहं त्वमूभ्यामपवित्रतामवापितो

नृभर्तेति शुशोच भामवान् । त्रिदण्डिना तावदवाचि धीभृता, ललाटपट्टे भ्रुकुटिं च बिभ्रता ॥१२५॥ कृतार्थजन्माद्य नृप त्वमाशिषे, विशुद्धवंशप्रभवस्तथा सखे । आबालकालं विधृतव्रताभ्यां, भुक्तं त्वया भाग्यवता यदाभ्याम् ॥१२६॥ गुरोरुपालम्भमुपेत्य संनिधौ स दत्तवानन्तिपदोः कृते विधौ । ऊचे तदानीं गुरुणा विमृश्य, त्वयि प्रवृत्ते जिनशासनस्य ॥१२७॥ प्रपालके भूरितरक्षुधातुरौ, मर्यादयेमौ रहितौ गुणाकरौ । शिष्याविभूतां स तवापराधः, सुश्रावकाग्र्यस्य न बुद्ध्यगाध ॥१२८॥ श्रुत्वेति पूज्यक्रमयोर्लगित्वा, चाणाक्य ऊचे विधिनाऽर्चयित्वा । क्षम्यं ममाकृत्यमतः-प्रभृत्यासे तीर्थचिन्ताकृदहं प्रकृत्या ॥१२९॥ चमत्कृतिश्चाथ कदापि हृद्यासीदस्य मन्त्रिप्रवरस्य हृद्या । सवैरिणश्चन्द्रधराधवस्य, मा कोऽपि दद्याद्विषमुग्रतस्य ॥१३०॥ लग्नस्ततो लक्षितमार्गवेदी, चन्द्रं विषैर्भावयितुं सभेदी । क्षुद्रप्रवृत्ता न पराभवन्ति, क्ष्वेडा यतोऽङ्गं भुवि किं स्रवन्ति ॥१३१॥ पार्श्वस्थितो भोजयति स्म पिच्छलं, स तस्य मन्त्री विविधं हलाहलम् । अथान्यदा मन्त्रिणि दूरगेऽस्ति, स्म गर्भभृद्राज्यमुना न वेत्ति ॥१३२॥ ग्रासाभिलाषं विपुलं वहन्त्या, अज्ञाततत्त्वो नृपतिर्लसन्त्याः । स्वस्थालतोऽस्याः कवलं ददिः स्वं, भजन्महाप्रीतिपरं किल स्वम् ॥१३३॥ विषान्नभुक्त्याऽधिकपारवश्यं, यावद्दधौ सा स्ववपुष्यवश्यम् । ज्ञात्वाऽऽशु चाणाक्य इयाय दध्यावस्या न युक्तं वमनं प्रसिद्ध्या ॥१३४॥ यतोऽस्त्यसौ गर्भवतीति कृत्वा, शस्त्रं सुतीक्ष्णं स्वकरे हि धृत्वा । विदार्य तस्या उदरं समुद्यतः, कार्येषु पूर्णं गरभं कलाभृतः ॥१३५॥ लात्वा कराभ्यां स्त आज्यपूरिते, चिक्षेप देहोपचयं क्रमादिते । तस्मिन्नकार्षीत्स तु बिन्दुसाराभिधानमुर्वीप्रथितं विचारात् ॥१३६॥ यद्गर्भसंस्थस्य शिरस्यमुष्य, प्रपेतिवान् बिन्दुरिहासदक्षः । रोमोद्गमस्तत्र

॥४१०॥

न जातु जातवान्, कालेन चन्द्रोऽपि मृतिं स यातवान् ।।१३७।। तदा नृपः सोऽजनि **बिन्दुसारः**, प्रोच्छिन्ननन्देश्वर-
मन्त्र्युदारः । **सुबन्धुनामा** छलमाकलय्य, प्राहैकदैकान्त इनं प्रसद्य ।।१३८।। प्रसादपात्रं न कदापि यद्यप्यहं तव क्षमाप-
गिराऽप्यगद्यः । किञ्चिद्धितं वच्मि तथापि तुभ्यं, प्रियङ्करं कर्णयुगस्य सभ्यम् ।।१३९।। त्रिदण्डिना त्वज्जननी निपा-
तिता, विदारयित्वा जठरं कलङ्किता । मित्रीकृतः सोऽपि किमत्र मान्यते, त्वया सपत्नादधिकः शुभाकृते ।।१४०।।
।४११। श्रुत्वेति रुष्टेन नृपेण धात्री, पृष्टा स्वकीया प्रमदप्रदात्री । तथैव सर्वं हि तयाऽप्यवावाचि, पक्वान्नमीषत्पुनरप्यपाचि
।।१४१।। चाणाक्य आगात्समये स हीनं, दृष्ट्वा भृकुटचाप ललामभीमम् । स्त्रीरागिसारिण्यधिपाश्नयन्ति, छेका यथा
तेऽपि तथा वलन्ति ।।१४२।। तस्मिंस्त्रिदण्डी विमुखे व्यचिन्तयत्क्ष्माभृद्विरोधीव किमद्य राति यत् । दृष्टिं ममोपर्यथ
जातभीतिः, सद्य स्वके वेश्मनि जङ्गमीति ।।१४३।। स्वपुत्रपौत्रस्वजनादिकेभ्यः, सर्वं च दत्त्वा गृहसारमेभ्यः । इत्थं
स्वयं मन्त्रयति स्म मेधया, केनापि मन्त्रमन्त्रिपदाश्रयेच्छया ।।१४४।। खलेन भूमिभृदयं प्रतारितः, कुर्वे तथा तर्हि मृतेन
मारितः । स स्याद्यथा जीवति चातिदुखितश्चिरं स्वदुष्कर्मफलोपलक्षितः ।।१४५।। ततः स्फुरद्गन्धमनोज्ञवासा युक्तिप्रयो-
गेण कृताः प्रयासात् । क्षिप्ताश्च नीत्वान्तरमी समुद्गकं, भुर्जे व्यलेखीति च तत्र दुःशकम् ।।१४६।। आघ्राय योऽमून् ।।४११।।
वरवासलक्ष्मयान्मनोहृषीकेष्वनुकूलतामयान् । भाव्युद्यतो ही विषयस्य सेवने, गन्ताऽस्ति सद्यः स यमालये जने ।।१४७।।
चीनांशुकालङ्कृतिराद्विलेपनाधितूलिकासौरभिपुष्पसेवनं । शृङ्गारणं मज्जनमङ्गपोषणं, कर्ता स गन्ता क्षयमाशुशोष-
णम् ।।१४८।। वासस्वरूपस्य निरूपणे पटुः, प्रक्षिप्य वासान्तरवाप्तधीर्बटुः । तद्भुर्जपत्रं तु समुद्गमापितं, मपञ्जूया मध्य-

गतं व्यधाच्च तम् ॥१४९॥ पेटाऽपि सा तेन हि कीलिकाभिर्बाढं जटित्वा स्वयसो घनाभिः । सद्द्वारयन्त्रेण नियन्त्र्य गर्भागारान्तरेऽमोचि सुगन्धगर्भा ॥१५०॥ द्वारे प्रदत्तः सुदृढः कपाटस्तत्कोटिमूल्यो रचितो वराटः । बन्धून्निजान् क्षामितवान्नियोज्य, श्रीजैनधर्मे वसु मुक्तभोज्यः ॥१५१॥ त्रिदण्डचरण्येऽस्ति स गोकुलास्पदे, गत्वेङ्गिनीमृत्युमुक्तदभ्रय-संपदे । ज्ञात्वा पुनस्तं परमार्थमतया, ध्यात्वा नृपोऽवाच्यहितं कृतं त्वया ॥१५२॥ पित्रा कृतस्ते यदसौ सगौरवस्त्वया कथं केसरिणेव कौरवः । अवापितो भूरिवं पराभवं, मन्मातृहन्तेत्यवदत्स लाघवम् ॥१५३॥ धात्र्याह माता यदि मारिता नो, स्यात्तेऽमुना धीरिमरत्नसानोः । तदाऽभविष्यत्तव संभवः कुतः, साम्बा स्वयं ते विषभोज्यसङ्गतः ॥१५४॥ पुरः पितुस्ते मृतिमाप भाविता, विषेण तस्याः क्षयमेक्ष्य धावता । विदारयित्वोदरमाश्वनेन भो, निष्कासितस्त्वं धृतजीवितः प्रभो ॥१५५॥ विनिर्गतस्याप्युदराद्बहिर्यकः, संलग्न आसीद्विषबिन्दुरुग्रकः । शीर्षे मषीवर्णमयो निगद्यसे, त्वं बिन्दुसारस्तदिहारितर्वसे ॥१५६॥ राजैतदाकर्ण्य विषण्णहृद्रसाढ्यया त्रिभूत्याथ समाश्रितोऽञ्जसा । चाणाक्यपार्श्वे गतवान्निरीक्षितः, स्थितोऽप्रसङ्गः स करीषमध्यतः ॥१५७॥ पुनः पुनः क्षामित आदरेण, व्रीडामवाप्तेन नरेश्वरेण । उक्तं समागच्छ च राज्यचिन्तनं, विधेहि सर्वं स उवाच भूधनम् ॥१५८॥ अहं गृहीतानशनश्च सङ्गत्यक्तः शुभध्यानधरान्तरङ्गः । सुबन्धुदुश्चेष्टितमाह नो परं, ज्ञात्वाऽप्यसौ भूपपुरस्तदोद्धुरम् ॥१५९॥ स्मृत्वा विपाके कटु चाप्रियंकरं, पैशून्यमेतद्गुरुदुःखमन्दिरम् । भालस्थलारोपितसत्करेण, सुबन्धुनोचे नृपतिः परेण । १६०॥ करोमि भक्तिं भवतामनुज्ञया, चाणाक्यनाम्नः स्वहितैकलिप्सया । दत्त्वा ह्यनुज्ञामगमत् क्षितीश्वरः, क्षुद्रः सुबन्धुः कलुषीव धीवरः

॥१६१॥ धूपं प्रदह्याक्षिपदन्तरङ्गारकं करीषस्य कुबुद्धिसंङ्गात् । नृपादिलोके प्रगते सखेदे, देहे करीषाग्निरमुं प्रपेदे
॥१६२॥ विशुद्धलेश्यो गिरिनिष्प्रकम्पः, सद्ध्यानतो नैव मनाक् चकम्प । स्वं निर्मिमीते स्म च पापगर्हणं, पुण्या-
नुमोदं प्रविनष्टदर्पणम् ॥१६३॥ दध्यौ ज्वलन् सन् प्रसरत्करीषजक्रूराग्निनाङ्गापघनेषु नीरजः । धन्यास्तके ये विल-
॥४१३॥ सन्ति निर्वृतौ, यत्कर्मबन्धस्य न कारणं क्षितौ ॥१६४॥ अस्मादृशः पापकृतो दुराशयाः, स्वकीयदेहस्य महासुखा-
शया । आरम्भभाजोऽमुमतामुपद्रवं, विधाय जीवन्ति मुधैव ये ध्रुवम् ॥१६५॥ मनस्यधन्यस्य जिनेन्द्रशासनप्रवर्तनं
भोगलतापिपासिनः । ममेदृशः कर्ममलीमसस्य, प्रौढालजालाभमभूजडस्य ॥१६६॥ ज्ञातोत्तमार्हद्वचनव्रजस्य, स्वामो-
हशल्याकुलितान्तरस्य । इहाभवन्मे परलोकदुःखदं, कीदृग्विरुद्धं चरितं हहोन्मदम् ॥१६७॥ दध्यौ सुबन्धाविति यः
प्रवर्तनं, चक्रेऽघशुद्ध्यै मम पुण्यखण्डनम् । कृत्वा निजं तस्य न चेत्क्षमामहं, कुर्वीं न मत् कोऽप्यधमस्तदान्वहम् ॥१६८॥
प्रेत्येह ये केऽपि हि जन्तुसञ्चया, दुःखीकृता जन्मनि दुर्धिया मया । क्षमन्तु मह्यं जगतीह ते क्षमाम्यप्येष्वहं चेतसि
संवहन् क्षमाः ॥१६८॥ पापाधिकृत्यावलिरर्दकेन, स्वराज्यकार्येषु मयोत्सुकेन । या मीलिता पापविशारदेन, त्यक्ता ॥४१३॥
त्रिधा साऽप्यधुना क्षणेन ॥१७०॥ यथा यथा क्रूरकरीषवह्निना, दंदह्यते स्मैष तनौ महामनाः । स्थूराणि कर्माणि
ययुस्तथा तथा, क्षयं दधीनीव घटान्तरे मथा ॥१७१॥ सद्भावनाभावितहृन्नमस्कृतिं, स्मरन् प्रकुर्वन्निजपापधिक्कृतिम् ।
प्राप्तः समाधिं समजायताशु, ध्यानस्थितः प्रीतिपरः परामुः ॥१७२॥ उत्पन्न उद्दामवपुर्महर्द्धिकः, स्वर्गे सुपर्वोज्ज्वल-
कीर्तिवर्धकः । सुबन्धुमन्त्र्यप्यथ तस्य मृत्युना, नन्दं प्रपन्नोऽग इवोत्तमर्तुना ॥१७३॥ नरेश्वराभ्यर्थितलोकविश्रुतत्रिद-

ण्डिगेहे स जगाम वेगतः । प्रेक्षिष्ट वासौकसि चैकमुद्धटं दृढं कपाटं स्फुटतालकीलकटम् ॥१७४॥ अस्तीह चाणाक्य-रमोत्करस्थिलिध्यत्विरेत्यय:पर्शुकृतारक्षितिः । निष्कास्य पेटां स तदन्तरालगान्, जिघ्राय वासान् धृतगन्धसौरभान् ॥१७५॥ ददर्श भूर्जे लिखितं च तत्फलं, बुबोध वासस्य गुणं ततः फलम् । जिघ्रापितो वासमनेन सेवकस्तत्प्रत्ययप्राप्तिकृते तदैकक: ॥१७६॥ समीरितः सद्विषयस्य सेवने, स श्राद्धदेवस्य ययौ निकेतने । सर्वेषु शेषेष्वपि शस्तवस्तुषु, प्राप्तोऽमुना प्रत्यय उत्कयुक्तिषु ॥१७७॥ हा हा मृतेनापि च मारितोऽस्म्यहं, तेनेति दुःखादितहृद्गतस्पृहम् । तस्थौ वराकः स यतीव सर्वदा, स्वजीवितायोज्झितभोगसम्पदा ॥१७८॥ ॥ इति समूलचाणाक्यदृष्टान्तः ॥२॥

गोधूमशालियवकोद्रवकङ्गुमाषा, व्रीहिः कुलत्थतुवरीतिलराजमाषाः । वल्लः शणत्रिपुटकेक्षुमसूरमुद्गा, रालातसी चणकचीनकराजमुद्गाः ॥१॥ धान्यं चतुःसहितविंशतिभेदभाजि, स्याद्यावदत्र भरतान्तरितं विराजि । कृत्वैकतस्तदपि कोऽप्यखिलं स्वनिश्रं, प्रस्थेन सर्षपभृतेन करोति मिश्रम् ॥२॥ शूर्पं विधाय जरती स्वकरेऽथ काऽपि, प्रस्थं पुनः सृजति सर्षपजं कदापि । धान्यात्ततः पृथगिमं किल पूर्वरीत्या, नो हारितं पुनरुपैति नृजन्म नीत्या ॥३॥ इति धान्यदृष्टान्तः ॥३॥

अष्टोत्तरस्तम्भसहस्रयुक्ता, कस्यापि भूपस्य सभाऽस्ति युक्ता । तत्राष्टसंयुक्तशतं समानां, स्तम्भाः पुनर्बिभ्रति कोणकानाम् ॥१॥ तत्रानिशं तिष्ठति मेदिनीपस्तद्राज्यकाङ्क्ष्यस्ति सुतः प्रलीपः । दध्यौ स वृद्धं जनकं निहत्यादास्यामि राज्यं सहसा जगत्याः ॥२॥ आलोचनं ज्ञातमिदं तदीयं, केनाप्यमात्येन न शोभनीयम् । तेनापि गत्वा क्षितिपस्य

॥४१५॥

शिष्टं, ध्यातं नृपेणापि तदा हृदिष्टम् ॥३॥ लोभग्रहग्रस्तमनोऽन्तराणां, नैवास्त्यकर्तव्यमहो नराणाम् । किञ्चित्क्वचिन्निर्दयताधराणां परोपघातप्रथितादराणाम् ॥४॥ कुर्याद्यतो नो कुलजात्यपेक्षां, हृत्प्रेम नो नापि कुकीर्त्युपेक्षाम् । लुब्धः करोत्येव बलादकार्यं, हन्याद्वयस्यं स्वजनं तथार्यम् ॥५॥ स्मृत्वेति राजा कथितं सुताय, क्षन्ता न नो राज्यमिदं हृदा यः । द्यूतं स पित्रा विरचय्य जेता, यदा तदा राज्यमिहोपनेता ॥६॥ जयस्य रीतिं शृणु भोः क्रमागतां, दायस्तवैको बहवो ममासताम् । यदेककं पुत्र जयस्यहो त्वकं, पृथक् पृथक् स्तम्भसहस्रकोणकम् ॥७॥ एकेन चैव स्वकदायकेन, ह्यष्टोत्तरं वारशतं कृतेन । राज्यं तदा भावि तवादितेयादेतद्भवेन्नो नृजनिः सुलेया ॥८॥ इति द्यूतदृष्टान्तः ॥४॥

एको वणिक् क्वाप्यभवत्पुराणः, सद्रत्नराशिं परिरक्षमाणः । कोटीध्वजं तत्र निजार्थजन्ये, बध्नन्ति गेहे वणिजस्तदन्ये ॥१॥ बध्नाति नो स स्वगृहेऽथ तस्मिन्, वृद्धे गते क्वापि पुरे परस्मिन् । विक्रीणिताऽन्यन्यपदोद्भवेभ्यः, पुत्रैर्वसून्यस्य तदा जनेभ्यः ॥२॥ कोटिध्वजोऽस्माभिरपि प्रबध्यते, तदा कुशोभा स्वगृहान्निषिध्यते । कृत्वेत्यथैते वणिजोऽगुरागतं, वृद्धं विना स्वस्वपदे यथागतम् ॥३॥ सद्माययौ स स्थविरोऽपि मण्यावलीप्रणाशं श्रुतवानपुण्यात् । कृत्वेति मद्रत्नलताऽर्पणीया, निर्वासितास्तेन सुताः स्वकीयाः ॥४॥ पुत्राः सृजन्ति स्म परिभ्रमन्ते, सर्वत्र रत्नानि तु नो लभन्ते । साऽप्याप्यते रत्नलता सुरेभ्यः, पुंजन्म यातं न लभेन्महेभ्यः ॥५॥ ॥ इति रत्नदृष्टान्तः ॥५॥

स्वप्ने पुरा कार्पटिकेन केनचिद्ग्रस्तं हि दृष्टं शशिमण्डलं क्वचित् । ऊचे स्वकानां सहचारिणां पुरस्तदा परेषां स

भवन्मुदाङ्कुरः ॥१॥ तैर्निर्विचारैः कथितं कदुत्तरं, त्वं लप्स्यसे मण्डकमेकमुत्तरम् । लब्धो गृहस्थादनिकोऽसवेऽमुना, क्वचित्सखण्डः स कुबुद्धिकेतुना ॥२॥ स्वप्नं तमेवैक्षत मूलदेवस्तत्रैव तस्यां निशि चारुहेवः । सुबुद्धिमांश्चिन्तितवाननमायी, स्वप्नो न मे मण्डकमात्रदायी ॥३॥ व्याख्याविशेषादिव नूनमेतादृग्जातमेतस्य फलं सुचेताः । दध्यौ स कस्यापि पुरोऽस्मि वक्ता, स्वप्नं निजं स्वप्नविदोऽतिरिक्ता ॥४॥ प्रसूनताम्बूलफलैः सपर्यामाधाय युक्तः शुभबुद्धितर्यो । स्नात्वा ततः श्वेतपटं वसानः, प्रोचे पुरः स्वप्नविदोऽप्रमानः ॥५॥ तदुक्तः स्वप्नविदाह सप्तमे, साम्राज्यलाभोऽस्ति तवाह्नि



निःसमे । पुरेऽथ तस्मिन्नृपतिर्विपन्नः, सुतोज्झितः सारबलप्रपन्नः ॥६॥ निर्यद्विपच्छत्रतुरङ्गचामरादिपञ्चदिव्यानि नरा महत्तराः । मुदा तदा तत्र पुरेऽध्यवासयन्, हृदीप्सितं स्वीयममी असाधयन् ॥७॥ तैः पञ्चसङ्ख्यैरपि मूलदेवः, कृतः स दिव्यैः सहसा नृदेवः । पूर्वोदितः कार्पटिको व्यचिन्तयन्निशम्य तद्राज्यकथामथेति यत् ॥८॥ यदीदृशं स्वप्नमथो विलोकयाम्यहो कदाचिन्निजभाग्यवत्तया । व्याख्याप्य विद्वद्भ्य उपैमि निर्भ्रमं, साम्राज्यमुर्व्यास्तु तदा हृतक्लमम् ॥९॥ ततः प्रभृत्युन्मदगोकुलानि, दध्याश्रये भ्राम्यति सोऽखिलानि । स्यान्मे शुभस्वप्नविलोकनं पुनस्तत्पानतो हीति कदाप्युपायिनः ॥१०॥ न दैवयोगात्कथमप्यवाप, स्वप्नं हि तादृक्षमसौ सपापः । तथा नरत्वं विगतं न लभ्यते, स्वारत्नवद्दुर्लभमत्र सन्मतेः ॥११॥ ॥इति संक्षेपतो मूलदेवराजपुत्रस्वप्नफलकथानकम् ॥६॥ 

पुरं विभातीन्द्रपुरं महत्तमं, धनेन धान्येन घनेन सत्तमम् । तत्रेन्द्रदत्तः समभून्महीपतिः, सुपर्वशालीव नवः शचीपतिः ॥१॥ जाता वरेण्या वशवर्तिनीनां, द्वाविंशतिस्तस्य सुता जनीनाम् । एके भणन्त्येकवशा प्रसूतास्ते जज्ञिरे

साधुभिरप्रणूताः ॥२॥ अथेन्द्रदत्तेन नियोगिपुत्री, धरावतीर्णेव सुरेन्द्रपुत्री । ऊढा विवाहावसरे परं सा, दृष्टा तयोऽमो-
च्यमुना रिरंसा ॥३॥ अभूदृतुस्नानवती सती सा । कदापि दृष्टा स्वदृशा महीशा । रत्या समाऽमात्यगृहोपरिस्थात्ततोऽ-
नुगाः कस्य सुतेति पृष्टाः ॥४॥ तैरुक्तमेषा युवती महीनाकृतादरा राजति तावकीना । एकां तया साकमथेन्दुकान्तां,
॥४१७॥ ततः स भूपोऽप्युषितोऽक्षतां ताम् ॥५॥ तदोदरेऽस्या उदियाय गर्भः, प्रावृट्क्षणेऽरण्यभुवीव दर्भः । नियोगिनाऽऽ-
ख्यायि पुरेति तस्या, ज्ञाप्या त्वया गर्भभवा समस्या ॥६॥ तया मुहूर्त्तं च दिनं स्वपित्रे, न्यवेदि तेनेदमलेखि पत्रे ।
नृपोक्त्यभिज्ञानमुखं रहस्यं, मेधाविना तत्र च दुर्निरस्यम् ॥७॥ दिनेषु पूर्णेषु सुतोऽपि जज्ञे, चत्वार आसँस्तनयास्त-
दन्ये । दासोद्भवाः पर्वतकोऽग्निकश्चान्यः सागरो बाहुलकश्च पश्चात् ॥८॥ नाम्ना सुतोऽभूत्स सुरेन्द्रदत्तः, प्राप्ताष्टवर्षो
गुरुभक्तिचित्तः । पित्रा कलाचार्यमथोपनीतः, कलोच्चयं शिक्षितवान् विनीतः ॥९॥ आर्यो यदा शिक्षयति स्म गाना-
लेख्यादिकाः सद्गणितप्रधानाः । कला अमूस्तर्हि नरेन्द्रपुत्रास्तस्यैव विघ्नं प्रथयन्त्यमित्राः ॥१०॥ न मन्यते तत्कृतम-
न्तरायं, स मन्त्रिसूः स्वं त्वधिकृत्य कायम् । कथं कथञ्चित्स्वगुरुप्रणीताः, सद्बुद्धिना तेन कला गृहीताः ॥११॥ द्वाविं-
शतिर्भूपसुताः कलोहं, ते ग्राह्यमाणा इव दुग्धदोहम् । गुरुं कुवाक्यैरपि तर्जयन्ति, क्षेत्रे प्रहारव्यथितं सृजन्ति ॥१२॥ ॥४१७॥
गुरुर्यदा तांस्तुदति व्यलीकानेत्य प्रसूभ्यः कथयन्त्यभीकाः । आर्यं तदैतास्तु पराभवन्ति, स्त्रीणां न पुत्राः सुलभा
भवन्ति ॥१३॥ अमूदृशास्तेऽपि च तस्थिवांसो, जाड्याश्रिता वा किरणाः सुधांशोः । काचित्कला तत्र न शिक्षिता
तैरुरीकृतोद्दामविवेकघातैः ॥१४॥ इतोऽस्ति राजा मथुरानगर्यां, जिताद्यशत्रुर्जितदेवपुर्याम् । नाम्नाऽभवन्निर्वृतिरस्य

पुत्री, सालङ्कृती रूपरमाधरित्री ॥१५॥ गताऽन्यदा सा पितृपर्षदन्ता, राज्ञा न्यगादीति तदा समन्तात् । वरः सुते यो हृदि रोचतेऽद्य, त्वया स मह्यं सहसा निवेद्यः ॥१६॥ तयाऽभ्यधायीति तदात्मसूधापरो रिपौ यः सुभटश्च भूयात् । वामेऽक्षिण यो विध्यति तात राधां, भर्ता स शोभां विदधात्यगाधाम् ॥१७॥ वाक्यात्पितुः साऽथ समग्रसामग्रीतश्च-चालेन्द्रपुराय नाम । श्रुत्वेन्द्रदत्तक्षितिपस्य दारकान्, भूयस्तरानद्भुतरूपधारकान् ॥१८॥ वृत्तं विदित्वेदमथेन्द्रदत्तः, क्षणेन दध्यौ स न कोऽपि मत्तः । राजाऽपरो लष्टतरोऽस्त्ययेन, स्वयंवरा मत्पुरमाप येन ॥१९॥ आकारितास्तेन समग्र-भूपास्तदा स्वशोभावततावनूपाः । महाविभूत्या समुपेयिवांसः, पुराद्बहिस्तेऽप्यथ तस्थिवांसः ॥२०॥ चक्रे पुरं तेन चल-त्पताकं, वनं यथा फुल्ललसल्लताकम् । रङ्गादिमो मण्डप एक उच्चः, कृतो बहिर्निर्मितचित्तमुच्च ॥२१॥ कृताष्टचक्रोपरि तत्र धीतुल्यकंकतोऽक्षेऽद्भुतदायिनी तु । वेध्येषुणा वामकनीनिकायां, साऽधोमुखैर्धार्मिजनैः सभायाम् ॥२२॥ संनह्य सार्कं स्वसुतैः स निर्ययौ, भूपो बही राजसुताऽप्युपाययौ । स्वयंवरालङ्कृतिसङ्गताङ्गी, वरेण्यलावण्यमयी कृशाङ्गी ॥२३॥ स्वस्थास्पदेऽस्थात् क्षितिभृत्कलापस्तथाऽन्यलोकोऽपि मनस्यपापः । स्वयंवरस्तादृगभूदमुष्या, यादृग्बभौ द्रौपदिकाम-हिष्याः ॥२४॥ श्रीमालिनामा प्रथमोऽङ्गजातः, प्रोक्तस्तदा भूमिभुजा कृपातः । भिन्ध्यक्षिण तैलप्रतिबिम्बितामिमां, पाञ्चालिकां लाहि सुतां सराज्यमाम् ॥२५॥ ततोऽकृताभ्यासविधिः कलादौ, सोऽप्युत्थितः स्वावनाम्य पादौ । धनु-र्गृहीतुं न परं शशाक, द्विजो यथा हंसगतं बलाकः ॥२६॥ आत्तं करे तत्कथमप्यनेन, यतस्ततो यात्विति कम्पितेन । व्यमोचि बाणः फलभारभुग्नः, शाखीव भग्नः स च चक्रलग्नः ॥२७॥ त्रिद्व्येकसङ्ख्यान्यरकान्तराणि, स्पृष्ट्वा शरास्तत्र

महत्तराणि । नृणामभज्यन्त बहिश्च केषांचिन्निःपतन्ति स्म ततः परेषाम् ॥२८॥ ततो व्यधात्सोऽधृतिमेवमुर्वीपतिर्यदे-
भिर्लघितोऽस्मि गर्वी । आख्यात्यमात्येन किमादधासि, स्वामिन्मुखे श्यामलतामिवासि: ॥२९॥ राजाऽऽह पुत्रैरधम-
प्रधानः, कृतोऽहमेतैं रचितापमानः । मन्त्र्यभ्यधान्मामकपुत्रिकाभूः, सुतोऽस्ति तेऽन्योऽपि लसत्कलाभूः ॥३०॥ सोऽस्ति
॥४१९॥ क्षमो वेधविधेर्विधाने, राज्ञोऽप्यभिज्ञानमवाचि जानेः । आकारितो मङ्क्षु सुरेन्द्रदत्तः, क्ष्मापेण हृष्टेन तदाऽऽच्छचितः
॥३१॥ आश्लिष्य चोक्तं सुत पुत्रिकाऽभिराऽष्टचक्राण्यवभिद्य तादृक् । स्वयंवराराज्यरमाऽप्यजेया, त्वयाऽधुनाऽऽत्मीय-
करेऽभ्युपेया ॥३२॥ वचस्तथेति प्रतिपद्य नेतुः स्वरूपनिर्भर्त्सितमत्स्यकेतुः । ततः कुमारः स्वकरे निनाय, स्थाने
स्थिरीभूय धनुर्जयाय ॥३३॥ चत्वार एतत्सविधे च चेटकाः, स्थिताश्चतुर्दिक्षु सखड्गखेटकाः । तत्पार्श्वयोरप्युभयोः
स्वपाणौ, स्थितौ भटौ द्वौ भयकृत्कृपाणौ ॥३४॥ भटः क्वचिच्चक्रिकृत्य लक्ष्यं, छेद्यं तदा त्वच्छिर एव दक्षम् ।
वदन्नुपाध्याय इति स्ववक्त्रे, भयं कुमाराय ददर्श वक्रं ॥३५॥ द्वाविंशतिस्तेऽपि तदा कुमारा, उल्लण्ठवाचः स्म वद-
न्त्यसाराः । विध्यत्वसौ मेति बलाद्वदन्तः, कुर्वन्ति विघ्नं च मिथो हसन्तः ॥३६॥ भटद्वयं तद्भृतिभुक् चतुष्टयं,
द्वाविंशतिं क्ष्मापतनूरुहामयम् । कुमार एवागणयँश्च जानन्नथाष्टचक्रान्तरमेकतानः ॥३७॥ तस्मिन् शरव्ये विनिवि-
ष्टदृष्टिः, स्थानेऽन्यतश्चाकृततत्त्वदृष्टिः । पाञ्चालिकां वामदृशं प्रवीणः क्षणाज्जनान्तर्विभिदेऽत्यरीणः ॥३८॥ उत्कृष्टशब्दं ॥४१९॥
किल साधुकारं, चक्रुर्जनास्तस्य तदाऽनिवारम् । कन्यां स धन्यां विधिनोपयेमे, सार्धं तया भोगसुखैश्च रेमे ॥३९॥
कर्तुं यथा दुष्कर एष राधावेधो बुधस्यावगणय्य बाधाः । स जातु सिद्धिं लभते सुरेभ्यः, पुंजन्म भूयो न लभेन्महेभ्यः

॥४०॥ ॥ इति सुरेन्द्रदत्तकथानकम् ॥७॥

ह्रदोऽस्ति साहस्रिकयोजनान्वितः, [illegible] शैवलमालिकाभृतः छिद्रं बभूवैकमथान्तरस्य, ग्रीवा ममौ यत्र च कच्छपस्य ॥१॥ स कच्छपो वर्षशते व्यतीते, प्रसारयेत्स्वां धमनिं प्रतीते । प्रसारिता तेन निजा शिरोधिश्छिद्रे नभोधिष्ण्यलताऽप्यबोधि ॥२॥ तां पुष्पमालामिव चन्द्रिकाया, दृष्ट्वा गतो गोत्रजमालिकायाः । आकारणार्थं सहित-स्तयाऽयं प्राप्तः पुनस्तत्र निरन्तरायम् ॥३॥ दिशो दिशं नेत्रयुगेन पश्यंश्छिद्रं न तत्प्रेक्षितवानवश्यम् । तदप्यसौ भो लभते सुरेभ्यः, पुंजन्म भूयो न लभेन्महेभ्यः ॥४॥ ॥इति कच्छपदृष्टान्तः प्रोक्तः ॥८॥

भ्रष्टं युगं प्राग्दिशि नीरराशेः, शम्याऽपतत्पश्चिमदिक्सकाशे । छिद्रे परिभ्रम्य युगस्य शम्या, विशेत्कदापि स्वयमेव रम्या ॥१॥ छिद्रेऽपि तत्रोर्मिमहासमीराहता पयःपूरचलच्छरीरा । साऽपि प्रवेशं लभते सुरेभ्यः, पुंजन्म भूयो न लभेन्महेभ्यः ॥२॥ ॥इति युगशम्यादृष्टान्तो नवमः ॥९॥

स्तम्भोऽभवत्कोऽप्यथ सोऽश्रमाणः सुरेण चक्रे कणसारचूर्णः । खण्डास्तदीया अपि निर्विभागाः, कृताः समग्रा नलिकालताग्राः ॥१॥ पश्चाद्ययौ मन्दरचूलिकायां, शयालुवत्कोमलतूलिकायाम् । अणूंस्तदीयान् सकलान् बलेन, पृथक् पृथक् फूत्कृतवान्मुखेन ॥२॥ कश्चित् पुनः स्तम्भमिमं महिष्ठं, दिशो दिशं चूर्णनतः प्रणष्टम् । करोति तेभ्यः परमाणुकेभ्यः, पुंजन्म भूयो न लभेन्महेभ्यः ॥३॥ ॥ इति स्तम्भदृष्टान्तो दशमः ॥१०॥

नरभवोपरि दश दृष्टान्ताः प्रथमपदे समुद्भाविताः । अथ द्वितीयपदस्यायं परमार्थः—नृभवे प्राप्तेऽपि पवित्रं कुलं

दुर्लभं । कुले प्राप्तेऽपि आर्यक्षेत्रं विना न धर्मप्राप्तिः । तत्राप्यार्यक्षेत्रे गुरूक्तं तत्त्वश्रवणं दुर्लभं । यदुक्तम्—"**भूएसु जंगमत्तं तत्तो पंचिंदियत्तमुक्कोसं । तेसु वि य माणुसत्तं मणुअत्ते आरिओ देसो ॥१॥ देसे कुलं पहाणं कुले पहाणे य जाइमुक्कोसा । तीइ वि रूवसमिद्धी रूवे विबलं पहाणयरं ॥२॥ होइ बले वि य जीयं जीए वि पहाणयंति विन्नाणं । विन्नाणे सम्मत्तं सम्मत्ते सीलसंपत्ती ॥३॥ सीले खाइयभावो खाइयभावे य केवलं नाणं । केवलिए संपत्ते तत्तो परमक्खरो**
।।४२१।। **मुक्खो ॥४॥ पन्नरसंगो एसो संपन्नो मुक्खसाहणोवाओ । इत्थ बहु संपत्तं थोवं संपाविअव्वं ते ॥५॥**" अथार्यक्षेत्राण्यमूनि—"**मगहंगवंगकासीकलिंगकुसकोसलाकुसट्टा य । जंगलवच्छविदेहा पंचालसुरट्ठसंडब्भा ॥१॥ मलयत्थसिंधुचेइवइराडवच्छभंगावट्टा य । लाढा य सूरसेणा कुणाल तह केयई अद्धं ॥२॥ जत्थ न जिणकल्लाणा न चक्किबलकेसवाण अवयारो । न य जिणधम्मपवित्ती सगजवणाई अणज्जा ते ॥३॥**" अथ गुरूक्तं साध्वधिकारे तत्त्वमिदमेव यत्साधुना क्रियाकलापसाधुनाऽत्यन्तमुपसर्गकारिण्यपि वैरिणि प्रकामक्षमाभाजा भाव्यं । यस्तु तद्विपरीतो भूत्वा भूयोऽपि प्रान्तेऽप्यक्षामतितिक्षां कक्षीकुरुते स संवराह्वयमुनिवत् कृतकृत्यः प्रसिध्यसिद्धिसौधमध्यमध्यास्ते । एतदुपरि **श्रीसंवरमुनि**दृष्टान्तो निदर्श्यते— ।।४२१।।

**श्रीसंवराख्यो** मुनिरुग्रचर्यः, कृतार्हदुक्तागमसत्सपर्यः । चक्रे स उत्तुङ्गगिरौ गरीयस्तपस्तनूत्सर्गवशाद्वरीयः ॥१॥ तुष्टाऽन्यदा शासनदेवमुष्मै, वचः कृतं कैश्चिदपीह शुष्मैः । ऊचे यदा कष्टमुपैति तुभ्यं, कार्यं तदा मे स्मरणं मुलभ्यम् ॥२॥ अथो मुनिः पारणकाङ्क्षि जाते, ग्रामस्य मार्गे चलितः प्रभाते । एकः समागाच्छकटः कुतश्चित्तत्सन्मुखं

तत्र तदैव कश्चित् ॥३॥ मार्गं मुनिर्मुञ्चति नो तदानीं, यथा नरेन्द्रो निजराजधानीम् । न मन्यते शाकटिकस्य धार्ष्ट्यं, यथाऽऽस्तिकः शासनमत्र शाक्यम् ॥४॥ रथात्समुत्तीर्य तदा तपोधनः, स ताडितो निर्मितमार्गरोधनः । तीव्रप्रहारैः प्रचुरैस्तनौ तथा, शीर्षेऽमुना शाकटिकेन सर्वथा ॥५॥ दण्डप्रहारैर्मुनिभिः स रोषादुद्वेजितः सोऽपि निगृह्य दोषा । तयोर्मिथो युद्धविधौ पपात, क्षितौ स मासक्षपकः सघातः ॥६॥ आगात्स्मृता शासनदेवता नो, महान्धकूपेषु विभेव भानोः । गते पुनः शाकटिके प्रवासादुपागता शासनदेवता सा ॥७॥ साधुः समालापित एष सुर्या, त्वं केत्यवादीदथ साऽऽह वर्या । त्वत्सेविनी देव्यहमेवमुक्तिं, निशम्य स प्राह मुनिः कुयुक्तिम् ॥८॥ पापे यदाऽस्मारि मया स्वकार्ये, किं नागता तत्र भवत्यनार्ये । किं साम्प्रतं दर्शयसि स्वमास्यं, कृते विवाहे न विभाति लास्यम् ॥९॥ अयं मुनिर्वा पशुपाल एष, प्रोचे सुरी नापि मया विशेषः । द्वयोस्तदानीं सरुषोः कथञ्चिन्मयापि तत्रोपकृतं न किञ्चित् ॥१०॥ यत्कोकिलानां स्वर एव रूपं, पतिव्रतात्वं वनितासु रूपम् । विद्या कुलीनस्य नरस्य रूपं, क्षमैव साधोः शुभकारि रूपम् ॥११॥ कोपः कुटुम्बस्य करोति हानिं, कोपश्च दुःखस्य ददाति खानिम् । कोपो भवेद्दुर्गतिमार्गसार्थः, कोपान्मनुष्यस्य भवोऽप्यपार्थः ॥१२॥ अन्तर्दधे शासनदेवतेयं, प्रबोध्य तं संवरनामधेयम् । तप्त्वा तपः सोऽपि च भूरिकालं, प्रान्ते शिवं साधुरगाद्विशालम् ॥१३॥ ॥ इति श्रीसंवराह्वयमुनीश्वरकथा ॥

अथैतस्यैव काव्यस्य तुर्यपदे **तुब्भं पमायायरणं न जुत्तं**" इति यदुक्तं तत्र प्रमादोऽष्टप्रकारः—"**पमाउय जिणिंदेहिं भणिओ अट्ठभेयओ । अन्नाणं १ संसओ २ चेव मिच्छानाणं ३ तहेव य ॥१ । रोगो ४ दोसो ५ मईभंसो ६**

धम्मम्मि य अणायरो ७ । जोगाणं दुप्पणीहाणं ८ अट्ठहा वज्जियव्वउ ॥२॥" इति । इतिकारणात्प्रमादः अज्ञानरूपः । स यथा श्रीस्थूलभद्रमुनिना स्थानत्रये कृतस्तथाऽन्यैर्धीधनैः साधुभिः "समयं गोयम मा पमायए" इति श्रीवीरवचश्चित्ते संस्मृत्य कर्हिचिन्न कार्यः । प्राणी तावत्प्रमादे एकान्तनिमग्न एवास्ति ये त्वप्रमादिनस्त एव स्वकार्यसाधका दुःखबाधकाश्च स्युः । अथ प्रमादाचरणस्थानज्ञापने स्थूलभद्रदृष्टान्त उच्यते—

जगत्प्रसिद्धः प्रविभाति नन्दः, क्षितीश्वरः कीर्तिलतैककन्दः । मन्त्रिप्रधानः शगडाल आसीत्तस्योत्तमः पाटलिपुत्रवासी ॥१॥ समुल्लसत्कल्पकवंशकेतुर्मेधाचतुष्कोपचयैकहेतुः । आसीत्स दुर्नीतिनिभेदकारी, श्रीनन्दराज्यप्रथितोऽधिकारी ॥२॥ श्रस्थूलभद्रस्तनयः प्रधानस्ततोऽपरोऽभूत्सिरियाभिधानः । जक्षादिकाः सद्गुणरूपवत्यः पुत्र्योऽभवन् सप्त गृहेऽस्य सत्यः ॥३॥ जक्षा द्वितीयाऽजनि जक्षदिन्ना, भूता तुरीयाऽपि च भूतदिन्ना । सेणाऽभिधाना ऽवभूव वेणा, षष्ठी सुता सप्तमिका च रेणा ॥४॥ गाथापदश्लोकसमूह एकद्विव्यादिकोक्तिक्रमसातिरेकः । मुखे समायाति कुमारिकाणां, तासां मनीषोदयधारिकाणाम् ॥५॥ जिनेन्द्रपूजागुरुपन्नमस्या शास्त्रार्थविज्ञानवृषप्रशस्याः । घस्राः प्रयान्ति स्म सुखेन तासां, सुवर्णसंकाशशरीरभासाम् ॥६॥ कविर्द्विजन्मा वररुच्यभिख्यस्तत्रैव चास्ते निवसन् सुदक्षः । अष्टोत्तरं काव्यशतं विरच्य क्ष्मापं सदा स्तौति भयं विमुच्य ॥७॥ तत्काव्यभक्त्युल्लसितोऽविगानं, समीहते दातुमभीष्टदानम् । नृपः परं नो सगडालसृष्टश्लाघां विना यच्छति तस्य तुष्टः ॥८॥ द्विजन्मना तेन ततः कलत्रं, मन्त्रीश्वरस्यास्य कृतं स्वमित्रम् । सत्पुष्पदानादिभिरर्चयित्वा, मायां स्वचित्ते परिबुध्य नूनम् ॥९॥ मन्त्रिस्त्रियोक्तं वद विप्र सत्यं, मया समं ते किमिहास्ति

॥४२३॥

 

कृत्यम् । सोऽप्याह मन्त्री स्वयकैष कार्यः, स्तोता मम क्ष्मापपुरो विचार्य ॥१०॥ स्त्रियाऽपि तद्वाक्यमिदं प्रपन्नं, प्रोचे च काले सचिवं प्रसन्नम् । न श्लाघ्यसे किं द्विजमाह सोऽपि, किं स्तौति मिथ्यादृशमत्र कोऽपि ॥११॥ प्रपन्नवान् वाक्यमसौ निजायाः, निर्बन्धमावेद्य पुनः प्रियायाः । कृता प्रशंसा पठतस्तु तस्य, प्रत्यग्रकाव्यानि पुरो नृपस्य ॥१२॥ अष्टाधिकं दापितवान्नरेशः, सुवर्णदीनारशतं द्विजेशः । सदैवतो तस्य बभूव वृत्तिः, शक्या न भङ्क्तुं भुवि कुप्रवृत्तिः ॥१३॥ अमात्यमात्येन पुनर्नृपस्य, द्युम्नक्षयं वीक्ष्य वृथा किमस्य । प्रदीयते स्वं धनमाह भूपः, स्तुतस्त्वयैवैष कुबुद्धि-

रूपः ॥१४॥ मन्त्र्याह देवान्यकृतैर्भवन्तं, संस्तौति काव्यैरयमर्थवन्तम् । ज्ञातं पुरा नास्य मयाऽपि वृत्तं, राजाह सत्यं किमिदं कुवृत्तम् ॥१५॥ ऊचे पुनर्मन्त्रिवरस्तदेति, द्विजोक्तमेतत्सकलं समेति । मुखाम्बुजे मामककन्यकानां, प्रज्ञाभृतां सप्तकसङ्ख्यकानाम् ॥१६॥ अथैष विप्रः समये नृपाग्रतः, स्वकाव्यमालाकथनार्थमागतः । धृता यवन्यन्तरिताः स्वपुत्रिकास्तदा त्वमात्येन सुयुक्तिपत्रिकाः ॥१७॥ आकर्ण्य वाचं तमथैकवारं द्विजोदितं नूतनकाव्यवारम् । कृत्वा मुखाधीतमुवाच यक्षा, श्रीनन्दभूपालपुरः सुशिष्या ॥१८॥ श्रुत्वा द्विजेनोच्चरितं च यक्षया, द्वितीयवारं किल यक्षदिन्नया । उक्तं नृपाग्रे क्रमतस्तृतीयया, तुरीययैवं किल यावदन्त्यया ॥१९॥ ततोऽधिकक्रोधभरेण राज्ञा, प्रदापिता तस्य सभाऽगमाज्ञा । पश्चात्स गङ्गापयसोऽन्तराले, यन्त्रप्रयोगं सृजति स्म काले ॥२०॥ दीनारमालां निशि तत्र दत्त्वा, संस्थापयत्येष जले प्रविश्य । आहत्य यन्त्रं चरणद्वयेन, प्रातः पुनर्लाति नुतिच्छलेन ॥२१॥ लोकाग्रतो वक्ति नुतिप्रसङ्गात्तुष्टा धनं मे प्रददाति गङ्गा । प्रोक्तं पुरस्तात्सचिवस्य सम्यक्कालान्तरे भूपतिना निशम्य ॥२२॥ मन्त्र्यूचिवांश्चेन्मम राति दृष्टौ, 

गङ्गा तदा सत्यमिदं न पृष्टौ । विलोकयिष्याम इदं हि कल्ये, राज्ञा प्रपन्नं कुतुकेऽत्यतुल्ये ॥२३॥ नियोगिना प्रत्य-
यितो मनुष्यः सन्ध्याक्षणेऽभाण्यथ लब्धलक्ष्यः । प्रच्छन्नमास्थाय विलोकनीयं, वृत्तं द्विजस्याम्बुनि निन्दनीयम् ॥२४॥
संस्थापयत्यम्बुनि यद्द्विजन्मेच्छया त्वमानीय प्रदेहि तन्मे । तेनापि गत्वा जगृहेऽस्य दीनाराणां ततः पोट्टलिकाऽतिपीना
॥२५॥ एत्य प्रभाते नरपत्यमात्यौ, तत्र द्विजं पश्यत एव जात्यौ । द्विजोऽपि गङ्गाम्बुभरे सुखेन, प्राविक्षदीडां
 कलयन्मुखेन ॥२६॥ प्रान्ते स्तुतेर्यन्त्रमिदं पदाभ्यां, संघट्टयामास मुहुः कराभ्याम् । दत्ते न किञ्चित्स ततो विलक्षः,
पुरो जनानामभवत्सलक्षः ॥२७॥ राजावदत्येष तु दुष्टकुम्भीनसोपमो वक्रतयानिदम्भी । स्वाचारदारुत्करधूमकेतुर्व्य-
लीककीर्तिर्नगरान्तरेषु ॥२८॥ स्वयं नृपाग्रे सचिवेन चाविष्कृतं तदीयं धनमप्रभावि । राजादिलोकस्तमथो जहास,
रुरोष मन्त्रिण्यथ विप्रपाशः ॥२९॥ चिन्तयति च—

समाहतं यच्चरणेन पुंसां, मूर्धानमारुह्य ददाति खिसाम् । मध्यस्थतां संदधतोऽपमाने, वरं मनुष्यादरज आप्तहानेः ॥३०॥ स
च्छिद्रमालोकयितुं प्रवृत्तस्तन्मन्त्रिणो दोषभरैरकृत्तः । मन्त्र्यन्यदाऽसौ सिरियाविवाहं, विधातुमुत्कः कुशलाम्बुवाहम् ॥३१॥
नरेन्द्रदेयानि घनायुधानि, च्छन्नं गृहे कारयतीप्सितानि । एतद्विरार्वजितमन्त्रिदास्या, प्रोक्तं द्विजायाभिकदारुदास्या ॥४२५॥
॥३२॥ प्राप्तच्छलस्तत्र तदा द्विजातिस्त्रिके चतुष्केऽध्वनि मन्त्र्यरातिः । शिशूनिदं पाठयति स्वतस्तु, द्विष्टो ददन्मोदक-
मुख्यवस्तु ॥३३॥ किञ्चिज्जनः सम्प्रति वेत्ति नासौ, मन्त्र्येष यन्नन्दनृपे परासौ । कृते सति स्वं सिरियाङ्गजातं राज्येऽस्ति
संस्थापयिता धिया तम् ॥३४॥ एहु लोय नवि जाणइ जं सिगडाल करिस्सइ । नंदराय मारेविकरि सिरियउ रज्जि ठवि-

स्सइ ॥३५॥ एतच्छलं क्वापि महीधवेन, प्रेक्षापितं मन्त्रिगृहं जवेन । व्यलोकि तत्रायुधचक्रवालं, निष्पद्यमानं चरकैः प्रभालम् ॥३६॥ उक्तं च तैर्भूपतयेऽथ नन्दः, पराङ्मुखीभूय रुपालिमन्दः । तस्थौ सभायां सति पादलग्ने, सेवागते मन्त्रिणि भक्त्यभग्ने ॥३७॥ यतः—मन्तास्त्यदो विश्वसनं न राजा दर्वीकरालीकुटिलस्वभाजाम् । निद्रायितं कूपकसन्निकर्षे, विग्रस्य चैतत् सति मुग्धकर्षे ॥३८॥ मन्त्री स्मरन्नस्ति वधे त्ववश्यमवाममकालस्य ममैककस्य । भूपादतोऽमुष्य कुटुम्बकस्य, क्रुद्धान्मृतिः स्यान्न हि मामकस्य ॥३९॥ विज्ञाय नन्दं कुपितं निशान्ते, समेत्य मन्त्री प्रमदाश्रुपाते । जगाद पुत्रं सिरियाभिधानं, नाहं मरिष्यामि यदि प्रधानम् ॥४०॥ तदा हनिष्यत्यधिपोऽत्र हीमान्नन्दकान्मनु यान् सकलानधीमान् । तस्मादहं वत्स गुणातिकस्य, त्वया निपात्यः शिरसिच्छिन्नः ॥४१॥ सुतेदमाक्रन्दमसौ ततान, प्रोचे च वंशक्षय एकतानः । किं तात जातोऽहमिहाकुलीनस्त्वं येन मामादिशसीत्यदीनः ॥४२॥ कुलोपसर्गस्य बलिं प्रदेहि, त्वं तात मामेव मृतं विधेहि । नृपाग्र एवं गदिते पिताऽऽह, त्वं नो कुलध्वंसकृतावगाहः ॥४३॥ कुलक्षयस्यान्तकरोऽसि किं तु, स्यास्त्वं विधायेति सुतापमन्तुः । अथाह पुत्रो भवतात्तु यत्तद्भावी परं वप्तृवधो न मत्तः ॥४४॥ मन्त्र्याह सोऽहं विषभक्षणेन, स्वं मारयिष्यामि सुत क्षणेन । त्वया विपन्नस्य ममैव बाह्यवृत्त्या विरत्यै ह्यसिरत्र वाह्यः ॥४५॥ नाक्रन्दकालोऽस्त्यधुना महीयानाज्ञा गुरूणां तु न लङ्घनीया । रक्ष स्वकीयं कुलमापदम्भोमौ तारयोद्दामकुकीर्तिसिन्धोः ॥४६॥ द्वीप्येकतोऽम्भोभृतसिन्धुरन्यतस्तथैकतोऽन्धुर्दववह्निरन्यतः । भोग्येकतः कण्टकराशिरन्यतः, सुतोऽविदन्सङ्कट एष मेऽद्भुतः ॥४७॥ यदेकतो मे गुरुशासनातिक्रमोऽन्यतो वप्तृवधो विभाति । स्वहत्यया भाव्ययशोऽपि मेऽति-

॥४२६॥

प्रौढं तमोऽस्मै फलितं किलेति ॥४८॥ दिवानिशं नन्दनृपाङ्गरक्षकः, स्वनामतश्चाथ स्थगितश्रुतिद्विकः । स मन्त्रिसूनु-
र्नयनस्रवज्जलः, मुमोच मालिन्यजितोग्रकज्जलः ॥४९॥ स्वकीयसूनोः पुनरप्यनेन, प्रोक्तं तदा मन्त्रिमहत्तमेन । वध्यो-
ऽहमीशांह्रिपुरोऽपकूटस्त्वयापशङ्कं श्रितकालकूटः ॥५०॥ आबालवृद्धार्दनशङ्कितेन, प्रतिश्रुतं तत्सिरियाभिधेन । पुत्रेण
॥४२७॥ पित्राऽपि मिथो विमृश्य, समागतं पर्षदि भूधनस्य ॥५१॥ दृष्ट्वा तमभ्याभिमुखः समाजासीनोऽनिरोधादभवत्स राजा ।
पार्श्वे स्थितो मन्त्र्युचितं वचः स्वं, द्विष्टः प्रयुङ्क्ते स्म धनीव स स्वम् ॥५२॥ न जल्पितं भूपतिनाऽप्यनेन, नतं पुरो-
भूय च धीसखेन । तथैव पाशैः पतितस्य नेतुश्छिन्नं शिरोऽनेन पितुर्विजेतुः ॥५३॥ चित्ते पुनश्चिन्तयतीति हा रे, बला-
त्त्वयाऽहं विपयो दयारेः । किं कारितोऽस्म्यत्र ममाथवा त्वं, घ्नतो न हृत् किं स्फुटितं स्वतातम् ॥५४॥ हा हा किला-
कार्यमिदं प्रजल्पन्नित्युत्थितो राड्हृदयद्विकल्पः । तदाऽभ्यधान्मन्त्रिसुतः स्वदेवं, वृथाऽऽकुलत्वेन तवालमेवम् ॥५५॥
स्फुरद्दुराचारविकारकत्वात्त्वच्छासनातिक्रमकारकत्वात् । स्तोकं मयाऽमुष्य कृतं तदेतत्कार्यं मनागप्यधृतिर्न नेतः ॥५६॥
त्यक्त्वा समग्रं स्वजनस्य कार्यं, कुर्वन्ति भृत्या निजनाथकार्यम् । किमन्यथा चञ्चलरागवन्तः, शक्याः समाराद्धुमिना
भवन्तः ॥५७॥ वामो भवेद्यस्तव देव नित्यं, न तेन पित्राऽपि ममास्ति कृत्यम् । तदा च राज्ञाऽवसितं कुलोकः, किम- ॥४२७॥
न्यथा मन्त्रयति कुदोकः ॥५८॥ किं त्वेष विश्रथितोऽस्ति दम्भः, सोऽहं कुकर्मा विषमिश्रकुम्भः । येनेदृशं भुव्यदमृ-
ष्टकार्यं, विनिर्मितं सम्प्रति दुर्निवार्यम् ॥५९॥ तन्मन्त्रिपट्टे यदि मन्त्रिपुत्रः, संस्थाप्यते तर्ह्यभिराममत्र । ततः स राज्ञा
भणितस्त्यज त्वस्वास्थ्यं निजं मन्त्रिपदं भजस्व ॥६०॥ उक्तं ततस्तेन ममास्ति वृद्धः, श्रीस्थूलभद्रः सहजः प्रसिद्धः ।

पणाङ्गनामन्दिरमाश्रितस्य, क्रान्ताः समा द्वादश देव तस्य ॥६१॥ प्रदीयतां मन्त्रिपदं नु तस्मा, आकारितः स प्रभुणाऽप्यकस्मात् । क्रमागतं मन्त्रिपदं गृहाण, स्वमेवमुक्ते स पुनर्बभाण ॥६२॥ विचिन्तयामीत्यमुना प्रजल्पिते, प्रोचे नृपोऽशोकवने व्रजोचिते । विचिन्तयैकान्ततयेत्यथागतः, श्रीस्थूलभद्रोऽपि वने शुभाश्रितः ॥६३॥ दध्याविहो भोगरसप्रचारिणां राज्याधिकारोत्सुकचित्तधारिणाम् । नृणाममात्यत्वमवद्यकारकं, संसेवितं राज्ञि विशिष्टनारकम् ॥६४॥ दुःखप्रदाः स्युर्विषयाः सदाऽमी, एतत्कृते को विजहाति कामी । सुदुर्लभं प्राप्तमिदं नरत्वं, विधाय संसारसुखे ममत्वम् ॥६५॥ नानाजनुःसङ्कटकुञ्जवन्ये, दुर्वारसंसारवनेऽत्यगम्ये । लब्धे नरत्वेऽक्षसुखोद्यतेन, क्रीतेव कोटयत्र वराटकेन ॥६६॥ निषेवितं वह्निशिखाकरालं, विलोक्यमानं यदि वेन्द्रजालम् । स्याद्द्यूतवद्धारि च रम्यमाणं, स्त्रीसेवनं चारु निवार्यमाणम् ॥६७॥ न ज्ञायते स्त्री घटिता विधात्रा, कीदृग्विधैरेव दलैः प्रमात्रा । यस्तत्र रागी रतिमादधाति, दुःखानि सौख्यस्य कृते स लाति ॥६८॥ न रज्यते यो विषये कथञ्चित्तत्कामनं यः कुरुते न किञ्चित् । भवेत्तदङ्गे सततं समाधिर्नाविर्भवत्येव रुजाद्युपाधिः ॥६९॥ विमुच्य तद्भोगमहाविलासं, तावत्क्षिपाम्युत्कटमोहपाशम् । यावज्जराराक्षसिका मदङ्गं, न निर्मिमीते कृतशौर्यभङ्गम् ॥७०॥ यावद्वशत्येष न रुग्भुजङ्गस्तावद्विधेयः सुकृतप्रसङ्गः । जीवोऽस्ति कल्येऽद्य कृतप्रयाणः, पान्थेन तुल्यो जरसा पुराणः ॥७१॥ ध्यात्वेति शीर्षेऽकृत पञ्चमुष्टिकं, लोचं क्षणान्निर्मितपुण्यपुष्टिकम् । धर्मध्वजं सोऽमलरत्नकम्बलं, छित्वा व्यधात् स्वं परलोकशम्बलम् ॥७२॥ आगत्य पार्श्वे नरनायकस्य, प्रोवाच धर्माशिषमेव तस्य । एतन्मया चिन्तितमेवमुक्ते, नृपोऽवदच्चाविदमाप्तमुक्ते ॥७३॥ यावद्बहिर्निर्गतवान्मुनीशः,

स्वारक्षकांस्तावदवक् क्षितीशः। विलोकनीयं कपटेन यायान्न वाऽसकौ धाम्नि पणाङ्गनायाः ॥७४॥ पश्यत्सु तेष्वेष
मृतात्कलेवरादास्यं पिधायापसरेत् पथान्तरा। यथा जनः सोऽपि मुनिः पणाङ्गनागृहात्तथा दूरमगान्महामनाः ॥७५॥
तैर्भूधनाग्रे कथितं तथैव, क्ष्मापोऽपि तुष्टाव मुनिं तदैव। कृतश्च मन्त्री सिरियाभिधानः, श्रीस्थूलभद्रोऽथ शुभावधानः
॥७६॥ संभूतिपूर्वविजयस्य गुरोरुपान्ते, भेजे व्रतं च सिरियाख्य इतोऽथ्यंकान्ते। कोश्याभिधप्रकटपण्यवधूगृहेऽति-
॥४२९॥ प्रेम्णा निजस्य सहजस्य सदा समेति ॥७७॥ सा स्थूलभद्रे गणिकाऽस्ति रक्ता, नान्यं जनं वाञ्छति रागपृक्ता।
कोश्याभगिन्यस्त्वथ योपकोश्या, कुर्यात्प्रवेशं स गृहे द्विजोऽस्याः ॥७८॥ पश्यंश्छलं मन्त्रिसुतो द्विजातेः, स भ्रातृजाया-
मवदद्यथा तां। प्राप्ता वयं भ्रातुरथो वियुक्तिं, द्विजादमुष्मात् पितृजीवमुक्तिम् ॥७९॥ कार्यं तथाऽयं तु यथा मदिष्टां,
पिबेत्तवेयं भगिनीं कनिष्ठाम्। गत्वाऽवदत्त्वं सुरयाऽतिमत्ता, द्विजस्त्वमत्तः कथमेकहृत्ता ॥८०॥ अथ त्वया कारयि-
तव्यमस्य, स्वसः सुरापानमिदं द्विजस्य। तयाऽपि विप्रो जगदे यदाऽयं, नेच्छेत्तदा साऽस्य बभाण सायम् ॥८१॥ सूनं
त्वया मेऽथ स तद्वियोगं, सोढुं समर्थो न जरीव रोगम्। चन्द्रप्रभायाः कृतवांश्च पानं, विन्ध्याजनः क्षीरमिति प्रधानम्
॥८२॥ तन्मन्त्रिसूनोः कथितं च कोश्यया, राजाऽन्यदोचे सिरियाख्यमिच्छया। हृतः पिताऽऽसीत्तव मे तदा पुनः,
कुकर्म तत्प्राह स मद्यपानिनः ॥८३॥ राजाऽऽह किं तेन सुराऽपि पीयते, स प्रोचिवान् सत्यमिदं विधीयते। कस्या-
प्यदाद्भावितमुत्पलं करे, देयं द्विजस्येति निगद्य पित्सरे ॥८४॥ सभासमाकारितवाडवस्य, प्रदायि तेनाव्रमरेऽधमस्य। ॥४२९॥
आघ्राय तद्वान्तमनेन निन्द्यं, भृङ्गारमध्येऽखिलमेव मद्यम् ॥८५॥ सर्वत्र लोकान्तरवाप्तरीढः, स प्रापितः शोधिमघा-

वलीढः । अप्यग्निना पायित एव तप्तं, पञ्चत्वमाप्तोऽधिककष्टलिप्तम् ॥८६॥ श्रीस्थूलभद्रो गुरुसन्निधाने, लीनस्तपः-कर्मणि चासमाने । विहारकृत्पाटलिपुत्रमागात्त्रयोऽपरे सन्त्यनगारनागाः ॥८७॥ अङ्गीकृतास्तैर्विविधा अभिग्रहाः, समाश्रितैकेन महाहरेर्गुहा । तमीक्ष्य शान्तिं स बभार केसरी, प्राप्तस्तदन्योऽहिबिलं च संवरी ॥८८॥ आलोक्य तं दृष्टिविषः प्रशान्तः, कूपस्य चैकः फलकेऽतिदान्तः । तस्थौ च कोश्यागृहमाससाद, श्रीस्थूलभद्रो मुनिरप्रमादः ॥८९॥ ज्ञात्वेति तुष्टा गणिका परीषहैः, पराजितोऽत्रागत एष दुस्सहैः । प्रोक्तं च कुर्वे किमुवाच साधुः, स्थातुं प्रदेहि स्ववनेऽत्र साधु ॥९०॥ तथा कृते सा मणिहेममुक्तालङ्कारसंशोभितदेहयुक्ता । आगत्य लग्ना निशि चाटु कर्तुं, परं न शक्नोति मनोऽस्य हर्तुम् ॥९१॥ ततः स्वभावाद्धरिवस्यति स्म, प्रबोधमेषोऽप्यनुतिष्ठति स्म । वार्धिः सरिद्भिर्दमुनाः समिद्भिः, प्राणी न तृप्येद्विषयैर्महद्भिः ॥९२॥ निवासमासूत्र्य चिरं स्वाबान्धवैर्विधाय तृप्तिं हृदयेप्सितैर्नवैः । प्रपालितं लालितमप्यनारतं, विमुच्य गन्तव्यमिदं वपुर्मतम् ॥९३॥ धान्यं धनं बन्धुजनोऽतिकान्तः, पञ्चप्रकारा विषया महान्तः । त्याज्यं क्षणादेव वपुश्च दासास्तथापि दीर्घाऽस्ति विशां हृदाशा ॥९४॥ श्रुत्वेति सा धर्मपथि व्रजन्ती, भूपालदत्तं मनुजं भजन्ती । ब्रह्मव्रतं सम्प्रति पालयन्ती, सुश्राविका जातवती लसन्ती ॥९५॥ मासां चतुष्कं तदथोपवासी, यत्याययौ सिंहगुहाधिवासी । दरोत्थितार्यैः समवाचि तस्य, स्यात्स्वागतं दुष्करकारकस्य ॥९६॥ अभिग्रहान्ते समुपागतस्य, व्यालास्पदस्थस्य च कूपगस्य । तथैव चक्रेऽथ तपोधनस्य, श्रीमद्भिरार्यैः कुहनां निरस्य ॥९७॥ श्रीस्थूलभद्रोऽपि च वारवध्वा-गृह्णाति सद्मन्यनिशं सदध्वा । नानाप्रकारं विकृतिप्रविष्टं, प्रायोग्यमाहारमतीव मिष्टम् ॥९८॥ समागतः सोऽपि नल-

॥४३०॥

श्चतुर्मास्यन्ते गुरूणां निकटे सुधर्मा । अभ्युत्थितैस्तैः स्तुतमस्य सत्त्वं, त्रिः प्रशिनतं दुष्करकारत्वम् ॥९९॥ तदा त्रयः
पूर्वनुतास्तु वाचंयमा मिथस्ते ब्रुवते स्म वाचम् । कृत्वेति मन्त्रिप्रसवो यदार्याः, स्निह्यन्ति लोकव्यवहारवार्याः ॥१००॥
विलोक्य वक्त्रं मनुजाः मृजेयुर्ललाम चाप्यादरमाचरेयुः । क्षपन्ति गाङ्गेयमयेऽपि भिक्षां, पात्रे न कुर्वन्ति मनागिवक्षाम्
॥४३१॥ ॥१०१॥ तत्र स्थितोऽसौ स्ववपुःसमाधिना, तथापि जातः स्तवनोचितोऽधुना । यत्यन्यवर्षे मृगराड्गुहास्थितः स्था-
स्यामि वेश्यागृह एवमुद्यतः ॥१०२॥ अभिग्रहं लाति तदा निषिद्धस्तैरार्यवर्यैर्न शृणोत्यशुद्धः । गत्वा ययाचे वसतिं
पणस्त्री, तदोपकोशाऽस्य ददौ नृशस्त्री ॥१०३॥ स्वाभाविकौदारिकदेहभूषिता, धर्मं समीपेऽस्य शृणोत्यदूषिता । तद-
ङ्गसङ्गं स विधातुमुद्यतश्चाटूनि वक्तीच्छति सा न सत्त्वतः ॥१०४॥ प्रबोधनार्थं भणतीति तस्य, प्रदेहि किञ्चित्स च वक्ति
वश्यः । ददामि किं साऽह च लक्षमेकं, प्रदीयतां भो मम सातिरेकम् ॥१०५॥ तत्प्राप्त्युपायं शृणु भूप आस्ते, नेपा-
लदेशे कृतपर्युपास्तेः । पुंसः प्रदत्ते जिनधर्म्यतुल्यं, स कम्बलं सम्प्रति लक्षमूल्यम् ॥१०६॥ देयं तदेवेति निशम्य निर्ग-
तस्तं प्रार्थयामास नृपं स दुर्गतिः । सत्कम्बलं प्राप्य च वंशदण्डके, क्षिप्त्वा सरन्ध्रे वदले ह्यखण्डके ॥१०७॥ एकत्र ॥४३१॥
चौरैः सरणिर्निबद्धा, पक्षी तरुस्थो वदतीति बुद्धः । लक्षं समायाति तदा च चौरस्वामीक्षतेऽमुं यतिमेव घोरः ॥१०८॥
तस्मिँश्च पश्चाद्वलिते स पक्षी, कोकूयते तत्र कुभक्ष्यभक्षी । याति स्म लक्षं पुनरेत्य तेन, प्रेक्ष्यैष उक्तो यतिरद्भुतेन
॥१०९॥ तवाभयं दत्तमहो मया परं, सत्यं निवेद्यं त्वयका ततः परम् । यथास्थितं तच्चरितं तदग्रतः, स ऊचिवान्
संमदतः समग्रतः ॥११०॥ पणस्त्रियै कम्बल एष कष्टतः, प्राप्तोऽस्ति नेपालनृपात्स्वदिष्टतः । लात्वा व्रजन्नस्म्यथ वा-

वयतस्त्वत:, सोऽमुं मुमोचैष सुखात्समागतः ॥१११॥ पणस्त्रियेऽदायि स तेन कम्बलः, क्षिप्तस्तया क्षालमलेऽतिनिर्मलः । लग्नो निषेद्धुं स विनाशनीयस्त्वया न साऽप्याह वचो वरीयः ॥११२॥ यते किमेनं हृदि शोचसे त्वकं, जाड्यात्पुनः किं न हि शोचसे स्वकम् । त्वमप्यहो ईदृश एव लक्ष्यसे, भावी व्रतं प्रोज्झ्य च मां यदिष्यसे ॥११३॥ धृत्वा चिरं शीलमिहाकलङ्कं, प्रक्षाल्य चारित्रजलेन पङ्कम् । भोगं यदिच्छेर्विषभुक्सवर्णं, ध्मातं हरेः फूत्करणैः सुवर्णम् ॥११४॥ अङ्गीकृतं ज्ञानमदभ्रकालं, यदर्जितं सद्गुणरत्नजालम् । गात्रे जरा मृत्युरुपैति तूर्णं, तत्साम्प्रतं धेहि शमं प्रपूर्णम् ॥११५॥ अत्रोकथत्सा गणिका विहस्य, प्रौढेन्द्रियव्यापसमाकुलस्य । श्रीस्थूलभद्रव्रतिना वराकामुना तवास्ते समशीर्षिका का ॥११६॥ सितच्छदैः का तुलना बकानां, केर्ष्या मृगेन्द्रोपरि जम्बुकानाम् । स्पर्धाम्बुजैः का जलशैवलानां, तुलोत्तमैः स्यात्खलु का खलानाम् ॥११७॥ क्व टिट्टिभः क्वापि च राजहंसः, क्व शान्तचेताः क्व पुनर्नृशंसः । क्व चाप्युपानत्क्व शिरोऽवतंसः, क्व चक्रवर्ती क्व [1]पुनर्नृकुंसः ॥११८॥ क्वाहर्पतिः कुत्र पुनः पतङ्गः, क्व वेसरः क्वोरुतरस्तुरङ्गः । क्व वासुकिः कुत्र च [2]वाहरङ्गः, क्व स्थूलभद्रः क्व पुनस्त्वमङ्ग ॥११९॥ प्रेक्षस्व साधो मम यद्भगिन्या, सौभाग्यवत्याऽद्भुतरूपखन्या । न चालितो मेरुरिवाप्तरेखः, श्रीस्थूलभद्रस्तिलमात्रमेषः ॥१२०॥ प्रक्षोभितोऽसि त्वमदृष्टपूर्वया, मयेव गौः प्रोद्गतनव्यदूर्वया । परस्परं भूरितरं तदन्तरं, निरीक्ष्यतेऽत्रापि नृणां निरन्तरम् ॥१२१॥ विशन्ति वह्नौ समरे म्रियन्ते, स्पर्शं सृजन्त्युत्कटकुम्भिदन्ते । केचित्पुनः प्रोच्चनगात्पतन्ति द्विता जिताक्षाः पुरुषा भवन्ति ॥१२२॥ रत्नोभूधनुर्नियं-

१. नटः. २ सर्पः.

दपाङ्गभल्ल्या, नाङ्गे कृता ये पुरुषाः सशल्याः । गङ्गापयोनिर्मलशीलवद्भ्यस्तेभ्यो नरेभ्योऽस्तु नमो महद्भ्यः ॥१२३॥
तच्छिक्षितोऽयं स्खलितप्रतिज्ञः, श्यामाननः पुण्यपथानभिज्ञः । पुनः पुनः संसृजति स्म खेदं, स्मृत्वा गरीयो गुरुगीर्वि-
भेदम् ॥१२४॥ प्राप्तं करे प्रोज्झ्य मणिं रविप्रभं, लातुं व्रजन् काचदलं किलाशुभम् । स्तम्भे स्फिटित्वाऽर्धपथि स्फुट-
॥४३३॥ च्छिरा, हा हास्यमाप्तोऽस्मि विधेर्गतिः परा ॥१२५॥ पूर्वं विधायामृतपानलब्धं, वचोऽप्रमाणं स्वगुरूपदिष्टम् । पश्चात्क-
रोति स्म शुचं वचस्वी, वेश्योपकोशागृहगस्तपस्वी ॥१२६॥ मत्तेभवत्सोऽयनमाप धुर्यस्तपोधनोऽभूद्विषये पटुर्यः । स्वदु-
श्चरित्रं हृदि निन्दतीह, प्रशंसया स्यादगुणोऽप्यनीहः ॥१२७॥ लज्जन्ति ते सद्गुणकीर्तनेन, श्रिता यके स्युर्गुरुसाहसेन ।
प्रशंसया चानृतया तदन्ये, न मान्ति केचिद्वपुषीति मन्ये ॥१२८॥ जगाम सद्यः स्वगुरोः समीपे, कुमार्गसेवाप्रथनप्र-
तीपे । व्रतेन साधुः स कुकर्मसेनादलं जिगाय प्रविनश्यदेनाः ॥१२९॥ आर्यैरभाण्यस्य शरीरपीडाकरा अहिव्याघ्र-
गजाः सनीडात् । नृणां न हि ज्ञानचरित्रभङ्गप्रदाश्च सम्यक्त्वहराः स्युरङ्ग ॥१३०॥ श्रीस्थूलभद्रो भगवानभीक्ष्णं
ह्याक्रामति स्मासिशिरः सुतीक्ष्णम् । छिन्नः परं नो दमुनः शिखायां, दग्धो व्रतन्नव्यथ न क्षमायाम् ॥१३१॥ तुष्टयाऽथ ॥४३३॥
नन्देन कदापि दत्ता, निजस्य कोशा रथिकस्य वित्ता । श्रीस्थूलभद्रस्य तु सा प्रशंसां, चक्रेऽधिकां नो दधती रिरंसाम्
॥१३२॥ सन्त्यत्र लोकेऽतिघना महीनाश्चित्रप्रदाः पञ्चजनाः कुलीनाः । नास्ते न भूतो न च भावुकोऽपि, श्रीस्थूल-
भद्रेण समोऽत्र कोऽपि ॥१३३॥ सदाकृतैतद्गुणमन्त्रजापा, सा तं तथा नोपचरत्यपापा । स्वमन्दिराशोकवनेऽन्यदा सा,
तेनाथ नीता विलसद्विलासा ॥१३४॥ स्वकीयविज्ञानविकाशनाय, प्रोद्दामसौभाग्यसमर्जनाय । लातुं करारोपितचाप-

दण्डः, स चाम्रराशेरुपरि प्रचण्डः ॥१३५॥ निक्षेप तत्रार्कजयाग्रपुङ्खं, पुनः पुनः स्वं शितिचित्रपुङ्खम् । यावत्करा-
भ्यर्णमथार्धचन्द्रच्छित्त्या व्यधात्तत्करगां वितन्द्रः ॥१३६॥ तदा पुनः सा वदति स्म तस्य, स्याद्दुष्करं नेह हि शिक्षि-
तस्य । सिद्धार्थराशिस्थितसूचिकाग्रे, नाट्यं व्यधात्साऽपि तदास्य चाग्रे ॥१३७॥ कृत्वोर्ध्वमंह्री स्वशिरोऽप्यधस्तात्तदा
स ऊचे गुणवत्प्रशस्ता । कृताभ्यसूया हृदि सा वहन्ती, तदेव वृत्तं न्यगदद्धसन्ती ॥१३८॥ न दुष्करं चूतफलप्रक-
र्तनं, न दुष्करं सूचिशिरोऽग्रनर्तनम् । तद्दुष्करं यत्स तपोधनाग्रणीः, क्षुब्धो न मत्सङ्गमितो महागुणी ॥१३९॥ यो
 जन्तुदुर्जेयमनोजमल्लस्फूर्जद्बलोल्लासनिरासभल्लः । यत्क्षोभणे स्युर्मरुतोऽपि नालं, श्रीस्थूलभद्राय नमस्त्रिकालम् ॥१४०॥
सदा प्रकुर्वन्नतिमिष्टभोज्यं, समस्तसुस्वादुरसप्रयोज्यम् । क्षुब्धो न यो मद्गृहवर्तमानः, श्रीस्थूलभद्राय नमः सदा नः
॥१४१॥ मत्काक्षविक्षेपसुतीक्ष्णकाण्डैश्चुक्षोभ विध्यन्नपि यः प्रकाण्डैः । न क्वापि तस्मै मुनिनायकाय, श्रीस्थूलभद्राय
नमः शुभाय ॥१४२॥ परीषहं स्त्रीकृतमत्र सोऽन्यः, सोढुं क्षमः कोऽस्ति महामनोज्ञः । श्रीस्थूलभद्रेण विना मया यः,
सज्जीकृतो न स्मरसेवनाय ॥१४३॥ मदीयसंसर्गवशादपीषद्भ्रष्टो न योऽग्नेरिव सत्करीषः । सुवर्णवत्किं त्वभवत्सुकान्तिः
स स्थूलभद्रो जयतादतान्तिः ॥१४४॥ सा तत्कथां तत्र जगाद वेश्या, तदग्रतोऽङ्गीकृतधर्मलेश्या । तद्वर्णनातो मुमुदे 
स भेजे, सुश्रावकत्वं च गुणैर्विरेजे ॥१४५॥ वन्दापनार्थं प्रययावथो मुदा, श्रीस्थूलभद्रो मुनिनायकोऽन्यदा । सुदूर-
देशागतबन्धुदुर्विधद्विजस्य गेहे स्थितिमूचिवान् बुधः ॥१४६॥ अत्रेदृशं तत्र तथाऽस्ति तादृशं, प्रेक्षस्व [illegible] वरिवर्ति
कीदृशम् । एवं भणित्वा विगते मुनीश्वरे, प्राप्तो द्विजः पृच्छति वर्णिनीमरे ॥१४७॥ भ्राता प्रदत्तं किमपीह तेन, प्रज-

लिप्तं वा मम सुव्रतेन । प्रोक्तं तया नो किमपि प्रदत्तं, यथोक्तवाक्यं च तदाऽवदत्तम् ।।१४८।। निष्कासयामास ततः स तस्मात्स्थानान्निधानं चतुरस्त्वकस्मात् । भुङ्क्ते स्म तत्तत्र स निर्विषादः, कृतेत्ययं साधुकृतः प्रसादः ।।१४९।। अथापतद्द्वादशवर्षचारी, दुष्काल उग्रोऽङ्गिविनाशकारी । भिन्नेषु निर्ग्रन्थव्रजेषु प्रधानपाठोऽपि कैषु ।।१५०।। तन्निर्गमे पाटलिपुत्रमागतः श्रीस्थूलभद्रोऽपि पुनः स्वभावतः । किं कस्य पार्श्वेऽस्ति तदेति निर्मिता, सङ्घेन चिन्ताऽखिलमूत्रसङ्गता ।।१५१।। उद्देशमात्राध्ययनादिचित्रं, यद्यस्य पार्श्वेऽभवदत्र सूत्रम् । संघट्टयित्वैकत एव तानि, ह्येकादशाङ्गान्यथ मीलितानि ।।१५२।। "परिकम्मं सुत्ताइं पुव्वगयं चूलियाणुओगो य । दिट्ठीवाओ इय पंचहा वि नो अत्थि तत्थ पुणो ।।१।।" तदा च नेपालवसुन्धरास्थः, श्रीभद्रबाहुर्गुरुरस्ति सास्थः । स दृष्टिवादं धरतीति कृत्वा, सङ्घेन साधुद्वितयं प्रहित्य ।।१५३।। कथापितं वाचय दृष्टिवादं, सन्त्यर्थिनो यद्यतयोऽनुपादम् । श्रीसङ्घकार्ये कथितेऽमुनाऽपि, प्रोक्तं महाप्राणमिदं मयापि ।।१५४।। पूर्णीकृतध्यानमिदं विना न, स्याद्वाचनादानसमर्थता नः । सङ्घस्य तेनोक्तमथागतेन, सङ्घाटकोऽन्यः प्रहितश्च तेन ।।१५५।। कथापितं चाथ न योऽत्र मन्यते, सङ्घं तु कस्तेन हि दण्ड आप्यते । स सङ्घबाह्यो वदतीति भद्रबाहौ स्वयमेवास्यवदत्समद्रः ।।१५६।। तदा गुरुः प्राह सुबुद्धिमन्तः, प्रेष्याः सुदक्षा मुनयोऽत्र सन्तः यद्वाचनासप्तकमह्नि दास्ये, यावन्निजं ध्यानमहं तदास्ये ।।१५७।। भैक्ष्यागमेऽथो दिवसार्धकाले, संज्ञानिषेधावसरे विकाले । आवश्यके चापि कृते विचारं, तद्वाचनादाय्यहमस्म्युदारम् ।।१५८।। श्रीस्थूलभद्रादितपोधनानां, तदन्तिके पञ्चशती शुभानाम् । तदन्विता लाति च कालवेलासु वाचनास्त्यक्तघनावहेला ।।१५९।। ते चैकशो द्विस्त्रिरपि

।।४३५।।

प्रयुक्तं, चित्ते न यावद्धतेऽह्नि नक्तम् । तावत्तु सर्वेऽपसृताः किलामी, श्रीस्थूलभद्रः स्थित ऊर्ध्वगामी ॥१६०॥
आर्येण चाथो तनुतावशिष्टे, ध्याने सति क्लाम्यसि नेति पृष्टे । ऊचे स नो मे क्लम आह चार्यः, कालं प्रतीक्षस्व कियन्तमार्य ॥१६१॥ वृद्धाचना दध्मि तवाविलम्बं, गुरुं च पप्रच्छ स निर्विडम्बम् । कियन्मया भो भगवन्नधीतं, स चाणुमेरूपमयाह नीतम् ॥१६२॥ तवात्र सूत्राणि बभूवुरष्टाशीतिस्त्वथ स्तोकदिनैः पटिष्ठा । तत्पूतिरास्ते तव भो भविश्री, सुखेन दुष्कर्मलताजयिश्री ॥१६३॥ पूर्वाण्यधीतानि दश क्रमेण, वस्तुद्वयोनान्यमुनाऽश्रमेण । सस्थूलभद्रा गुरवोऽन्यदाऽऽप्ता, विहारतः पाटलिपुत्रमाप्ताः ॥१६४॥ बाह्ये वने तेऽपि च तस्थिवांसस्तान्नन्तुमायान्ति घनाः पुमांसः । ता याममयोऽप्यैयरुरत्र यक्षाद्याः स्थूलभद्रस्य हि सप्त दक्षाः ॥१६५॥ पृच्छन्ति नत्वा गुरुमस्ति कुत्र, श्रीस्थूलभद्राख्यमुनिः पवित्रः । तेनोदित देवकुले निभाल्यः, श्रीतो गुणन्नस्ति सुकीर्तिमाल्यः ॥१६६॥ समुत्थितास्ता गुरुसन्निकृष्टाद्भ्रातुर्निनंसाधिकयैऽलिहृष्टाः । सप्तापि साध्व्यस्तदनुप्रकृष्टाचारप्रचारप्रशमैकनिष्ठाः ॥१६७॥ आगच्छतीर्वन्दनहेतवे ता, विलोक्य सोऽहङ्कृतिपूर्णचेताः । पञ्चाननाकारधरश्च जातस्त्रस्तास्तमालोक्य च तास्त्वरातः ॥१६८॥ उपद्रुतोऽयं हरिणा शरीरे, गत्वा वदन्ति स्म गुरोस्तु तीरे । आर्यस्तदाऽऽहेति वचोऽतिहारि, स स्थूलभद्रो न पुनर्मृगारिः ॥१६९॥ आगत्य ताभिः प्रणतोऽनसूयः, श्रीस्थूलभद्राख्यमुनिः स भूयः । तास्तेन पृष्टाः कुशलप्रवृत्तिं, यक्षाऽऽह तस्मै सिरियाङ्कभित्तिम् ॥१७०॥ यथैष दीक्षाग्रहणादनन्तरं, बलेन पर्वाह्ण्युपवस्तमुत्तरम् । प्रकारितः सोऽपि ततस्त्रिविष्टपं, प्राप्तश्च मृत्वाऽलिरिवोन्मदद्विपम् ॥१७१॥ अत्र्यपिहत्याभयभीतचित्ता, तपःप्रभावादहमप्रमत्ता । नीता विदेहे जिनशासना-

धिष्ठाय्योपसीमन्धरमर्दिताधिः ॥१७२॥ आनीतवत्यध्ययनद्वयं स्वहं, सद्भावनामुक्त्यभिधं महामहम् । उक्त्वेति तास्तत्र गता निजास्पदं, द्वितीयवास्तेऽथ मुनिः ससंमदम् ॥१७३॥ गुर्वन्तिकेऽगान्नवसूत्रशिक्षामहासमुद्देशकृतेऽथ तदा । मुखेऽप्ययोग्यस्त्वमितीव वक्ति, प्रोद्देशमस्मै न गुरुर्व्यनक्ति ॥१७४॥ तदा प्रमादं स्मरति स्म स स्वकृतं यशोव्याप्तसमस्तविश्वः । नाहं करिष्ये पुनरित्यवादीद्गुरोस्त्वदन्योऽपि यतः प्रमादी ॥१७५॥ तस्मान्न वच्मीति गुरुः प्रपेदे, कष्टेन स्पष्टे सति चित्तभेदे । अग्रेतनं पूर्वचतुष्कमस्य प्रादाद्गुरुः सूत्रत एव वश्यः ॥१७६॥ तस्मै पुनर्नो दशमस्य वस्तुद्वयं सदर्थं कथितं ततस्तु । तावत्प्रवृत्तं भुवि यावदार्यवज्राभिधोऽभून्महिमाभिरार्यः ॥१७७॥ श्रीस्थूलभद्रस्य मुनेः समासाच्चरित्रमेतत्स्वमतिप्रभासात् । कृतं स्वबुद्धया शिवसुन्दरेण, प्राज्ञैर्विशोध्यं प्रगुणादरेण ॥१७८॥ सिरिथूलभद्दपहुणो पसायचरियाइं तिन्नि तस्सावि । सीहविउब्वणगुणणं कहणं दव्वस्स, सयणाणं ॥१७९॥ ॥ इति काव्यतुर्यपदस्थप्रमादाचरणोपरि **श्री स्थूलभद्रचरित्रम्** ॥

अथ वयस्त्रिकेऽपि धर्मावसरो दुर्लभ एव तदुपरि काव्यमुच्यते—

**बालत्तणं खिड्डुपरो गमेइ, तारुण्णए भोगसुहे रमेई ।**
**थेरत्तणे कायबलं वमेई, मूढो मुहा कालमइक्कमेइ ॥६८॥**

**व्याख्या**–बालत्वं क्रीडापरः प्राणी गमयति मुधा हारयति "बालः प्रायो रमणासक्तः" इत्युक्तेः । अथ तारुण्ये प्राप्ते भोगसुखेषु रमते । तदनु स्थविरत्वे वार्धके वपुर्बलं वमति एवं मुग्धात्मा मुधा नैरर्थक्येनैव कालं समयमति-

॥४३७॥

क्रामतीति काव्यार्थः ॥

अथ शैशवादश्रेयस्करणं श्रेयस्करमित्युद्भावयन्नग्रिमं काव्यमाह—

**लहुत्तणाओ वि न जेण पुन्नं, समज्जियं सव्वगुणोहपुन्नं ।**

**थेरत्तणे तस्स य नावयासो, धम्मस्स जत्थ त्थि जरापयासो ॥६२॥**

**व्याख्या**---शैशवादप्यारभ्य येन प्राणिना पुण्यं न समर्जितं नात्मसात्कृतं पुण्यं सत्कर्मपुद्गला इति दानशीलाद्यं, किं भूतं तत् ? सर्वगुणौघैः पूर्णं तस्य स्थविरत्वे नावकाशो धर्मस्य शक्तिवैकल्येन शीतवातातपाद्यनेकतनुक्लेशाधिसहनासामर्थ्यप्राप्तेरिति नावकाशो धर्मस्य, यत्र जरसा जर्जरीभावमासादयेद्वपुर्मृत्स्नाभाण्डवदिति काव्यार्थः ॥

अत्रार्थे श्रीअन्तकृद्दशासूत्रोक्तोऽतिमुक्तकाभिधेयक्षुल्लकसाधुसम्बन्धः सन्धिबन्धेन प्रस्तूयते–

इह भरहखित्ति अत्थइ पसिद्ध पोलासनामि पुर धणसमिद्ध । जिहिं वसइ लोय परधणअलुद्ध जलहिव्व जु परचकिहिं अखुद्ध ॥१ । जयजयरव मग्गण भणइं जस्स जयनाम रज्ज पालेइ तस्स । न हु देससीम जंपेइ जस्स अइउब्भडरिउघड जगि अवस्स ॥२॥ पत्तक्ख सरस्सइ सिरीय जाणि तसु सिरीय भज्ज अइमहुरवाणि । अनुलडहरूवलावन्नखाणि वरकमलसुकोमलचरणपाणि ॥३॥ इत्थंतरि सुमिणहमज्झि दिट्ठ अइमुत्तयतरु अइसयवरिट्ठ । सा तम्मि चेव दिवसम्मि गब्भ उव्वहइ जेम जलभार अब्भ ॥४॥ नवमास अद्ध अट्ठमदिणम्मि पसवइ सा नंदण सुहखणम्मि । अइमुत्तय तसु अभिहाण किद्ध अइउच्छव नव नव नयरि सिद्ध ॥५॥ हत्थाउ हत्थि सो संचरंत पिउमाइमणोरह पूरयंत । दीसंत

सुपिय दंसण अईव निबु मन्नइ नियकुलघरपईव ॥६॥ मंदरगिरि सुरतरु अंकुरु व्व, सो वड्ढइ पियघरि गुणिअपुव्व । मम्मणघण वयण भणंतु सव्व परियण आणंदइ रूवि दिव्व ॥७॥ घात–इत्थंतरि सामिय सिद्धिहिं गामीय विहरंतउ सिरिवीरपहो । संपत्तओ तिणि पुरि सेविय नरसुरि पुन्निमचंदसमाणमुहो ॥८॥ भास–उज्जाणपाल आविय नरिंद
।४३९॥ वद्धाविउ चरमजिणिंदचंद । सामिय इह पत्तउ विजयवंत मुणिवरपरिवारिहिं गहगहंत ॥९॥ तसु दिद्ध पारितोसिय महंत धणदाणसयं बहुभत्तिमंत । अह चल्लिय पिल्लिय गुणहिं राय गंतूण तत्थ पहु नमइ पाय ॥१०॥ तिपयाहिण-पुव्व नमित्तु नाह संतोस धरइ नियमणि अगाह । पारद्ध धम्मदेसण जिणेण पीयूसवरिसमहुरत्तणेण ॥११॥ भो भव्व सव्वसंसारसार नरजम्म लहे विण अइउदार । जिणधम्मरम्म जणदिन्न सग्ग आराहउ साहुओ सिद्धिमग्ग ॥१२॥ चत्तारि न किज्जइ मणि कसाय पच्चक्खरूव नणु ते पिसाय । वसि किज्जइ ते नियउज्जमेण खमदमउवसमबलिनिच्छएण ॥१३॥ इचाइ सुदेसण रससुसाउ परिपीय सव्वजण गयविसाउ । जिणगुण थुणंतु नियगेहपत्त पहुभत्तिकरंबियसुद्ध-चित्त ॥१४॥ अह छट्ठ सुट्ठु तवपारणम्मि आपुच्छिय पहु भिक्खाखणम्मि । पोलासपुरिहिं गोयममुणिंद आवइ मुहचंगि-मविजियचंद ॥१५॥ अह रायमग्गि अइमुत्तनाम पुरकुमर समन्निय मणभिराम । खिल्लंतउ अच्छइ कंदुगेण नाणाविहकी- ॥४३९॥
लारसभरेण ॥१६॥ नहु थक्कइ हक्कइ पुरकुमार रे धावहु लावहु कांइवार । इय जंपिरेण हरिसेण तेण दिट्ठउ गोयमरिसि तक्खणेण ॥१७॥ पयपउमि लग्ग सो मुणिवरस्स बहुपुन्नजोगि समुवागयस्स । को रायहंस गइ सिक्खवेइ को उच्छुदंड महुरिम ठवेइ ॥१८॥ कुलवंत होइ नणु विणयवंत विणसिरिक्खिय अक्खिय सो महंत । अंगुलीयलग्ग अइमुत्त वत्त

इय करइ हरइ मुणिवरहचित्त ॥१९॥ तुम्हे पहु निवसहु कत्थ ठामि पुरनयरदेसि आरामिगामि । पुरमज्झि भमहु कुण कारणेण तो अक्खिय गोयममुणिवरेण ॥२०॥ **घात–**भो भिक्खाकारणि छट्ठहपारणि हउं भमामि पुरि कुमरवर । सिरिवीरहपासिहिं नणु वणवासिहि वासमज्झि अच्छइ पवर । २१॥ **भास–**इय गुरुवयण सुणेवि कुमारो सिरिअइमुत्त कहइ जगसारो । सामीय मज्झघरिहि पधारउ सुकयवल्लिवणराइ वधारउ ॥२२॥ आवंतउ नियनंदण निरखीय सुगुरुसरिथ जणणी मणि हरखिय । पुन्नवंत अप्पणपउं मन्नइ कुमरतणा गुण वयणिहिं वन्नइ ॥२३॥ लक्खणि संमुह आविय अंबा गुरुदंसणि पुलइय अविलंबा । पयजोहारिय मोयग अप्पइ अप्पण पुन्नवंतधुरि थप्पइ ॥२४॥ चित्तवित्तसुद्धीय मुणेविण पडिगाहइ मुणिपत्तधरे विण । तो अइमुत्तकुमर मणि तुट्ठओ मज्झ मणोरह फलियगरिट्ठउ ॥२५॥ महुरवाणि अह नंदण भासइ जणणी जणयह मण उल्लासइ । सामि कहउ तुम्हि किहि जाएसहु वीरपासि आवहु आएसहु ॥२६॥ गोयमगणहर वणिहिं पहुत्तउ मणहरकुमरिहिं सो संजुत्तउ । रूवकंतिरवि जिम दिप्पंतउ उग्गपरीसहरिउ जिप्पंतउ ॥२७॥ सामिय कुमर पिक्खि समुवागय पुच्छइ वच्छ सच्छमइ सागय । देसणअमियरसिहिं सिंचेई भवदुहदाहसु परिवंचेई ॥२८॥ इहु असारसंसार गणिज्जइ धम्मसार नरजम्मि सुणिज्जइ । देउलसिरि जिम धयवडअंचल धणजुव्वणपरियण सहु चंचल ॥२९॥ जररक्खसि आवइ धावंती छलइ सयणजण इत्थ न भंती । तसु जो अप्प न रक्खइ मुक्खो अंतकालि सो होइ विलक्खो ॥३०॥ आहिवाहि जा तणु न विवाहइ सोगसंग जा अंग न गाहइ । इंदियसत्तिहाणि नहु गच्छइ जाव पिंडबल पयडउ अच्छइ ॥३१॥ ताव धम्म आयरिहिं करिज्जइ जीवियजम्मतणउ फल लिज्जइ । सव-

पंजलि जिणवाणी पिज्जइ जरामरण दुह दुरि गमिज्जइ ।।३२।। दीणहीणजण करुणा किज्जइ पाणीय जाणी नेव हणि-
ज्जइ । अलिय अदत्त अबंभ निवारउ अप्पण पउं संसारह तारउ ।।३३।। **घात**–इच्चाइ सुणेविण तत्त मुणेविण चि-
त्तिहिं रंजिय कुमरवरो । संपत्तउ नियघरि वुल्लइ अवसरि आवीय जणणीजणयपुरो ।।३४।। **भास**—घणवुट्ठइ वण
।४४१।। जिम उल्लसीयउ मह मणु अज्ज धम्मि नणु वसीयउ । वद्धमाण जिणवर वक्खाणीय धम्मवत्त मइं निच्चल जाणीय ।।३५।।
धम्म इक्क परमत्थ मुणिज्जइ अवर सहू अकयत्थ गणिज्जइ । जउ चिंतामणि करियलि कलीयउ तउ किं काच करइ जगि
रलीयउ ।।३६।। सामिय पासि गहिसु हउं दिक्खा बहु परिणामिसु निच्चल सिक्खा । घरि घरि गोयरचरिय भमेसो
चंचलचित्तपयंग दमेसो ।।३७।। तो पियरिहिं पुच्छियउ कुमारो, एवडतइं किम मुणिय विचारो । महुर वयणि अइमु-
त्तउ बुल्लइ पिउ सणेहगुल्लिहिं नहु दुल्लइ ।।३८।। जं मइं जाणिय तं नवि जाणिव जं जाणिय तं पुण न वियाणिय ।
एरिस असमंजस तब्भासिय निसुणिय माइपियर उल्लासिय ।।३९।। वच्छ कहं एरिस तउं जंपइ तो अइमुत्तउ बोलइ तं
पइ । एय वत्त परमत्थ महंतउ तुम्हि बुज्झउ मइं पयडिज्जंतउ ।।४०।। जउ जायउ तउ निच्छइ मरई पुन्नपावसत्थिहिं
अणुसरई । तं न मुणिज्जइ जं पुण किग्गिलणि जीव मरेस्सइ पुरि बाहिरि वणि ।।४१।। नवि बुज्झउं कुणसउं जिउ ।।४४१।।
गच्छइ नरयमज्झि तिहिं दुक्खिय अच्छइ । जाणउं पुण सो वेढिय कम्मिहिं जाइ सही संकिण्ण अधम्मिहिं ।।४२।। **घात**–
तो अक्खइ राया मिल्लिय माया जाया संजलि तउं लहु य । कह चरण चरेसी कट्ठ करेसी खुह पिवास दुह अइबहुय
।।४३।। **भास**–तुह पउमपत्तसुकुमालदेह लायन्नपुन्न नणु सुक्ख गेह । खग्गधारतिक्खा पुण दिक्खा कह मग्गिसि घरि

घरि पुरि भिक्खा ॥४४॥ पंचमहव्वयमेरु धरेवा भुयबलि नियसिरिलोयकरेवा । दुसह परीसह अंगि सहेवा दुक्खसुक्ख न लगार कहेवा ॥४२॥ सत्तुमित्त तणतुल्ल गणेवा विणयगुणिहिं सुसत्थ भणेवा । दुक्कर किरिय करिसु तउं केम वच्छ सुक्ख अणुहवि सुर जेम ॥४६ । भुत्तभोग चारित्त धरे जे रहि घरि नंदण रज्ज करे जे । कहइ कुमार किं पि न दुहे-लउ धीर नरह सव्वं पि सुहेलउ ॥४७॥ दुद्धर गिरि भुयबलि उप्पाडइ मेरुसिहरि अप्पण पउं वाडइ । गयणमग्गि चरणहबलि चल्लइ सेसनाग नियकंठिहिं घल्लइ ॥४८॥ तिहुयण जण नयणह विण कहइ जं असज्झ तं कज्ज पसाहइ । इय अइमुत्त वयइ पिउ अग्गइ दुक्करदिक्ख सिक्ख सो मग्गइ ॥४९॥ उत्तालत्तणवाल न किज्जइ कित्तिय काल विलंब वहिज्जइ । इय जा जणणि जणय तं वुल्लइं पुत्तविरह जाणी मनि डुल्लइं ॥५०॥ ताव कुमार कहइ भो निसुणह जीविय जुव्वण चवल वियाणह । बालप्पणि जिणि धम्म न किद्धओ तेणि अमिय मिल्हवि विस पिद्धउ ॥५१॥ बाल वुड्ढ तरुणो वि न छुट्टइ लिज्जइ जमकिंकरिहिं अखुट्टइ । धण परियण सहु छड्डिय पच्छइ संबल विणु जणु परभवि गच्छइ ॥५२॥ इय निसुणिय सुयपभणिय माया हरिमुल्लसिरसरीरा जाया । वलि किज्जउं तुह एरिस वुल्लइ छहि बरसिहिं पंडिव्व अतुल्लह ॥५३॥ कहमवि माइपियरि अणुमन्निय संघसयल अच्चिय बहुमन्निय । रयणुज्जल आभरण अलंकिय चरण कज्जि चल्लिय निस्संकिय ॥५४॥ नरसहस्सवाहणसिवियागय धरिय छत्तचामरजुय संगय । जय जय रव मग्गणजण बुल्लइं पियरचित्त सुयनेहिंणि सल्लइं ॥५५॥ जह तारायणि ससि परियरियउ परियणि सयणि तह अणुसरीउ । तूरनादिगिरि अंबर गज्जइं महुरभेरि झल्लरि तिहिं वज्जइं ॥५६॥ रयहरणिहिं मुणिवेसिहिं जुत्तउ अइ असार संसार विरत्तउ । तिहिं

गुत्तिहि गुत्तउ **अइमुत्तउ** सामी समवसरणि संपत्तउ ।।५७।। जह राया तह **सिरियामाया** विन्नवंति पणमिय पहुपाया ।
अम्ह गुरुह पहु सिक्खा दिज्जइ कुमरो जि सुहेण करिज्जइ ।।५८।। तो दिक्खिय पहुणा नियहत्थिहि मिलियउ रायकुमर
मुणिसत्थिहि । छव्वारिसिउवि संजम पालइ पावपंकभर दूरिहि टालइ ।।५९।। सामि भणइ भूवइ तउं धन्नउ जसु
।।४४३।। नंदण इणिपरि कयपुन्नउ । होसइ चरमसरीरी निच्छइ धन्न पुन्न जे लोयणि पिच्छइ ।।६०।। मास वरिस सो कइया
होही जइया अम्हे विहु कयसोही । पहुपासिहि चारित्त गहेस्सउं मोहपास मूलिहि छिंदेस्सउं ।।६१।। इय चिंतंता जिणव-
वंदिय निय कुमार मुणिवर अभिनंदिय । जणणि जणय नियमंदिरि पत्ता देसण अमीयरसहि संसित्ता ।।६२।। अह
वरसालइ बाहिरि पत्तउ थविरसत्थि मुणिवर अइमुत्तउ । वाल बहुल खिल्लंता गंठिय रमणकज्जि हुअओ उक्कंठिय ।।६३।।
मट्टी तणीय पालि सो बंधइ खलहलंत जलवेगिहि रुंधइ । भरितलाय जिमडिगह मिल्हइ नाव जेम दंडिहि करि पिल्लइ
।।६४।। हउं नाविउ मुज्झ चल्लइ नाव इम जलि रमलि करइ सो जाव । वय अणुसारइ मइ उप्पज्जइ सच्चिय वत्त जणह
नणु गिज्जइ ।।६५।। थविरमुणिंदिहि ताव सुहकीय तव्वयणिहि खुड्डयमुणि संकिय । लज्जिय जाव अहोमुह जाओ सम-
वसरणि मुणिसत्थिहि आओ ।।६६।। थिरमुणिहि पहु अग्गइ साहिय दगमट्टी य नणु एणि विराहिय । मा हीलह ।।४४३।।
अइमुत्तकुमारं दुद्धरउद्धियसंजमभारं ।।६७।। अन्नपाणदाणिहि ससालह अम्ह सीस खुड्डय परिपालह । इय पहु जाम भणिय
ता पुच्छइ थविरमुणिंदे सुणंता अच्छइ ।।६८।। भयवं भव्व अभव्व कुमारो चरमतणू अचरिमतणुधारो । पहु आइसइ
भव्व चरमंगी इय सुणित्तु मुणि हुय सुहसंगी ।।६९।। पहुपइ लग्गिय सुट्ठु खमंतउ पुण पुण विणयभत्ति पणमंतउ ।

इक्कारस अंगाइं अहिज्जिय गिरि अइमुत्ति चरणविहिसज्जिय ॥७०॥ सव करेइ गुणमणिसंवच्छर न धरइ अरइ रई दम मच्छर । अट्ठकम्मदुम मूलुच्छिंदिय केवलनाणलच्छि अभिणंदिय ॥७१॥ तेर वरिस अव्वाऊ पालिय संजमजलि अप्पउं पक्खालिय । निव्वुरमणि सयंवरि वरीयउ दंसणनाणरयणगणभरीयउ ॥७२॥ धात-इणिपरि लहुयत्तणि जेम वुड्ढत्तणि अइमुत्तउ जिणधम्मकिय । तिणि परि काराधउ सिवसुह साधउ भवियलोय खेमेहिं सहिय ॥७३॥ ॥ इति **श्रीअतिमुक्तकसंधिः** ॥

अथ पूर्वकृतसुकृतमाहात्म्यमाह—

**पुव्विं कयं जं सुकयं उदारं, पत्तं नरत्तं नणु तेण सारं ।**
**करेसि नो इत्थ जया सुकम्मं, कहं सुहं जीव लहेसि रम्मं** ॥७०॥

**व्याख्या**—पूर्वं पूर्वजन्मनि कृतं निर्मितं यत्सुकृतं दानशीलतपःप्रभृति । किंभूतं ? उदारं अद्भुतं स्वर्गमोक्षसुखप्रदाने जिनधर्मस्य दानशौण्डत्वात्, न तथाऽन्यधर्मस्य साधर्म्यं, तत उदारमिति, प्राप्तं लब्धं नरत्वं नरजन्म । नन्विति निश्चितं । तेन कारणेन सारं तत्त्वभूतं सुकृतानुभावेनैव सत्कुले जन्म लभ्यते, नान्यथा । एवंविधायां धर्मसाधनसामग्र्यां प्राप्तायां सत्यामपि रे प्राणिन् करिष्यसि न ह्यत्र जन्मनि यदा सत्कर्म कथं तदा सुखं लप्स्यसे रम्यं चेतोहारि इति काव्यार्थः ॥

अत्रार्थे **श्रीमृगापुत्रेण** यथा मातर पित्रोरग्रे स्वमनोरथ एतदुपदेशगर्भो यथोद्दिष्टस्तथैवोपदिश्यते—

पुरं वनोद्यानविभूषयाऽऽवृतं, नाम्नास्ति सुग्रीवपुरं रमाभृतम् । चकास्ति तस्मिन् बलभद्रभूपतिर्यः प्रष्ठनीतिव्रतताव-
¹नूपति ॥१॥ गुणाकरस्तस्य गृहेऽस्ति कामिनी, नाम्ना मृगा भर्तृमनोनुगामिनी । तयोर्मृगापुत्र इति प्रसिद्धिमान्, सुतो
बलश्रीरभवन्नयर्द्धिमान् ॥२॥ स यौवराज्यं सुकृती दधाति, प्रेष्ठः स्वपित्रोर्न गुणान् जहाति । सौधस्थितः क्रीडनमङ्ग-
नाभिः, करोति दोगुंदकवत्सवाभिः ॥३॥ मणीमयावासगवाक्षसङ्गतः, पुरश्रियं पश्यति चित्तरङ्गतः । स्थाने चतुष्कत्रि-
कचत्वरादिके, दृष्टिं ददच्चेतसि तुष्टिवान् स्वके ॥४॥ तेषु त्रिकादिष्वथ संयतं समागच्छन्तमालोकयति स्म निस्तमाः ।
तपःक्षमासंयमविभ्रमाधरं, स शीलवन्तं श्रमणं शमाकरम् ॥५॥ मृगासुतस्तं किल निर्निमेषया, प्रेक्षिष्ट साधुं निजदृ-
ष्टिरेखया । व्यचिन्तयद्रूपमभूदृशं मया, व्यलोकि किं क्वापि पुरा दृशाऽनया ॥६॥ जातिस्मृतिर्भव्यगभस्ति-
मालिनस्तदाऽस्य रम्याध्यवसायशालिनः । जज्ञे मनोज्ञे मुनिदर्शने सति, प्राप्तस्य मूर्छां प्रससार सन्मतिः ॥७॥ श्राम-
ण्यमैक्षिष्ट पुरा कृतं स्वयं, सस्मार जातिं च पुरातनीमयम् । महर्द्धिको मंक्षु मृगातनूद्भवः, प्राप्तो विरक्तिं विषयेसु
सूत्सवः ॥८॥ रक्तान्तरः संयममार्गलम्भे, भजन् विरक्तिं च भवे सदम्भे । इत्यब्रवीदग्रत एत्य मातुः, पितुश्च संयोज्य करौ
प्रमातुः ॥९॥ श्रुतान्यहो पञ्च महाव्रतानि, श्रुतानि तिर्यङ्नरकाश्रितानि । मयोग्रदुःखानि भवाद्विरक्तः, पित्राज्ञया
प्रव्रजनेऽस्मि सक्तः ॥१०॥ हे अम्ब हे तात विषानुरूपा, भुक्ता मया भोगभरा विरूपाः । पश्चाद्विपाके कटुतां भजन्तः,
कष्टं गरीयोऽनुमतां सृजन्तः ॥११॥ कुशाग्रवार्बिन्दुचलं शरीरं, पूत्युद्भवं चाशुचिताकुटीरम् । जीवस्य च स्थानमिदं

१ अनूपो जलमयः प्रदेशस्तद्वदाचरति.

॥४४५॥

ह्यनित्यं, दुःखस्य बिभ्रत्परमाधिपत्यम् ॥१२॥ अशाश्वतेऽङ्गे न रतिं लभेऽहं, पश्चात्पुरा त्याज्यमिदं हतेहम् । जितो-ल्लसद्बुद्बुदवारिफेनं, स्वचापलेनोन्मदकर्मसेनम् ॥१३॥ नो रंरमीत्यत्र हि मानुषत्वे, मनो ममाविष्कृतरोगसत्त्वे । जनुर्जरामृत्युभयाभिभूते, सदाप्यसारे कलुषैर्विधूते ॥१४॥ दुःखानि रोगा मृतिरस्ति दुःखं, जन्मास्ति दुःखं जरितास्ति दुःखम् । क्लिश्यन्ति जीवाः सकला यदर्थं, स दुःखमेवास्ति भवस्तदर्थम् ॥१५॥ हट्टो गृहं क्षेत्रमथो हिरण्यं, स्त्रीपुत्रबन्धवादि न मे शरण्यम् । मया स्वकं संहननं हठेन, प्रोन्मुच्य गन्तव्यमिहावशेन ॥१६॥ कान्तानि यद्वत्परिणामगानि,-स्युर्नैव किंपाकतरोः फलानि । रम्याणि नो भोगतरोः फलानि, स्युरत्र तद्वत्परिणामजानि ॥१७॥ निःशम्बलोऽध्वान, महो महान्तं, यः पुरुषः सर्पति ही नितान्तम् । गच्छन् स दुःखं लभते पिपासा, क्षुधातुरो भूरितरप्रयासात् ॥१८॥ यश्चेत्थमत्रानिचय्य पुण्यं, नरः प्रयात्यन्यभवोर्वरण्यम् । गच्छन् स रोगैः परिपीड्यमानः, पदे पदे स्यादसुखैः सहानः ॥१९॥ पाथेययुक्तः सरणिं महान्तं, यश्चाध्वगो गच्छति भो नितान्तम् । गच्छन् स सौख्यं लभते पिपासाक्षुदादिकष्टै रहितोऽप्रयासात् ॥२०॥ इत्थं भवे योऽत्र विधाय पुण्यं, नरः प्रयात्यन्यभवोर्वरण्यम् । स संपनीपद्यत आप्तशर्मा, गच्छन् विमुक्तो व्यथयाऽल्पकर्मा ॥२१॥ यथा प्रदीप्तेऽपि गृहे गृहस्य, स्याद्यः प्रभुस्तस्य शुभं विमृश्य । उपेक्षते सर्वमसारभाण्डं, बहिर्नयत्येव स सारभाण्डम् ॥२२॥ एवं जरामृत्युयुगेन लोके, सति प्रदीप्ते न शुभं विलोके । स्वं तारयिष्यामि भवाब्धिमध्यादनुज्ञयाऽहं भवतोः स्वबुद्ध्या ॥२३॥ तदाहतुस्तत्पितरौ सुदुष्करं, भोः पुत्र चारित्रमिहास्ति दुश्चरम् । भिक्षोः सहस्राणि पुनर्गुणानां, धार्याणि सन्त्यत्र सदोल्बणानाम् ॥२४॥ अरौ च मित्रे समताऽनिवारा,

॥५४६॥

भूतेषु कार्या निखिलेषु तारा । प्राणातिपाताद्विरतिश्च यावज्जीवं विधेया जगतीह तावत् ॥२५॥ सदोपयुक्तेन मृषा न
भाषाऽऽभाष्या कृतावद्यतराभिलाषा । हितं मितं भोः परिभाषणीयं, सेव्या स्थितिः सद्गतिसाक्षिणीयम् ॥२६॥ न
दन्तसंशोधनमात्रवित्तं, ग्राह्यं परस्यानिशमप्यदत्तम् । लेयं महादुष्करमेषणीयं, हेयं तथान्नाद्यमनेषणीयम् ॥२७॥ अब्र-
॥४४७॥ ह्मचर्यादविशं विरक्तिर्दार्या मनोऽभीप्सितभोगभुक्तिः । महाव्रतेष्वेतदतीव दुष्करं, धार्यं व्रतं वा करवर्तिपुष्करम् ॥२८॥
धनेषु धान्येषु परैधितेषु, त्याज्यं मनः सङ्ग्रहकारितेषु । आरम्भवृत्तिः सकला प्रहेया, सुदुष्करा निर्ममताऽभ्युपेया
॥२९॥ चतुर्विधाहारकृतापहृत्या, त्याज्यं निशाभोजनकं विरत्या । स्याद्दुष्करस्त्यक्तुमसौ मुनीनां, यत्सचयः प्रोज्झितस-
न्निधीनाम् ॥३०॥ सह्याश्च शीतोष्णतृषाबुभुक्षाः, कार्या न दंशे मशकेऽङ्गरक्षा । सह्या मलाक्रोशनदुःखशय्याः, स्पृष्ट्वा
तृणानां सह कष्टमय्या ॥३१॥ भिक्षाटनं याचनमप्यलाभता, बन्धो वधस्ताडनतर्जनावता । द्वाविंशतिर्व्यक्तपरीषहा-
णामस्तीह सह्या सुधियाऽप्रमाणा ॥३२॥ कापोतिकी वृत्तिरियं सशङ्का, स्याद्दुष्करा दोषहृतेरपङ्का । आत्मेक्ष्यते ब्रह्म-
गुणानुसर्ता, स्यात्केशलोचोऽपि च कष्टकर्ता ॥३३॥ त्वमाश्रितप्रक्षणपिण्डसाम्यः, सुखी मृदुः स्त्रीजनचित्तकाम्यः ।
भोः पुत्र न स्याः प्रभविष्णुरङ्गे, धर्तुं चरित्रस्य गुणं सुचङ्गे ॥३४॥ आजीविताद्भार उरुर्गुणानां, वाह्योऽस्त्यविश्रामत- ॥४४७॥
योल्बणानाम् । यः स्यादयोभार इवातिदुःसहः, स्फुरद्बलानामपि वत्स दुर्वहः ॥३५॥ आरब्धमेतत्तरणाय नव्यं, गङ्गा
नदीश्रोत इह प्रसव्यम् । स्वकीयदोर्भ्यां तरणीय एष, स्फुरद्गुणाम्भोधिरवाप्तरेखः ॥३६॥ आस्वादमुक्तः कव-
लोऽधमायाः स्याद्याहशः सम्प्रति बालुकायाः । स्यात्संयमस्ताद्दृगसिस्थधारागमोपमाः सन्ति तपःप्रचाराः ॥३७॥ एका-

न्तदृष्ट्याऽहिरिवोपलक्षितुं, स्यात्संयमो दुष्कर एष शिक्षितुम् । अयोमयाः स्वेन च चर्वणीया, यवा मुखेनामुखमर्पणीयाः ।।३८।। यथोग्रकष्टाय च जातवेदःशिखाप्रपानं भुवि जायतेऽदः । श्रामण्यकं पुत्र तथाऽवसेयं, स्वयौवने दुष्करमप्रमेयम् ।।३९।। दृतिर्न यद्वत्सुकराऽनिलेन, स्यात्कस्यचित् पूरयितुं बलेन । क्लीवेन नो पालयितुं प्रपार्यते, तद्वद्यतित्वं न तमोऽपि वार्यते ।।४०।। स्याद्दुष्करस्तोलयितुं यथा [1]नुस्तुलाधिरूढः किल रत्नसानुः । तथा चरित्राचरणं गवेष्यं, कष्टाय निःशङ्कतया विशेष्यम् ।।४१।। न स्यात्तरीतुं सुकरो भुजाभ्यां, रत्नाकरो यद्वदसावुभाभ्याम् । तथोपशान्तेर्दमवीचिमाली, स्याद्दुस्तरः पुण्यपथांशुमाली ।।४२।। मनुष्यभोगानुपभुङ्क्ष्व पञ्चप्रकारयुक्तांस्त्वमतः सदञ्चः । [2]भुक्तेष्टभोगस्तदनूद्वहाहो, भूयाः सधर्मः परिघाभबाहो ।।४३।। ततो मृगापुत्र उवाच मातस्तातैवमेवेदमुदीरणातः । सुदुष्करं किञ्चिदहो नरस्य, स्यान्नेह लोके तृषयोज्झितस्य ।।४४।। सोढा अनन्ताः स्वमनःशरीरजा, दुर्वेदना नित्यमिमाः समं रुजाः । आप्तानि दुःखानि घनैनसा भयान्यमून्यनेकान्यपि सर्वतो मया ।।४५।। स्फुरज्जरामृत्युभयार्त्यरण्ये, भवेऽत्र चातुर्गतिकेऽप्यगण्ये । भयप्रपूर्णोऽहमनेककृत्वः, सोढा हहा जन्ममृतीरसत्त्वः ।।४६।। जाज्वल्यमानो भुवि यादृशोऽत्र, प्रोष्णस्ततोऽप्यस्ति स [3]वीतिहोत्रः । यन्नारकेऽनन्तगुणो ह्यसातं, तत्रापि सोढं मयकोष्णजातम् ।।४७।। लोकेऽस्ति यादृग्विधमत्र शीतं, तदस्त्यतोऽनन्तगुणं प्रणीतम् । सापि स्वदुष्कर्मकृतापराधात्सोढा मया नारकशीतबाधा ।।४८।। आक्रन्दकर्तोर्ध्वपदोऽप्यधस्यस्फुरच्छिराः कष्टभरैरमुत्थः । ज्वालाकुलेऽहं ज्वलनेऽस्मि शुक्लः कुम्भीगतोऽनन्तश एव पक्तः ।।४९।।

---

१ नरस्य. २ हे पुत्र. ३ अग्नि.

कदम्बवज्रादिमवालुकानद्यन्तर्गतेऽहं पुलिनेऽविमानः । दग्धोऽग्नितुल्ये महद्वालुकावज्ञाज्वल्यमाने बहुशोऽस्मि तावत्
॥५०॥ सुभीमकुम्भीषु रसन् निशिध्य, प्रोच्चैर्निबध्योपरि वा भुजिष्यः । निर्बन्धिवद् सन् क्रकचाग्रधाराभरैर्विभिन्नो-
ऽहमनन्तवारान् ॥५१॥ तुङ्गेऽतितीक्ष्णाननकण्टकाकुले, यच्छाल्मलिक्षोणिरुहे च्छदाविले । हा पाशबद्धेन मयाऽपकर्षणैः,
 पुनः पुनः खिन्नमतीव कर्षणैः ॥५२॥ अथारसन्निक्षुरिवातिभैरवं, बलेन यन्त्रे महतीव कैरवम् । सीमालमङ्गं विदधत्स-
कार्मुकैर्निष्पीडिताऽहं परमाद्यधार्मिकैः ॥५३॥ स्वरूपवच्छूकररूपवद्भिः, श्यामैस्तथाऽहं शबलै रसद्भिः । आक्रन्दकृद्भूमि-
तले प्रपातापितश्छिन्नोऽथ जीर्णशुकवच्च पातितः ॥५४॥ नव्यातसीपुष्पसमासिजालैर्भल्लैस्तथा पट्टिशचक्रबालैः । दुष्कर्म-
कोटया निरयेऽवतीर्णश्छिन्नो विभिन्नोऽहमथो विदीर्णः ॥५५॥ प्रयोजितो लोहरथे ज्वलत्याधारोज्झितो दुस्त-
रकर्मगत्या । [1]अत्युष्णशम्ये पशुवच्च [2]तोत्रैस्तत्रेरितः पातनतः [3]कुयोत्रैः ॥५६॥ भस्मीकृतः सैरभवच्चितासु, ज्वलद्बृहद्भ्रा-
तुसमाश्रितासु । अहं पुनर्हा विवशो भटित्रीकृतोऽशुभा पापकृतिर्भवित्री ॥५७॥ संदंशतीक्ष्णाननकोटिसङ्घैर्लोहोपमैः-
श्चञ्चुपुटैः पतङ्गैः । ढङ्कैश्च गृध्रैर्विलपन् विलुप्तः, कठोरचौरैः सुधनीव सुप्तः ॥५८॥ इतस्ततो [4]धाविनवान्सधीतिर्यवित्नदीं
वैतरिणीं सभीतिः । अहं गतः पानकृते तदा हतः, क्षुराभतद्वीचिभरैः समाहतः ॥५९॥ उष्णाभितस्त्वसिपत्रनामकं, ॥४४९॥
यदा वनं संगतवान् यथार्थकम् । तदाऽसिपत्रैः प्रबलैः [5]प्रपातुकैश्छिन्नोऽहमंहोवशगोऽङ्गपातकैः ॥६०॥ प्रोतस्त्रिशूलैर्मु-
शलैः कठोरैर्भग्नस्तनौ मुद्गरकैश्च घोरैः । अनन्तशो दुष्करदुःखमृष्टः, सोऽहं गताशो ह्यभवं निकृष्टः ॥६१॥ तीक्ष्णैः

१ शम्या युगकीलकः. २ प्राजनैः. ३ योत्रं "जोतर" इति भाषायाम्. ४ ससिपासः. ५ पापवशग.

क्षुरप्रैः क्षुरिकावलीभिः, [1]शिताग्रधारायुतकल्पनीभिः । अनन्तकृत्वो द्विदलीकृतोऽहं, विखण्डितः [2]क्लृप्तमुखव्यपोहम् ॥६२॥ [3]प्रसारवश्यो हरुवन्निरुद्धः, पाशैश्च कूटैर्हृदयेऽप्यशुद्धः । व्यापादितोऽहं बहुशो निबद्धः, शिरोमणिः पाप्मभृतां प्रसिद्धः ॥६३॥ तत्रस्थदेवैर्मकरानुकारिभिः, प्रपादितो निर्दयचित्तधारिभिः । जालैर्गृहीत्वा रिवव [5]सञ्चचारी, [4]गलैर्गले विद्ध इहार्त्तिधारी ॥६४॥ श्येनैर्गृहीतः खगवच्च जालैर्बद्धश्च लिप्तः पटुलेपजालैः । अनन्तवारान् सकलैश्च मारितः, केनापि कर्माभ्युदयो न वारितः ॥६५॥ यत्तक्षभिर्वृक्ष इवानिवारैश्चूर्णीकृतोऽहं निशितैः कुठारैः । त्वचोऽपहृत्योपरि तक्षितश्च, छिन्नोऽवशः कुट्टिनपाटितश्च ॥६७॥ तैराहतः कुट्टित एव चायस्कारैरहं लोह इव [6]स्तपायः । श्लक्ष्णीकृतः प्राप्य घनाश्चपेटा, मुष्टीश्च पुष्टीकृतदुःखपेटाः ॥६७॥ तप्तानि ताम्राणि पराण्ययांसि, त्रपुण्यथो सीसकदुःपयांसि । प्रपायितः क्वाथमवापितानि, स्वास्येऽपि कुर्वन् कटुकूजितानि ॥६८॥ आसन् पुरा तेऽतिमनोमतानि, शूल्यानि मांसानि विखण्डितानि । कृशानुवर्णानि निजानि पक्त्वा, मांसान्यहं जेमित एवमुक्त्वा ॥६९॥ तवाभवत् पूर्वभवे च [7]कादम्बिनी प्रियोक्त्वेति दधद्विषादम् । प्रपायितोऽहं निरये ज्वलन्तीरसृग्वसाः पूतिरसैर्मिलन्तीः ॥७०॥ त्रस्तश्च भीतः परिकम्पमानाङ्गोपाङ्गयुक्तोऽहमथासमानाम् । निरन्तरं वेदितवान् प्रभूतां, दुर्वेदनां नारकवासभूताम् ॥७१॥ यथाऽतितीव्रा नरकस्य वेदनाः, सुदुःसहा निर्मितगात्रभेदनाः । संश्रूयमाणा अपि भीतिकर्त्र्यः सोढा मनोऽन्तर्गततोपहर्त्र्यः ॥७२॥ यादृश्यहो तात निरीक्ष्यमाणाऽस्ति वेदना [8]लोकगताऽप्रहाणा । साऽऽस्ते ततोऽनन्तगुणाधिकत्वं, समुद्वहन्ती नरकेऽनुस-

१ कल्पकी-कर्त्रिका. २ व्यापोहं-वैपरीत्यं. ३ परितो रोधवश्य. ४ मत्स्यः ५ मत्स्यविशेषः ६ सुतरामपायो नाशो यस्य सः ७ मदिरा ८ अविनाशिनी.

त्वम् ॥७३॥ भवेषु सर्वेषु मम ह्यसाता, श्रिता व्यथा हे पितरत्र जाता। न जातवानस्मि निमेषमात्रं, कदाऽप्यहं
निःसमसातपात्रम् ॥७४॥ ब्रूतस्तदैतत्पितरौ सुतस्त्वं, स्वैरं भव प्रव्रजितः सुत त्वम्। श्रामण्यमार्गे परमस्त्यतुच्छा, सुदु-
ष्करा रोगगणाच्चिकित्सा ॥७५॥ उवाच पुत्रः पितरौ मृगाया, योक्ता स्थितिर्निःप्रतिकर्मतायाः। सा दुष्करा नास्ति वयो-
॥४५१॥ मृगाणां, प्रतिक्रिया काऽस्ति वनेचराणाम् ॥७६॥ एकाक्यरण्येषु यथा कुरङ्गः, सर्वत्र कुर्याद् भ्रमणं सरङ्गः। धर्मं चरि-
ष्यामि तथाऽहमेनं, तपोयमैर्जैनमताम्बुजेनम्[1] ॥७७॥ वने यदैणस्य भवेद्धपुष्यातङ्कस्तदाकेन शरीररक्षा। चिकि-
त्सया भोः क्रियते प्रयस्य, स्थितस्य मूले फलदस्य तस्य ॥७८॥ [2]रात्यौषधं तस्य च कः कृपालुः, पानाशने यच्छति कल्ल-
पालुः। संपद्यते तस्य हि कः सुखस्य, प्रष्टा पुनः स्पष्टमवाङ्मुखस्य ॥७९॥ यदा च स स्यात्सुखितोऽत्र वातप्रमीस्तदा
गच्छति चेतनातः। स्वभुक्तपानादिकृते सरांसि, स्वयं वनान्यप्यथ नीरजांसि ॥८०॥ स्वभक्ष्यमास्वाद्य पयो निपीय, स्वैरं
सरःकक्षभरे निलीय। इतस्ततश्चोत्प्लवनैर्विभाति, स्वीयाश्रयक्षोणितटे प्रयाति ॥८१॥ कुरङ्गवन्निस्तुलसंयमानुष्ठानो मुनि-
र्भूभ्रमणोत्कजानुः। इत्थं चिकित्साभिमुखो न भावी, निर्वाणमाप्नोति च कर्मलावी ॥८२॥ मृगो यथैकोऽपि न नित्य-
वासी, नैकत्रचारी चटिताशनाशी। एवं मुनिर्गोचरणप्रविष्टः, कदन्नहीलाकरणान्न लष्टः ॥८३॥ अहं चरिष्यामि कुर- ॥४५१॥
ङ्गचर्यामिवं बलश्रीयुवराजवर्यात्। श्रुत्वोचतुस्तत्पितरावनुज्ञया, गच्छावयोः पुत्र यथासुखं स्यात् ॥८४॥ ततः स तत्याज
निजोपधिं समं, जगाद चैवं पितरौ गतभ्रमम्। अनुज्ञया वाममुखापहामहं, कुरङ्गचर्यां रचयाम्यथान्वहम् ॥८५॥ एवं

१ ईनः सूर्यः. २ ददाति.

मृगासुः पितरं च मातरं, हर्षादनुज्ञाप्य समस्तमान्तरम् । ममत्वमुन्मूलितवान् सकञ्चुकं, तनोर्महानाग इवाधिकं स्वकम्
॥८६॥ मित्राणि पुत्रानपि पद्मवासां, कलत्रराजीं वदने सहासाम् । निर्धूय [3]बन्धून्निरगान्निकायाद्रजोवदेषोऽपि बहिः
स्वराज्यात् ॥८७॥ समित्युपेतो व्रतपञ्चतय्या, श्रितश्च गुप्तिप्रकटत्रितय्या । सदा शुभध्यानयुगान्तरेण, बाह्येन युक्तस्त
पसोत्तरेण ॥८८॥ अगारवस्त्यक्तसमग्रसङ्गः, श्लथाभिमानोऽत्यममः सुचङ्गः । जीवेषु तुल्यस्त्रकचित्तवृत्तिस्त्रसेषु च
स्थावरकेष्वभित्तिः ॥८९॥ दुःखे सुखे भूरितरापमाने, माने मृतौ जीवितकेऽविगाने । लाभेऽप्यलाभेष्वसमाधिहर्ता,
श्लाघासु निन्दासु च साम्यधर्ता ॥९०॥ महाकषायेष्वथ गारवेषु, दण्डेषु शल्येषु पुनर्भयेषु । शोकेषु हास्येषु दधौ
निवर्तनं, निर्बन्धतः प्राप्य निदानकर्तनम् ॥९१॥ अनिश्रितः साधुतयेह लोके, निरीहताभाक् च परत्र लोके ।
समोऽशने चानशनेऽपि वासीगोशीर्षसङ्गेऽपि समत्वभासी ॥९२॥ द्वाराण्यसौ जन्तुवधादिकानि, स्थितः पिधायाश्र-
वतोऽशुभानि । अर्हन्मतस्थः सुदमः सुयोगश्चिरं शुभध्यानकृताभियोगः ॥९३॥ एवं चरित्रेण च दर्शनेन, ज्ञानेन रङ्ग-
त्तपसा घनेन । सद्भावनाभिः परिभावयित्वा, सम्यक्तयात्मानमघानि हत्वा ॥९४॥ बहूनि वर्षाणि च पालयित्वा, श्राम-
ण्यमागामि निभालयित्वा । मासोपवासानशनं ततान, प्राप्तोऽपवर्गं महिमैधमानः ॥९५॥ एवं प्रकुर्वन्ति विचक्षणा ये,
प्रबोधवन्तः शमिनः स्वकार्ये । निवृत्तिमायान्ति च भोगभुक्तेः, श्रुत्वा मृगापुत्रचरित्रयुक्तेः ॥९६॥ श्रुत्वा मृगापुत्रमुनि-
प्रथस्य, प्रभाविनो भाषितमलथस्य । तपःप्रधानं चरितं च तस्य, गतिप्रधानं त्रिजगच्छ्रुतस्य ॥९७॥ विज्ञाय दुःखो-
दयवर्धनं घनं, भयोपयुक्तं सममत्वबन्धनम् । अनुत्तरा धर्मधुरा दरापहा, धार्याऽत्र धन्यैः शिवकृद्गुणावहा ॥९८॥



॥४५२॥

॥ इति श्रीमृगापुत्रराजर्षिचरित्रम् ॥

अथ श्रीजैनधर्ममूलद्वारभूतश्रीसम्यक्त्वोपरि काव्यमाह–

**तवेण पक्खालियकम्मलेवो, अन्नो जिणिंदाउ न कोइ देवो ।**
**गुरू सुसाहू जिणरायवुत्तं, तत्तं च सम्मत्तमिमं निरुत्तं ॥७१॥**

व्याख्या–तपसा द्वादशविधेन प्रक्षालितः कर्मलेपो येन सः । तथाऽन्यो जिनेन्द्रान्न कश्चिद्देवः । तथा गुरुः सुसाधुरष्टादशसहस्रशीलाङ्गधारकः शान्तदान्तात्मा । तथा श्रीअर्हदुक्तं तत्त्वं । एतत्त्रयं सम्यक्त्वमुक्तं सम्यक्तत्त्वं सम्यक्त्वं । एतल्लाभेन जीवस्य नारकतिर्यग्गतयः पिहितद्वाराः संजायन्ते, दिव्यमानुषसिद्धिसुखानि स्वाधीनानि संपनीपद्यन्ते । सर्वलाभेष्वयमेव महान् लाभः । यतः–"**सम्मत्तम्मि उ लद्धे विमाणवज्जं न बंधए आउं । जइ वि न सम्मत्तजढो अहव निबद्धाउओ पुव्वि** ॥१॥" इति काव्यार्थः ॥

एतदुपरि **श्रीमृगध्वजस्**वरूपमुच्यते, तेन पूर्वमुपशमो नानीतः, पश्चान्मन्त्रिगिरा सर्वविरतिरादृतेति, एतद्विशेषं पुनर्मृगध्वजसम्बन्धप्रान्ते दर्शयिष्याम इति ।

**श्रीवीरतीर्थपं** नत्वा तत्त्वार्थख्यापनोद्यतम् । **मृगध्वजमुनेर्वृत्तं** वित्तं वक्ष्ये जगत्त्रये ॥१॥ आस्तेऽमरावतीतुल्या कुल्याकासारभूषिता । **श्रावस्ती** नगरी श्रेष्ठा ज्येष्ठाचारनरैः श्रिता ॥२॥ **जितशत्रुनृपः** प्राज्यं राज्यं तत्र प्रतापवान् । प्रपालयति विस्फूर्जद्दूर्जतजितवासवः ॥३॥ तस्य **कीर्तिमती** कान्ता शान्ताकारा शशाङ्कवत् । सीतेव विलसल्लीलाशो-

॥४५३॥

लालङ्कारधारिणी ॥४॥ लावण्यागण्यसौभाग्यभाग्यशोभाविभूषितः । तत्पुत्रस्तरणिर्धाम्ना नाम्नाऽजनि मृगध्वजः ॥५॥
धनेन धनदप्रायः प्रायः श्रेष्ठिशिरोमणिः । **कामदेवः** सदा राज्ञो मान्यो वसति तत्र च ॥६॥ स स्वकं गोकुलं द्रष्टुं स्रष्टुं
सारां बहिर्ययौ । **दण्डकाख्यः** कृपारोपी गोपोऽथ मिलितस्तदा ॥७॥ आचख्यौ गोपतिः स्वामिन् कामितार्थमहत्तरो ।
गोकुलं महिषीवृन्दं मन्दं मन्दं विलोकय ॥८॥ अथ गोकुलसंस्पर्शदर्शनोत्सुकचेतसा । श्रेष्ठिनैकस्तदा दृष्टः स्पृष्टः कंपेन
सैरभः ॥९॥ दृशोरश्रूणि वर्षन्तं सतं स्वमहिषं तदा । मा भैषीर्दण्डकः प्राह व्याहारन् कोमलां गिरम् ॥१०॥ अस्माकं
श्रेष्ठ्यसौ स्वामी ग्रामीणानां यथा नृपः । आगच्छास्य पुरः कामं नामं स्वशिरसा कुरु ॥११॥ निष्कास्य रसनामेष
द्वेषमुक्तस्तदाऽकरोत् । भयार्तोऽग्रे समागत्य सत्यारूपां नमस्क्रियाम् ॥१२ । श्रेष्ठिनोक्तमसौ तिर्यङ्निर्यज्जिह्वः सभीः कथम् ।
एवमुक्तेऽवदद्गोपः कोपनिर्मुक्तमानसः ॥१३॥ आकर्णय त्वमायुष्मन् युष्मद्दृष्टो बिभेत्यसौ । सप्तकृत्वोऽशुभापत्त्या हत्याऽस्य
विहिता मया ॥१४॥ ज्ञानिनो वचसा ज्ञात्वा ध्यात्वा हिंसां च दुःखदाम् । दत्तमस्मै मया दानं सानन्दमभयाह्वयम्
॥१५॥ श्रेष्ठ्यपि प्राप वैराग्यं भाग्यं गुरुतरं वहन् । तद्वचःश्रवणाद्धिसां खिसामिव हृदि स्मरन् ॥१६॥ ये चान्धाः
कुष्ठिनः काणाः प्राणघातस्य तत्फलम् । नरकादिगतिभ्रान्तिः क्लान्तिर्जीववधाद्भवेत् ॥१७॥ अतः परं करिष्ये नो तेनोग्रं
वधमप्यहम् । ध्यात्वेति महिषस्यापि प्रापितं श्रेष्ठिनाऽभयम् ॥१८॥ त्वज्जन्म जीवितं साधु साधुषु त्वं शिरोमणिः ।
प्रमाणं त्वत्कुलं जातिः सातिरेका शुभोदयैः ॥१९॥ एवं कृते दयाटोपे गोपेन श्रेष्ठ्ययं स्तुतः । क्षीरखण्डैः समानीय
स्वीयगेहे च भोजितः ॥२०॥ भुक्त्वा श्रेष्ठी गृहे याति ख्यातिमान् यावदात्मनः । लग्नो विद्धोर्यथा खेटः केटकेऽस्य

महस्तदा ॥२१॥ वालितोऽपि धनैर्गोपैः सोऽपैनःप्रदुर्मतिः । बलति स्म कथञ्चिन्नो भिन्नोऽपि लकुटैः स्फुटैः ॥२२॥
श्रेष्ठिनोक्तं समायातु मातुः पार्श्वेऽङ्गभूरिव । चिन्तामस्य करिष्येऽहं गेहं प्राप्तस्य मामकम् ॥२३॥ इत्युक्त्वा स्वगृहं नीतः
क्रीतः कर्मकरो यथा । महिषोऽन्नादिभिर्दानैः पानैः संपोषितोऽधुना ॥२४॥ अन्येद्युः सपरीवारः कारणाच्च कुतोऽप्यसौ ।
।४५५।। श्रेष्ठ्यगाद्भूपतेः सद्म पश्चाद्गमिलनोद्यतः ॥२५॥ महिषोऽप्यभवत्सार्थे पार्थे यद्वत्पराक्रमः । स्थातुं शक्नोति नैकाकी नाकीश
इव भूतटे ॥२६॥ राजद्वारे गतो यावत्तावद्दारक्षको नरः । अग्रे दत्ते न तं गन्तुं रन्तुं पुत्रं यथा पिता ॥२७॥ काम-
देवस्तदोदारद्वारपालाद्विमोच्य तम् । महिषं भूधनोपान्ते कान्ते गत्वाऽकरोन्नतिम् ॥२८॥ महिषोऽथ नृपं नत्वा सत्त्वा-
तुरमना भिया । निष्कास्य रसनां राजद्राजपर्षदि तस्थिवान् ॥२९॥ निरीक्ष्येदृशमाश्चर्यं वर्यं पप्रच्छ भूपतिः । श्रेष्ठिनं
सोऽप्यथाभाणीत्त्राणीकृतसुधर्मधीः ॥३०॥ राजन् जीवदयाधर्मः शर्मदो जन्तुसंततेः । येषां यागे वधाशंसा संसारे पर्य-
टन्ति ते ॥३१॥ महिषस्यास्य दुष्कर्मकर्मठस्य निशम्यताम् । विपाकः कर्मणां नेतश्चेतसश्चित्रदायकः ॥३२॥ महिषः
सभयश्चैष एष मद्गोकुलेऽभवत् । मरणाद्विग्रहेऽतीव क्लीबत्वं विदधन्निजे ॥३३॥ जातिस्मरणयोगेनानेनादर्शि पुरातनः । ॥४५५॥
आत्मीयको भवो यस्मात्तस्माद्रोदिति खिद्यते ॥३४॥ वेत्त्यस्य कोऽपि नो मर्म धर्ममूर्त्तिरथान्यदा । ज्ञानी कोऽप्यागत-
स्तत्र क्षत्रवैश्यादिबोधकृत् ॥३५॥ सोऽवग्गोपं प्रति प्रेयः श्रेयस्कारी मुनीश्वरः । महिषोऽयं तमस्तमः सप्तवारं हत-
स्त्वया ॥३६॥ एकस्या जठरे जन्म सन्महिष्याः समाश्रितः । ततोऽयं कम्पते दर्शं दर्शं तावकं दर्शनम् ॥३७॥ सर्वेषां
प्राणिनामिष्टं मिष्टं क्षीरमिवानिशम् । जीवितव्यमिति श्रुत्वा नुत्वा गोपो मुनीश्वरम् ॥३८॥ चक्रे हिंसापरित्यागं रागं

धर्मेऽदधत्तराम् । अन्यदा गोकुलेऽहं स हंसवन्मानसे गतः ॥३९॥ माहिषं वृत्तमाकर्ण्य वर्ण्यमेतच्च दण्डकात् । हननं
सर्वजन्तूनां दूनानामहमत्यजम् ॥४०॥ त्वत्पर्षद्यभिरामायामायासीदेष मत्समम् । याचतेऽद्याभयं देव केवलं युष्मद-
न्तिकात् ॥४१॥ अग्रस्थायी निराधारः पारवश्येन पीडितः । साम्प्रतं चास्त्यसौ दीनो मीनो यादृग्जलोज्झितः ॥४२॥
ईदृङ्महिषमालोक्य शोच्ययं ध्यातवान्नृपः । कोऽपि नास्त्युपकारी वा जीवानां भ्रमतां भवे ॥४३॥ न कश्चिद्वेत्ति चाध-
मैकर्मणां विषमोदयम् । जीवा नरकतिर्यक्षु न क्षुब्धा भ्रमणादमी ॥४४॥ जीवयोनिषु चाम्लानाज्ञानास्ते संचरन्ति ही ।
विवेकं दधते नैव दैवदत्तविडम्बनाः ॥४५॥ निगोदेषु परिभ्रान्ताः श्रान्ता नैव कथञ्चन । प्राप्ता भूरिपरिस्वेदच्छेदभेद-
कदर्थनम् ॥४६॥ कुर्वन्ति नटवल्लास्यं दास्यं दासा इवानिशम् । भजन्ते बहुरूपाणि पाणिपादाक्षिचेष्टनैः ॥४७॥ लभन्ते
सुखदुःखानि खानिकल्पेऽहसां भवे । जीवा इति विमृश्यान्तः शान्तवृत्तिर्नृपोऽभवत् ॥४८॥ ददौ जनेषु चादेशं देश-
मध्येऽस्य कोऽपि यः । महिषस्य वधं कर्ता हर्ता तच्छिरसोऽस्म्यहम् ॥४९॥ चतुष्पथे चतुर्दिक्षु भिक्षुवन्महिषस्ततः ।
सर्वत्र भ्रमति स्मायं सायं प्रातर्दिवा निशि ॥५०॥ भुङ्क्ते पिबति च स्वैरं स्वैरं शेते च तिष्ठति । क्रीडनं कुरुते स्वैरं
स्वैरमायाति याति च ॥५१॥ परिभ्रम्यैकदोद्याने मानेन परिपूरितः । कुमारो बलवत्कोटीकोटीराभो मृगध्वजः ॥५२॥
प्रतोल्यग्रे समायातः पातकोपरि बद्धधीः । दृष्टो स पतितस्तस्य पश्यतोहरवत्पशुः ॥५३॥ तद्दर्शनसमुद्भूतनूतनक्रोध-
सङ्क्रमः । दधावे खड्गमादाय न्यायमुक्तः स राजसूः ॥५४॥ भटैर्नत्वा पदावुक्तं भुक्तं स्यान्मृत्यवे विषम् । नृपाज्ञालोपनं
कोपान्नोपादेयं कुमार भोः ॥५५॥ जीवहिंसाऽत्र च प्रेत्य भेत्स्यसञ्चय सुखोदयम् । अश्रुत्वेति शुभालापं पापं धृत्वा



॥४५६॥

नृपाङ्गजः ॥५६॥ चिच्छेद माहिषं पादं भादं प्राप्तस्तदाऽसिना । प्रहारपीडयाऽऽक्रान्तः शान्ततां महिषो दधौ ॥५७॥
दध्यौ च जीव एकाकी व्याकीर्णः सन् कुकर्मभिः । शुभाशुभफलं भोक्ता मोक्ता कोऽप्यस्य नापरः ॥५८॥ शनैः शनैः
पदत्रय्या शय्यावत्प्रस्खलँश्चरन् । गृह्णन् सर्वत्र विश्रामं क्षामं कर्म स्वमाचरन् ॥४९॥ निर्नाथ आगतः स्तम्भे दम्भेन
॥४५७॥ रहितो निजे । क्रोधं पूर्वभवस्मृत्या कृत्याकृत्यविदाप नो ॥६०॥ स्मरन् स्वकर्मणो दोषं तोषं चित्ते व्यधत्त सः । दध्रे
शुभपरीणामं स्वामन्तर्हीनतां स्मरन् ॥६१॥ राजाऽश्रौषीदथान्यायं प्रायं कौमारमुत्कटम् । पौरलोकात्ततो रुष्टो दुष्टो
मूर्तकृतान्तवत् ॥६२॥ शूलिकारोपणादेशः क्लेशदायी महीभुजा । दत्तस्तदाऽस्य पुत्रस्य नष्टदाक्षिण्यबुद्धिना ॥६३॥
अथात्मीयकराम्भोजयोजनं कीर्तिमत्यसौ । भालस्थले समाधाय नायकाय व्यजिज्ञपत् ॥६४॥ क्षम्यतामपराधोऽयं
तोयं नोष्णं गृहं दहेत् । नापवर्वं मारयत्यात्रं ताम्रं चार्यै न रूप्यगम् ॥५५॥ अविमृश्य कृतं कार्यं नार्यं वपुषि शल्य-
कृत् । पश्चाद्दत्ते मनःपीडां क्रीडां सुष्टामिवाहिला ॥६६॥ राज्ञीवचस्तिरस्कृत्य भृत्यवृन्दमिवालसम् । पौरानवगणय्याथो
पाथोजालीमिव द्विपः ॥६७॥ हृदयं कठिनीकृत्य मृत्यर्थं नृपतिः सुतम् । बहिर्निष्कासयामास रासभारोपणेन तम्
॥६८॥ करवीरकृतोत्ताला मालाऽस्यारोपिता गले । उच्छ्रितः कृतहूद्दाहः काहलीध्वनिरुल्वणः ॥६९॥ आनीतो वध्य- ॥४५७॥
भूभागे यागे पशुरिवाबलः । कुमारः सर्वगोपालबालप्रत्यक्षमक्षमः ॥७०॥ न तस्य कोऽप्यभूत्त्राता वाताहततरोरिव ।
मन्त्रिणा छलभेदेन केनचित्सोऽथ रक्षितः ॥७१॥ स्थापितः कोष्टकस्यान्तर्ध्वान्तव्याप्तमहीतटे । प्रबोधं च ददौ मन्त्री
स्वतन्त्रीकृतमानसः ॥७२॥ अन्तः शमरसं धेहि देहि जैनमते मतिम् । विरोधं त्यज भो दूरे क्रूरे पाप्मनि मा चर

॥७३॥ बन्धूनां पितृमातॄणां नृणां प्रेमास्ति कृत्रिमम् । पतङ्गरङ्गवद्याति स्फातिमत्यातपे रवेः ॥७४॥ सस्नेहा येऽत्र
राजन्ति सन्ति ते स्वार्थतत्पराः । मैत्री धर्मस्य या सत्या मत्याधार कुमार सा ॥७५॥ इन्द्रजालोपमं पश्य त्रस्यत्संसार-
सङ्गमम् । रमन्तेऽमेधसस्तत्र सभ्रमध्ये कुरङ्गवत् ॥७६॥ अस्मिन् भवे फलं दृष्टं स्पष्टं हिंसाकृतं त्वया । परत्र यत्पुन-
 र्भावि सा विज्ञैर्विक्रियोच्यते ॥७७॥ हिंसा दुःखलतेः खानिः सा नित्यं दुर्गतिप्रदा । हिंसातो जन्तुराप्नोति ज्योतिर्गण
इव भ्रमम् ॥७८॥ नमिनाथान्मयाऽश्रावि भाविनारकदुःखदम् । हिंसाफलमुरुत्साहः प्राह मन्त्रीति तं प्रति ॥७९॥
श्रुतं मृगध्वजेनैतद्कुलमायोज्य हस्तयोः । चतुर्गत्यसुखव्रातो ज्ञातोऽनेन महात्मना ॥८०॥ तदाऽस्य हृत्स्थिरीकारात्सारा-
लेश्याविशेषतः । जातिस्मृतिः समुत्पेदे खेदेन रहितस्य वै ॥८१॥ परिजह्रे रुषा रागः प्रागपि प्राप्तशान्तिना । तदाऽने-
नाप्रमत्तेन ज्ञेन सोपशमेन च ॥८२॥ सुकुमारं कुमारं तमन्तकारकमंहसाम् । मन्त्री गृहे निनायाथ माथकारं कुकर्म-
णाम् ॥८३॥ वेपथमर्पयामास व्यासवत्तत्र साधुजम् । दधार हृदये हर्षं वर्षणेनेव कर्षकः ॥८४॥ महिषं वेदनाश्लिष्टं
विलष्टं ज्ञात्वाऽथ मन्त्रिराट् । दशधा श्रावयामास व्यासमाराधनाविधेः ॥८५॥ महिषोऽपि मनःशुद्ध्या सुध्यानोऽनशनं
ललौ । अष्टादशदिनीं यावद्भावतोऽपालयत्ततः ॥८६॥ लोहिताक्षाह्वयः ख्यातो जातोऽयमसुरो बली । स्फुर्जत्पुण्यप्र-
भावेण तेन पातालमध्यतः ॥८७॥ मृगध्वजमुनीन्द्रोऽपि गोपिताङ्गो विचारणाम् । चक्रे चेन्मिलति च्छेक एकवारं नृपो 
मम ॥८८॥ तदोपशान्तिमायाति स्वातिशायी रुषोदयः । लालगीति न मे दोषः प्लोषदज्ञलमध्यतः ॥८९॥ मध्ये
स्थिताः किलावन्या धन्यास्ते साधवः सदा । ये वहन्ति शुभाचारं भारं संयमसंभवम् ॥९०॥ विमृश्येति मनोवीर्या-

 ॥४५९॥

ईर्यासमितिमान् मुनिः । चचाल मन्त्रियुक् प्राज्ञो राज्ञो मिलनहेतवे ॥९१॥ नृपस्याग्रे क्रमेणागाद्रागापगमसुन्दरः । मुनिं वीक्ष्य नृपश्चारु दारुसिंहासनं ददौ ॥९२॥ वेषयोगेन सन्मानदानतः पूजितो मुनिः । उपाविशत् पुनस्तत्र स दयेषु दयापरः ॥९३॥ पाणिभ्यां नृपतिः पादावादाय स्थितवान्मुनेः । भक्तो विलोकयत्यास्यं लास्यं कौतुकवानिव ॥९४॥ यावत् पुत्रं न वेत्त्येष लेखनिर्मितरूपवत् । तदोक्तं मन्त्रिणा नेतः श्वेतवासास्त्वदङ्गजः ॥९५॥ स्वकुलं निर्मलं सृष्टं कृष्टं जन्मतरोः फलम् । अनेनेति निशम्याङ्गजागरूको नृपोऽभवत् ॥९६॥ पश्चात्तापान्महोभर्त्रा स्मर्त्रा दुश्चरितं निजम् । क्षामितः साधुरानत्वानत्वा पादौ पुनः पुनः ॥९७॥ यन्मयाऽत्रापराद्धं तत्क्षन्तव्यमखिलं मुने । युष्मादृशाः क्षमावन्तः सन्तः स्युरुपकारिणः ॥९८॥ इदं राज्यमिदं पद्मासद्माद्याङ्गीकुरु त्वकम् । एवमुक्ते नृपेणेह नेहते निर्ममो मुनिः ॥९९॥ संसारभ्रमणोद्विग्नः संविग्नः साधुसत्तमः । नृपानुमतिमादाय ध्यायन् ध्यानं शुभं हृदि ॥१००॥ जगाम बहिरुद्याने म्लाने कर्मोदये सति । स्वीचक्रे चरणं पार्श्वे सीमन्धरगुरोरसौ ॥१०१॥ गृह्णाति स्मोज्झिताहारं सारं षष्ठतपः सृजन् । द्वाविंशतिदिनीं व्यापमाप छाद्मस्थ्यसङ्गतेः ॥१०२॥ आरूढः क्षपकश्रेणीमेणीसुत इव स्थलीम् । सर्वकर्मक्षयादेव केवलज्ञानमाप्तवान् ॥१०३॥ सुरैर्व्यधायि सद्वर्णस्वर्णपङ्केरुहं तदा । तस्योपरि स्थितो ज्ञानी ग्लानीकृतरवी रुचा ॥१०४॥ भूपोऽप्यागत्य निःशोकैर्लोकैः सार्धं प्रमोदवान् । चरणाम्भोजमानम्य कम्पकान्तिः पुरः स्थितः ॥१०५॥ ज्ञानिना देशनाऽऽरब्धा लब्धानन्तगुणश्रिया । देशनामृतसंतुष्टः पुष्टः पप्रच्छ भूपतिः ॥१०६॥ भगवन्नेष वृत्तान्तः शान्तवृत्ते निगद्यताम् । वैरं किमत्र युष्माकं साकमेतेन शृङ्गिणा ॥१०७॥ आचख्यौ केवली प्राच्यं वाच्यं निजभवं ततः । प्राग्भवेऽहं

जडः शश्वदश्वग्रीवनृपोऽभवम् ॥१०८॥ असौ मन्त्री कुकर्मा मे ग्रामे नास्तिकधर्मवान् । द्वावावां कुमते ख्यातौ यातौ सप्तमनारकम् ॥१०९॥ तत्रावाभ्यां कृतं ऊर्द्धं युद्धं कृत्वाऽऽयुरात्मनः । सागराणि त्रयस्त्रिंशद्विसकाभ्यां प्रपूरितम् ॥११०॥ कर्मातिद्वेषसम्बद्धं बद्धं तत्रामुनाऽधिकम् । भ्रान्तोऽहमथ संसारं स्फारं पुण्योदयोज्झितः ॥१११॥ न केनापि कृता सारा कारास्यस्येव तत्र मे । बहुकर्मेश्वर्यं कृत्वा मृत्वाऽहं त्वत्सुतोऽभवम् ॥११२॥ माहिषं शृणु सम्बन्धं बन्धनालिवधादिकम् । भ्रान्तोऽसौ बहुलं कालं बालं वक्तुं सुधीरपि ॥११३॥ सप्तापि निरयाः स्पृष्टा दृष्टा तिर्यक्षु वेदना । चतुर्गत्यन्तरे भ्रान्तं श्रान्तं नानेन कुत्रचित् ॥११४॥ महिष्या अथ जीर्णाया आयासीदुदरेऽप्ययम् । तत्र दुःखद्विषच्छन्नः सप्तकृत्वोऽलभन्मृतिम् ॥११५॥ मिलितोऽयं भवे मेऽत्र नेत्ररोषान्मयार्दितः । अथ प्राप्तो भवस्यान्तः शान्तवृत्तिजुषा मया ॥११६॥ महिषोऽप्यसुरः सोऽभून्नो भूयो दुःखमाप्स्यति । ऋद्धिं प्राप्तः क्रमान्मुक्तो युक्तो भाव्येष सिद्धिगः ॥११७॥ एतत्पूर्वभवोद्भूतनूतनं वृत्तमावयोः । विज्ञाय विबुधैः क्रोधरोधः कार्यो विशेषतः ॥११८॥ प्रबुद्धा बहवो भव्याः श्रव्यादस्मादुदन्ततः । राजा प्राप्तो निजावासं वासं संसारतो दधत् ॥११९॥ मृगध्वजमुनेर्ज्ञानस्थानके कृतवानसौ । प्रासादमसुरश्चक्रे रङ्गन्मण्डपमण्डितम् ॥१२०॥ मृगध्वजमुनेर्मूर्तिः स्फूर्तिमत्यन्तरे कृता । पादेन महिषः खङ्गः खङ्गनाभः कृतोऽपि सः ॥१२१॥ वितीर्योऽरघनं नाम कामदेवस्य दत्तवान् । भलापनां स्वचैत्यस्य तस्य सोऽयमथासुरः ॥१२२॥ विहारं केवली मह्यां सह्यावन्यामिव द्विपः । चकार विकसद्वैरकैरवश्रीदवानलः ॥१२३॥ श्रूयमाणयशस्तूर्यः सूर्यवज्ज्ञानरश्मियुक् । निघ्नन्नज्ञानभृच्छायं स्मायं भाति प्रबोधकृत् ॥१२४॥ हताष्टकर्मगोमायुः स्वायुः पूर्णं प्रपाल्य च । ज्ञानी

॥४६१

मोक्षे ययौ प्रान्ते कान्तेऽनन्तसुखात्मके ॥१२५॥ एवं **श्रीनमिनायकस्य** विलसत्तीर्थे सुलब्धोदयः, संजात स **मृगध्वजो** मुनिवरः प्राप्तप्रभावं च यः। ये चैतस्य चरित्रमत्र सुभगं शृण्वन्ति वृण्वन्ति ते, श्रेयःश्रीललनां घनां विदधते हृद्युन्नतिं सन्मतेः ॥१२६॥ ॥ इति **श्रीमृगध्वजचरित्रं** कृतं **श्रीक्षेमराजोपाध्यायैः** ॥

तत्प्रागुक्तं सम्यक्त्वं यथा जन्तोः स्यात्स प्रकारः सप्रपञ्चः प्रोच्यते—इह गम्भीरापारसंसारसागरमध्यवर्ती जन्तुः सकलदुःखापादपबीजभूतमिथ्यात्वप्रत्ययमनन्तान् पुद्गलपरावर्ताननन्तदुःखलक्षणाननुभूय कथमपि तथाभव्यत्वपरिपाकवशा-द्गिरिसरिदुपलघोलनाध्यवसायरूपेणानाभोगनिर्वर्तितयथाप्रवृत्तिकरणेनायुर्वर्जानि ज्ञानावरणादीनि कर्माण्यन्तःसागरोपम-कोटाकोटीस्थितिकानि करोति। अत्र चान्तरे कर्ममलपटलतिरस्कृतवीर्यविशेषाणामसुमतां दुर्भेद्यः कर्कशनिबिडचिर-प्ररूढगुपिलवक्रग्रन्थिवत्कर्मपरिणामजनितो निबिडरागद्वेषपरिणामरूपोऽभिन्नपूर्वो ग्रन्थिः स्यात्। तदुक्तं—"**गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठि व्व। जीवस्स कम्मजणिओ घणरागद्दोसपरिणामो** ॥१॥" इमं च ग्रन्थिं यावदभव्या अपि यथाप्रवृत्तिकरणेन कर्म क्षपयित्वाऽनन्तशः समागच्छन्त्येव। एतदनन्तरं पुनः कश्चिदेव महात्मा समासन्नपरमनिर्वृतिसुख-समुल्लसितप्रचुरदुर्निवारवीर्यप्रसरो निशितकुठारधारयेव परमविशुद्ध्या यथोक्तस्वरूपग्रन्थिभेदं विधाय मिथ्यात्वमोहनी-यकर्मस्थितेरन्तर्मुहूर्त्तमुदयक्षणादुपर्यतिक्रम्यापूर्वकरणानिवृत्तकरणलक्षणविशुद्धिजनितसामर्थ्योऽन्तर्मुहूर्त्तकालप्रमाणतत्प्रदेशवे-द्यदलिकाभावरूपमन्तरकरणं करोति। अत्र च यथाप्रवृत्त्यपूर्वानिवृत्तिकरणानामयं क्रमो वेदितव्यो यथा—"**जा गंठी ता पढमं गंठिं समइच्छओ हवइ बीयं। अनियट्टीकरणं पुण सम्मत्तपुरक्खडे जीवे** ॥१॥" "गंठिं समइच्छउ त्ति" ग्रन्थि

समतिक्रामतो भिन्दानस्येत्यर्थः । "सम्मत्तपुरक्खडे त्ति" सम्यक्त्वं पुरस्कृतं येन स तथा तस्मिन्नासन्नसम्यक्त्व एव जीवेऽनिवृत्तिकरणं भवतीत्यर्थः । शेषं सुगमं । एतस्मिंश्चान्तरकरणे कृते तस्य मिथ्यात्वमोहनीयस्य कर्मणः स्थितिद्वयं भवति अन्तरकरणादधस्तनी प्रथमस्थितिरन्तर्मुहूर्त्तमात्रा तस्मादेवोपरितनी शेषा द्वितीयस्थितिरिति । स्थापना चेयं=। तत्र प्रथमस्थितौ मिथ्यात्वदलिकवेदनादसौ मिथ्यादृष्टिरेव, अन्तर्मुहूर्त्तेन तस्यामपगतायामन्तरकरणप्रथमसमय एवौपशमिकं सम्यक्त्वमाप्नोति, मिथ्यात्वदलिकवेदनाभावात् । यथा हि वनदवानलः पूर्वदग्धेन्धनं वनमूषरं वा देशमवाप्य विध्यायति तथा मिथ्यात्ववेदनाग्निरन्तरकरणमवाप्य विध्यायति । तस्यां चान्तर्मौहूर्त्तिक्यामुपशान्ताद्धायां परमनिधिलाभकल्पायां जघन्येन समयशेषायामुत्कृष्टतः षडावलिकाशेषायां कस्यचिन्महाविभीषिकोत्थानकल्पोऽनन्तानुबन्ध्युदयो भवति । तदुदये चासौ सासादनसम्यग्दृष्टिगुणस्थाने वर्त्तते । उपशमश्रेणिप्रतिपतितो वा कश्चित्सासादनत्वं यातीति तदुत्तरकालं चावश्यं मिथ्यात्वोदयादसौ मिथ्यादृष्टिर्भवतीत्यलं विस्तरेणेति ॥

अथ सम्यक्त्वप्राप्तौ सत्यां यदुत्तरोत्तरं फलं स्यात्तत् प्ररूप्यते—

पसत्थलेसं पकरंति चित्तं, जे सत्तखित्तेसु ववंति वित्तं ।
छिंदंति निम्मोहमणा ममत्तं, कुणंति ते जम्ममिमं पवित्तं ॥७२॥

**व्याख्या**—ये ज्ञाततत्त्वाः सत्त्वा अप्रशस्तलेश्यापरिहारेण स्वकीयं चित्तं प्रशस्तलेश्यं प्रकुर्वन्ति । तथा ये सप्तसु क्षेत्रेषु वपन्ति न्यायोपार्जितं वित्तं । क्षेत्राणि चैतानि समये प्रोक्तानि **श्रीभक्तप्रकीर्णकग्रन्थे**—"अह हुज्ज देस-

विरओ सम्मत्तरओ रओ य जिणवयणे। तस्स य अणुव्वयाइं आरोविज्जंति सुद्धाइं ॥१॥ अनियाणोदारमणो हरिसवसविसट्टकंटयकरालो। पूएइ गुरुं संघं साहम्मियमाइभत्तीए ॥२॥ नियदव्वमउव्वजिणिंदभवणजिणबिंबवरपइट्ठासु। वियरइ पसत्थपुत्थयसुतित्थतित्थयरपूयासु ॥३॥" इतिवचनाज्जिनभवनबिम्बपुस्तकचतुर्विधसङ्घरूपेषु सप्तसु क्षेत्रेषु धनं व्ययीकुर्वन्ति। तदनु दीक्षावसरे निर्मोहमनसः सन्तः ममतां छिन्दन्ति मूलान्निकृन्तन्ति। ते सर्वसंसारनिःसङ्गाः कुर्वन्ति जन्मैतत् नृजन्मलक्षणं पवित्रं शुचितरमिति काव्यार्थः॥ ॥४६३॥

अथैतदुपदेशसप्ततिकापर्यन्तकाव्ये पठनफलमाह–

पढिउं एयं उवएससत्तरिं, मुणंति चित्ते परमत्थवित्थरं।
तरित्तु ते दुक्खभरं सुदुत्तरं, खेमेण पावंति सुहं अणुत्तरं ॥७३॥

**व्याख्या**–पठित्वा सूत्रत एतां **उपदेशसप्ततिकां** मुणंति अवबुध्यन्ति चित्ते चेतसि परमार्थो मोक्षस्तस्य विस्तरः साधनोपायः तं। सूत्रस्य केवले पठने न काचिदर्थसिद्धिर्जन्तोर्यावता परमार्थं तत्त्वार्थं नावगच्छति तत उक्तं मुणंतीति। ततस्तत्त्वाधिगमफलमाह–"तरित्तु" तीर्त्वा ते प्राणिनो दुःखभरं जन्मजरामरणशोकरोगरूपं सुतरामाधिक्येन दुस्तरं क्षेमेण कुशलेन प्राप्नुवन्ति सुखं सिद्धिपुरन्ध्रीप्राप्तिलक्षणं अनुत्तरं सर्वोत्कृष्टमिति लेशतोऽक्षरत्रयेण नामसंसूचकं काव्यमिदं। ॥४६३॥
मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणीति हेतोः क्षेमेणेत्युक्तम्॥

## ॥ इति श्रीउपदेशसप्ततिकावृत्तिः ॥

# ॥ अथ प्रशस्तिः ॥

श्रीखरतरगणनाथाः श्रीमज्जिनकुशलसूरयोऽभूवन् । यन्नामस्मरणादपि भवन्ति कुशलानि कुशलानाम् ॥१॥ तच्छिष्यविजयतिलकः पाठकमुख्यो बभूव दक्षात्मा । विद्या यद्वदनाम्बुजमभिलीना सरसि हंसीव ॥२॥ तद्विनेयो विनीतात्मा जज्ञे श्रीविनयप्रभः । स्वर्णरेखेव यद्रेखा दक्षौघनिकषोपले ॥३॥ तच्छिष्यः श्रीक्षेमकीर्तिः प्रसिद्धः, साधुर्जज्ञे वाचनाचार्यवर्यः । मिथ्यात्वोग्रध्वान्तपूरो निरस्तः, स्थाने स्थाने यस्य वाग्दीपिकाल्या ॥४॥ कारितं येन शिष्याणां शतमेकं दशोत्तरम् । तद्वभूवातिवैदुष्यभूषितं वाक्पतिर्यथा ॥५॥ जीरापल्लीपार्श्वोपासनतो यस्य सातिशयताऽऽसीत् । आचारे च विचारे विधौ विहारे विनेयजने ॥६॥ येन स्वपर्यन्तमवेत्य मासादर्वाक्प्रपन्नानशनेन यातम् । श्रीसिद्धशैलप्रणतिं विधातुं, तत्रैव तत्पादयुगं नमामि ॥७॥ तच्छिष्यः क्षेमहंसाख्यः सुगुरुः प्रबभौ भुवि । येन हंसायितं कामं शुद्धपक्षद्वयी श्रिया ॥८॥ श्रीवाचनाचार्यशिरस्सु मुख्या क्षेमध्वजाख्यास्तु तदीयशिष्याः । यैर्भूरिदेशेषु कृतो विहारः, सर्वत्र लब्धः स्वयशःप्रचारः ॥९॥ तच्छिष्याः प्रविभान्ति शान्तिसहिताः सौभाग्यभाग्याश्रिताः, सद्विद्याभ्युदयाधरीकृतसुराचार्याः क्षितौ विश्रुताः । कीर्तिस्फूर्तिमधिष्ठिता मुनिवराः श्रीक्षेमराजाह्वयाः, पुण्योत्सत्यतिशायिपाठकशिरोरत्नोपमानोदयाः ॥१०॥ स्वकृतोपदेशसप्ततिकाख्यसूत्रस्य निर्मिता टीका । तैरेवैषा वर्षे मुनिवेदशरेन्दुभिः (१५४७) प्रमिते ॥११॥ विबुधजनवाच्यमाना नानाविधसूत्रयुक्तिललिताङ्गी । चिरकालमियं जीयादमेयधिषणोदयविधात्री ॥१२॥ हिसारकोट्टवास्तव्यः श्रीमालोत्तमवंशजः । पट्टपर्पटगोत्रीयः श्रीमान् दोदाह्वयोऽभवत् ॥१३॥ स श्राद्धगुणरत्नानां रोहणो द्रोहणो हृदि । कृता तस्याग्रहेणैषा नव्या सप्ततिका मुदा ॥१४॥

॥ इति प्रशस्तिः ॥